कृष्णदास संस्कृत सीरीज २२०

कोष 263

सुरकान्तसंकलितः

ज्योतिर्विज्ञानशब्दकोषः

लेखन एवं सम्पादन

डॉ. सुरकान्त झा

ज्यौतिषशास्त्राचार्य

चौखम्बा कृष्णदास अकादमी, वाराणसी

R.

कृष्णदास संस्कृत सीरीज
२२०

***

सुरकान्तसंकलित:

ज्योतिर्विज्ञानशब्दकोषः

लेखन एवं सम्पादन

डॉ० सुरकान्त झा

ज्यौतिषशास्त्राचार्य
शिक्षाशास्त्री
चक्रवर्ती (Ph. D.)

चौखम्बा कृष्णदास अकादमी, वाराणसी

प्रकाशक : चौखम्बा कृष्णदास अकादमी, वाराणसी
मुद्रक : चौखम्बा प्रेस, वाराणसी
संस्करण : प्रथम, वि०सं० २०६५, सन् २००९

ISBN : 978-81-213-0259-8

© **चौखम्बा कृष्णदास अकादमी**
के० ३७/११८, गोपाल मन्दिर लेन
गोलघर (मैदागिन) के पास
पो० बा० नं० १११८, वाराणसी-२२१००१ (भारत)
फोन : (०५४२) २३३५०२०

Acc. 2068
2074

अपरं च प्राप्तिस्थानम्
चौखम्बा संस्कृत सीरीज आफिस
के० ३७/९९, गोपाल मन्दिर लेन
गोलघर (मैदागिन) के पास
पो० बा० नं० १००८, वाराणसी—२२१००१ (भारत)
फोन : (आफिस) (०५४२) २३३३४५८
(आवास) (०५४२) २३३५०२०, २३३४०३२
Fax : 0542 - 2333458
e-mail : cssoffice@satyam.net.in

R.

॥ श्रीः ॥

प्राक्कथनम्

शङ्करादिगुरुत्रयं गणपतिं पीठत्रयम्भैरवम् ।
सिद्धौघं बटुकत्रयम्पदयुगं दूतीक्रमं मण्डलम् ॥
वीरान् द्व्यष्टचतुष्क षष्टिनवकं वीरावलीपञ्चकम् ।
श्रीमन्मालिनिमन्त्रराज सहितं वन्दे गुरोर्मण्डलम् ॥

तत्र भवतां सुविदितमेवैतत् यत् जगति जनिमतामेक एव वेदः श्रेयोमार्गप्रदर्शकः । यतो जनै मन्यन्ते—

'यदिहास्ति तदन्यत्र यन्नेहास्ति न तद् क्वचित्'

अर्थात् यद्वेदे नास्ति, तदन्यत्रोऽपि नह्येव भवितुमर्हति। तस्य वेदस्य षडङ्गभूतानि शिक्षा-कल्प-शब्द-ज्यौतिष-निरूक्त-च्छन्दः शास्त्राणि संदृश्यन्ते । यथा—

शिक्षा कल्पो व्याकरणं निरुक्तं छन्दस्तं च यः ।
ज्यौतिषामायनञ्चेति वेदाङ्गानि षडैव तु ॥

तथा च भास्कराचार्यः—

शब्दशास्त्रं मुखं ज्यौतिषं चक्षुषि श्रौत्रमुक्तं निरूक्तं च कल्पः करौ ।
या तु शिक्षाऽस्य वेदस्य सा नासिका पादपद्मद्वयं छन्द आद्यैर्बुधैः ॥

इत्यनेन तेषु षडङ्गेषु ज्यौतिशास्त्रस्य परिगणनं वर्तते। तत्र तस्य शास्त्रास्यानेन महत्त्वं संलक्ष्यते। यथा च भास्करः—

वेदास्तावद्यज्ञकर्मप्रवृत्ता यज्ञाः प्रोक्तास्ते तु कालाश्रयेण ।
शास्त्रादस्मात् कालबोधो यतः स्याद् वेदाङ्गत्वं ज्योतिषस्योक्तमस्मात् ॥

अपि चाह नारदः—

वेदस्य निर्मलं चक्षुर्ज्योतिःशास्त्रमकल्मषम् ।
विनैतदखिलं कर्म श्रौतं स्मार्तं न सिद्ध्यति ॥

एवमनेन सिद्ध्यते यज् ज्यौतिषशास्त्रं विना लोकानां लौकिकं वैदिकं स्मार्तञ्च किमपि कर्म न साफल्यमुपयाति। यतोऽस्मान् वेदो यज्ञं प्रति प्रवर्तयति। सुष्ठुकाले कृतमेव कर्म साफल्यमकाले वैफल्यं प्रयातीति कालज्ञानं ज्यौतिःशास्त्रादेव जायतेऽनेनास्य

वेदाङ्गत्वं सार्थकं भवति । षडङ्गेषु ज्योतिःशास्त्रस्य मुख्यत्वमपि भास्करेण निगदितम्। यथा—

वेदचक्षुः किलेदं स्मृतं ज्योतिषं मुख्यता चाङ्गमध्येऽस्य तेनोच्यते।
संयुतोऽपीतरैः कर्णनासादिभिश्चक्षुषाङ्गेन हीनो न किञ्चिद् कुरः।।

उक्तकथनात् पूर्वमेव लगधेण वेदाङ्गेभ्यो ज्योतिःशास्त्रस्य वरिष्ठता प्रतिपादिता वर्तते। यथा—

यथाशिखा मयूराणां नागानां मणयो यथा।
तद्वद् वेदाङ्गशास्त्राणां ज्योतिषं मूर्ध्नि वर्तते।।

अतोऽनेनेदं सिद्धं यद् वेदाङ्गेषु ज्योतिषशास्त्रस्य सर्वातिशायि श्रेष्ठत्वं वर्तते। एवं 'दैवाधीनं जगत् सर्वम्' इति तथा 'ग्रहास्ते देवतांशकाः' इति वचनस्वरशात् सकलं जगद् ग्रहाधीनमेवास्ति।

वस्तुतो रविकिरणसंयोगवशादेव सकलं जगज्जातं चरमचरञ्च जीवनं स्थैर्यं च प्रत्यहं त्रिकालं वहंति' इत्यनेनैव लोकैः रविरूपास्यते। तेषां ख-खेचर-भू-भूधर-त्रिदश-दानव-मानवानां स्थितमिति-गतिज्ञानं ज्योतिषशास्त्रमन्तरा न केवलं दुर्घटमसम्भवमप्यस्ति। यथा नहि नेत्रं विना किञ्चिदपि जनो निरापदं स्वीयमभिलषितं पदं गन्तुं शक्यते तथा ज्योतिषशास्त्रं (नेत्रं) विना जगतः श्रेयोमार्गः कथमपि न सम्भवतीति।

एवमन्यशास्त्रसन्देहास्पदमप्रत्यक्षञ्च, परञ्च ज्यौतिःशास्त्रं प्रत्यक्षं युक्तियुक्तञ्चाधः-स्थकथनेनेदं प्रकटयति—

अप्रत्यक्षाणि शास्त्राणि विवादस्तेषु केवलम्।
प्रत्यक्षं ज्यौतिषं शास्त्रं चन्द्राऽर्कौ यत्र साक्षिणौ।।

अथ काश्यपवचनादष्टादशर्षयः ज्यौतिशास्त्रप्रवर्त्तकाः सन्ति ।

सूर्यो पितामहो व्यासो वशिष्ठोऽत्रिः पराशरः ।
कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिराः ।।
लोमशःपौलिशश्चैव च्यवनो यवनो भृगुः ।
शौनकोऽष्टादशाश्चैते ज्योतिःशास्त्रप्रवर्त्तकाः ।।

तथा सूर्यसिद्धान्तवचनाच्च—

दिव्यं चक्षुर्ग्रहर्क्षाणां दर्शितं ज्ञानमुत्तमम् ।
विज्ञायार्कादिलोकेषु स्थानं प्राप्नोति शास्वतम् ।।

अपि गर्गवचनाच्च—

ज्योतिश्चक्रे तु लोकस्य सर्वस्योक्तं शुभाशुभम्।
ज्योतिर्ज्ञानं तु यो वेद स याति परमाङ्गतिम्।।

अपि वाराहमिहिरवचनाच्च—

न साम्वत्सरपाठी च नरके परिपच्यते।
ब्रह्मलोक प्रतिष्ठां च लभते दैवचिन्तकः।।

अतश्च स्पष्टं यज्ज्यौतिःशास्त्रस्य प्रयोजनं न केवलमेवाध्ययनाध्यापनावश्यकताऽपितु परमार्थ बुद्ध्याऽपि। एवं च सकलात्मनो जगन्नियन्तुः सवितुः स्थितिमिति गति प्रतिपादकत्वादिदं शास्त्रं दर्शनशास्त्रमप्यस्ति' इति कथने न काचिद् विशेषोक्तिः।

एवञ्चास्य ज्यौतिःशास्त्रस्य प्रमुखाङ्गानि त्रयान्युक्तानि नारदेण च—

"सिद्धान्त-संहिता-होरारूपं स्कन्धत्रयात्मकम्"

तथा चाह वाराहः—

ज्योतिःशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितं
तत्कात्स्न्योंपनयस्य नाम मुनिभिः सङ्कीर्त्यते संहिता।
स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ
होराऽन्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः।।

तत्र तावत् संहिताभागे स्थल-जल-गगनजातविविधप्राकृतिकलक्षणेन फलादेशकारकग्रन्थास्तेषु संहिताविषयप्रतिपादकग्रन्थेषु केवलं वाराहमिहिरस्यैकस्यैव कृतस्य बृहत्संहिताभिधस्य इदानीं लोके समुपलब्धिः प्रचारश्चास्ति। अन्याः संहितालुप्तप्रायाः सन्ति। सिद्धान्तभागे च सूर्यसिद्धान्त-ब्रह्मस्फुटसिद्धान्त-सिद्धान्तशेखर-सिद्धान्तशिरोमणि-सिद्धान्ततत्त्वविवेक-आर्यभटीयमिति सिद्धान्तग्रन्थस्य प्रचारो वर्त्तते। होराभागे त्वपि द्वित्रा एव मूलग्रन्थाः प्रचलिताः तदितरास्तु इदानीन्तनाः सङ्कलिताः समविषयका एव भिन्न-भिन्न नाम्ना दृष्टिपथमायान्ति।

प्रायो ज्यौतिःशास्त्रस्य प्राचीनार्षग्रन्थाः हतभाग्यवशादस्मिन् भारते समागते मुगलसाम्राज्ये नियन्त्रिता बहुशः लुप्ता बभूवुः। दैववशात्तत्काले तेषां कुटिलकटाक्षैर्वञ्चिता ये केचन ग्रन्था हतभाग्यानामस्माकं नयनपथमुपयान्ति। ते च यवना अस्माकमार्षग्रन्थानां यथावसरं सारं सङ्कलय्य स्वभाषाबद्धान् ग्रन्थानरचयन्। यद् वाराहमिहिरस्य बृहज्जातकस्य

नीलकण्ठाचार्यस्य ताजिकनीलकण्ठी नामकस्य च ग्रन्थदर्शनेन स्पष्टीयते। अपरेऽपि केचन ग्रन्था इदृशा वर्त्तन्ते।

एवं मुगलसाम्राज्यस्यानन्तरमाङ्लानां साम्राज्ये ये केचिदुर्वरिता अस्माकमार्षग्रन्था भारतीयानां मन्दभाग्यैरनादृता: शनै: शनै: यूरपीयदेशमगच्छन्। तत्रापि च भारतेऽर्वाचीन-विनिर्मिता: पौरुषा एव ग्रन्था दृष्टिपथमागच्छन्ति, ते च पौरुषा: ग्रन्था: पञ्चदशशताब्दाभ्यन्तर-कालीना एव सन्ति। यत आर्यभट: (३९७शकाब्दकालीन:) प्रथमाचार्योऽस्ति। इमा: सर्वा वार्त्ता आर्यभटकृदार्यभटीयम् वाराहमिहिरस्य पञ्चसिद्धान्तिकादिग्रन्थाणामालोडनेनापि सम्यक्‌तया ज्ञायन्ते।

एवञ्च भास्कराचार्यकथनेन यत: ज्यौति:शास्त्रमागमादेशमस्ति, यथा—

'ज्यौति:शास्त्रफलं पुराणगणकैरादेश इत्युच्यते'

तथा च वाराहमिहिरकथनेन ज्यौति:शास्त्राद् पूर्वजन्मार्जितकर्मफलं व्यञ्जयति, यथा—

यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मण: पङ्क्तिम्।
व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव।।

अथानेन ज्योति:शास्त्रस्य फलादेशकरणमेव मुख्यप्रयोजनं सिद्ध्यति। तत्र च फलादेशज्ञानार्थं होरास्कन्धस्य पौरुषग्रन्थेषु सर्वप्रथमो बृहज्जातकस्याविर्भावोऽभवत्। ग्रन्थोऽयञ्च प्राचीनार्ष होराग्रन्थसारभूतस्तंत्सम्मतश्चाधुनिक सकलपौरुषग्रन्थानां जनकोऽभिगण्यते। अस्य ग्रन्थरत्नस्याविर्भावको वाराहमिहिर:। तथा चैतस्यैव ग्रन्थस्य सारभूतं लघुजातकाख्यं तत्कृतमेवातीव मनोहरं जातकविदामुपकृत्यै विराजते। इत: परं कियन्तो जातकविषयकग्रन्था: कियद्भ्यो ग्रन्थेभ्य: प्राकरणिकवाक्यानि सङ्कलय्य तत्तदाविर्भावकैराविष्कृता:। यथा च श्रीपतिपद्धति:-श्रीपतिना, सारावली-कल्याणवर्मणा, सर्वार्थचिन्तामणि-वेङ्कटेशेण, जातकादेश:गुणाकरेण, होरारत्न-बलभद्रेण, मानसागरी, जातकाभरणम्, जातकतत्त्वम्, मन्त्रेश्वरस्य फलदीपिका बैद्यनाथस्य जातकपारिजात इत्यादयोऽनेके ग्रन्था विविधविषयविभूषिता: समुपलभ्यन्ते।

एवं तेषु तावदेका जातकसम्बन्धिका यावद् विषयोपयुक्ता 'सारावली' यतो नामानुरूपगुणोऽतोऽध्यापकैरध्येतृभिश्चाधुना प्राय समाद्रियते। एतद् ग्रन्थादौ—

विस्तरकृतानि मुनिभि: परिहृत्य पुरातनानि शास्त्राणि।
होरातन्त्रं रचितं वराहमिहिरेण संक्षेपात्।।

इति वचनेन सिद्ध्यति यत् कल्याणवर्मकृत 'सारावली' प्राचीनार्षग्रन्थाणां सारभागं सङ्गृह्यापि च बृहज्जातकयवनादिरचितशास्त्रप्रभृतिका ये पौरुषजातकग्रन्थास्तेषां सारभूतवाक्यानि सङ्कलय्य रचयामास। यथा ग्रन्थेऽस्मिन् ग्रन्थकारः कथयति—

"सकलमसारं त्यक्त्वा तेभ्यः सारं समुद्ध्रियते।।"

वस्तुतस्तु साम्प्रतिक पौरूषजातक ग्रन्थेसु बृहज्जातकस्य मूलभूता एव कियन्ताः श्लोका दृश्यन्ते। एवमेव बृहज्जातकमिव संहितास्कन्धस्य बृहत्संहिता ग्रन्थस्य, यस्या परन्नाम 'वाराही संहिता'ऽस्ति, साम्प्रतिके लोकेऽतिमहत्त्वमभिदृश्यत इति।

एवम्प्रकारेण भारतीयज्योतिर्विज्ञानस्यातिविस्तृतं क्षेत्रं दृष्ट्वा तथा ऋग्वेद-कालतश्चाद्यावधिं यावद् त्रिस्कन्धात्मकेषु भारतीयज्योतिषसाहित्येषु सम्प्रयुक्तानां व्यवहृतानां च विभिद्यात्स्रोतादाऽऽगतानां शब्दानां सम्यज्ज्ञानाय तेषामध्ययनाध्यापनयोस्तेषां प्रायोगिक स्वरूपस्य चापि सरलीकरणाय चैकस्य शब्दकोषस्य दीर्घकालेनापेक्षा वर्तते। तस्याऽऽपूर्त्यर्थमेवायं कोषग्रन्थो भवति सेवायां प्रस्तुतोऽस्ति। ग्रन्थेऽस्मिन् नवदश सर्गाः सन्ति। यथा—'पञ्चाङ्गसर्गः, कालसर्गः, पर्वसर्गः...............' इति। येषां परिज्ञानं ग्रन्थदर्शनेन स्पष्टतया तु सम्भवत्येव, सहैव शब्दकोषस्यान्यान्यानां विशेषताया अपि सम्यज् ज्ञानं भवति। परम विश्वासो मामस्ति यत् सर्वेभ्यः स्तरेभ्यः पाठकेभ्यो ग्रन्थोऽयमवश्यमेव समुपयोगयोग्यः संग्रहणीयश्च भविष्यति। इति।।

तत्र यावदध्ययनाध्यापने काठिन्यञ्चावलोकयद्भिः वाराणसेय 'चौखम्बा संस्कृत सीरीज' नामकस्य संस्थानस्याध्यक्ष श्रेष्ठिवर महोदयैः मुहुरभ्यर्थितश्चाहमेतद् प्रस्तुतस्य ज्योतिर्विज्ञानशब्दकोषस्य शब्दसङ्कलने लेखनेप्रकाशनकार्ये च प्रवृत्तोऽभवम्। तदस्मिन् पुण्यात्मके जगदुपकृतिकार्ये विश्वनाथानुकम्पया परमाल्पधियाऽपि मया त्वरितमेव निर्बाधं साफल्यमवाप्तमिति गुरुपदानुकम्पैव बीजम्।

यद्यनेन जनानां किञ्चिदपि लाभोऽभविष्यत् तदा मम श्रमं सार्थकं सम्पत्स्यते। प्रमादवशात् यन्त्रादिवशाद् वा या अशुद्धयः सञ्जाता विद्वद्भिः संशोधयित्वा पठनीयाः सूचनीयाश्च। एतदर्थमपि सर्वेषां कृतज्ञतां ज्ञापयामि।

वाराणसी
अनन्त चतुर्दशी-सम्वत् २०६५
कलिसम्वत्—५१०९

विदुषामाश्रवः
सुरकान्त झा

ज्योतिर्विज्ञानशब्दकोषस्थसर्गसूची

सर्गः	पृष्ठाङ्काः
१. पञ्चाङ्गसर्गः	१-१०
२. कालसर्गः	११-२०
३. पर्वसर्गः	२०-२५
४. राशिसर्गः	२५-२९
५. ग्रहसर्गः	२९-५८
६. मानसर्गः	५८-७०
७. गणनासर्गः	७०-९६
८. ग्रहगणितसर्गः	९६-१२१
९. भावादिसर्गः	१२१-१३१
१०. मुहूर्त्तादिसर्गः	१३१-१४०
११. आयुर्दायादिसर्गः	१४०-१४४
१२. दृष्ट्यादिसर्गः	१४५-१६८
१३. धातुसर्गः	१६८-१९७
१४. देवसर्गः	१९७-२३३
१५. दिग्सर्गः	२३३-२३६
१६. दिक्पालसर्गः	२३६-२४७
१७. पुरसर्गः	२४७-२४९
१८. प्रकीर्णसर्गः	२४९-२५८
१९. शब्दव्युत्पत्तिसर्गःसर्गः	२५९-२७२
२०. ज्योतिर्विज्ञानशब्दकोषस्थशब्दानामकारादिक्रमेण शब्दानुक्रमणिका	२३७-६१२
२१. ज्योतिर्विज्ञानशब्दकोषस्थ संक्षिप्तशब्दानां स्पष्टीकरणम्	६१३-६१४

—०—

॥श्री॥

सुरकान्तसंकलितः

ज्योतिर्विज्ञानशब्दकोषः

अथ पञ्चाङ्गसर्गः—१

सर्वदा सर्वकार्येषु नस्ति तेषाममङ्गलम् ।
येषां हृदिस्थो भगवान् मङ्गलायतनं हरिः ॥१॥
लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ।
येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥२॥
स्मृते सकलकल्याणभाजनं यत्र जायते ।
पुरुषं तमजं नित्यं व्रजामि शरणं हरिम् ॥३॥
सर्वेषारभ्यकार्येषु त्रयस्त्रिभुवनेश्वरः ।
देवा दिशन्तु नः सिद्धि ब्रह्मेशानजनार्दनाः ॥४॥
विघ्नध्वान्त निवारणैक तरणिं कृत्स्नैः सदा सेवितं ।
श्रीविघ्नेशपदारविन्दयुगलं ध्यात्वा तथा भक्तितः
स्वान्ते श्रीगुरुपादपद्मयुगलं कल्याणकल्पद्रुमं
ह्यत्र ज्योतिश्शब्दकोषं संप्रकुरुते सुर्कान्तः तद्ग्रन्थतः॥५॥

पञ्चाङ्गपर्यायाः—पञ्चाङ्गम्, पञ्जिः, पञ्जिका, पञ्जी, तिथिपत्रम्, तिथिपत्रिका, तिथिपत्री।

पञ्चाङ्गावयवनामानि—(१) तिथिः, (२) वारः, (३) नक्षत्रम्, (४) योगः, (५) करणम्, चेत्येतानि पञ्चाङ्गस्य पुञ्चावयवानि सन्ति।

तदुक्तं—

तिथिर्वारश्च नक्षत्रं योगः करणमेव च, पञ्चाङ्गस्य फलंश्रुत्वा गङ्गास्नानफलं लभेद् ' इति। अपि च—'वारो हरति दुःस्वप्नं नक्षत्रं पापनाशनम्। तिथिर्भवति गङ्गाया योगः सागरसङ्गमः। करणं सर्वतीर्थानि श्रूयते यत्र पञ्जिका' इति शब्दार्थचिन्तामणिः।१६।२।१।

तिथिपर्यायाः—कर्मवाटिका, कर्मवाटी, कला, तिथिः (पुं० स्त्री०) तिथी (स्त्री)।

तिथिनामानि—(१) प्रतिपदा, (२) द्वितीया, (३) तृतीया, (४) चतुर्थी, (५) पञ्चमी, (६) षष्ठी, (७) सप्तमी, (८) अष्टमी, (९) नवमी, (१०) दशमी, (११) एकादशी, (१२) द्वादशी, (१३) त्रयोदशी, (१४) चतुर्दशी, (१५) पूर्णिमा चेति शुक्लपक्षे तिथिनामानि। एवं कृष्णेऽपि। परन्तु तत्र पूर्णिमास्थाने (३०) 'अमावस्या' इति सञ्ज्ञा ज्ञेया।

शुक्लप्रतिपदापर्यायाः—अग्नितिथिः, अजातचन्द्रा, आग्नेयी, आदिमा, आद्या, एकपक्षतिः, पक्षतिः, प्रतिपत् (द्) प्रतिपदा, प्रथमा, सितास्या।

द्वितीयापर्यायाः—द्वितीया, धातृतिथिः, निपक्षतिः।

तृतीयापर्यायाः—गिरिजातिथिः, गौरीतिथिः, तृतीया।

चतुर्थीपर्यायाः—गणेशतिथिः, चतुर्थी, लम्बोदरतिथिः।

पञ्चमीपर्यायाः—अहितिथिः, पञ्चमी, सर्पतिथिः।

षष्ठीपर्यायाः—कार्तिकेयतिथिः, षष्ठी, स्कन्दतिथिः।

सप्तमीपर्यायाः—दिनकृत्तिथिः, रवितिथिः सप्तमी।

अष्टमीपर्यायाः—अष्टमी, महेशतिथिः।

नवमीपर्यायाः—दुर्गातिथिः, नवमी।

दशमीपर्यायाः—अन्तकतिथिः, दशमी, यमतिथिः।

एकादशीपर्यायाः—एकादशी, विश्वेदेवतिथिः।

द्वादशीपर्यायाः—द्वादशी, विष्णुतिथिः, हरितिथिः।

त्रयोदशीपर्यायाः—कामतिथिः त्रयोदशी।

चतुर्दशीपर्यायाः—कलिः, चतुर्दशी, पाटूरः, शिवतिथिः।

पूर्णिमापर्यायाः—चन्द्रमाता (तृ), चान्द्री, धर्म्मवासरः, निरञ्जना, पित्र्या, पूर्णमा, पूर्णमासी, पूर्णा, पूर्णिका, पूर्णिमा, पौर्णमासी, पौर्णमी। इति।

पूर्णिमाया भेदौ—(१) अनुमतिः, (२) राका चेति पूर्णिमाया द्वौ भेदौ स्याताम्। यत्र चन्द्रः कलोनस्तत्र 'अनुमतिः'। यत्र स परिपूर्णस्तत्र 'राका' ज्ञेया।

कृष्णप्रतिपदापर्यायाः—कलोनचन्द्रा, कृष्णास्या, बहुलमुखा। शेषपर्यायास्तु शुक्लपक्षवज्ज्ञेयाः।

कृष्णचतुर्दशीपर्यायाः—भूतः, भूता, भूतेष्टा। शेषपर्यायास्तु शुक्लपक्षवज्ज्ञेयाः।

अमावास्यापर्यायाः—अमा, अमामसी, अमामंस्या, अमावसी, अमावस्या, अमावासी, अमावास्या, तिथिक्षयः, दर्शः, पितृतिथि, विगतचन्द्रतिथिः, विधुक्षयः, सूर्येन्दुसङ्गमः, इति।

अमाया भेदौ—यदि दृष्टचन्द्रे सा तदा (१) 'सिनीवाली'। नष्टचन्द्रे तु सा (२) कुहुः, कुहूः, इति अमाया द्वौ भेदौ स्याताम्।

तिथिस्वामिनामानि—(१) अग्निः, (२) ब्रह्मा (अन्), (३) गौरी, (४) गणेशः, (५) सर्पः, (६) स्कन्दः, (७) रविः, (८) शिवः, (९) दुर्गाः, (१०) यमः, (११) विश्वेदेवाः (पुं०ब०), (१२) विष्णुः, (१३) कामः, (१४) शिवः, (१५) चन्द्रः, (३०) पितरः (पुं०ब०) (पितामहाः)।

तिथिभेदाः—(१) नन्दा, (२) भद्रा, (३) जया, (४) रिक्ता, (५) पूर्णा चेत्येते तिथीनां पञ्चभेदाः स्युः।

नन्दातिथिनामानि—प्रतिपदा, षष्ठी, एकादशी इति।

भद्रातिथिनामानि—द्वितीया, सप्तमी, द्वादशी इति।

जयातिथिनामानि—तृतीया, अष्टमी, त्रयोदशी इति।

रिक्तातिथिनामानि—चतुर्थी, नवमी, चतुर्दशी इति।

पूर्णातिथिनामानि—पञ्चमी, दशमी, पूर्णिमा इति।

एकयोक्त्या पूर्णिमादर्शयोः पर्यायाः—नन्दि-वर्द्धनौ, पक्षान्तौ, पञ्चदश्यौ (स्त्री०द्वि०), पर्वणी (अन्) (न०द्वि०), यज्ञकालौ इति।

पर्वमूलपर्यायः—भूतेष्टापञ्चदश्योर्यदन्तरं तत् 'पर्वमूलम्' इति।

पर्वसन्धिपर्यायः—प्रतिपत्पञ्चदश्योर्यदन्तरं सः 'पर्व-सन्धिः' इति।

पक्षमूलपर्यायाः—पक्षतिः (स्त्री), पक्षती (स्त्री०), पक्षमूलम् इति।

अशुभतिथिनामानि—(१) चतुर्थी, (२) नवमी, (३) चतुर्दशी, (४) अमावास्या चैताश्चतस्त्रोऽशुभतिथयः स्युः। एताः शुभे वर्ज्याः।

वारपर्यायाः—अवसरः, अहः, अहन्, दिनम्, वारः, वासरः, दिवसः, वेला इति।

वारनामानि—(१) रविवारः, (२) सोमवारः, (३) मङ्गलवारः, (४) बुधवारः, (५) गुरुवारः, (६) शुक्रवारः (७) शनिवारश्चेत्येते सप्तवाराः स्युः।

क्रूरवारनामानि—(१) रविः, (२) मङ्गलः, (३) शनिश्चैते त्रयः क्रूरवाराः स्युः।

सौम्यवारनामानि—(१) सोमः, (२) बुधः, (३) गुरुः, (४) शुक्रश्चैते चत्वारः सौम्यवाराः स्युः।

क्रूरवाचकशब्दाः—अशुभम्, अशोभनम्, असत्, उग्रम्, क्रूरम्, दुष्टम् पापम्।

सौम्यवाचकशब्दाः—शुभम्, शोभनम्, सत्, शांतम, अक्रूरम्, पुण्यम्, सौम्यम्।

नक्षत्रपर्य्यायाः—उडु (न०) उडुः, (स्त्री०) ऋक्षम्, ग्रहः, चन्द्रदाराः (पुं०ब०), ज्योतिः (इस्) (न०) तारम्, तारकम्, तारका, तारा, दक्षजाः (स्त्री०व०), दाक्षायण्यः (स्त्री०ब), दिवाभीतम्, धिष्ण्यम्, नक्षत्रम्, भम्, भासन्तः, भासन्ती (स्त्री०), रात्रिजम्, रात्रिदृश्यम्, सत्?, स्तृ? इति।

नक्षत्रनामानि—(१) अश्विनी, (२) भरणी, (३) कृत्तिका, (४) रोहिणी, (५) मृगशीर्षम्, (६) आर्द्रा, (७) पुनर्वसुः, (८) तिष्यः (पुष्यः), (९) आश्लेषा, (१०) मघा

(११) पूर्वाफाल्गुनी, (१२) उत्तराफाल्गुनी(१३) हस्तः (१४) चित्रा, (१५) स्वातिः, (१६) विशाखा, (१७) अनुराधा, (१८) ज्येष्ठा·(१९) मूलम्, (२०) पूर्वाषाढा, (२१) उत्तराषाढा, (अभिजित्) (त्) (न०) उत्तराषाढायाश्चतुर्थांशस्य श्रवणादिचतुर्दण्डस्य च अभिजित् इति संज्ञा स्यात्। तदुक्तं मुहूर्त्तचिन्तामणौ—'वैश्व-प्रान्त्यांघ्रिश्रुतितिथिभागतोऽभिजित्स्यात्। इति। (२२) श्रवण, (२३) घनिष्ठा, (२४) शतभिषा, (२५) पूर्वाभाद्रपदा, (२६) उत्तराभाद्रपदा, (२७) रेवती, चेत्येतानि सप्तविंशतिनक्षत्राणि स्युः। तत्राभिजित् गणनयाष्टाविंशति नक्षत्राणि भवन्ति।

सलिङ्गनक्षत्रनामानि—अश्विन्यौ (स्त्री०द्वि०),। भरण्यः (स्त्री०ब०) क्वचित्तु भरणि (न०), कृत्तिका (स्त्री०ब०),। कृत्तिका (स्त्री०), रोहिणी (स्त्री०), मृगशिरः (अस्) (न०), मृगशिरः (पुं०) मृगशिरः (अस्) (स्त्री०) मृगशीर्षम् (न०) मृगशीर्षा (स्त्री०)। आर्द्रा (स्त्री०),। पुनर्वसू (पुं०द्वि०), क्वचित्तु-पुनर्वसुः (पुं०)। तिष्यः पुष्यः (पु०)। आश्लेषाः (स्त्री०ब०)। मघाः (स्त्री०ब०) क्वचित्तु-मघा (स्त्री०)। पूर्वाफाल्गुन्यौ (स्त्री०द्वि०)। उत्तराफाल्गुन्यौ (स्त्री०द्वि०)। हस्तः (पु०) हस्ता (स्त्री०)। चित्रा (स्त्री०)। स्वातिः (पुं०स्त्री०), स्वाती (स्त्री०)। विशाखे (स्त्री०द्वि०)। अनुराधाः (स्त्री०ब०) अनूराधः (पु०ब०)। ज्येष्ठा (स्त्री०)। मूलः (पु०) मूलम् (न०)। पूर्वाषाढाः (स्त्री०ब०)। उत्तराषाढाः (स्त्री०ब०)। अभिजित् (त्) (न०)। श्रवणः (पुं०) श्रवणा (स्त्री०)। धनिष्ठाः (स्त्री०, ब०)। शतभिषा (स्त्री०)। पूर्वाभाद्रपदाः (स्त्री०ब०)। उतराभाद्रपदाः (स्त्री०ब०), रेवती (स्त्री०)। इति।

नक्षत्राधिदेवतानामानि—(१) दस्रौ (पु०द्वि०) (२) यमः, (३) अग्निः, (४) ब्रह्मा (अन्), (५) चन्द्रः, (६) रुद्रः, (७) अदितिः, (८) जीवः (९) सर्पः, (१०) पितरः (पुं०ब०) (११) भगः, (१२) अर्यमा (अन्), (१३) रविः, (१४) त्वष्टा (ष्टृ), (१५) वायुः, (१६) शक्राग्नी (पु०द्वि०), (१६) मित्रः, (१८) शक्रः (१९) निर्ऋतिः, (२०) आपः (स्त्री०ब०) (२१) विश्वेदेवाः (पुं०ब०) (अभिजितो विधिः), (२२) गोविंदः, (२३) वसुः, (२४) वरुणः, (२५) अजैकचरणः, (२६) अहिर्बुध्न्यः, (२७) पूषा (अन्)। इति।

नराणां राशिनाम्ने[1] नक्षत्राणां पादवशतो विशेषसंज्ञाः—चू, चे, चो, ला (अश्विनी)।

---

[1] *इह प्रसिद्धनाम्नो यदाद्यमक्षरं तद्वशेन चू, चे, चो, ला इत्यादिनो यो राशिर्भवति स नामराशिर्ज्ञेयः। एवं यस्य नक्षत्रस्य यस्मिन्पादे जन्म तद्वशेन जन्मराशिर्ज्ञेयः।*

तत्रादौ नामराशेः प्राधान्यामुक्तं ग्रन्थान्तरे—

'देशे ग्रामे गृहे युद्धे सेवायां व्यवहारके
नामराशेः प्रधानत्वं जन्मराशिं न चिन्तयेत्।। इति।।

जन्मराशेः प्राधान्यमुक्तं तत्रैव—

'विवाहे सर्वमाङ्गल्ये तंत्रादौ ग्रहगोचरे।
जन्मराशेः प्रधानत्वं नामराशिं न चिन्तयेत्'।।इति।।

अत्र ग्रन्थान्तरे तु विशेष उक्तः—

'देशे ज्वरे ग्राम-गृहप्रवेशे सेवासु युद्धे व्यववहारकार्य्ये।
द्यूते च दानादिषु नामराशिर्यात्रा विवाहादिषु जन्मराशिः ।।इति।।

विचिन्त्य इति शेषः।

ली, लू, ले, लो (भरणी); आ, ई, ऊ, ए (कृत्तिका); ओ, वा, वी, वू (रोहिणी); वे, वो, का, की (मृगशीर्षम्) कू, घ, ङ, छ (आर्द्रा); के, को, हा, ही (पुनर्वसुः); हू, हे, हो, डा (तिष्यः), डी, डू, डे, डो (आश्लेषा)। मा, मी, मू, मे, (मघा)। मो, टा, टी, टू, (पूर्वाफाल्गुनी)। टे, टो, पा, पी, (उत्तराफाल्गुनी)। पू, ष, ण, ठ, (हस्तः); पे, पो, रा, री (चित्रा); रू, रे, रो, ता (स्वाती), ती, तू, ते, तो (विशाखा); ना, नी, नू ने (अनुराधा); नो, या, यी, यू, (ज्येष्ठा), ये, यो, भा, भी, (मूलम्)। भू, ध, फ, ढ, (पूर्वाषाढा)। भे भी, जा, जी, (उत्तराषाढा)। जू, जे जो खा, (अभिजित्)। खी, खू, खे, खो, (श्रवणः)। गा, गी, गू, गे, (घनिष्ठा)। गो, सा, सी, सू, (शतभिषा)। से, सो, दा, दी, (पूर्वाभाद्रपदा); दू, थ, झ, ञ (उत्तराभाद्रपदा); दे, दो, चा, ची (रेवती); इति नराणां राशिनाम्नेऽश्विन्यादिनक्षत्रतूर्यपादानां विशेषसंज्ञाः। इह प्रसङ्गात् नाम्न आद्यक्षरनिर्णय उक्तो 'ज्योतिस्तत्त्वे'—५,५६।

'अक्षराङञणा नोक्ता आदौ नाम्नो न सन्ति ते।
यदा भवन्ति गजडा विज्ञेयास्ते यथाक्रमम्' ॥इति॥

नामपर्यायाः—अभिख्या, अभिधा, आख्या, आह्वयः, आह्वा, गोत्रम्, नाम (अन्) नामधेयः, संज्ञा। उक्तं च' हैमे-अथाह्वयोऽभिधा। गोत्रसंज्ञा नाम धेयाऽऽख्याऽऽह्वाऽभिख्याश्च नाम चेति २/२

अश्विनीपर्यायाः—अमृतादनवैद्यभम्, अश्विनी, अश्वियुक्, आदिभम्, आद्यम्, तुरङ्गः, त्रिदशदोषवित्-द्, दस्रदेवता, दास्रम्, दास्रदैवत्यम्, देवदोषज्ञौ, देववैद्यभम्, नासत्यौ, प्रथमभम्, यमलौ, यमौ, वालिनी, सुरचिकित्सकौ, सुरभिषजौ (ज्), सुरवैद्यभम्, हयः, शेषपर्यायास्तु नासत्याश्वश यौगिकशब्दतश्चोहनीयाः।

भरणीपर्यायाः—अन्तकः, अपभरणी, आन्तकम् कालः, कृतान्तः, दण्डधरः, दण्डेशः, भरणि, भरणिः, भरणी, यमः, यमदेवता, यमदैवतम् यमदैवत्यम्, याम्यम्, याम्यभम्, योग्या, शमनः, शामनम्, सूरजः, सौरिः, शेषपर्यायास्तु यमपर्यायत ऊहनीयाः।

कृत्तिकापर्यायाः—अग्निः, अग्निदेवा, अग्निदैवतम्, अग्निदैवत्यम्, अनलः, आग्नेयम्, कार्शानवम्, कृत्तिका, कृशानुः, दहनः, बहुला, वह्निः, शिखी (इन्), शौच्यम्, हविर्भुक् (ज्), हव्यवाहः, हव्यवाहभम्, हुतभुक (ज्), हुतवहः, हुताशनः, हौतभुजम्, हौतवहम्, शेषपर्यायास्तु अग्निपर्यायत ऊहनीयाः।

रोहिणीपर्यायाः—अजः, अजतारा, अजरवृद्धभम्, कः, कमलजः, कमलयोनिः, कमलागारः, चतुरास्यः, तामरसोदयः द्रौहिणम्, धाता (तृ), धातृभम्, निर्जरज्येष्ठभम्, पङ्कजप्रभवः, पद्मतनयः, प्रजापतिः, प्रजापतिदैवतम्, प्राजापत्यम्, प्राजेशम्, ब्रह्मा (अन्) ब्राह्मयम्, ब्राह्मीं, ब्राह्मम्, रोहिणी, विधात्र्यम्, विधिः, विरञ्चः, विरिञ्चिः, विरिचिः, वेधाः (अस्), वैधसम्, वैरञ्चम्, शकटम्, शतानन्दभम्, सरोजनिलयः, शेषपर्यायास्तु ब्रह्मशकटपर्यायतः कल्पनीयाः।

मृगशीर्षपर्यायाः— आग्रहायणी, आब्जम्, इन्दुः, उडुपः, उषार्य्यः, ऐन्दवम्, ओषध्यर्य्यः, कुरङ्गमूर्द्धा (अन्), चन्द्रदैवत्यम्, चन्द्रमाः (अस्), चान्द्रम्, चान्द्रमसम्, तमीशतारका, तरलतारकाभम्, न्यङ्कूत्तमाङ्गम्, भार्यः मस्तकम्, मार्गः मार्गायणी, मृगः, मृगशिरः (अस्), मृगशिराः, मृगशिराः (अस्), मृगशिरास्तारका, मृगशीर्षम्, मृगशीर्षा,

मृगशीर्ष्णिभम्, मृगी, मृगोत्तमाङ्गम्, रजनिकृत् (त्), राजभम्, राज्यम्, रुरः, रुरुशिराः (अस्), रुरूत्तमाङ्गम्, शशभृत् (त्) शशाङ्कभम्, शशिभम्, शीतद्युतिः, सौम्यम्, शेषपर्यायास्तु चन्द्रमृगमस्तकपर्यायत ऊहनीयाः।

आर्द्रापर्यायाः०—आर्द्रम्, आर्द्रा, ईशः, ऐशम्, कालिनी, गिरिशः, चन्द्रशेखरः, त्रिनयनः, त्रिनेत्रर्क्षम्, पुरजित् (द्), भर्गः, भावम्, राजमौलिः, रुद्रः, रुद्रदैवत्यम्, रौद्रम्, रौद्री, रौद्यम्, शः, शङ्करः, शिवः, शूलभृत् (द्), शूली (इन्), शैवम्, हरसंज्ञकः, हारम्, हुताशरेताः (अस्) शेषपर्यायास्तु शिवपर्यायतः कल्पनीयाः।

पुनर्वसुपर्यायाः—अदितिः, अदितिदैवतम्, अद्री, अमरमाता (तृ), आदितेयम्, आदित्यम्, कश्यपभीरुः, काश्यपी, काश्यपीतारा, त्रिदशेन्द्रसूः, देवप्रसूः, देवमाता (तृ०), देवाम्बिका, पुनर्भम्, पुनर्वसुः, पुनर्वसू, माता (तृ०), मित्रजननी, यामकौ, सुरसवित्री, सुरसूः, सुराम्बा, सुरजननी, शेषपर्यायास्तु अदितिकश्यप-देव-मातृपर्यायत ऊहनीयाः।

तिष्यपर्यायाः—अङ्गिराः (अस्), अमरेज्यः, अमरेड्यः, आङ्गिरसम्, आर्य्यः, इज्यः, इन्द्रमन्त्री (इन्), ऐज्यम्, गीष्पतिः, गुरुः, गुरुदैवतम्, गुरुदैवत्यम्, गौरवम्, जीवः, जैवम्, तिष्यः, धैषणम्, पुष्यः, पूज्यः, योग्य, वासवार्च्यभम्, सिद्धः, सिध्यः शेषपर्यायास्तु अङ्गिरोगुरुशक्रपर्यायतः कल्पनीयाः।

आश्लेषापर्यायाः—अश्लेषा, अहिः, आशीविषभम्, आश्रैषा, आश्लेषम्, आश्लेषा, आश्लेषिका, आह्यम्, उरगः, कद्रुजभम्, कद्रूजः, कुण्डली (इन्), दन्दशूकः, द्विरसनम् नागदेवा, नागदैवतम्, नागदैवत्यम्, फणभृत (द्), फणी (इन्), भुजगाधिपः, भुजङ्गः, भौजङ्गम्, व्यालः, व्यालराट् (ज्), श्लेषा, सर्पदेवा, सर्पदैवतम्, सर्पदैवत्यम्, सर्पोऽघाः, सार्पम्, सार्पी, शेषपर्यायास्तु सर्पपर्यायत ऊहनीयाः।

मघापर्यायाः—आदिजाः (पु०ब०) आदिप्रभवाः (पु०ब०) आदिभुवः (पु०ब०) कव्यभुक् (ज्), जनकः, पितरः (पु०ब०), पिता (तृ), पितृजनकः, पितृदेवधिष्ण्यम्, पितृदेवा, पितृदैवतम्, पितृदैवत्यम्, पित्र्यम्, पित्र्या, पूर्वजाः (पु०ब०), पैत्रम्, पैत्र्यम्, पौर्वजम्, मखा, मघः, मघा, शेषपर्यायास्तु पितृपर्यायत ऊहनीयाः।

पूर्वाफाल्गुनीपर्यायाः—पुफा, पूर्वफल्गुभम्, पूर्वफाल्गुः, पूर्वयोनिः, पूर्वाफाल्गुनी, फाल्गुनी, भगः, भगदेवत्यम्, भागम्, भाग्यम्, भाग्यभम्, योनिः, योनिदेवता, योनिदेवा, योनिदैवतम्, योनिदैवत्यम्, शेषपर्यायास्तु योनितः कल्पनीयाः।

उत्तराफाल्गुनीपर्यायाः—अदितिसुतः, अर्यमदेवता, अर्यमदेवा, अर्यमदैवतम्, अर्यमदैवत्यम्, अर्यमा (अन्), अर्यम्णम्, आर्यभम्, आर्यम्णम्, उत्तरफल्गुभम्, उत्तरफाल्गुः, उत्तराख्यं, उत्तराफाल्गुनी, मतान्तरे-भगम्, शेषपर्यायास्तु अर्यमतः कल्पनीयाः।

हस्तपर्यायाः—अरुणः, अर्कः, आरुणम्, आर्कम्, ऐनम्, करः, तैक्ष्णकरम्, दिनेशभम्, दोः (ष्), पाणिः, बाहुः, भवसुः, भवसूः, भानवम्, भानुः, भानुभम्, भुजः, रविः, रावेयम्, शयः, सवितृदेवता, सवितृदेवा, सवितृदैवतम्, सवितृदैवत्यम्, सावित्रम, हस्तः, हस्ता, शेषपर्यायास्तु हस्तार्कपर्यायतः प्रकल्प्याः।

चित्रापर्यायाः—चित्रः, चित्रम्, चित्रा, तक्षा (अन्), त्वष्टा (ष्टृ), त्वष्टृदेवता, त्वष्टृदेवा, त्वष्टृदैवतम्, त्वष्टृदैवत्यम्, त्वाष्ट्रम्, देवरथकारभम्, देवशिल्पिः, देवशिल्पी (इन्), देवसूत्रधारः

निर्जरवर्द्धकिः, निर्जरवर्द्धकी (इन्), विश्वकर्मा, (अन्), विश्वकर्मभम्, विश्वकृत, (त्), सुरवर्द्धकिः, सुरवर्द्धकी (इन्), सुरशिल्पी (इन) शेषपर्यायास्तु देवत्वष्टृशिल्पिपर्यायतः कल्पनीयाः।

स्वातिपर्यायाः—अनिलः, अनिली, आनिलेयम्, आशुगः, कः, निष्ठ्या, पवनः, पवना, पावनम्, मरुत् (द्), महाबलः, मारुतः, मारुतम्, वातः, वात्यम्, वायव्यम्, वायुः, वायुदेवता, वायुदेवा, वायुदैवतम्, वायुदैवत्यम्, समीरः, समीरणभम्, समीरणाख्यः, सामीरम्, स्वशनः, स्वातिः, स्वाती, शेषपर्यायास्तु वायुपर्यायत ऊहनीयाः।

विशाखापर्यायाः—इन्द्राग्निकम्, इन्द्राग्निदेवता, इन्द्राग्निदेवा, इन्द्राग्निदैवतम्, इन्द्राग्निदैवत्यम्, इन्द्राग्नी, ऐन्द्राग्निकम्, ऐन्द्राग्नेयम्, द्विनायकः, द्विपः, द्विदेवता, द्विदेवा, द्विदैवतम्, द्विदैवत्यम्, द्विसुरः, द्वीश, द्वीश्वरः द्व्यमरः, द्व्यर्यः, राधा, विशाखः, विशाखम्, विशाखा, शक्राग्नी, शतमखानलौ, शूर्पम् शेषपर्यायास्तु वह्नीन्द्रपर्यायत ऊहनीयाः।

अनुराधापर्यायाः—अनु (अ०), अनुराधः, अनुराधा, अनुराधाः, (पुं०ब०) अनुराधा, मित्रः, मित्रदेवता, मित्रदेवा, मित्रदैवतम् मित्रदैवत्यम्, मैत्रम्, मैत्री, मैत्र्यम्, शेषपर्यायास्तु मित्रपर्यायतः प्रकल्प्याः।

ज्येष्ठापर्यायाः—इन्द्रः, इन्द्रदेवता, इन्द्रदेवा, इन्द्रदैवतम्, इन्द्रदैवत्यम्, उग्रधन्वा (अन्), ऐन्द्रम्, ऐन्दी, कुलिशतारा, कुलिशभृत्तारा, जैष्णवम्, ज्येष्ठघ्नी, ज्येष्ठा, देवपः, धन्वभृद्भम्, नगारिभम्, पौरन्दरम्, पौरुहूतम्, माहेन्द्रम्, शतमखः, शाक्रम्, शातमखम्, सुरस्वामी (इन्), स्वर्गाधीश्वरः, शेषपर्यायास्त्विन्द्रपर्यायत ऊह्याः।

मूलपर्यायाः—अक्रतुभुक् (ज्), असुरः, अस्रपः, आशरः, आशिरः, क्रव्यादः, जटा, दानवः, नक्तञ्चरम्, निर्ऋतिः, निशाचरम्, नैकषेयम्, नैर्ऋतम्, नैर्ऋत्यम्, मूलः मूलम्, मूलवर्हणी, यातुभम्, रक्षः (अस्) रक्षोदेवता, रक्षोदेवा, रक्षोदैवत्यम्, रक्षोभम्, राक्षसः, शिफा, शेषपर्यायास्तु रक्षः पर्यायतः परिकल्पनीयाः।

पूर्वाषाढापर्यायाः—अम्बुदेवता, अम्बुदेवा, अम्बुदैवतम्, अम्बुदैवत्यम्, अम्भोभम्, अर्णोभम्, अषाडा, अषाढा, आप्यम्, आशाडा, आशाढा, आषाडा, आषाढा, कीलालम्, कैलालम्, क्षीरम्, क्षैरम्, जलम् तोयम् निष्कम्, नीरम्, नैरम्, नारम्, पयः (अस्), पयोदकुसुमम्, पानीयम्, पूर्वाषाढः, पूर्वाषाढा, पूषा, वनम्, वानम् वारि, वाः (र्), वार्भम्, विशम्, विषम्, वैषम्, सलिलम्, सागरः, सलिलम्, शेषपर्यायास्तु, जलपर्यायतः प्रकल्प्याः।

उत्तराषाढापर्यायाः—अशाडा, अषाढा, आशाडा, आशाढा, आषाडा, आषाढा, उत्तराषाडा, उत्तराषाढा, उषा, विश्वम्, विश्वे (पु०ब०), विश्वेदेवा, विश्वेश्वरः, वैश्वम्, वैश्वदेवम्, वैश्वदेवा, वैश्वदैवतम्, वैश्वदैवत्यम्, वैश्वी, शेषपर्यायास्तु विश्वेदेवपर्यायत ऊहनीयाः।

अभिजित्पर्यायाः—अजः, अभिजित् (द्), अभिजिद्भम्, कः, विधिः, शेषपर्यायास्तु विधिपर्यायतः कल्पनीयाः।

श्रवणपर्यायाः—अः, अच्युतभम्, अजम्, अनुश्रुतिः, आज्यम्, कर्णः, कार्ष्ण्यम्, गदाग्रजज्योतिः (इष्), गोविन्दः, जिनः, जैनम्, दानववैरी, (इन्), बलेशोडुः, मुकुन्दः, मुरजित् (द्), मुरारिभम्, वासुदेवः, विष्णुः, विष्णुदैवतम्, विष्णुदैवत्यम्, वैकुण्ठः, वैष्णवम्, शब्दग्रहः, शौरिः, श्रवः, श्रवणः, श्रवणभम्, श्रवणा, श्रवः (अस्), श्रुतिः, श्रोणा, श्रोत्रम्,

श्रीनाथः, श्रीपतिभम्, सनातनः, हरिः, हरिदेवः, शेषपर्यायास्तु विष्णुकर्णपर्यायत ऊहनीयाः।

धनिष्ठापर्यायाः—द्रविणम्, धनम्, धनिष्ठा, मन्दागा, वसु, वसुः, वसुदेवता, वसुदेवा, वसुदैवतम्, वसुदैवत्यम्, वासवम्, वित्तम्, श्रविष्ठा, स्वम्, स्वापतेयम्, शेषपर्यायास्तु धनपर्यायतः कल्पनीयाः।

शतभिषापर्यायाः—अपांपतिः, अप्पतिः, अम्बुपः, अम्भोऽर्यभम्, कार्यः, कीलालेशः, क्षीरेशः, जलेशः, तोयपः, पाथोनाथः, पाथोऽर्यः, पाशी (इन्), प्रचेताः (अस्), प्राचेताः (अस्), प्राचेतसम्, भिषक् (ज्), यादोऽर्यः, वनपः, वरुणः, वरुणदेवता, वरुणदेवा, वरुणदैवतम्, वरुणदैवत्यम्, वरुणभम्, वारीशः, वारुणम्, वारुणी, शतम्, शततारका, शततारा, शतभिषः, शतभिषम्, शतभिषक् (ज्), शतभिषा, संवरविभुभम्, सर्वतोमुखपः, शेषपर्यायास्तु वरुणजलपतिपर्यायतः कल्पनीयः।

पूर्वाभाद्रपदापर्यायाः—अंघ्रिः, अजः, अजचरणम्, अजपदम्, अजपत् (द्), अजपादः, अजपात् (द्), अजांघ्रिः, अजैकचरणम्, अजैकपादः, अजैकपात् (द्), अजैकपाददैवतम्, अजैकपाददैवत्यम्, अजैकांघ्रिः, आजम्, आजैकपदः आजैकपदम्, एकांघ्रिः, ओजपात् (द्), छागपात् (द्) छागैकपात् (द्), पूभा, पूर्वप्राष्ठपदम्, पूर्वप्रोष्ठपदर्क्षकम्, पूर्वाप्रोष्ठपदा, पूर्वाप्रोष्ठपादः, पूर्वप्राष्ठपादः, पूर्वभाद्रपदा, पूर्वाभाद्रपात् (द्) पूर्वाभाद्रा, प्राग्भाद्रः, प्रोष्ठपदः, प्रोष्ठपत् (द्), प्रौष्ठपदा, प्रौष्ठपात् (द्), भद्रः, भद्रतारका, भद्रातारा, भद्रपदः, भद्रपदा, भद्रभम्, भद्रर्क्षम्, शेषपर्यायास्त्वजैकांघ्रिपर्यायत ऊहनीयाः।

उत्तराभाद्रपदापर्यायाः—अहिर्बुध्निः, अहिर्बुध्न्यः, अहिर्बुध्न्यदेवता, अहिर्बुध्न्यदेवा, अहिर्बुध्न्यदैवम्, अहिबुध्न्यदैवतम्, अहिर्बुध्न्यदैवत्यम्, आहिर्बुध्नम्, आहिर्बुध्न्यम्, उत्तरभद्रका, उत्तरभाद्रम्, उत्तरादिभाद्रपदाः, उत्तराप्रोष्ठपादः, उत्तराप्रोष्ठपात् (द्), उपान्त्यभम्, उभा, परभाद्रपदा, परभाद्रपात् (द्) उत्तराभाद्रपदा, उत्तराभाद्रपात (द्), बुध्निः, बुध्न्यम्, बुध्न्यभम्, शेषपर्यायास्त्वहिर्बुध्न्यादि पर्यायतः प्रकल्प्याः।

रेवतीपर्यायाः—प्रन्तगतभम्, प्रान्तगतभम्, अन्तगतभर्मं, अन्त्यम्, अन्त्यभम्, आन्त्यम् नष्टदशनः, नष्टरदः, पूषदेवता, पूषदेवा, पूषदैवतम्, पूषदैवत्यम्, पूषभम्, पूषा (अन्), पौष्णम् पौष्णभम्, पौष्णी, रेवती, विरदः, स्तोमनष्टरदभम्, शेषपर्यायास्तु दन्तपूषादिपर्यायत ऊहनीयाः।

एकयोक्त्या त्रिपूर्वापर्यायाः—त्रिकपूर्वा, त्रिपूर्वा, पूर्वात्रयम् 'पूर्वाफाल्गुनी-पूर्वाषाढा-पूर्वाभाद्रपदाः'। इति।

तद्वत् त्र्युत्तरापर्यायाः—उत्तरात्रयम्, त्रिकोत्तराः, त्र्युत्तराः, 'उत्तराफाल्गुन्युत्तराषाढोत्तरा-भाद्रपदाः। इति।

तद्वदाषाढाद्वयपर्यायाः—आषाढाद्वयम् 'पूर्वाषाढोत्तराषढे' इति।

तद्वत् पूर्वोत्तरात्रयपर्यायाः—त्रियमली, त्रियुग्मतारा, त्रियुग्मी, पूर्वोत्तरात्रयम् पूर्वाफाल्गुन्युत्तराफाल्गुनी-पूर्वाषाढोत्तराषाढापूर्वाभाद्रोत्तराभाद्रपदाः इति।

तद्वद्भाद्राषाढाद्वयपर्यायाः—भाद्राषाढाद्वयम् 'पूर्वभाद्रपदोत्तराभाद्रपदा पूर्वाषाढोत्तराषाढाः' इति।

तद्वत् फल्गुयुग्मापर्यायाः—फल्गुयुग्मापूर्वाफाल्गुन्युत्तराफाल्गुन्यौ' इति।

कद्वयपर्यायाः—कद्वयम् 'रोहिण्यभिजिती' इति।

कत्रयपर्यायः—कत्रयम्, 'रोहिण-स्वात्यभिजिन्ति।' इति।

अजयुग्मापर्यायाः—अजयुग्मा, भाद्रद्वयम्, भाद्रयुग्मम्, 'पूर्वाभाद्रोत्तराभाद्रपदे'। इति।

सवारध्रुवस्थिरभनामानि—(ध्रुवस्थिरभम्) रोहिणी, उत्तराफाल्गुनी, उत्तराषाढा, उत्तराभाद्रपदा, रविवारः। इति।

सवारचरचलभनामानि—(चरचलभम्) श्रवणः, धनिष्ठा, शतभिषा, पुनर्वसु, स्वातिः, सोमवारः। इति।

सवारोग्रक्रूरभनामानि—(उग्रक्रूरभम्) पूर्वाफाल्गुनी, पूर्वाषाढा, पूर्वाभाद्रपदा, भरणी, मघा, मङ्गलवारः। इति।

सवारमिश्रसाधारणभनामानि—(मिश्रसाधारणभम्)—कृत्तिका, विशाखा, बुधवारः।' इति।

सवारलघुक्षिप्रभनामानि—(लघुक्षिप्रभम्) अभिजित्, अश्विनी, तिष्यः, हस्तः, गुरुवारः। इति।

सवारमृदुमैत्रभनामानि (मृदुमैत्रम्)—अनुराधा, चित्रा, मृगशीर्षम्, रेवती, शुक्रवारः।' इति।

सवारतीक्ष्णदारुणभनामानि—(तीक्ष्णदारुणाम्) आर्द्रा, आश्लेषा, ज्येष्ठा, मूलम्, शनिवारः।' इति।

पञ्चकनक्षत्रनामानि—(१) धनिष्ठोत्तरार्द्धम्, (२) शतभिषा, (३) पूर्वाभाद्रपदा, (४) उत्तराभाद्रपदा, (५) रेवती, चैतानि पञ्चकनक्षत्राणि स्युः।

त्रिपुष्करयोगकरनक्षत्रादिनामानि—(१) त्रिपादनक्षत्राणि (कृ., पु., उ. फा., वि., उ. षा., पू. भा.), (२) भद्रातिथयः, (३) क्रूरवाराश्चैतानि त्रिपुष्करयोगकरनक्षत्रादीनि ज्ञेयानि।

द्विपुष्करयोगकरनक्षत्रादिनामानि—(१) द्विपादनक्षत्राणि (मृगशिरा, चित्रा, धनिष्ठा) (२) भद्रातिथयः, (३) क्रूरवाराश्चैतानि द्विपुष्करयोगकरनक्षत्रादीनि ज्ञेयानि।

तारानामानि—(१) जन्म (न), (२) सम्पत् (द), (३) विपत् (द), (४) क्षेमः, (५) प्रत्यरिः, (६) साधकः, (७) वधः, (८) मैत्रः, (९) अतिमैत्रश्चैते नव ताराः स्युः।

वर्ज्यतारानामानि—(१) विपद्, (२) प्रत्यरिः, (३) वधश्चैतास्तिस्रस्ताराः शुभे वर्ज्याः। इहानुषङ्गतस्तारा बोध्याः।

इह प्रसङ्गाद् भवारजयोगनामानि—(१) आनन्दः, (२) कालदण्डः, (कालः), (३) धूम्रः, (४) प्रजापतिः (धाता), (५) सौम्यः, (६) ध्वांक्षः, (७) ध्वजः (केतुः), (८) श्रीवत्सः, (९) वज्रम्, (१०) मुद्गरः, (११) छत्रम्, (१२) मित्रम्, (१३) मानसम्, (१४) पद्मः, (१५) लुम्बः (१६) उत्पातः, (१७) मृत्युः, (१८) काणः, (१९) सिद्धिः, (२०) शुभ;, (२१) अमृतः, (२२) मुसलम्, (२३) गदः, (२४) मातङ्गः, (२५) रक्षः (अस्) (राक्षसः), (२६) चरः, (२७) सुस्थिरः (स्थिरः), (२८) प्रवर्द्धमानः (वर्द्धमानः), चेत्येतेऽष्टाविंशतिभवारजयोगाः स्युः। एषामानयनज्ञानं तु 'मुहूर्त्तचितामणौ'—'दास्रादर्के' इत्यस्मिन् श्लोके द्रष्टव्यम्।

कतिघटीवर्ज्ययोगनामानि—काणः, धूम्रः, ध्वांक्षः, पद्मः, मुद्गरः, मुसलः, लुम्बः, वज्रश्चेति।

सर्वत्याज्ययोगनामानि—उत्पातः, कालदण्डः, मृत्युः, रक्षश्चेति।

विष्कम्भादियोगनामानि—(१) विष्कम्भः, (२) प्रीतिः, (३) आयुष्मान् (मतुबन्तः), (४) सौभाग्यः, (५) शोभनः (६) अतिगण्डः, (७) सुकर्मा (अन्), (८) धृतिः, (९) शूलम्,

(१०) गण्डः, (११) वृद्धिः, (१२) ध्रुवः, (१३) व्याघातः, (१४) हर्षणः, (१५) वज्रम्, (१६) सिद्धिः, (१७) व्यतिपातः (व्यतीपातः), (१८) वरीयान् (ईयस्), (१९) परिघः, (२०) शिवः, (२१) सिद्धः, (२२) साध्यः, (२३) शुभः, (२४) शुक्लः, (२५) ब्रह्मा (अन्), (२६) ऐन्द्रः, (२७) वैधृतिश्चेत्येते विष्कम्भादयः सप्तविंशतियोगाः स्युः।

कतिघटीवर्ज्ययोगनामानि—विष्कम्भः, अतिगण्डः, शूलम्, गण्डः, व्याघातः, वज्र :, परिघश्चेति।

सर्वत्याज्ययोगनामानि—व्यति (ती) पातः, वैधृतिश्चेति।

तदुक्तम् ग्रन्थान्तरे —

विरुद्धसञ्ज्ञा इह ये च योगास्तेषामनिष्टः खलु पाद आद्यः।
सवैधृतिस्तु व्यतिपातनामा सर्वेऽप्यनिष्टाः परिघस्य चार्द्धम्॥
तिस्रस्तु योगे प्रथमे सवज्रे, व्याघातसंज्ञे नव, पञ्च शूले।
गण्डेऽतिगण्डे च षडेव नाड्यः, शुभेषु कार्येषु विवर्जनीयाः॥ इति।

तिथ्यादीनां क्षयवृद्धिभेदौ—

तिथिक्षयः, तिथिवृद्धिः। नक्षत्रक्षयः, नक्षत्रवृद्धिः। योगक्षयः, योगवृद्धिः।

तिथ्यादीनां क्षय-वृद्धि-घटी प्रमाणं यथा—षड्घट्यस्तिथिक्षयप्रमाणम्, एवं पञ्चघट्यस्तिथिवृद्धिप्रमाणम्, तदुक्तं धर्म्मशास्त्रे—'बाणवृद्धी रसक्षयः। इति।

सांघ्रिवेदघट्यो नक्षत्रक्षयः ४/१५ एवं सदलषड्घट्यो नक्षत्रवृद्धिः ६/३०विज्ञेया। अष्टघट्यो योगक्षयः। तथा व्यंघ्रियम-घट्यौ योगवृद्धि १/४५/५५ प्रमाणं ज्ञेयम्।

तदुक्तं मकरन्द विवरणे

'सांघ्रिसिन्धुरससिन्धुरप्रमा तारकातिथियुजां क्षयप्रमा।
नाडिकासु सदलाङ्गमार्गणा व्यंघ्रिलोचनमिता मताचितिः। इति।

ज्योतिर्विदाभरणेऽपि—

'वृद्धिक्षयौस्तः परमौ तिथौ सदा व्यर्द्धा रसाः सांघ्रिरसाश्च नाडिकाः।
सनेमतर्काः सपदार्णवास्तु भेनिस्त्र्यंशदोषौ द्विरदा युतौ क्रमात्। इति।

करणपर्यायाः—करणम्, कर्म्मवाटीखण्डम्, कर्मवाट्यर्द्धम्, कलाखण्डम्, कलादलम्, कलार्द्धम्, तिथिखण्डम्, तिथिदलम्, तिथ्यर्द्धम् चेति।

करणभेदौ—(१) चरकरणम् (२) स्थिरकरणम् चेति करणस्य द्वौ भेदौ स्याताम्।

तत्रादौ चरकरणनामानि—(१) बवः, (२) बालवः, (३) कौलवः, (४) तैतिलः, (५) गरः, (६) वणिजः, (७) विष्टिः, चैतानि सप्तचरकरणानि स्युः।

तदीशभेदाः—(१) इन्द्रः, (२) ब्रह्मा अन्), (३) मित्रः, (४) अर्यमा (अन्), (५) भूः, (६) श्रीः, (७) यमश्चैते चरकरणपतयः स्युः।

स्थिरकरणनामानि—(१) शकुनिः, (२) चतुष्पदः (चतुष्पात), (३) नागः, (४) किंस्तुघ्नः, चैतानि चत्वारि स्थिरकरणानि स्युः।

विष्टिपर्यायाः—ईशजा, भद्रा, भैमिका, भैमी, विट् (ष्), विष्टिः, शम्भुजाः, शम्भुभवा।' इति।

॥ इति बिहारप्रान्तसहरसामण्डलान्तर्गतदोरमाग्रामवास्तव्येन दैवज्ञचूड़ामणिश्रीसूर्यनारायणसूनुना डॉ० सुरकान्तझाख्येन ज्योतिर्विज्ञानशब्दकोषे पञ्चाङ्गसर्गः प्रथमः॥१॥

अथ कालसर्गः—२

सामान्यकालपर्यायाः—अनुवेलम्, अनेहा (स्), अपष्ठुः, अवसरः, आमतिः, कर्माहः, कालः, क्षणः, जहः, तिथः, दिष्टः, पीथः, पीयुः, मः, मतिः, वारः, वेला, समयः, सर्वमूषकः, इति।

इष्टवाचकशब्दाः—अभिमतः, अभीप्सितः, अभीष्टः, इष्टः, ईप्सितश्चेत्येते त्रिलिङ्गाः स्युः।

इष्टकालपर्यायाः—अभिमतकालः अभिमतसमयः, अभीप्सितकालः, अभीप्सितसमयः, अभीष्टकालः, अभीष्टदिष्टः, अभीष्टसमयः, अभीष्टानेहा (स्), इष्टकालः, इष्टदिष्टः, इष्टानेहा (स्), ईप्सितकालः, ईप्सितदिष्टः, ईप्सितसमयश्चैते पुँल्लिङ्गाः स्युः।

कालभेदाः—(१) विनिमे (मि) षः (सेकेण्ड), (२) निमे (मि) षः (मिनट), (३) काष्ठादिः, (४) कला, (५) क्षणः, (६) मुहूर्त्तः, (७) होरा (घण्टा) (८) अहोरात्रः (दिन रात), (९) पक्षः, (१०) मासः, (११) ऋतुः, (१२) अयनम्, (१३) गोलः, (१४) अब्दः (वर्षम्), (१५) युगम् (१६) मन्वन्तरम् (१७) कल्पः, (१८) कल्पान्तश्चैते कालस्याष्टादशभेदाः स्युः।

सूर्यसिद्धान्ते तु (१) मूर्तः (२) अमूर्तः (त्रुट्यादिः), एतौ द्वौ भेदावुक्तौ। उक्तं च—प्राणादिः कथितो मूर्तस्त्रुट्याद्योऽमूर्त्तसंज्ञकः। इति ९/९९।

विनिमेषपर्यायाः—विनिमिषः, विनिमेषः, (सेकेण्ड इति भाषा)।

निमेशपर्यायाः—निमिषः, निमेषः, लवद्वयम्, नेत्रपक्ष्मणोर्व्यापारात्मकः कालः, लध्वक्षरोच्चारणमात्रकालः, लवद्वयात्मकः कालो वा। (मिनट इति भाषा),

काष्ठापर्यायाः—काष्ठा, अष्टादशनिमेषात्मकः कालः।

लवपर्यायाः—काष्ठाद्वयम्, क्षणद्वयम्, लवः।

कलापर्यायाः—कला, त्रिंशत्काष्ठात्मकः कालः पञ्च दशलवात्मकः कालो वा।

लेशपर्यायाः—कलाद्वयम्, लेशः।

क्षणपर्यायाः—क्षणः, त्रिंशत्कलात्मकः कालः, पञ्चदशलेशात्मकः कालो वा।

त्रुटिपर्यायाः—त्रुटिः, त्रुटी, क्षणद्वयात्मकः कालो, लवद्वयात्मकः कालो वा। मतान्तरे तु निमेषद्वयम्।

विपलपर्यायाः—विपलम्, पलषष्टिभागैकभागः।

असपर्यायाः—असवः (पुं०ब०), प्राणाः (पुं०ब०) शरीरस्थपञ्चवायवः, दशगुर्वक्षरोच्चारणात्मकः कालः।

यथा—'दशगुर्व्वक्षरोच्चारकालः प्राणः षडात्मकैः। तैः पलं स्यात्तु तत्षष्ट्या

अहरसुपर्यायाः—अहः प्राणः, अहरसुः।

पलपर्यायाः—पलम्, विघटिका, विघटी, विदण्डः, विनाडिका, विनाडी क्वचित् 'चषा' इत्यपि दृश्यते। षट्प्राणात्मकः कालः।

घटीपर्यायाः—घटिका, घटी, दण्डः, धारिका, नाडिका, नाडी, नालिका, नाली, षष्टिदीर्घाक्षरोच्चारणात्मकः कालः, षष्टिपलात्मकः कालो वा।

यथा—दण्ड इत्यभिधीयते।। इतिशब्दार्थचिन्तामणिः। ११५५/२

षड्भिः प्राणैविनाडी स्यात्तत्पषट्या नाडिका स्मृता। नाडीष्ष्ट्या तु नाक्षत्रमहोरात्रं प्रकीर्तितम्।।'

इति सूर्यसिद्धान्तः १/११,१२

मुहूर्त्तपर्यायाः—घटीद्वयम्, दण्डद्वयम्, नाडीद्वयाम्, मुहूर्त्तः, द्वादशक्षणात्मकः कालः।

होरापर्यायाः—वेला, होरा, सार्द्धघटीद्वयात्मकः कालः षष्टिनिमेषात्मकः कालो वा (घण्टा इति भाषा)।

दिनपर्यार्यायाः—अंशम्, अंशकः, अंशकम्, अहः (अन्), कोकहितः, घस्रः, घ्रंसः, दिनम्, दिवम्, दिवसम्, दिवसः, दिवा (अ.) द्यु, द्यौः, पद्मबन्धुः, भास्वरः, याममालः, रविध्वजः, वारः, वासरः, वास्रः, व्युष्टम्, पञ्चदशमुहूर्तात्मकः कालः।

दिनभेदाः—(१) चान्द्रदिनम्, (२) नाक्षत्रदिनम्, (३) सौरदिनम्, (४) सावनदिनम्, चैते चत्वारो दिनभेदाः स्युः।

चान्द्रदिनपर्यायाः—ऐन्दवदिनम्, चान्द्रदिनम्, सौम्यदिनम्, एकतिथ्यात्मकः कालः।

नाक्षत्रदिनपर्यायाः—आर्क्षदिनम्, औडवदिनम्, नाक्षत्रदिनम्, षष्टिनाड्यात्मकः कालः।

सौरदिनपर्यायाः—आर्कदिनम्, ऐनदिनम्, सौरदिनम्। यथा—

'सावनम्। दण्डाः षष्टिरहः स्वरवगुणांशाढ्यास्तदैनं भवेदिति ग्रन्थान्तरे।

सावनदिनपर्यायाः—कुदिनम्, मेदिनीदिनम्, सावनम्, सूर्यद्वयान्तर्गतः कालः।

यथा—उदयादुदयं भानोर्भूमिसावनवासराः। इति सूर्यसिद्धान्ते।

प्रभातपर्यायाः—अहर्मुखम्, उषः (अस्) (न०), उषा, कल्पम्, काल्यम्, गोसर्गः, दिनादिः, निशात्ययः, पूर्वाह्णः, पूर्वेद्युः, प्रगे (अ०), प्रत्युषः (अस्) (न०), प्रत्यूषम् (न०), प्रत्यूषः (पु०), प्रभातम्, प्रविसरः, प्रातः (र्) (अ०), प्राह्णः, वासरास्यम्, विभातम्, विहानः, व्युष्टम्, सांयात्रिकम्, चैते दिनस्य प्रथमयामपर्यायाः स्युः।

सङ्गतपर्यायाः—सङ्गतः, सङ्गवः, चैतौ दिनस्य द्वितीययामपर्यायौ स्याताम्।

मध्याह्नपर्यायाः—दिनखण्डम्, दिनदलम्, दिनशकलम्, दिनार्द्धम्, दिवामध्यम्, मध्यन्दिनम्, मध्याह्नः, वासरमध्यम्, चैते दिनस्य तृतीययाम पर्यायाः स्युः।

कुतपपर्यायाः—कुतपः, कुतुपः, दिवाष्टममुहूर्त्तः, दिवाष्टमांशः, श्राद्धकालः।

पुण्याहपर्यायाः—पुण्याहम् (अह्नि पुण्योऽशः)।

दिनान्तपर्यायाः—अपराह्णः, उच्छूरः, उत्सूरः, दिनान्तम्, दिनात्ययः, दिनावसानम्, दिवावसानम्, विकालः, विकालकः, सवलिः, सायः, सायम् (अ०), सायाह्नश्चैते दिनस्य चतुर्थयामपर्यायाः स्युः।

सन्ध्यापर्यायाः—पितृसूः, पितृप्रसूः, रुमा, सन्धा, सन्ध्या।

सन्धिपर्यायाः—सन्धा, सन्धिः।

त्रिसन्ध्यपर्यायाः—उपवैणवम्, त्रिसन्ध्यम्, त्रिसन्ध्यकम्, वैणवम्।

त्रिसन्ध्यभेदाः—(१) प्राह्णः (२) मध्याह्नः (३) अपराह्णः (पराह्णः) चैते त्रिसन्ध्य भेदाः स्युः।

दिवामुहूर्त्त नामानि—(१) महादेवः, (२) सर्पः, (३) मित्रः, (४) पितरः (पुं. ब.), (५) वसुः, (६) जलम् (७) विश्वेदेवाः (प. ब.), (८) अभिजित् (द्) (न०) (९) ब्रह्मा (अन्), (१०) इन्द्रः, (११) इन्द्राग्नी, (पुं. द्वि.) (१२) राक्षसः, (१३) वरुणः, (१४) अर्यमा (अन्), (१५) भगः, चैते दिवापञ्चदश मुहूर्त्ताः स्युः।

रात्रिपर्यायाः—इन्दुकान्ता, उमा, उशाः (स्), उषा, कलापिनी, ? काली ? क्षणिनी, क्षपा,

क्षमा, क्षाणिनी, क्षाणी, क्षिपा? धारिः, घोरा, चक्रभेदिनी, चन्द्रस्त्री, तमस्विनी, तमा, तमिः, तमिस्रा, तमी, तामसी, तारकिणी,? तारा, तुङ्गा, तुङ्गी, त्रियामा, दोषा, नक्तम् (अ०), नक्तमुखा, नक्ता, निट् (श्), निशा, निशीथिनी, निशीथ्या, निषद्वरी, पूतार्चिः (स्), पैशाची, भूता, भौती, यामवती, यामिनी, याम्या, रक्षोजननी, रजनिः, रजनी, राक्षसी, रात्रिः, रात्री, वसतिः, वसती, वासतेयी, वासरकन्यका, वासुरा, वासुरोषा, विभावरी, शताक्षी, शय्या? शर्वरी, शशिशरीरेश्वरी, शार्वरी, श्यामा, हतार्चिः (स्), हिमा।' इति।

दर्शरात्रिपर्यायाः—तमसी, तामसी। यदि सा अतितमो युक्ता तमिस्रा इति।

पूर्णिमारात्रिपर्यायाः—यदि सा चन्द्रिकया युक्ता ज्योतिष्मती ज्यौत्स्नी' इति च।

रात्रिमुहूर्त्तनामानि—(१) शिवः, (२) अजचरणः, (३) अहिर्बुध्न्यः (४) पूषा (अन्), (५) अश्विनौ (पुं. द्वि.) (६) यमः, (७) अग्निः, (८) ब्रह्मा (अन्), (९) चन्द्रमाः (अस्), (१०) अदितिः, (११) बृहस्पतिः, (१२) विष्णुः, (१३) सूर्यः, (१४) त्वष्टा (ष्टृ), (१५) वायुः, चैते पञ्चदशरात्रिमुहुर्त्ताः स्युः।

प्रदोषपर्यायाः—दिनात्ययः, निण्मुखम्, निशावदनम्, निशास्यम्, प्रदोषः, मैथिलः, यामिनीमुखम्, रजनीमुखम् चैते रात्रेः प्रथमयामपर्यायाः।

साम्बाधिकपर्यायाः—साम्बाधिकः, इत्ययं प्रदोषतः परं रात्रेर्द्वितीययामपर्यायः।

अर्द्धरात्रपर्यायाः—अर्द्धरात्रः, अर्द्धरात्रकः, अवसरालयः, निःसम्पातः, निशाशकलम्, निशीथः, मध्यरात्रः, महानिशा, महानिट् (श्), महारात्रः सर्वावसरश्चैते रात्रेस्तृतीययामपर्यायाः।

अपररात्रपर्यायाः—अपररात्रः, अपररात्रकः, उच्चन्द्रः, पश्चिमरात्रः, ब्राह्माश्चैते रात्रेश्चतुर्थयामपर्यायाः।

रात्रिसमूहपर्यायाः—गणरात्रः, निशागणः। इति।

पक्षिणीपर्यायाः—'पक्षिणी' पूर्वापरदिनाभ्यां युक्तरात्रिपर्यायोऽयम् इति।

गर्भकपर्यायाः—गर्भकम्, रजनीद्वन्द्वम्, रात्रिद्वयम्।

कुक्कुरमादकपर्यायाः—श्वनिशम्, श्वनिशा।

अहोरात्रपर्यायाः—अहर्निट् (श्), अहोरात्रः, दिवानिट् (श्), दिवारात्रम्, द्युनिट् (श्), द्युरात्रम्, मुहूर्त्तत्रिंशात्मकः कालः।

दैनंदिनपर्यायाः—दैनंदिनम्, दिनेदिने भव इत्यर्थः।

यामपर्यायाः—घटीमालः, नाडीमालः, प्रहरः, यमः, यातुकः, यामः, दिनस्य रात्रेश्च तुर्यांशात्मकः कालः।

अर्द्धप्रहरपर्यायाः—अर्द्धप्रहरः, अर्द्धयमः, अर्द्धयातुकः, अर्द्धयामः, दिनस्य रात्रेश्चाष्टमांशात्मकः कालः।

पक्षपर्यायाः—अर्द्धमासः, दलः, दलमासः, नेममासः, पक्षः पञ्चदशाहोरात्रः, मासखण्डः, मासार्द्धकः, शकलमासः, पञ्चदशदिवारात्रात्मकः कालः।

पक्षभेदौ—(१) शुक्लः, (२) कृष्णश्चैतौ द्वौ पक्षौ स्याताम्।

शुक्लपक्षपर्यायाः—अच्छपक्षः, अब्जदीप्तिः, आपूर्यमाणपक्षः, चन्द्रविवर्द्धपक्षः, दिवाह्वयः, धवलपक्षः, पूर्वपक्षः, प्राक्पक्षः, बहुलेतरपक्षः, वलक्षपक्षः शुक्लपक्षः, सितपक्षः।

शुक्लवर्णपर्यायाः—अच्छः, अमलः, अर्जुनः, अवदातः, अवलक्षः, उज्ज्वलः, कृष्णेतरः, गौरः, धवलः पाण्डरः, पाण्डुः, पाण्डुरः, पुण्ट्रकः, वदातः, वलक्षः,

बिशदः, शुक्रः, शुक्लः, शुचिः, शुभ्रः, शुभ्रम् (अ०), श्येतः, श्वेतः, सितः, हरिणः।

कृष्णपक्षपर्यायाः—अपरपक्षः, असितपक्षः, कृष्णपक्षः, क्षयपक्षः, तमिस्रपक्षः, निशाह्वयः, बहुलपक्षः, शुक्लेतरपक्षः शामलपक्षः, सितान्यपक्षः, सितेतरपक्षः।

कृष्णवर्णप०–अशुभः, असितः, कालः, कृष्णः, नीलः, मेचकः, रामः, शितिः, श्यामः, श्यामलः।

मासप०—अहर्गणः, दिनमालः, पक्षौ, माः (स्), मासः, वर्षकोशः, वर्षाङ्गः, वर्षांशः, वर्षांशकः, श्रामः।

मासान्तप०—दिनमालान्तः, मासान्तः, मासावसानम्।

मासभेदाः—(१) चैत्रः, (२) वैशाखः, (३) ज्येष्ठः, (४) आषाढः, (५) श्रावणः, (६) भाद्रपदः, (७) आश्विनः, (८) कार्तिकः, (९) मार्गशीर्षः, (१०) पौषः, (११) माघः, (१२) फाल्गुनश्चेत्येते द्वादशमासाः स्युः।

चैत्रप०—कामसखः, कामसखा, चैत्रः, चैत्रिकः, फाल्गुनानुजः, मधुः, मन्मथसखः, मोहनिकः, मौहनिकः, वसन्तमासः, सुरभिमासः।

वैशाखप०—उच्छरः, उच्छुनः, उत्सरः, उत्सूरः, चैत्रानुजः, ज्येष्ठपूर्वजः, माधवः, राधः, वैशाखः।

ज्येष्ठप०—आषाढपूर्वजः, ईजानः, खरकोमलः, ज्येष्ठः, ज्येष्ठामूलीयः, ज्यैष्ठः, वैशाखानुजः, शुक्रः।

आषाढप०—अशाडः, अशाढः, आशाढः, आषाडः, आषाढः, ज्येष्ठानुजः, शुचिः, श्रावणपूर्वजः।

श्रावणप०—आषाढानुजः, नभः (अस्) (न.), 'सकारान्ता मासाः क्लीबेऽपि, इति 'वैजयन्ती)। नभाः (अस्) (पु.) नभसः, भाद्रपदपूर्वजः, श्रावणः, श्रावणिकः।

भाद्रपदपर्यायाः—आश्विनपूर्वजः, नभस्यः, नभस्यकः, प्रौष्ठः, प्रौष्ठपदः भाद्रः, भाद्रपदः, श्रावणानुजः।

आश्विनप०—अश्वयुक् (ज्), अश्वियुक् (ज्), आश्वयुजः, आश्विनः, इषः, कार्तिकपूर्वजः, भाद्रपदानुजः, भाद्रपदावरजः।

कार्तिकप०—आश्विनानुजः, आश्विनावरजः, ऊर्जः।

मार्गशीर्षपर्यायाः—अग्रहायणः, आग्रहायणिकः, कार्तिकानुजः, कार्तिकावरजः, पौषपूर्वजः, मार्गः, मार्गशिरः, मार्गशीर्षः, वत्सरादिः, वर्षमुखः, वर्षाद्यः, सहः (अस्) (न०), सहाः (अस्) (पु०), हैमनः। कार्तिकः, कार्तिकिकः, कौमुदः, बाहुलः, मार्गशीर्षपूर्वजः, शैल;, सैरः, सैरी (इन्)।

पौषप०—तिष्यः, तैषः, पुष्यः, पौषः, माघपूर्वजः, मार्गशीर्षानुजः, मार्गशीर्षावरजः, सहस्यः, सिद्धः, सैद्धः।

माघप०—तपः (अस्) (न०), तपाः (अस्) (पु०), तपसः, पौषानुजः पौषावरजः, फाल्गुनपूर्वजः, माघः, शातरः, शानकः।

फाल्गुनप०—चैत्रपूर्वः, तपस्यः, फल्गुनः, फल्गुनाडः, फल्गुनालः, फाल्गुनिकः, माघानुजः, माघावरजः, वत्सरान्तकः।

अधिमासप०–अधिकमासः, अधिमासः, असंक्रान्तिमासः, मलमासः, मलिनमासः, मलिम्लुचः।

अधिमासभेदौ—(१) संसर्पसञ्ज्ञकः, (२) अंहस्पतिसञ्ज्ञकश्चेत्येतावधिमासस्य द्वौ भेदौ स्याताम्।

अत्रविशेषः—यस्मिन्नब्दे क्षयमासो भवेत्तत्र द्वावधिमासौ स्याताम्। क्षयमासाद्योऽधिमासः पूर्वः

स संसर्पसञ्ज्ञकः सर्वशुभकर्मार्हः, अर्थात्तस्मिन् सर्वशुभकर्म कर्त्तव्यम्। क्षयमासादुत्तरो भाव्यधिमासस्तु अहंस्पतिसंञ्ज्ञकः, तस्मिन् सर्वशुभकर्म न कर्त्तव्यम्।

क्षयमासपर्यायाः—ऊनमासः, क्षयमासः, द्विसंक्रान्तिमासः, न्यूनमासः।

संक्रान्तिपर्यायाः—संक्रमः, (पु०) संक्रमणम् (न०), संक्रान्तिः (स्त्री०)।

संक्रान्तिभेदाः—(१) विषुवती (मेष-तुला) संक्रान्ती, (२) अयन (कर्क-मकर) संक्रान्ती, (३) षडशीत्यानन (मिथुन-कन्या-धनु-र्मीन) संक्रान्तयः, (४) विष्णुपदाह्वयाः (वृष-सिंह-वृश्चिक-कुम्भ) संक्रान्तयश्चैते संक्रान्तीनां चत्वारो भेदाः स्युः। तथा चोक्तं रामेण—षडशीत्याननं चापनयुककन्याझषे भवेत्। तुलाजौ विषुवं विष्णुपदं सिंहालिगोघटे। इति।

विषुवत्पर्यायाः—विषुणः, विषुवम्, विषुवान् (मतु०), विषुवत् (त्), विषुवती।

सम्पातपर्यायाः—सम्पातः (पु०) मिलनस्थानम्; सङ्गमःद्वयोः विषुवत्योः अयनयोः संक्रान्त्योर्वा मिलनस्थानं सम्यातो ज्ञेयः।

ऋतुपर्यायाः—ऋतुः, कालः, बीजम्, सतेरकम्, समयः, मासद्वयात्मकः कालः।

ऋतुभेदाः—(१) शिशिरः, (२) वसन्तः, (३) ग्रीष्मः, (४) प्रावृड् (ष्) (स्त्री०), वर्षा (स्त्री०), (५) शरत् (द्), (स्त्री०), (६) हेमन्तश्चैते षड्तवः, स्युः।

शिशिरपर्यायाः—कम्पनः, कोटनः, कोडनः, तपः (अस्), तुहिनर्त्तुः, शिशिरः, शीतः, शैखः? शैशिरः, शैषः, सैषः, हिमकूटः।

वसन्तपर्यायाः—इध्मः, इष्यः, ऋतुराजः, कान्तः, कामसखः, कुसुमाकरः, पिकबान्धवः, पिकानन्दः, पुष्पकालः, पुष्पमासः, पुष्पसमयः, पुष्पसारणः, बलाङ्कः, बलाङ्ककः, बलाङ्गः,, वसन्तः, सुरभिः।

ग्रीष्मपर्यायाः—आखोरः, उष्णः, उष्णकः, उष्णकालः, उष्णागमः, उष्णोपगमः, ऊष्मकः, ऊष्मा (अन्), उष्मागमः, ऊष्मायणः, ग्रीष्मः, घर्मः, तपः, तपर्तु, तपसमयः, तापनः, दिनाघः, पद्मः, शुचिः।

वर्षर्तुपर्यायाः—अब्दकालः, कालोक्षी (इन्), क्षरी (इन्), घनागमः, जलधरमालाकालः, जलार्णवः, तपात्ययः, प्रावृट् (ष्), प्रावृषा, मेघकालः, मेघकालागमः, वरिषाः (स्त्री०ब०), वर्षर्तुः, वर्षा, वर्षाकालः, वर्षाः (स्त्री०ब०), वार्षी।

शरदृतुपर्यायाः—कालप्रभातः, घनान्तः, घनात्ययः, प्रावृडत्ययः, मेघान्तः, वर्षावसानम्, शरत् (द्), शरदा।

हेमन्तर्त्तुपर्यायाः—ऊष्मसहः, प्रशलः (प्रसवः), प्रालेयः, रौद्रः, लोध्रः, शरदन्तः, शरदत्ययः, हिमागमः, हेमन्तः, हैमनः, हैमन्तः।

गोलपर्यायाः—गोलः। सायनार्कस्य मेषादिषड्राशिभ्रमणात्मकः कालः, तुलादिषड्राशिभ्रमणात्मकः कालश्चेति।

गोलभेदौ—(१) उत्तरगोलः, (२) दक्षिणगोलश्चैतौ गोलस्य द्वौ भेदौ स्याताम्। उक्तं च—गोलौ स्तः सौम्ययाम्यौ क्रियधटरसभे खेचरे' इति ग्र. ला.।

उत्तरगोलप०—उत्तरगोलः, उदग्गोलः, दक्षिणेतरगोलः, याम्यान्यगोलः, सौम्यगोलः।

दक्षिणगोलपर्यायाः—अनुदग्गोलः, उत्तरेतरगोलः, उदगन्यगोलः, दक्षिणगोलः, याम्यगोलः, सौम्येतरगोलः।

अयनपर्यायाः—अयनम् पथः, मार्गः, वर्त्म (अन्), सायनार्कस्य मकरादिषड्राशिभ्रमणात्मकः कालः, कर्कादिषड्राशिभ्रमणात्मकः कालश्चेति।

अयनभेदौ—(१) उत्तरायणम्, (२) दक्षिणायनम् चैतावयनस्य द्वौ भेदौ स्याताम्। उक्तं च—

'अथायने ते नक्रात्कीटाच्च षड्भे' इति ग्र. ला.।

उत्तरायणपर्यायाः—आग्नेयम्, उत्तरवर्त्म (अन्), उत्तरायणम्, उदगयनम्, सौम्यायनम्।

अत्रोदाहरणानि—'उत्तरपथावलम्बी (इन्), 'उत्तरमार्गगामी' (इन्,) उत्तरवर्त्मचारी (इन्) रविरितिशेषः।

दक्षिणायनप०—अनुदगयनम्, अपागयनम्, अवागयनम्, दक्षिणवर्त्म (अन्), दक्षिणायनम्, याम्यायनम्, विसर्गः।

अत्रोदाहरणानि—'दक्षिणपथावलम्बी' (इन्), दक्षिणमार्गगामी (इन्), दक्षिणवर्त्मचारी' (इन्), रविरितिशेषः।

संवत्सरपर्यायाः—अब्दः, अहर्जरः, आग्नेयः, उर्वटः, ऋतुवृत्तिः, कालग्रन्थिः, परवाणिः, मासमानः, मासमालः, युगांशः, युगांशकः, वत्सः, वत्सरः, वरिषम्, वर्षः (पुं०, न०), वायव्यः, शरत् (द्) (स्त्री०) शारद, श्रामः, सम्पत् (अ०), सम्वत् (अ०) सम्व्वत्सरः, (स्त्री), समाः (स्त्री०ब०), सर्वर्तुः, हायनः (पुं०न०)।

शलिवाहनीयशकवर्षपर्यायाः—शकः, शाकः, शाकेन्द्रकालः, शालिवाहनीयशकः, शालिवाहनीयशकाब्दः।

कलौ संव्वत्सरारम्भकर्त्तृ नृपनामानि—(१) युधिष्ठिरः, अस्य ३०४४ वर्षप्रमाणम् (२) विक्रमः, अस्य १३५ वर्षप्रमाणम्, (३) शालिवाहनः, अस्य १८०००वर्षप्रमाणम्। (४) विजयाभिनन्दनः, अस्य १००००वर्षप्रमाणम्। (५) नागार्जुनः, अस्य ४०००००वर्षप्रमाणम्। (६) कल्किः अस्य ८२१ वर्षप्रमाणम्। कलावेते षट् सँव्वत्सरारम्भकारका नृपाः स्युः।

वर्षभेदाः—(१) सावनवर्षः, (२) सौरवर्षः, (३) चान्द्रवर्षः, (४) आर्क्षवर्षः, (५) गौरववर्षश्चैते वर्षस्य पञ्च भेदाः स्युः।

सावनवर्षपर्यायाः—सावनवर्षः सावनाब्दः, सावनवत्सरः, षष्ट्युत्तरशतत्रयदिनात्मकः कालः।

सौरवर्षपर्यायाः—आर्कवर्षः, ऐनवर्षः, सौरवर्षः, हैलेयवर्षः। पञ्चषष्ट्युत्तरशतत्रयदिनात्मकः कालः।

चान्द्रवर्षपर्यायाः—आब्जवर्षः, ऐन्दववर्षः, चान्द्रवर्षः, वैधववर्षः, चतुः पञ्चाशदुत्तरशतत्रयदिनात्मकः कालः।

आर्क्षवर्षपर्यायाः—आर्क्षवर्षः, औडववर्षः, धैष्ण्यवर्षः, नाक्षत्रवर्षः। चतुर्विंशत्युत्तरशतत्रयदिनात्मकः कालः।

गौरववर्षपर्यायाः—गौरववर्षः, जैववर्षः, बार्हस्पत्यवर्षः, एकषष्ट्युत्तरशतत्रयदिनात्मकः कालः।

प्रभवादिसंव्वत्सरभेदाः—(१) प्रभवः, (२) विभवः, (३) शुक्लः, (४) प्रमोदः, (५) प्रजापतिः, (६) अङ्गिराः (अस्), (७) श्रीमुखः, (८) भावः, (९) युवा (अन्), (१०) धाता (तृ), (११) ईश्वरः (१२) बहुधान्यः, (१३) प्रमाथी (इन्), (१४) विक्रमः, (१५) वृषः, (१६) चित्रभानुः, (१७) सुभानुः, (१८) तारणः, (१९) पार्थिवः, (२०) व्ययः, (२१) सर्वजित् (द्), (२२) सर्वधारी (इन्), (२३) विरोधी (इन्), (२४) विकृतिः, (२५) खरः,

(२६) नन्दनः, (२७) विजयः, (२८) जयः, (२९) मन्मथः, (३०) दुर्मुखः, (३१) हेमलम्बः (म्बी), (३२) विलम्बः (म्बी), (३३) विकारी (इन्), (३४) शार्वरी (इन्), (३५) प्लवः, (३६) शुभकृत् (द्), (३७) शोभनः, (३८) क्रोधी (इन्), (३९) विश्वावसुः, (४०) पराभवः, (४१) प्लवङ्गः, (४२) कीलकः, (४३) सौम्यः, (४४) साधारणः, (४५) विरोधकृत् (द्), (४६) परिधावी (इन्), (४७) प्रमादी (इन्), (४८) आनन्दः, (४९) राक्षसः (५०) अनलः, (५१) पिङ्गलः, (५२) कालयुक्तः, (५३) सिद्धार्थी (इन्), (५४) रौद्रः, (५५) दुर्मतिः, (५६) दुन्दुभिः, (५७) रुधिरोद्धारी (इन्), (५८) रक्ताक्षी (इन्), (५९) क्रोधनः, (६०) क्षय—श्चैते प्रभवादयः षष्टिसम्वत्सराः स्युः।

पञ्चवर्षीययुगभेदाः—(१) सँवत्सरः, (२) परिवत्सरः, (३) इडावत्सरः, (४) अनुवत्सरः, (५) उद्वत्सरश्चैते पञ्चवर्षीययुगभेदाः स्युः।

द्वादशयुगस्वामिनामानि—(१) विष्णुः, (२) जीवः, (३) शक्रः, (४) अग्निः, (५) त्वष्टा (ष्टृ), (६) अहिर्बुध्न्यः, (७) पितरः (तृ), (८) विश्वेदेवाः, (९) सोमः, (१०) इन्द्राग्नी, (११) नासत्यौ, (१२) भगश्चैते द्वादशयुगस्वामिनः स्युः।

पैत्रपर्यायः—पैत्रः (पुं०), मानुषेण मासेनैकः पितॄणामहोरात्रात्मकः कालः।

दैवतप०—दैवतः (पुं०), मानुषेण वर्षेणैको देवानामहोरात्रात्मकः कालः।

दिव्यवर्षप०—दिव्यवर्षम् (न०),देवतानां षष्ट्यधिकशतत्रयाहोरात्रात्मकः कालः।

दिव्ययुगपर्यायः—दिव्ययुगम् (न०) दिव्यैर्द्वादशसहस्रवर्षैर्मानुषचतुर्युगं स्यात्।

दैवयुगप०—दैवयुगम् (न०) मानुषाणां कृतादियुगचतुष्टयात्मकः कालः।

युगभेदाः—(१) सत्यम्, (२) त्रेता, (३) द्वापरः, (४) कलिश्चैते युगस्य चत्वारो भेदाः स्युः।

सत्यपर्यायाः—कृतम्, सत्यम्, सत्ययुगम्, सौम्यम् चैतानि क्लीबलिङ्गानि स्युः।

त्रेताप०—अग्नायी, त्रेता, विसर्जिका चैताः स्त्रीलिङ्गाः स्युः।

द्वापरप०—आग्नेयः, द्वापरः, यज्ञियश्चैते पुँल्लिङ्गाः स्युः।

कलिप०—कर्मयुगम् (न०), कलिः (पु०), कलियुगम् (न०), झर्झरकः, पुष्यः (उभौ पुंसि)।

कल्पप०—कल्पौ (पुं०द्वि०), ये द्वे दैवे युगसहस्रे तौ नृणां कल्पौ स्थितिप्रलयकालावित्यर्थः।

ब्राह्मप०—ब्राह्मः, (पुं०) दैवे द्वे युगसहस्रेण एको ब्रह्मणोऽहोरात्रात्मकः कालः।

मन्वन्तरप०—मन्वन्तरम् (न०), दिव्यानां युगानां या एकसप्ततिरेकाधिका सप्ततिः तन्मन्वन्तरम्।

तदुक्तममरेण—

मन्वन्तरं तु दिव्यानां युगानामेकसप्ततिः।' इति अ० ४।२२

मयेनापि—

'युगानां सप्ततिः सैका मन्वन्तरमिहोच्यते।' इति सू०सि०१/१८

मनुभेदाः—(१) स्वायम्भुवः, (२) स्वारोचिषः, (३) उत्तमः (औत्तमिः), (४) तामसः (तामसिः), (५) रैवतः, (६) चाक्षुषः, (७) वैवस्वतः, (८) सावर्णिः, (९) दक्षसावर्णिः,

(१०) ब्रह्मसावर्णिः, (११) धर्मसावर्णिः, (१२) रुद्रसावर्णिः, (१३) रौच्यः (देवसावर्णिः), (१४) भौत्यः (इन्द्रसावर्णिः) इत्येते चतुर्दश मनवः स्युः।

प्रलयपर्यायाः—कल्पः, कल्पान्तः (कल्पसंहारः), क्षयः, जगत्क्षयः, जिहानकः, दैनन्दिनः, परान्तः, परिवर्तः, परीवर्तः, भूतप्लवः, महाप्रलयः, महासुप्तिः, युगान्तः (युगसंहारः), लोकशेषः, संवर्तः, संहारः, समसुप्तिः, सर्वनाशनः।

प्रतिसर्गप०—प्रतिसञ्चारः, प्रतिसर्गः, प्रलयः, संहारः।

कालान्यभेदाः—(१) पूर्वाह्णः, (२) मध्याह्नः, (३) सायाह्नः, (४) पूर्वरात्रः, (५) मध्यरात्रः, (६) अन्त्यरात्रः। (एते कालस्य षड्भेदाः स्युः।

कालान्यप्रभेदाः—(१) भूतम्, (२) वर्त्तमानम्, (३) भविष्यत्, इत्येते कालस्य त्रयः प्रभेदाः स्युः।

भूतकालपर्यायाः—अतीतकालः, गतकालः, भूतकालः, यातकालः, वृत्तकालः, व्यतीतकालः।

वर्तमानकालपर्यायाः—अतीतानागतभिन्नकालः, अद्यतनम्, अधुनातनम्, इदानीन्तनम्, वर्त्तमानः, वर्त्तमानकालः। (आरब्धात्परिसमाप्तिर्वर्तमानः कालः।)

भविष्यत्कालप०—अनागतम्, उदर्कः, भविष्यम्, भविष्यत्, भावी (इन्), श्वस्तनम्।

सद्यः फलपर्यायाः—सांदृष्टिकम्, सांसृष्टिकम्, यत्सद्यः फलं तत्।

वर्त्तमानकालफलपर्यायाः—तत्कालः, तदात्वम्, तात्कालिकम्, वर्तमानकालफलम्।

आगामिकालफलपर्यायाः—आगामिकालफलम्, आयतिः (शुभोत्तरः कालः), उदर्कः (उत्तरं भाविफलं सः), एष्यत्कालीनफलम्, भाविकर्मफलम्, भाविफलम्।

उषःकालपर्यायाः—अहर्मुखम्, उषः (अस्) (न०), प्रत्यूषः (पुं०) शेषपर्यायास्तु प्रभाते द्रष्टव्याः।

अस्य निर्णयो यथा—'पञ्चपञ्च उषःकालः' इति देवीभागवतम्। पञ्चपञ्चाशद्घटिकोत्तरमुषः कालः। अथवा-होराद्वयात्मकरात्रिशेषकालः।

ब्राह्ममुहूर्त्तपर्यायाः—ब्राह्ममुहूर्त्तः, स यथा—अरुणोदयकालस्य प्रथमदण्डद्वयात्मकः कालः।

मदनपारिजाते तु—'शेषार्द्धप्रहरो ब्राह्मो मुहूर्त्तः। इति।

तत्रापि—'सूर्योदयात्प्रागर्द्धप्रहरे यौ द्वौ मुहूर्त्तौ। तत्राद्यो ब्राह्मः, द्वितीयो रौद्रः।

यल्लक्ष्यम्—'ब्राह्मे मुहूर्त्ते उत्तिष्ठेत् ' इति वाग्भटः। 'ब्राह्मे मुहूर्ते किल तस्य देवी' इति रघुः ५/३६

अरुणोदयकालपर्यायाः—अरुणोदयकालः, ब्राह्ममुहूर्त्तः। सूर्योदयात्पूर्वं मुहूर्त्तद्वयात्मकः कालः।

स यथा—'रजनीशेषयामस्य शेषार्द्धमरुणोदयः।' इति।

अपि च—'चतस्रो घटिकाः प्रातरुणोदय उच्यते' इति।

देवीभागवते तु—'सप्तपञ्चारुणोदयः' इति। इह सप्तपञ्चाशद् घटिकोत्तरमरुणोदयः, अथवा—सद्वादशनिमेष-होरात्मकरात्रिशेषकाल इत्यर्थः।

गोधूलिकालपर्यायाः—गोधूलिः (पुं०) गोधूलिकालः (पुं०), गोधूली (स्त्री०), गोपांशुः (पुं०), गोरजः (अस्) (न०), गोरेणुः (पुं०स्त्री०)।

अयं कालविशेषः, स तु ऋतुवशेन ज्ञेयः।

स यथा—हेमन्तशिशिरयोर्मृदुतां प्राप्तपिण्डीभूतार्ककालः।

ग्रीष्मेऽर्द्धास्तार्ककालः। वर्षाशरद्वसन्तेष्वस्तगतार्ककालो गोधूली, एषा तु विवाहे शस्ता।

ह्योऽव्ययप०[१]—ह्यः (अस्) (अ०), गतेऽहनीत्यर्थः।

श्वोऽव्ययप०[२]—श्वः (अस्) (अ०), आगामिन्यहनीत्यर्थः।

अद्यश्वोऽव्ययप०[३]—अद्यश्वः (अस्) (अ०), कालविशेषः।

अद्यतनप०[४]—अद्यतनः (पुं०), कालविशेषः

स यथा—'अतीतरात्रेरन्त्ययामद्वयेन आगामिरात्रेराद्ययामद्वयेन च सहितो दिवसः।

अनद्यतनप०[५]—अनद्यतनः (पुं०), कालविशेषः, वर्त्तमानदिवसरहितसमयः, अद्यतनभिन्नः कालः

ऐषमप०[६]—ऐषमः (अस्) (अ०), वर्तमान वत्सरः।

परुत्प०[७]—परुत् (द्) (अ०), पूर्ववत्सरः।

परारिप०[८]—परारि (अ०), पूर्वतरवत्सरः, गततृतीयवर्षः।

इतरेद्यु प०[९]—इतरेद्युः (स्) (अ०), अन्यदिनम्।

अद्याव्ययप०[१०]—अद्य, अद्यत्वे, अधुना, इदानीम्, एतर्हि, सम्प्रति, साम्प्रतम्। एतेऽव्ययाः सन्ति।

सद्योऽव्ययप०[११]—अकस्मात्, एकपदे, सद्यः (स्), सपदि, सहसा। एतेऽव्ययाः सन्ति।

सदाऽव्ययप०[१२]—अजस्रम्, अनिशम्, शश्वत् (द्), सदा, सततं, सना, सनात् (द्), सर्वदा। एतेऽव्ययाः सन्ति।

मुहुरव्ययपर्यायाः[१३]—अभीक्ष्णम्, असकृत्, पुनः (र्), पुनः पुनः (र्), भूयः (स्), मुहुः (स्), मुहुर्मुहुः (स्) एतेऽव्ययाः सन्ति।

एकदाऽव्ययप०[१४]—एकदा, युगपद् (द्), उभावव्ययौ स्तः।

तदाऽव्ययप०[१५]—तदा, तदानीम्, तर्हि, एतेऽव्ययाः सन्ति।

यदाऽव्ययप०[१६]—यदा, यर्हि। (उभावव्ययौ स्तः)।

कदाऽव्ययप०[१७]—कदा, कर्हि। (उभावव्ययौ स्तः)।

कदाचनाव्ययप०[१८]—कदाचन, कदाचित्, कर्हिचित्, जातु। एतेऽव्ययाः सन्ति।

---

१. गतदिन, २. आने वाला दिन, ३. आजकल, ४. आज का, आज की वस्तुएं, आधुनिक, ५. आज का दिन नहीं, जो आज का नहीं ६. ऐसौ, ऐंसू, ७. गतवर्ष, ८. गत तृतीयवर्ष, परार, ९. अन्यदिन दूसरे दिन, १०. वर्तमानदिन, इस समय, ११. तत्काल, तत्क्षंण, उसी समय। १२. नित्य, हमेशा, १३. बारं बारं, १४. एक ही समय में, १५. तब, उसी समय, १६. जब, जिस समंय, १७. कब, किस समय, १८. किसी समय में।

इह प्रसङ्गात्केचिदव्ययाः कथ्यन्ते—

कुत्राव्ययप०[१]—कुत्र, (उभावव्ययौ स्तः)।

कुत्रचित्प०[२]—कुत्रचित् (अ०)।

क्वचनप०[३]—क्वचन, क्वचित्, (उभावव्ययौ स्तः)।

क्वापिप०[४]—कुत्रापि (अ०)।

क्वापिप०[५]—क्वापि (अ०)।

किञ्चनप०[६]—किञ्चन, किञ्चित्। (उभावव्ययौ स्तः)।

अत्रप०[७]—अत्र, इह, (उभावव्ययौस्तः)।

इत्थम्प०[८]—इत्थम्, एवम्, (उभावव्ययौ स्तः)।

मिथःप०[९]—अन्योन्यम् (त्रि०), इतरेतरम् (त्रि०), परस्परम् (अ०), मिथः (स्) (अ०)।

वाप०[१०]—अथवा, अन्यतरस्याम्, आहो, उत, उताहो, किम्, किमु, किमुत्, किमुत, किमूत, किंवा, यदि वा, यद्वा, वा, विभाषा। एते सर्वेऽव्ययाः सन्तिः।

पृथक्प०[११]—पृथक् (अ०), भिन्नः, अन्यत्रसंगतः, असंकीर्णः।

॥ इति बिहारप्रान्तसहरसामण्डलान्तर्गतदोरमाग्रामवास्तव्येन दैवज्ञचूडामणिश्रीसूर्यनारायणसूनुना डॉ० सुरकान्तझाख्येन ज्योतिर्विज्ञानशब्दकोषे कालसर्गः द्वितीयः॥२॥

अथ पर्वसर्गः – ३

पर्वपर्यायाः—उत्सवः, उद्धर्षः, उद्धवः, क्षणः (एते पुंसि), पर्व (अन्) (न०), महः (पुं०)।

वार्षिकपर्वभेदा कथनक्रमे चैत्रशुक्लपक्षीयपर्वनामानि—

१. शुक्लप्रतिपदि—कल्पादिः, नवरात्रारम्भः, वसन्तारम्भः, आरोग्यप्रतिपद्व्रतम्, विद्याव्रतम्, तिलकव्रतम्, रोटकव्रतम्।

(३) तत्र तृतीयायाम्—मन्वादिः, मत्स्यजयन्ती, गौरीव्रतम्, सौभाग्यशयनव्रतम्, मनोरथव्रतम्, अरुन्धतीव्रतम्।

(५) तत्र पञ्चम्याम्—कल्पादिः।

(८) तत्र अष्टम्याम्—भवान्युत्पत्तिः। शीतलाष्टमी। बुधाष्टमी।

(९) तत्र नवम्याम्—रामनवमी (रामजयन्ती), सा मध्याह्नव्यापिनीग्राह्याः, तत्र रामनामलेखनव्रतम्।

(११) तत्र एकादश्याम्—लक्ष्मीकान्तदोलोत्सवः, कामदैकादशी।

(१२) तत्र द्वादश्याम्—वामनद्वादशी; एषा वाराहपुराणोक्ता।

(१३) तत्र त्रयोदश्याम्—अशोकत्रिरात्रव्रतम्, मल्लिकादन्तधावनम्।

(१५) पूर्णिमायाम्—मन्वादिः, हनुमज्जयन्ती, वैशाखस्नानारम्भः, तस्याः पर्याया यथा-कर्दनी, काममहः कामिमहः, कूर्दना, कूर्दनी, चैत्रपूर्णिमा, चैत्री, मदनध्वजा, मदनोत्सवः, मधूत्सवः, वासन्ती, सुवसन्तः, सुवसन्तकः, स्मरोत्सवः।

वैशाखासितपक्षीयपर्वनाम—

(११) तत्र वरुथिन्येकादशी।

---

१. कहाँ, २. किसी स्थान में, ३. किसी समय में, ४. कहीं भी, ५. कभी, ६. अल्प, ७. यहाँ ८. इस प्रकार से ९. परस्पर, १०. अथवा या, विकल्प, ११. अलग-अलग, जुदा।

वैशाखशुक्लपक्षीय पर्वनामानि—

(३) तत्र तृतीयायाम्—कल्पादिः, अक्षय्यतृतीया, परशुरामजयन्ती। (७) तत्र सप्तम्याम् —गङ्गासप्तमी। (११) तत्र मोहिन्येकादशी। (१२) तत्र जामदग्न्यद्वादशी। (१३) तत्र त्रयोदश्याम्, गुर्जरदेशे कालीव्रतम्, अपामार्गदन्तधावनम्। (१४) तत्र चतुर्दश्याम्—नृसिंहजयन्ती। (१५) तत्र पूर्णिमायाम्—कूर्मजयन्ती, जलकुम्भदानम्। तस्याः पर्यायौ—विश्वविस्ता, वैशाखी।

ज्येष्ठासितपक्षीयपर्वनामानि—

(११) तत्र अपरैकादशी। (३०) तत्र भावुकाऽमावास्या।

ज्येष्ठसितपक्षीयपर्वनामानि—

(३) तत्र तृतीयायाम्—रमाव्रतम्। (१०) तत्र दशम्याम्—गङ्गोत्पत्तिः, दशहरा। (११) तत्र निर्जलैकादशी। (१२) तत्र रामद्वादशी। (१३) तत्र त्रयोदश्यां निर्गुण्डीदन्तधावनम्। (१५) तत्र पूर्णिमायाम्—मन्वादिः, तस्याः पर्यायाः—उपनिवेशिनी, ज्येष्ठी, ज्यैष्ठी, वटसावित्री।

आषाढासितपक्षीयपर्वनाम—

(११) तत्र योगिन्येकादशी।

आषाढसितपक्षीयपर्वनामानि—

(१०) तत्र दशम्याम्—मन्वादिः, आशादशमीव्रतम्। (११) तत्र एकादश्यां चातुर्मास्यारम्भः, गोपद्मव्रतम्, कोकिलाव्रतम्, हरिशयन्येकादशी। (१२) तत्र कृष्णद्वादशी। (१३) तत्र त्रयोदश्यां नारङ्गदन्तधावनम्। (१५) तत्र गुरुपूजा, तस्याः पर्यायाः—आषाढी, कृत्रिमाचारी, गुरुपूर्णिमा।

श्रावणासितपक्षीयपर्वनामानि—

(२) तत्र द्वितीयायाम् अशून्यव्रतम्। (४) तत्र चतुर्थ्याम् सङ्कष्टचतुर्थीव्रतम्। (७) तत्र सप्तम्याम्—शीतलाव्रतम्। (११) तत्र कामिकैकादशी।

श्रावणसितपक्षीयपर्वनामानि—

(१)तत्र प्रतिपदि—नक्तव्रतारम्भः, रोटकव्रतम्, सुकृतव्रतम्, स्वर्णगौरीव्रतम्। (३) तत्र मधुश्रवातृतीया। (४) तत्र चतुर्थ्याम्—कपर्दिविनायकव्रतम्, दूर्वागणपतिव्रतम् इदं कार्तिके वा। (५) तत्र नागपञ्चमी। (६) तत्र वर्णषष्ठी। (७) तत्र सप्तम्याम्—शीतलापूजनम्। (८) तत्र दुर्गाष्टमी। (१०) तत्र दशम्याम्—कल्किजयन्ती। (११) तत्र पुत्रदैकादशी। (१२) तत्र द्वादश्याम्—पवित्रार्पणम्, दधिव्रतम्, बुद्धद्वादशी। (१३) तत्र त्रयोदश्याम्—कारञ्जदन्तधावनम्। (१५) तत्र पूर्णिमायाम्—रक्षाबन्धनम्, अस्याः पर्यायाः श्रावणी, द्विवेदिनी, ऋषितर्पणी।

भाद्रपदासितपक्षीयपर्वनामानि—

(३) तत्र तृतीयायाम्—बृहद्गौरीव्रतम्, दशाफलव्रतम्। (६) तत्र चन्द्रषष्ठी, कपिलाषष्ठी। (८) तत्र अष्टम्याम्—मन्वादिः, कृष्णजयन्ती, कृष्णजन्माष्टमी, सा निशीथव्यापिनी ग्राह्या।

(११) तत्र अजैकादशी। (३०) तत्र अमावास्यायाम्—पिठोरीव्रतम्, अस्याः पर्यायः—कुशग्रहणी।

भाद्रपदसितपक्षीयपर्वनामानि—

(१) तत्र प्रतिपदि—नक्तव्रतशान्तिः।

(३) तत्र तृतीयायाम्—मन्वादिः, हरितालिका तद्व्रतञ्च।

(४) तत्र चतुर्थ्याम्—स्यमन्तकः, सिद्धिविनायकव्रतम्।

(५) तत्र ऋषिपञ्चमी, नागपञ्चमी, नागदष्टपञ्चमी।

(६) तत्र षष्ठ्याम्—ललिताव्रतम्, महाचम्पाव्रतम्।

(७) तत्र सप्तम्याम्—मुक्ताभरणव्रतम्, महालंक्ष्मीसप्तमी।

(८) तत्र अष्टम्याम्—महालक्ष्मीव्रतम्, दूर्वाष्टमीव्रतम्, ज्येष्ठाव्रतम्।

(९) तत्र नवम्याम्—दुःखनवमीव्रतम्।

(११) तत्र पद्मैकादशी।

(१२) तत्र द्वादश्याम्—दुग्धव्रतम्, कल्किद्वादशी, जयाद्वादशी, विष्णुशृङ्खलः, अस्यां श्रवणभे—श्रवणद्वादशी, वामनजयन्ती, वामनजयन्तीव्रतम्, अस्याः पर्यायाः—इन्द्रध्वजः, इन्द्रमहोत्सवः, इन्द्रस्योत्सवः, ध्वजोत्थानम्, शक्रध्वजः, शक्रध्वजोत्सवः, शक्रोत्सवः, शक्रोत्थानम्।

(१३) तत्र त्रयोदश्याम्—कङ्कोलदन्तधावनम्।

(१४) तत्र अनन्तचतुर्दशी, उमामहेश्वरव्रतम्, नष्टदोरकम्।

(१५) तत्र पूर्णिमायां श्राद्धारम्भः, अस्याः पर्यायौ प्राष्ठपदी, गाङ्गी।

आश्विनासितपक्षीयपर्वनामानि—

(४) तत्र चतुर्थ्यां दशरथललिताव्रतम्।

(६) तत्र षष्ठ्याम्—कपिलाषष्ठी।

(११) तत्र इन्दिरैकादशी।

(१३) तत्र त्रयोदश्याम्—कलियुगादिः।

(३०) तत्र पित्रममावास्या, अस्यां गजच्छायापर्व (अन्)।

आश्विन्सितपक्षीयपर्वनामानि—

(१) तत्र प्रतिपदि—नवरात्रारम्भः, नवरात्रव्रतम्, मातामहश्राद्धम्।

(५) तत्र उपाङ्गललितापञ्चमी।

(७) तत्र सप्तम्यां सरस्वतीपूजनम्, विल्वशाखापूजनम्, कालरात्रिसप्तमी।

(८) तत्र अष्टम्याम्—महारात्रिः, महाष्टमी, अशोकाष्टमी।

(९) तत्र नवम्याम्—मन्वादिः, भद्रकालीव्रतम्।

(१०) तत्र दशम्याम्—बौद्धजयन्ती, विजयादशमी।

(११) तत्र पाशाङ्कुशैकादशी।

(१२) तत्र पद्मनाभद्वादशी।

(१३) तत्र त्रयोदश्याम्—कङ्कलीदन्तधावनम्, गुर्जरे तु गोत्रिरात्रव्रतम्।

(१५) तत्र पूर्णिमायाम्-नवान्नभक्षणम्, जागरीव्रतम्, अस्याः पर्यायाः—आश्विनी, अराबिला, शारदी, सरस्वती, द्यूतपूर्णिमा, कोजागरः, शरत्पर्व (अन्), कौमुदीचारम्।

कार्तिकासितपक्षीयपर्वनामानि—(४) तत्र कर्कचतुर्थी, एषा तु दक्षिणदेशे आश्विने।

(६) तत्र स्कन्दषष्ठी। (११) तत्र रमैकादशी। (१२) तत्र द्वादश्याम्—गोवत्सपूजा। (१३) तत्र यमत्रयोदशी। (१४) तत्र नरकचतुर्दशी। (३०) तत्र अमायाम्—दीपमाला, लक्ष्मीपूजा, लक्ष्मीव्रतम्, बलिराज्योत्सवश्च, अस्याः पर्यायाः दीपमाला, दीपमालिका, दीपाली, दीपावली, बलिपर्व (अन्), यक्षनिट् (श्), यक्षरात्रिः।

कार्तिकसितपक्षीयपर्वनामानि—

(१) तत्र प्रतिपदि—बलिराजः, अन्नककूटः, पुष्करयोगः। (२) तत्र यमद्वितीया, भ्रातृद्वितीया।

(७) तत्र सप्तम्याम्—कल्पादिः। (८) तत्र गोपाष्टमी। (९) तत्र नवम्याम्—कृतयुगादिः अक्षयनवमी, कूष्माण्डनवमी। तत्र नवमीत एकादश्याम्—तुलसीविवाहः। (११) तत्र प्रबोधिन्येकादशी, भीष्मपञ्चकव्रतम्। (१२) तत्र द्वादश्याम् —मन्वादिः, नारायणद्वादशी। (१३) तत्र त्रयोदश्याम्—शनिप्रदोषव्रतम्, पक्षव्रतम्, गुर्जरदेशे तु कालीव्रतम्, कादम्बदन्तधावनम्। (१४) तत्र वैकुण्ठचतुर्दशी। (१५) तत्र पूर्णिमायाम्-त्रिपुरोत्सवः, मन्वादिः। अस्याः पर्यायाः—अरिश्रणी, कार्तिकी, धैनुकी, वत्सरान्तः।

मार्गशीर्षासितपक्षीयपर्वनासानि—

(३) तत्र तृतीयायाम्—सौभाग्यसुन्दरीव्रतम्, तपसि वा। (८) तत्र कालभैरवाष्टमी, कृष्णाष्टमी। (११) तत्र उत्पत्त्येकादशी, अस्यां वैतरणीव्रतम्। (३०) तत्र अमायाम्—गौरीतपोव्रतम्, महाव्रतम्।

मार्गशीर्षसितपक्षीयपर्वनामानि—

(५) तत्र नागपञ्चमी। (६) तत्र चम्पाषष्ठी। (९) तत्र नवम्याम्—कल्पादिः। (११) तत्र मोक्षदैकादशी। (१२) तत्र मत्स्यद्वादशी। (१३) तत्र त्रयोदश्याम्—पिप्पलदन्तधावनम्। (१४) तत्र चतुर्दश्याम्—पिशाचमोचनश्राद्धम्। (१५) तत्र पूर्णिमायाम्—दत्तजयन्ती, द्वात्रिंशीपौर्णिमाव्रतम। अस्याः पर्यायाः—आग्रहायणी, आग्रायणी, मार्गशीर्षी, मार्गी शङ्कुमूली।

इह केशवे—

मृगशीर्षयुतामार्गशीर्षे स्यादाग्रहायणी। इति।

वैजयन्त्यां तु विशेषः—

'मासाख्या कूर्चनक्षत्रयोगश्च गुरुणा यदा।
महाग्रहाणीत्याद्यास्त एव तिथयः क्रमात्। इति।

पौषसितपक्षीयपर्वनामानि—

(११) तत्र सफलैकादशी। (१२) तत्र सुरूपाद्वादशी। (३०) तत्र अमायाम्—अर्द्धोदयव्रतम्।

पौषसितपक्षीयपर्वनामानि—

(११) तत्रैकादश्याम्—मन्वादिः, पुत्रदैकादशी। (१२) तत्र कूर्मद्वादशी। (१३) तत्र त्रयोदश्याम्-औदुम्बरदन्तधावनम्। (१५) तत्र पूर्णिमा—अस्याः पर्यायाः—पौषी, महिषी, माता (तृ)।

केशवे तु—पुष्ययुक्ता पौर्णमासी मासे पौषी च सा पुन:। इति।

माघासितपक्षीयपर्वनामानि—

(४) तत्र सङ्कष्टहरचतुर्थी, अङ्गारकचतुर्थी। (११) तत्र षट्तिलैकादशी। (३०) तत्र अमायाम्—द्वापरादि:।

माघसितपक्षीयपर्वनामानि—

(१) तत्र प्रतिपदि—वल्लभजयन्ती। (४) तत्र तिलचतुर्थी। तस्याम्—गौरीव्रतम्, वरदव्रतम्। (५) तत्र पञ्चम्याम्—वसन्तपञ्चमी। (६) तत्र सूर्यषष्ठी। (७) तत्र सप्तम्याम्—मन्वादि:, अचलासप्तमी, पुत्रसप्तमी, रथसप्तमी। (८) तत्र भीष्माष्टमी। (९) तत्र द्रोणनवमी। (११) तत्र जयैकादशी। (१२) तत्र वराहद्वादशी, भीष्मद्वादशी। (१३) त्रयोदश्याम्—कल्पादि:। गुर्जरे तु कालीव्रतम्। न्यग्रोधदन्तधावनम्। (१५) तत्र पूर्णिमा, अस्या: पर्यायौ-अग्निपूर्णिमा, माघी।

फाल्गुनासितपक्षीय पर्वनामानि—

(११) तत्र विजयैकादशी।

(१४) तत्र चतुर्दश्याम्—शिवरात्रिव्रंतम्, सा तु निशीथव्यापिनी ग्राह्या।

फाल्गुनसितपक्षीयपर्वनामानि—

(१) तत्र प्रतिपदि—होलिकारम्भ:। (८) तत्र होलाष्टमी। (११) तत्र आमलकी (आमर्दी) एकादशी। (१२) तत्र गोविन्दद्वादशी, वाराहे तु नृसिंहद्वादशी। (१३) तत्र त्रयोदश्याम्—बादरदन्तधावनम्। (१५) तत्र पूर्णिमायाम्—मन्वादि:। होलिकोत्सव:।

अस्या: पर्याया:—दाण्डपाता, फाल्गुनी, वसन्तोत्सव:, हुताशनी, होला, होलाका, होलिका, होली।

एतया पूर्णिमया संलग्ना या प्रतिपत्तस्या: पर्याया:—धूलिमह:, पांसुमह: रजोमह:, रेणुमह: (धुलेण्डी इति भाषा)।

चैत्रासितपक्षीयपर्वनामानि—

(११) तत्र पापमोचन्येकादशी।

(१३) तत्र त्रयोदश्याम्—महावारुणीव्रतम्, महामहावारुणीव्रतम्, शनिप्रदोषव्रतम्, पक्षप्रदोषव्रतम्।

(३०) तत्र अमायाम्-मन्वादि:।

यस्मिन्नब्देऽधिमासस्तस्य पक्षद्वयो: कमलैकादश्यौ। मतान्तरेतु-अधिके सिते 'पद्मिनी'। असिते 'परमा' इति।

प्रतिमासे पञ्चपर्वभेदा:—

(१) कृष्णचतुर्दशी, (२) कृष्णाष्टमी, (३) अमावास्या, (४) पूर्णिमा, (५) रविसंक्रान्तिदिनं, चैतानि पञ्च पर्वाणि स्यु:।

यदुक्तं ज्योतिस्तत्त्वे—१६-७-३१४।

'भूतकृष्णाष्टमीदर्शराका: संक्रान्तिवासर:।
भानोरेतानि पर्वाणि पञ्च सत्सु विवर्जयेत्। इति।

पञ्चाङ्गे ये वार्षिकफलाधिकारिणस्तेषां नामानि—

यथा—(१) संव्वत्सरः, (२) राजा (अन्), (३) मंत्री (इन्), (४) सस्याधिपः, (५) पश्चिमधान्येश, (६) मेघेशः, (७) रसाधिपः, (८) नीरसेशः, (९) फलेशः, (१०) धनेशः, (११) दुर्गेशः, (१२) महावर्षा, (१३) युवराजः, (१४) धनेशः, (१५) अन्नेशः, (१६) करणाधिपः, (१७) ग्रहेशः, (१८) मेघराजः, (१९) नागराजः, (२०) वायुराजः, (२१) वर्षाधान्यादयः, (२२) आर्द्राप्रवेशः, (२३) गुरुचारः, (२४) शनिचारः, (२५) शनजिह्वा, (२६) रोहिणीवासः, (२७) जगल्लग्नम्, (२८) वर्षलग्नम्, (विंशोत्तरीमतेन, अष्टोत्तरीमतेन वा (२९) आयः (लाभः), (३०) व्ययः, 'एषामानयनविधिस्तु 'मकरन्दकल्पलतादिषु, द्रष्टव्याः। इति।

।। इति बिहारप्रान्तसहरसामण्डलान्तर्गतदोरमाग्रामवास्तव्येन दैवज्ञचूड़ामणिश्रीसूर्यनारायणसूनुना डॉ० सुरकान्तझाख्येन ज्योतिर्विज्ञानशब्दकोषे पर्वसर्गः तृतीयः।।३।।

अथ राशिसर्गः–४

राशिपर्यायाः—ऋक्षम्, क्षेत्रम्, गृहम्, भम्, भवनम्, एते क्लीबलिङ्गाः स्युः, राशिः (पु०), (अपममण्डलार्कांशो राशिर्बोध्यः)।

राशिभेदाः—(१) मेषः, (२) वृषः, (३) मिथुनः, (४) कर्कः, (५) सिंहः, (एते पुँल्लिङ्गाः) (६) कन्या, (७) तुला, (उभौ स्त्रीलिङ्गौ), (८) वृश्चिकः (पु०), (९) धनुः (षु) न०, (१०) मकरः, (११) कुम्भः, (१२) मीनः, (एते पुँल्लिङ्गाः) इत्येते द्वादशराशयः सन्ति।

मेषपर्यायाः—(२)[1] अजः, अविः, आद्यः, क्रियः, छागः, पशुः, बस्तः, मेढ़ः, मेड्रः, विश्वः, वृष्णिः, शुभः, (३) आदिमः, उरणः, उरभः, ऊर्णायुः, एडकः, छगलः, तुबुरः, तुम्बुरः, प्रथमः, (४) छगलकः, मुख्यतमः।

वृषप०—(१) गौः (गो), भः, (२) उक्षा (अन्), उस्रः, गोपः, भद्रः, वृष, वही (इन्) (३) अनड्वान् (अनुडुह), ऋषभः, उक्षकः, ककुद्मान् (मतु०), गोकुलः, गोपतिः, ताबुरिः, ताबुरुः, द्वितीयः, पुङ्गवः, वृषभः, गोरमणः, बलीवर्दः, सौरभेयः, (५) बलीवर्दकः।

मिथुनप०—(१) युक् (ज्), (२) कामः, जित्मः, द्वन्द्वः, नृयुक् (ज्), यमम्, युगम्, युग्मम्, वीणा, (३) जतुमः, जितुमः, जुतुमः, तृतीयः नृयुग्मः, मन्मथः, मिथुनः, युगलम्, वल्लकी, विपञ्ची, वैणिकम्, स्त्रीपुंसः, (४) नृमिथुनम्, वीणाधरः, वीणावादः, (५) नरमिथुनम्, वीणा, वैणिकम्।

कर्कप०—(२) कर्कः, कर्की (इन्), कीटः, कूर्मः, चान्द्रम्, (३) कटकः, कर्कटः, कुलिरः, कुलीरः, चतुर्थः, चन्द्रभम्, विधुभम्, (४) कटकभम्, कर्कटकः, कर्काटकः, शशाङ्कभम्, षाडशांघ्रिः, (५) अपत्यशत्रुः, चतुर्थराशिः, चन्द्रभवनम्, जम्बालनीडः, षोडशपादः, सलिलचरः, (६) अपत्यशात्रवः, अपत्यसपत्नः, षोडशचरणः।

---

[1] राशिग्रहपर्यायारम्भे स्थिताङ्काः, पर्यायस्यैकाद्यक्षराङ्कनज्ञेया। एवमन्यत्रापि।

सिंहपर्यायाः—(२) लेयः, सिंहः, हरिः, (३) इनभम्, केसरी (इन्), द्विपारिः पञ्चमः, पञ्चास्यः, मृगद्विट् (ष्) मृगराट् (ज्), मृगारिः, मृगेन्द्रः, मृगेशः, रविभम्, वनपः, हर्य्यक्षः, (४) इभरिपुः, कण्ठीरवः, करिरिपुः, करिवैरी (इन्), काननेशः, चित्रकायः, द्विपारिभम्, नखायुधः, पञ्चनखः, पञ्चमभम्, पञ्चाननः, पुण्डरीकः, मृगदृष्टिः, मृगराजः, मृगरिपुः, मृगाधिपः, मृगारातिः, मृगाशनः, (५) इभजिघांसुः, पाणिजायुधः, वनजवनः, वारणवैरी (इन्), (६) करिकुलरिपुः, (७) सिन्धुरवैरिराशिः।

कन्याप०—(१) स्त्री, (२) कन्या, कान्ता, तन्वी, नारी, बाला, भीरुः, योषा, योषित् (त्), रामा, वधूः, वशा, वामा, षष्ठः, षष्ठी, सुता, (३) अङ्गना, अबला, एणाक्षी, कन्यका, कन्यात्मः, कलदृक् (श्), कामिनी, कुमारी, तरुणी, दयिता, दारिका, पाथेयः, पाथोनः, प्रमदा, बालिका, भामिनी, महिला, महेला, मानिनी, मृगाक्षी, मृगीदृक् (श्), युवतिः, योषिता, रमणी, ललना, वधुटी, वधूटि, वनिता, वर्णिनी, सुन्दरी, सुमुखी (४) अभिरामा, कन्यात्मकः, कुमारिका, कुरङ्गीदृक् (श्), जलजाक्षी, नितम्बिनी, पाथोनकः, सीमन्तिनी, सुलोचना, सुवासिनी, हरिणदृक् (श्), (५) एणनयना, पद्मदलाक्षी, मृगनयना, मृगलोचना, वामलोचनाः हरिणेक्षणा, (६) कुरङ्गनयना, कुरङ्गलोचना, प्रतीपदर्शिनी, वामविलोचना।

तुलाप०—(२) जूकः, तुलः, तुला, तुली, तूलः? (१) तौलिः, तौली (इन्), घटः, पिचुः, यूकम्, वणिक्, (ज्), (३) तुलकः, तुलभृत्, तुलाभृत्, तूलभृत्, तौलिकः, नैगमः, वणिजः, वाणिजः, सप्तमः, (४) आपणिकः, तुलाधरः, धटगतिः, पण्याजीवः, वैदेहकः, सार्थवाहः, (६) क्रय विक्रयकः, वणिगधिपतिः।

वृश्चिकप०—(२) अलिः, अली (इन्), आलिः, कीटः, कोर्पिः, कौर्पी (इन्), कौर्प्यः, द्रौणः, भृङ्गः, (३) अष्टमः, कौर्पिकः, द्विरेफः, भ्रमरः, वृश्चिकः, षडंघ्रिः, सविषः, (४) चञ्चरीकः, पुष्पन्धयः, मधुकरः, वृश्चिकिकः सरीसृपः।

धनुःप०—(२) अश्वः, अश्वी (इन्), अस्त्री (इन्), चापः, चापी (इन्), तौक्षः, तौक्षी (इन्), धनम्? धनुः, धनुः (ष्), धन्वा (अन्), धन्वी (इन्), शस्त्री (इन्), शार्ङ्गम्, हयः, (३) अस्त्रिभम्, इष्वासः, कार्मुकम्, कोदण्डम्, चापभृत् (द्), तौक्षिकः, धनुर्भृत् (द्), धनुष्कः, धनुष्मान् (मनु०), धानुष्कः, नवमः, निषङ्गी (इन्), शरगः, शारङ्गम्, सारङ्गम्, हयाङ्गम्, (४) अश्वकायः, अश्वतनुः, इष्वासनम्, कार्मुकभृत्, कोदण्डभृत्, चापधरः, तुरङ्गाङ्गम्, धनुर्धरः, बाणासनम्, रोपासनम्, शरधरः, शरासनम्, हयतनुः, (५) कार्मुकधरः, कोदण्डधरः, तुरगतनुः, तुरगजंघः, विशिखासनम् (६) तुरङ्गजघनः, (७) हयनरविदेहः।

मकरप०—(२) एणः, ग्राहः, नक्रः, मृगः, कुरङ्गः, कुम्भीरः, दशमः, मकरः, मृगास्यः, वातायुः, हरिणः, (४) आकोकेरः, एणाननः, करिकरः, कुरङ्गास्यः, मृगमुखः, मृगवक्त्रः, मृगाननः, शार्ङ्गरवः, शिशुमारः, हरिणास्यः, (५) अजिनयोनिः, कुरङ्गवक्त्रः, कुरङ्गास्यकः,

मृगवदनः, हरिणाननः, (६) ऋषविशेषभुक् (ज्) हरिणवदनः।

कुम्भपर्यायाः—(१) बः, (२) कुटः, कुम्भः, घटः, निपः, (३) कलशः, कुम्भभृत्, (द्) घटभृत्, तोयभृत्, हृद्रोगः, (४) कलशभृत्, कुम्भधरः, घटधरः, घटरूपः, चित्तामयः, चेतोगदः, तोयधरः, पयोधरः, (५) कलशधरः, हृदयरोगः।

मीनप०—(२) अन्त्यम्, कन्दः, झषः, तिमिः, प्रोष्ठी (इन्), मत्स्यः, मीनः, शक्ली (इन्), (३) अण्डजः, अन्तिमः, अन्त्यभम्, इत्थसिः, तुरष्कः, पाठीनः, पाठीरः, मीनालिः, विसारः, शकली (इन्), शकुली (इन्), शफरः, शफरी (इन्), अन्त्यगमः, अन्त्यराशिः, अनिमिषः, अनिमेषः, अवसानम्, जलचरः, तिमिद्वयः, तिमियुगः, पृथुरोमा (अन्), मीनद्वयः, मीनयुगः, मीनयुग्मः, वैसारिणः, (५) अभ्ररसौकाः (अस्), तिमियुगलः, नीरनिकेतनः, मीनयुगलः, शफरिद्वयः, शफरियुग्मः, (६) अनिमेषाह्वयः, घनरसचरः, पानीयनिकेतः, शफरियुगलः, (७) पुष्करागारराशिः, (८) वलाहकरसागारः।

एकयोक्त्या राशिद्वयपर्यायाः—

मेषवृश्चिकपर्यायाः—कौजम्, भौमम्, भौमिजम्, लौहिताङ्गम्।

वृषतुलाप०—काव्यम्, भार्गवम्, शौक्रम्, सैतम्।

मिथुनकन्याप०—बौधम्, बौधनम्, रोधनम्, चान्द्रिभम्, सौम्यभम्।

धनुमीनप०—गौरवम्, जैवम्, बार्हस्पत्यम्, वाचस्पत्यम्।

मकरकुम्भप०—मान्दम्, मार्दवम्, छायाजम्, भानुजम्।

मेषराशिनक्षत्रभेदाः—अश्विनी, भरणी, कृत्तिकाद्यपादश्च 'मेषराशिः'।

वृष—कृत्तिकाद्व्यादिपादाः, रोहिणी, मृगशिरोऽर्द्धम् च वृषराशिः।

मिथुन—मृगशीर्षोत्तरार्द्धम्, आर्द्रा, पुनर्वसोरादित्रयः पादाश्च मिथुनराशिः।

कर्क—पुनर्वस्वन्त्यपादः, तिष्यः, आश्लेषान्तं च कर्कराशिः।

सिंह—मघा, पूर्वाफाल्गुनी, उत्तराफाल्गुन्याद्यपादश्च सिंहराशिः।

कन्या—उत्तराफाल्गुनीद्व्यादिपादाः, हस्तः, चित्रार्द्धञ्च कन्याराशिः।

तुला—चित्रोत्तरार्द्धम्, स्वाती, विशाखादित्रयः पादाश्च तुलाराशिः।

वृश्चिक—विशाखान्त्यपादः, अनुराधा, ज्येष्ठान्तं च 'वृश्चिकराशिः।

धनुः—मूलम्, पूर्वाषाढा, उत्तराषाढाद्यपादश्च 'धनुराशिः'।

मकर—उत्तराषाढाद्व्यादिपादाः, श्रवणम्, धनिष्ठार्द्धञ्च मकरराशिः।

कुम्भ—धनिष्ठोत्तरार्द्धम्, शतभिषा, पूर्वाभाद्रपदादित्रयःपादाश्च कुम्भराशिः।

मीन—पूर्वाभाद्रपदान्त्यपादः, उत्तराभाद्रपदा, रेवत्यन्तञ्च मीनराशिः।

कालपुरुषाङ्गे राशिविभागः—(१) मूर्धा (शिरः), (२) मुखम्, (३) वक्षःस्थलम्, (४) हृदयम्, (५) क्रोडम् (उदरम्), (६) अम्बरभृत् (कटी), (७) बस्तिः, (८) मेहनम्, (९) ऊरू, (१०) जानू, (११) जंघे, पादद्वयमेव कालपुरुषस्याङ्गे क्रमशो मेषादिराशीनां विभागो ज्ञेयः।

राशीनां चरादिभेदाः—(१) चरः, (२) स्थिरः, (३) द्विस्वभावश्चैते राशीनां त्रयोभेदाः स्युः।

चरराशिनामानि—मेषः, कर्कः, तुला, मकरः,

स्थिरराशिनामानि—वृषः, सिंहः, वृश्चिक,, कुम्भः।

द्विस्वभावराशिनामानि—मिथुनः, कन्या, धनुः, मीनः।

चरराशिपर्याया—चपलः, चपलोदयः, चरः, चरोदयः, चलः, चलोदयः, तरलः।

स्थिरराशिप०—अगः, अगोदयः, अचपलः, अचपलोदयः, अचरः, अचरोदयः, अचलः, अचलोदयः, अतरलः, स्थास्नुः, स्थिरः।

द्विस्वभावराशिप०—द्वन्द्वम्, द्वितनुः, द्विदेहः, द्विप्रकृतिः, द्विमूर्तिः, द्विस्वभावः, द्व्यङ्गम्।

राशीनां मनुष्यादिभेदाः—(१) मनुष्यः, (२) पशुः, (३) कीटः, (४) जलजश्चैते राशीनां मनुष्यादिचत्वारो भेदाः स्युः।

मनुष्यराशिनामानि—मिथुनः, कन्या, तुला, धनुःपूर्वार्द्धम्, कुम्भश्चैते मनुष्यराशयो लग्नस्थाः, पूर्वस्यां बलिनः, स्युः।

पशुराशिनामानि—मेषः, वृषः, सिंहः, धनुपरार्द्धः, मकरपूर्वार्द्धश्चैते पशुराशयः खस्था अवाच्यां बलिनः स्वामिनः स्युः।

जलजराशिनामानि—कर्कः, मकरपरार्द्धः, मीनश्चैते जलजराशयः, सुखस्थाः कौबेर्यां बलिनः स्युः।

कीटराशिनाम—वृश्चिकः, अयमस्ते प्रतीच्यां बली।

मनुष्यराशिपर्यायाः—द्विपदः, नरः, मनुजः, मनुष्यः, मर्त्यः, मानवः, मानुषः इति।

चतुष्पदराशिप०—चतुष्पदः, चतुष्पाद् (त्), चतुष्पादः, चतुश्चरणः, चतुरंघ्रिः, चरिः, तुर्यपादः, तिर्यङ् (च्), तूर्यपादः, पशुः।

कीटराशिप०—कीटः।

जलचरराशिप०—अब्जः, अम्बुजः, आप्यः, जलचरः, जलजः, जलराशिः, वारिजोदयः, वारिप्रसूतोदयः।

शीर्षोदयराशिनामानि—मिथुनः, सिंहः, कन्या, तुला, वृश्चिकः, कुम्भश्च।

पृष्ठोदयपराशिनामानि—मेषः, वृषः, कर्कः, धनुः, मकरश्च।

उभयोदयराशिनाम—मीनः।

दिवाबलिराशिनामानि—मिथुनः, सिंहः, कन्या, तुला, वृश्चिकः, कुम्भः, मीनश्च।

निशाबलिराशिनामानि—मेषः, वृषः, कर्कः, धनुः, मकरश्च।

पूर्वदिङ्निवासिराशिनामानि—मेषः, सिंहः, धनुश्च।

दक्षिणदिङ्निवासिराशिनामानि—वृषः कन्या, मकरश्च।

पश्चिमदिङ्निवासिराशिनामानि—मिथुनः, तुला, कुम्भश्च।

उत्तरदिङ्निवासिराशिनामानि—कर्कः, वृश्चिकः, मीनश्च।

राशिस्वामिनामानि—(१) कुजः (मङ्गलः), (२) शुक्रः (भृगुः), (३) बुधः (सौम्यः), (४) चन्द्रः (सोमः), (५) रविः (सूर्यः), (६) बुधः, (७) शुक्रः, (८) मङ्गलः, (९) बृहस्पतिः (गुरुः), (१०) शनिः (मन्दः), (११) शनिः, (१२) बृहस्पतिश्चेत्येते मेषात् क्रमात् द्वादशराशीनां स्वामिनः सन्ति।

आत्मीयपर्यायाः—अन्तरङ्गम्, आत्मीयम्, निजम्, नैजम्, स्वम्, स्वकम्, स्वकीयम्, स्वीयम्।

स्वराशिप०—आत्मीयभम्, आत्मीयराशिः, निजगृहम्, निजभम्, निजराशिः, निजर्क्षम्, स्वगृहम्, स्वभम्, स्वराशिः, स्वर्क्षम्, स्वकीयगृहम्, स्वकीयभम्, स्वकीयराशिः, स्वकीयर्क्षम्, स्वीयगृहम्, स्वीयभम्, स्वीयराशिः, स्वीयर्क्षम् ।

स्वांशप०—स्वनवांशः स्वभागः, स्वलवः, स्वांशः, स्वांशकः।

वर्गोत्तमांशप०—उत्तमभागः, उत्तमलवः, उत्तमांशः, उत्तमांशकः, वर्गोत्तमः, वर्गोत्तमभागः, वर्गोत्तमलवः, वर्गोत्तमांशः, वर्गोत्तमांशकः।

वर्गोत्तमांशभेदा—(१) प्रथमां (आद्यां) शक, (२) पञ्चमांशकः, (३) नवमांशकश्चैते वर्गोत्तमांशस्य त्रयो भेदाः स्युः।

ते च यथा—चरराशिषु प्रथमनवांशः, स्थिरराशिषु पञ्चमनवांशः, द्विस्वभावराशिषु नवमनवांशो वर्गोत्तमसंज्ञको बोध्यः।

।। इति बिहारप्रान्तसहरसामण्डलान्तर्गतदोरमाग्रामवास्तव्येन दैवज्ञचूड़ामणिश्रीसूर्यनारायणसूनुना डॉ० सुरकान्तझाख्येन ज्योतिर्विज्ञानशब्दकोषे राशिसर्गः चतुर्थः।।४।।

अथ ग्रहसर्गः—५

ग्रहपर्यायाः—(२) खगः, खसत् (द्), खेटः, खौकाः (अस्), ग्रहः, द्युगः, द्युसत् (द्), (३) अभ्रगः, खगामी (इन्), खगेन्द्रः, खचरः खचारः, खचारी (इन्), खपान्थः, खवर्त्मा (अन्), खेगामी (इन्), खेचरः, गोगतिः, ग्रहेन्द्रः, दिविषत् (द्), दिवौका (अस्), द्युगतिः, द्युगामी (इन्), द्युचरः, द्युचारी (इन्), नभः सत् (द्), नभोगः, विबुधः, वियद्गः, विहगः, विहङ्गः, व्योमगः, (४) अभ्रगतिः, अभ्रगामी (इन्), अभ्रचरः, अम्बरगः, आकाशगः, गगनगः, गगनसत् (द्), दिविचरः, नभश्चरः, पुष्करगः, वियच्चरः, विहङ्गमः, व्योमगतिः, व्योमगामी (इन्), व्योमगृहः, व्योमगेहः, व्योमचरः, व्योमचारी (इन्), व्योमाटनः, व्योम्निगतिः, (५) अम्बरगतिः, अम्बरगामी (इन्), अम्बरचरः, अम्बरचारी (इन्), अम्बरपान्थः, अम्बरवासः, अम्बरायणः, आकाशगतिः, आकाशगामी (इन्), आकाशगेहः, आकाशचरः, आकाशचारी (इन्), आकाशवासः, आकाशाटनः, गगनगतिः, गंगनगामी (इन्), गगनगेहः, गगनचरः, गगनचारी (इन्), गगनवासः, गगनवासी (इन्), गगनाटनः, गगनेचरः, पुष्करचरः, पुष्करालयः, व्योमनिवासः, (६) अनिलाध्ववेगः, अम्बरनिवासः, आकाशनिलयः, आकाशसदनः; गगननिवासः, आकाशनिलयः, आकाशसदनः, गगननिवासः, गगनभ्रमणः, गगनविचारी (इन्), गगनाधिवासी (इन्), विष्णुपदायनः, हरिवर्त्मचर, हरिवर्त्मचारी (इन्), (७) पुष्करालयशाली (इन्), महाबलवर्त्मगः, विबुधमार्गचरः, व्योमतलाधिवासः, समीरायणचारी (इन्), (८) गगनगृहनिवासः, पत्ररथायनायनः।

आकाशप०—अनन्तम्, अन्तरिक्षम्, अन्तरीक्षम्, अभ्रम्, अभ्रपथः, अम्बरम्, अर्कमार्गः, अवटी (इन्), आकाशः, उडुपथः, खम्, गगनम्, ग्रहनेमिः, घनाश्रयः, चन्द्रमार्गः, छायापथः,

तारापथः, तारावर्त्म (अन्), दिगवस्थानम्, द्यौः (दिव्), दिव्यम्, देवमार्गः, देववर्त्म (अन्), द्युः (अ०), द्यौः (द्यो), नक्षत्रमार्गः, नक्षत्रवर्त्म (अन्), नभः (अस्), नभसः, नाकः, पक्षिमार्गः, पुष्करम्, बाणमार्गः, भुवः (अस्) (अ०), मरुत् पथ, मरुद्वर्त्म (अन्), महावलिम्, मेधवर्त्म (अन्), मेघाध्वा (अन्), वायुः, वायुमार्गः, वायुवर्त्म (अन्), वार्वाहाश्रयः, वियत् (द्), विष्णुपदम्, विहायः (अस्), विहायसः, विहयसा (अ०), व्योम (अन्), सुरपथः, सुरवर्त्म (अन्), स्वर्गवासी (इन्)।

शुभग्रहपर्यायाः—(१) सन् (त्), (२) इष्टः, चारुः, पुण्यः, भव्यः, रम्यः, शस्तः, शुभः, साधुः, सौम्यः, (३) अनघः, अनुग्रः, अमलः, उत्तमः, निर्मलः, प्रशस्तः, विमलः, शस्तकृत् (द्), शस्तदः, शुभकृत्, (द्), शुभदः, शोभनः, सत्खसत् (द्), सत्खौकाः (अस्), सद्ग्रहः, सुकृतः, सुखगः, सुखेटः, सुग्रहः, (४) अनशुभः, गतमलः, भव्यग्रहः, विनिर्मलः, वीतमलः, शुभकरः, सत्खचरः, सद्द्युगतिः, सन्नभोगः, (५) कल्याणग्रहः, भव्यनभोगः, शुभग्रहेन्द्रः, सद्व्योमवासः, सुकृतग्रहः, सुवियचच्चरः, (६) कल्याणखचरः, भव्यवियत्पान्थः, शुभगगनगः, शुभवियविच्चरः, (७) कल्याणखगमनः, भव्यवियच्चरेन्द्रः, शुभनभोगमनः, सुकृतवियच्चरः, (८) सुकृतगगनचारी (इन्), सुकृतगगनवासः।

पापग्रहपर्यायाः—(२) अंहाः (अस्), अद्यः, असन् (त्) उग्रः, एनाः (अस्), खरः, खलः, तीव्रः, दुष्टः, पङ्कः, पापः, पाप्मा (अन्), (३) अचारुः, अपुण्यः, अभव्यः, अशस्तः, अशुभः, असाधुः, असौम्यः, आग्नेयः, कण्टकः, कलुषः, कल्मषः, किल्बिषः, गर्हितः, दहनः, दुरितः, दुग्रहः, दुष्कृतः, पापकः, पावकः, मलिनः, वृजिनः, (४) अनुत्तमः, अशुभकृत् (द्), अशुभदः, अशोभनः, असत्करः, असुकृतः, शुभेतरः, सौम्येतरः, (५) अशुभकरः, अशोभनकृत् (द्), अशोभनदः, सुकृतेतरः, (६) अशोभनखगः, असुकृतखेटः, (७) अशुभनामधरः, अशुभनामधेयः।

बलपर्यायाः—ऊर्जम्, ओजः (अस्), तरः (अस्), बलम्, वीर्यम्, शक्तिः, शुष्मम्, शौर्य्यम्, सत्त्वम्, सहः (अस्), सरम्, स्थाम् (अन्), शेषस्त्वांयुर्दायादिवर्गे।

बलिग्रहपर्यायाः—(२) पुष्टः, प्राणी (इन्), बली (इन्), सारी (इन्), (३) असलः, ओजस्वी (इन्), ओजिष्ठः, पीवरः, प्राणभाक् (ज्), प्राणवान् (मतु०), बलभाक् (ज्), बलवान् (मतु०), बलस्थः, मांसलः, विक्रान्तः, वीर्यभाक् (ज्), वीर्यवान् (मतु०), शक्तिभाक् (ज्), शक्तिभृत् (त्), शक्तिमान् (मतु०), सप्राणः, सबलः, सवीर्य्यः, सशौर्यः, ससारः, सहस्वान् (मतु०), सारभाक् (ज्), सारभृत् (त्), सारमान् (मतु०) (४) उपचितः, प्राप्तवीर्यः, बलदीप्तः, बलशाली (इन्), बलोदारः वीर्यवाही (इन्), शक्तियुक्तः, शक्तिशाली (इन्), शौर्यवाही (इन्), (५) प्राणोपपन्नः, बलोपपन्नः, वीर्यवन्मुखी (इन्), वीर्योपपन्नः, सम्प्राप्तबलः, (६) प्रकटितबलः, विरचितबलः।

अतिबलिग्रहपर्यायाः—(३) प्राबल्यः, बलिष्ठः, बलीयान् (ईयसुन), विक्रमः, (४)

अतिप्राणी (इन्), अतिबली (इन्), अतिवीर्यः, अतिशौर्यः, अधिप्राणी (इन्), अधिबली (इन्), प्राणाधिक्यः, बलाधिक्यः, बलोत्कटः, बलोत्कर्षः, वीर्यवत्ता (स्त्री०), श्रेष्ठबल, श्रेष्ठवीर्यः, (५) अतिशक्तिता (स्त्री०) अत्यन्तप्राणी (इन्), अत्यन्तबली (इन्), अत्यन्तसत्त्वः, प्राणप्रधानः, बलप्रधानः, महोग्रवीर्यः, महोग्रसारः, वीर्यप्रधानः, शौर्यप्रधानः, (६) अतिपराक्रमः, स्फुरदंशुजालः, (७) उत्कटकान्तियुक्तः, श्रेष्ठबलाधिशाली (इन्)।

हीनबलग्रहपर्यायाः—(२) रिक्तः, (३) अप्राणः, अबलः, अवीर्यः, अशौर्यः, असारः, दुर्बलः, निःप्राणः, निःशौर्यः, निःसत्त्वः, निःसारः, निर्बलः, निर्वीर्यः, विप्राणः, विबलः, विवीर्यः, विशौर्यः विसारः, (४) इतबलः, कृशबलः, क्षीणबलः, क्षीणवीर्यः, क्षीणसारः, गतप्राणः, गतबलः, बलमुक्तः, बलोज्झितः, बलोद्रिक्तः, वीतबलः, वीर्योज्झितः, सारमुक्तः, हीनबलः, (५) ओजोरहितः, प्राणवर्जितः, बलवर्जितः, विधूतवीर्यः, (६) क्षीणपराक्रमः, हीनपराक्रमः, (७) पराक्रमवर्जितः।

कल्याणमात्रपर्यायाः—कल्याणम् (न०), स्त्रियां कल्याणी, अन्ये टाबन्ताः। काम्यम्, कुशलम्, क्षेमम्, प्रशस्तम, भन्दम्, भद्रम्, भविकम्, भव्यम् भावुकम्, भासुरम्, मङ्गलम्, भद्रम्, शम् शस्तम्, शिवम्, शुभम्, श्रेयः (अस्), श्वः श्रेयसम्, श्वोवसीयसम्, सुकृतम्, सूनृतम्, प्रशस्तम्, शुभम्, शोभनम्, सत् (द्) (न०), क्वचित्तु—वरम्, श्रेष्ठम्, वरिष्ठम् वरीयः (ईयसुन्) (न०)।

अन्यत्रापि—

इष्टम्, उत्तमम्, हितम्, अतिशोभनम्, पुष्कलम्, श्रेयः (अस्), श्रेष्ठम्, सत्तमम्। अतिशोभनाद्याः शब्दाः शोभनस्य इत्यन्ये।

क्वचित्तु—वरीयः (ईयसुन्), वरिष्ठम्, अप्यतिशोभनस्य।

सुखपर्यायाः—कम्, निर्वृतिः, शर्मम्, शर्म (अन्), शातम्, सातम्, सुखम्, सौख्यम्।

आनन्दपर्यायाः—आनन्दः, आनन्दथुः, आमोदः आह्लादः, चित्तप्रसन्नता, तृप्तिः, नन्दथुः, नन्दिः, प्रमदः, प्रमोदः, प्रीतिः, मद्ः, मुत् (द्), शम्भरः, सम्मदः, हर्षः, हृष्टिः, ह्लादः।

क्लेशप०—आदीनवः, आश्रवः, आस्रवः, क्लेशः, 'आदीनवः, दोषे कष्टे चेत्यन्ये।' क्लेशः, परिश्रमे इत्यन्ये।

दुःखप०—अकम्, अर्तिः, असुखम्, आभीलम्, आमनस्यम्, आर्तिः, कष्टम्, कृच्छ्रम्, दुखम्, पीडा, प्रगाढ़ः, प्रसूतिजम्, बाधा, विराधनम्, वेदना, व्यथा।

अशुभप०—अनिष्टम्, अप्रशस्तम्, अरिष्टम्, अशस्तम्, अशुभम्, अशोभनम्, असत् (द्), नेष्टम्, रिष्टम्।

ग्रहभेदाः—(१) सूर्यः, (२) चन्द्रः, (३) मङ्गलः, (४) बुधः, (५) बृहस्पतिः, (६) शुक्रः, (७) शनिः (८) राहुः, (९) केतुश्चेत्येते नवग्रहाः सन्ति (१) गुलिकः (२) मान्दिश्चेति द्वावुपग्रहौ। ताजिकशास्त्रे तु मुन्था इत्युपग्रह उक्तः।

आधुनिकैस्तु (१) हर्शलः, (२) न्येप्च्यूनश्चेति प्लुटो इत्यपि एकोग्रह उक्तः।

रविपर्यायाः—(१) कः, खः, गौः (गो), द्यौः (द्यो)।

(२) अंशुः, अगः, अद्रिः, अरुः (ष्), अर्कः, अर्चिः (ष्), अविः, अहिः, आत्मा (अन्), इनः, कतिः, खगः, खाङ्कः, ज्योतिः (ष्), तपु (ष्), तर्षुः, त्वष्टा (ष्ट्), द्युकृत् (द्), द्युमान् (मतु.) पपीः, पाथः, पाथिः, पासिः, पीतः, पीतुः, पीथः, पीयुः, पुष्टः, पृष्णिः, पेरुः, ब्रध्नः, ब्रह्मा (अन्), भगः, भातुः, भानुः, भान्तः, भास्वान् (मतुः), मन्थः, मित्रः, वाजी (इन्), विष्णुः, शुचिः, सुरः, सूनुः, सूरः, सूर्यः, हंसः, हरिः, हस्ती (इन्), हेलिः।

(३) अंशुमान् (मतु०), अध्वगः, अरुणः, अर्चिष्मान् (मतु.), अर्मया (अन्), अव्यथः, असुरः, आदित्यः, उष्णकृत् (द्), उष्णगुः, उष्णभाः, (स्), उष्णभृत् (द्), उष्णरुक् (च्), उष्णांशुः, उष्णोस्त्रः, कर्मसूः, कालकृत् (द्), कालभृत् (द्), काश्यपः, काश्यपिः, किरणः, किशोरः, कुञ्जारः, कुतपः, क्षपारिः, खंद्योतः, खमणिः, खररुक् (च्), खरांशुः, गभस्तिः, गोपतिः, ग्रहमुट् (ष्), ग्रहेशः, घर्मांशुः, चण्डांशु, चित्रार्चिः (ष्) छायेशः, जगत्सूः, ज्योतिष्मान् (मतु), ज्योतिषः, तपनः, तरणिः, तरलः, तापनः, तिग्मगुः, तिग्मभाः (स्), तिग्मांशुः, तीक्ष्णभाः (स्), तीक्ष्णांशुः, तीव्रांशु, त्रितनुः, त्रिमूर्तिः, दिनकृत् (द्), दिनपः, दिनेशः दिवसेट् (श्), दीप्तिमान् (मतु), दृशानः, द्युनाथः, द्युनेता (तृ), द्युपतिः, द्युप्रणीः, द्युभर्ता (तृ), द्युमणिः, द्युरश्मिः, धरुणः, ध्वान्तारिः, पतङ्गः, पद्माक्षः, पिङ्गलः, पुष्करः, प्लवगः, भाकोषः भानुमान् (मतु०), भानेमिः, भारविः, भास्करः, महिरः, मिहिरः, मार्तण्डः, मार्ताण्डः, मुण्डीरः, यमसूः, रात्रिद्विट् (ष्), रुचिपः, वारुणः, वारकृत् (द्), वासन्तः, विवस्वान् (मतु.), विश्वप्साः (आकारान्तः), सप्ताश्वः, सविता (तृ०)।

(४) अंशुधरः, अंशुपाणिः, अंशुभर्ता (तृ), अंशुमाली (इन्), अंशुहस्तः, अब्जपाणिः, अब्जबन्धुः, अब्जहस्तः, अभीशुमान् (मतु०), अभीषुमान् (मतु०), अम्बरीषः, अम्बुजिनीट् (श्), अम्बुजेशः, अव्यथिषः, अशीतरुक् (च्) अशीतांशुः, अहरीशः, अहर्नटः, अहर्पतिः, अहर्मणिः, अहस्करः, अहिमत्विट् (ष्), अहिमांशुः, अह्नोभर्ता (तृ), उदरथिः, उष्णकरः, उष्णघृणिः, उष्णतेजाः (अस्), उष्णद्युतिः, उष्णधामा (अन्), उष्णभानुः, उष्णरश्मिः, उष्णरुचिः, उष्णवपुः, (ष्), उष्णवृष्णिः, कमलिनीट् (श्), कर्णपिता (तृ), कर्मसाक्षी (इन्), कान्तिपतिः, कालकृतः, कालिन्दीसूः, काश्यपेयः, कोकबन्धुः, खगवरः, खतिलकः, खरकरः, खरघृणिः, खरतेजाः (अस्), खरदीप्तिः, खरमहाः (अस्), खररश्मिः, खररुचिः, खाध्वनीन, गभस्तिमान् (मतु०), गवांविभुः, ग्रहपतिः ग्रहपुषः, ग्रहराजः, घर्मकरः, घर्मघृणिः, घर्मद्युतिः, घर्मभानुः, घर्मरोचिः (ष्), घस्राधीशः, चण्डकरः, चण्डच्छविः, चण्डभानुः, चण्डमहाः (अस्), चण्डरश्मिः, चित्रभानुः, चित्ररथः, छायाजानिः, छायानाथः, छायापतिः, छायाभर्ता (तृ), जगच्चक्षुः (ष्) जगद्दीपः, जगन्नेत्रः, जगत्साक्षी (इन्), जलचौरः, ज्योतिः पीथः, तमिस्रहा (अन्), तमोतुदः, तमोपहा (अन्), तमोरिपुः, तमोहन्ता (न्तृ), तिग्मकरः,

तिग्मतेजाः (अस्), तिग्मद्युतिः, तिग्मभानुः, तिग्ममहाः (अस्), तिग्मरश्मिः, तिग्मरोचिः (ष्), तिमिरारिः, तीक्ष्णकरः, तीक्ष्णद्युतिः, तीक्ष्णभानुः, तीक्ष्णमहाः (अस्), तीव्रकरः, तीव्रभानुः, तेजःपतिः, तेजोनिधिः, तेजोराशिः, त्रयीतनु, त्रयीतपः, त्रयीमूर्तिः, त्विषान्निधिः, त्विषांपतिः, त्विषांप्रभुः, त्विषामीशः, दहनांशुः, दिनकरः, दिनकर्त्ता (तृ), दिनदयः, दिनपतिः, दिनप्रणीः, दिनबन्धुः, दिनभर्ता (तृ), दिनमणिः, दिनरत्नम्, दिनवसुः, दिनविभु, दिनेश्वरः, दिवसकृत् (द्), दिवसेशः, दिवाकरः, दिवाधीशः, दिवानाथः, दिवानेता (तृ), दिवाभर्ता (तृ), दिवामणिः, दीधितिमान् (मतु०), दीप्तमूर्तिः, दीप्तरश्मिः, दीप्तिपतिः, दृगध्यक्षः, देवसैन्यः, द्युमयीशः, द्वादशाङ्गः, द्वादशात्मा (अन्), धामधामा (अन्), धामनिधिः, धामपतिः, धाम्नान्निधिः, ध्वान्तारातिः, नभःपान्थः, नभश्चक्षुः, नभोमणिः, निदाघरुक्, (च्), पद्मपाणि, पद्मबन्धुः, पद्मिनीशः, प्रचण्डांशुः, प्रजापतिः, प्रतिदिवा (अन्), प्रत्यूषाण्डम्, प्रद्योतनः, प्रभाकरः, प्रभापतिः, प्रभाप्रभुः, प्रभाभर्ता (तृ), बहुरूपः, भानुकोशः—(षः), मनुपिता (तृ), मन्दपिता (तृ), मयूखवान् (मतु०), मरीचिमान् (मतु०), महोनिधिः, महोराशिः, यमपिता (तृ०), यमपिता (तृ०), यमीपिता (तृ०), रश्मिमाली (इन्), रसाधारः, रुचिधामा (अन्), रुचिभर्ता (तृ), रुचिविभुः, लोकबन्धुः, वासरकृत् (द्), वासरपः, वासरेशः, विकर्त्तनः, विभाकरः, विभावसुः, वियन्मणिः, विरोचनः, विश्वकर्मा (अन्), वीतिहोत्रः, वेदोदयः, व्योमरत्नम्, शनिपिता (तृ), सञ्ज्ञाजानिः, सदागतिः, सप्तवाहः, सप्तसप्तिः, सहस्रगुः, सहस्राङ्कः, सहस्रार्चिः (ष्), सहस्रांशुः, सुरावृतः, हंसकरः, हरिदश्वः, हरिद्धयः, हरिद्वाजी (इन्), हिमारातिः,

(५) अब्जिनीपतिः, अब्जिनीबन्धुः, अमरव्रतः, अम्बरध्वजः, अम्बरमणिः, अम्बुतस्करः, अम्भोजिनीशः, अयुगसप्तिः, अरुणसूतः, अमरव्रतः, अशिशिरगुः, अशीतकरः, अशीतद्युतिः, अशीतवृष्णिः, अहिमकरः, अहिमरश्मिः, अहिमरुचिः, अहिमरोचिः (ष्), अह्नांनायकः, उष्णकिरणः, उष्णदीधितिः, उष्णमरीचिः, कठोरज्योतिः (ष्), कपिलद्युतिः, कमलिनीशः, किरणमाली (इन्), कौसुम्भवासाः (अस्), खरगभस्तिः, खरदीधितिः, खरमरीचिः, खेचरपतिः, गगनमणिः, गभस्तिपाणिः, गभस्तिमाली (इन्), गभस्तिहस्तः, घर्मकिरणः, घर्मदीधितिः, घर्ममयूखः, चण्डकिरणः, छायाधिनाथः, छायाधिपालः, छायानायकः, जगत्प्रदीपः, जलजिनीशः, जलतस्करः, तिग्मकिरणः, तिग्मदीधितिः, तिग्ममरीचिः, तिमिरदीप्तिः, तिमिररिपुः, तीक्ष्णदीधितिः, तीक्ष्णमयूखः, तीव्रदीधितिः, तेजसांपतिः, तेजसांराशिः, त्विषांनायकः, दशशतांशुः, दिननायकः, दिनाधिनाथः, दिनाधिराजः, दिवसकरः, दिवसपतिः, दिवसमणिः, दिवसविभुः, दिवसेश्वरः, दिवानयकः, द्युतीनांपतिः, नभःकेतनम्, नलिनीकान्तः, नलिनीनाथः, नलिनीप्रियः, नलिनीविभुः, निदाघकरः निदाघभानुः, पङ्कजिनीशः, पङ्केरुहेशः, पद्मलाञ्छनः, पद्मिनीकान्तः, पद्मिनीनाथः, पद्मिनीपालः, पद्मिनीश्वरः, प्रतापनिधिः, प्रभाणां पतिः, भानुकेसरः, मयूखमाली

(इन्), मरीचिमाली (इन्), महसांपतिः, महसामीशः, मृणालिनीशः, यमजनकः, रात्रिनाशनः, लोकबान्धवः, लोकलोचनः, वासरकरः, वासरनाथः, वासरमणिः, वासरेश्वरः, सरण्यूजानिः, सरण्यूभर्ता (तृ०), सरोजबन्धुः, सरोजिनीशः, सहस्रकरः, सहस्रपादः, सहस्ररश्मिः, सुग्रीवपिता (तृ), हरिद्रन्धर्वः, हरिद्वाहनः, हिरण्यरेताः (अस्), अतुषारकरः, अतुहिनधामा (अन्), अतुहिनरश्मिः, अतुहिनरुचिः, अदितितनयः, अदितिनन्दनः, अनूरुसारथिः, अम्बरमार्गगः, अम्बुजबान्धवः, अम्बुजिनीपतिः, अम्भोजिनीप्रेयाः (अस्), अम्भोजिनीस्वामी (इन्), अरुणकिरणः, अरुणसारथिः, अशिशिरकरः, अशिशिररश्मिः, अशीतकिरणः, अशीतदीधितिः, अशीतमरीचिः, अशीतलकेतुः, अहिममयूखः, कमलबान्धवः, कमलिनीनाथः, कमलिनीभर्त्ता (तृ), कुमुद्वतीशत्रुः, कृतान्तजनकः, खररश्मिमाली (इन्), चक्रवाकबन्धुः, चक्रवाकसुहृत् (द्), जलजिनीबन्धुः, तमिस्राभियाती (इन्), तिमिरविनाशः, तिमिरविनाशी (इन्), त्रिजगन्नमस्यः, दहनकिरणः, दशशतकरः, दशशतरश्मिः, दिवसाधिनाथः, द्युचरनायकः, ध्वान्तध्वंसविधिः, नलिनीदयितः, नलिनीवनेशः, नलिनीवल्लभः, नलिनीविलासी (इन्), निदाघदीधितिः, निदाघांशुमाली, पङ्कजबान्धवः, पङ्कजबोधनः, पङ्कजिनीपतिः, पङ्केरुहबन्धुः, पद्मिनीदयितः, पद्मिनीनायकः, पद्मिनीपालकः, पद्मिनीरमणः, पद्मिनीवल्लभः, प्रत्यूषडम्बरः, महसामधिपः, यमुनाजनकः, लोकप्रकाशनः, वासरनायकः, शीतेतररश्मिः, संवत्सरपथः, सप्ततुरङ्गमः, सरोजबान्धवः, सरोजिनीपतिः, सरोजिनीराजः, सरोरुहसृहृत्, (द्), सहस्रकिरणः, सहस्रदीधितिः, सहस्रमयूखः, सांतत्सररथः।

(७) अम्बुजिनीवनेशः, अशिशिरकिरणः, अशिशिरदीधितिः, तिग्ममरीचिमाली (इन्), तीक्ष्णमयूखमाली (इन्), दशशतकिरणः, दशशतमूयूखः, धर्मराजजनकः, पद्मिनीप्राणपालः, वनजवनपतिः, वासराणांविधाता (तृ), सप्तलोकैकचक्षुः, (ष्)

(८) अम्भोजवनप्रकाशी (इन्), कमलिनीकाननेशः, दशशतकरमूर्तिः, राजीवजीवितेश्वरः, सहस्रमरीचिमाली (इन्), हरिततुरगनाथः, हारितहरितवाजी (इन्),

(९) कमलिनीपरिणायकः, पङ्केरुहनिकरबन्धुः, भुवनत्रयचूडामणिः, सरोजिनीजीवितेश्वरः, सरोजिनीप्राणाधिनाथः, सहस्रपत्रवनबन्धुः,

(१०) अरविन्दकानननायकः, हृषीकेशपदौकसांपतिः,

(११) सरसीरुहकानननायकः

(१३) सकललोकचक्रवालचक्रवर्ती (इन्)।

ग्रहणपर्यायाः—उपप्लवः, उपरागः, ग्रहः, ग्रहणम्, राहुग्रासः, राहुस्पर्शः।

ग्रस्तपुष्पवत्प०—उपरक्तौ, परिग्रहौ।

बिम्बप०—बिम्बः, मण्डलम्, शेषपर्यायास्त्वन्यत्र।

परिधिप०—उपसूर्यकम्, उपार्कम्, परिधिः, परिवेशः, परिवेशनम्, परिवेषः, परिवेषकः, परीवेशः, परीवेशनम्, परीवेषः, मण्डलम्।

भर्तृप०—अनुगः, अभिकः, अभीकः, असुपः अर्य्यः, उपयन्ता (न्तृ), कमिता (तृ), कान्तः,

गृही (इन्), जानिः, जामाता (तृ०), धवः, नर्मकीलः, पतिः, परिणेता (तृ), पाणिग्रही (इन्), पाणिग्राहः, प्रणयी (इन्), प्राणनाथः, प्राणपः, प्राणपालः, प्राणपालकः, प्राणसमः, प्राणाधिनाथः, प्राणेशः, प्राणेश्वरः, प्रियः, प्रेयान् (ईयसुन्), प्रेष्ठः, भरुः, भार्त्ता (तृ), भासुः, भोक्ता (क्तृ), यामाता (तृ), रतगुरुः, रमः, रमणः, रुच्यः, वरः, वरयिता (तृ), विवोढा (ढृ), वोढा (ढृ), सुखोत्सवः, सेक्ता (क्तृ), हृदयेशः।

क्वंचित्तु—धनिकः, धनी (इन्) इति च दृश्यते।

स्वामिप०—अधिनाथः, अधिनायकः, अधिपः, अधिपतिः, अधिभूः, अधिराजः, अधीशः, अधीश्वरः, अर्यः, इनः, इन्द्रः, ईट् (श्), ईशः, ईशानः, ईशिता (तृ), ईश्वरः, नाथः, नायकः, नेता (तृ), पतिः, परिवृढः, पालः, पालकः, प्रभु, भर्ता (त्तृ), राट् (ज्), राजा (अन्), विभुः, सम्पालः, सम्पालकः, स्वामी (इन्)।

एकयोक्त्या भर्तृस्वामिनोः पर्यायाः—तिलकः, दयः, दयितः, पतिः, प्रियः, भर्त्ताः, वल्लभः, स्वामी (इन्)।

मणिप०—मणिः (पुं०स्त्री०) रत्नम् (न०) (अजहल्लिङ्गम्), वसु (न०)।

रविपत्नीभेदाः—(१) सञ्ज्ञा, (२) छाया, (३) राज्ञी, (४) पृश्निः, (५) वडवा चेत्येते रविपत्नीभेदाः स्युः।

सञ्ज्ञापर्यायाः—कालिन्दीप्रसूः, त्रसरेणुः, त्वाष्ट्री, द्युमयी, प्रभा, प्रभावप्रसूः, मनुप्रसूः महावीर्या, यमजननी, यमप्रसूः, यमीमाता (तृ), योग्या. वैवस्वतजननी, सञ्ज्ञा, सरण्युः, सरण्यूः, सुवर्चला, सूर्या, स्वरेणुः, (सुरेणुः), स्वातिः।

छायाप०—छाया, तपती, तपतीप्रसूः, प्रतिरूपिणी, भूमयी, भूमिमयी, मन्दजननी, मन्दप्रसूः, वरी, विक्षुभा, विष्टिप्रसूः, सञ्ज्ञाप्रतिकृतिः, सवर्णा, सावर्णिप्रसूः।

राज्ञीप०—राज्ञी, रेवन्तजननी, रेवन्तप्रसूः, रेवन्तमाता (तृ०, रेवन्ताम्बा।

पृश्निप०—पृश्निः, सावित्रीजननी, सावित्रीप्रसूः, सावित्रीमाता (तृ)।

वडवापर्यायाः—अर्वती, अश्वा, दस्रजननी, नासत्यप्रसूः, दस्रप्रसूः, वडवा, वामी।

रविपुत्रनामानि—(१) कर्णः, (२) नासत्यौ, (३) यमः, (४) रेवन्तः, (५) वरुणः, (६) वैवस्वतः (सप्तमो मनुः), (७) शनिः, (८) सावर्णिः (अष्टमो मनुः), (९) सुग्रीवः (वानरेन्द्रः), चैते रविपुत्राः सन्ति।

कर्णपर्यायाः—अङ्गराट् (ज्), अर्कतनयः, चम्पाधिपः, राधातनयः, सूततनयः।

रेवन्तप०—अर्करेतोजः, प्लवगः, राज्ञीतनयः, रेवन्तः, हयवाहनः।

सुग्रीवप०—आदित्यसूनुः, तारापतिः, रामसखः, रुमाप्रियः, वानरेन्द्रः, सुग्रीवः, हनुमन्मित्रम्।

रविपुत्रीनामानि—(१) कालिन्दी, (२) विद्युत् (द्), (३) सावित्री, चैता रविकन्याः सन्ति।

कालिन्दीपर्यायाः—अर्कात्मजा, कलिन्दकन्या, कलिन्दतनया, कलिन्दपुत्री, कालिन्दी, तपती, तपनतनूजा, तापी, यमभगिनी, यमस्वसा (सृ), यमानुजा, यमी, यमुना, शमनस्वसा (सृ),

सूर्यजा, सूर्यतनया।

सावित्रीप०—पृश्निपुत्री, विधातृपत्नी, सावित्री।

रविसारथिप०—अनूरूः, अरुणः, आश्मनः, काश्यपिः, गरुडाग्रजः, जटायुसूः, तार्क्ष्यः, महासारथिः, विनतासूनुः, विपुलस्कन्धः, वैनतेयः, सूरसूतः।

सारथिप०—क्षत्ता (त्तृ), दक्षिण (णे) स्थः, नियन्ता (न्तृ), प्राजिता (तृ), यन्ता (न्तृ), रथकुटुम्बिकः, रथकुटुम्बी (इन्), प्रवे (चे) ता (तृ), सव्येष्ठः, सव्येष्ठा (ष्ठृ), सारथिः, सूतः।

दिनप०—अहः (न्), घस्रः, दिनम्, दिवसः, वासरः, शेषपर्यायास्तु कालवर्गे द्रष्टव्याः।

सूर्यलोकः—भास्करभुवनम्, लोकबन्धुलोकः, सूर्यलोकः, सौरभुवनम्।

किरणः—अंशुः, अभीशुः अभीषुः, अर्चिः (ष्), उपधृतिः, उस्रः, करः, किरणः, गभस्तिः—स्ती, गौः, (गो), घृणिः, त्विषिः-षी, दीधितिः (स्त्री०), द्युत् (द्), धाम (अन्), धृष्णिः, नेमिनिधिः, पद्मपादः, पृश्निः, प्रग्रहः, भानुः, भाः (स्), मयूखः, मरीचिः—ची (स्त्री०पुं०), रश्मिः, विरोकः, वृष्णिः, सान्ध्यः, हेतिः।

प्रभा (दीप्ति) प०—आभां, ओजः (अस्), केतु; छविः, त्विट् (ष्), त्विषा, दीप्तिः, द्युतिः-ती, प्रभा, भा, भामः, भासः, रुक्, (च्), रुचिः, रोचिः (ष्) (न०), वसु, विभा, शोचिः (ष्) (न०)।

प्रकाशपर्यायाः—आतपः, आलोकः, इद्धम्, उद्योतः, उद्द्योतः, घर्मः, ज्योतिः (ष्), तेजः (स्), द्योतः, प्रकाशः, महः (अस्), वर्चः (अस्), शुष्मम्, सहः (अस्)।

उष्णप०—ऊष्णम्, घर्मः, निदाघः।

अत्युष्णप०—खरम्, चण्डः, तिग्मम्, तीक्ष्णम्, तीव्रम्, पटुः, रौद्रम्।

कमलप०—अप्पुष्पम्, अब्जम्, अम्बुजन्म (अन्), अम्बुपद्मम्, अम्बुरुट् (ह्), अम्बुरुहम्, अम्भोजम्, अम्भोरुहम्, अरविन्दम्, कंजम्, कञ्जम् कमलम्, कुटपम्, कुशेशयम्, जलजम्, जलजन्म (अन्), जल रुट् (ह्), जलरुहम्, तामरसम्, दारम्, दोलकम्, नलम्, नलिनम्, नालीकम्, निर्लेपम्, पङ्कजम्, पङ्कजन्म (अन्), पङ्करुट् (ह्), पङ्करुहम्, पङ्केरुहम्, पद्मम्, पाथोजम्, पाथोरुहम्, पुष्करम्, बिसकुसुमम्, बिसनाभिजम्, बिसप्रसूनम्, महोत्पलम्, राजीवम्, वारिजम्, वारिहम् वार्जम्, विसकुसुमम्, विसनाभिजम्, विसप्रसूनम्, शतपत्रम्, श्रीः, सरसिजम्, सरसीजम्, सरसीरुहम्, सरोजम्, सरोजन्म (अन्), सरोरुट् (ह्), सरोरुहम्, सलिलजम्, सहस्रपत्रम्, सारसम्, सुजलम्।

कमलिनीपर्यायाः—अब्जिनी, अम्बुजिनी, अम्भोजिनी, कमलिनी, जलजिनी, नलिनिनी, नलिनी, नालीकिनी, पङ्कजिनी, पद्मिनी, पुटकिनी, मृणालिनी, विसिनी, सरोजिनी।

प्रियपर्यायाः—अभीप्सितम्, अभीष्टम्, दयः, दयितः, प्रियः, वल्लभः, हृद्यम्।

रवेः पारिपार्श्विकनामानि—माठरः, पिङ्गलः, दण्डः, राजश्रोथौ, खरद्वारिकौ, कल्माषपक्षिणौ, जातृकारः, कुतापकौ, पिङ्गगजौ, दण्डिपुरुषौ, किशोरकौ।

सौरतंत्रे तु—

'तत्र शक्रो वामपार्श्वे दण्डाख्यो दण्डनायकः।

वह्निस्तु दक्षिणे पार्श्वे पिङ्गलो वामनश्च सः।। यमोऽपि दक्षिणे पार्श्वे भवेन्माठरसंज्ञया।' इति।

रवेर्मातृपर्यायाः—अदितिः—ती, अमरमाता (तृ), ऋटः, ऋटनामा, कश्यपपत्नी, कश्यपभीरुः, काश्यपी, त्रिदशेन्द्रप्रसूः, दक्षप्रजापतिकन्या, देवजननी, देवप्रसूः, देवमाता (तृ), देवाम्बिका, मित्रजननी, सुरजननी, सुरप्रसूः, सुरसवित्री, सुराम्बा।

रवेः पितृपर्यायाः—कर्दमकन्याकुमारः, कलाङ्गजः, कलागर्भजः, कलापुत्रः, कलाभवः, कलाभूः, कश्यपः, काश्यपः, मरीचिजः, मरीचिपुत्रः, मारीचः, सुरजनकः, सुरतातः, सूर्यपिता।

कश्यपपत्नीभेदाः—(१) अदितिः, (२) दितिः, (३) दनुः, (४) काला, (५) दनायुषा, (६) सिंहिका, (७) मुनिः, (८) क्रोधा, (९) वरिष्ठा, (१०) सुरभिः, (११) वशा, (१२) कद्रूः, (१३) विनता, चेत्येतास्त्रयोदश कश्यपस्य पत्न्यः सन्ति।

सूर्यद्वादशभेदाः—(१) विष्णुः, (२) यमः, (३) विवस्वान् (मतु०), (४) अंशुमान् (मतु०), (५) पर्जन्यः, (६) वरुणः, (७) इन्द्रः, (८) धाता (तृ), (९) मित्रः, (१०) पूषा (अन्), (११) त्वष्टा (ष्टृ), (१२) भगश्चैते चैत्रादितो रवेर्द्वादशभेदाः स्युः।

चक्रवाकपर्यायाः—कान्तः, कामी (इन्), कामुकः, कोकः, गोनर्दः? चक्रः, चक्रवाकः, चक्राह्वयाह्वयः, द्वन्द्वचरः, द्वन्द्वचारी (इन्), भूरिप्रेमा (अन्), रथाङ्गः, रथाङ्गाह्वः, रथाङ्गाह्वयनायकः, रात्रिवियोगी (इन्), रात्रिविश्लेषगामी (इन्), राविषः, सहायः।

बन्धुपर्यायाः—ज्ञाप्तिः, बन्धुः, बान्धवः, सगोत्रः, स्वः, स्वजनः।

मित्रपर्यायाः—मित्रम् (न०) (अजहल्लिङ्गम्), वयस्यः, सखा (खि), सवयाः (अस्), सहचरः, सहायः, साप्तपदीनः, सुहृत् (द्), स्निग्धः।

आकाशप०—आकाशः, खम्, गगनम्, नभः (अस्), शेषस्त्वन्यत्र।

नेत्रप०—अक्षि (इन्), चक्षुः (ष्), नयनम्, नेत्रम्, लोचनम्, शेषस्त्वन्यत्र।

चोरप०—एकागारिकः, चोरः, चोरडः चौरः, तस्करः, दस्युः, पटचोरः, परास्कन्दी (इन्), परिमोषी (इन्), पाटच्चरः, पारिपन्थिकः, प्रतिरोधकः, मलिम्लुचः, रात्रिचरः।

वनप०—काननम्, गहनम्, वनम्, विपिनम्, शेषस्त्वन्यत्र।

अस्तप०—अस्तः, अस्तमनम्, लुप्तः, लोपः, शेषस्त्वन्यत्र।

उदयप०—असूर्यगः, उदयः, दृश्यमानः, शेषस्त्वन्यत्र।

अत्र विशेषः। ग्रन्थान्तरे—

'वैशाखादिषु मासेषु लग्नेष्वन्यादिषु क्रमात्।
उदेत्यर्कः, स्वोदयादङ्गात्सप्तमेऽङ्केऽस्तमेति सः॥

अर्थात्—वैशाखदिषु द्वादशमासेषु क्रमात् मेषादिषु द्वादशलग्नेषु सूर्य उदेति। तथा स्वोदयलग्नात्सप्तमे लग्ने सः (सूर्यः) अस्तमेति अस्तं प्राप्नोतीत्यर्थः।

वस्त्रप०—अंशुकम्, अम्बरम्, आच्छादः, आच्छादनम्, कर्पटः, कशिपुः, चीरम्, चीवरम्, चेलम्, छादनम्, द्विचयम्, निवसनम्, पटम्, प्रोतम्, लक्तकः, वसनम्, वसित्तम्,

वस्त्रम्, वासम्,वासः (अस्) (न०), शाटकः, सिक् (च्), सिचयः।

कुसुम्भप०—कमलोत्तरम्, कुसुम्भम्, पद्मोतरम्, महारजतम्, महारजनम्, लट्वा (स्त्री०), वह्निशिखम्।

हरित्प०—पालाशः, हरित्, शेषस्तु बुधे।

अश्वप०—अमृतसोदरः, अरुट् (ष्), अर्वा (अन्), अव्यथः, अश्वः, आशुः, उच्चैःश्रवाः (अस्), एकशफ, एतम्बः, एतशः, किण्वी (इन्), किन्धी (इन्), कुण्डी (इन्), कुटरः, कुदरः, कुरटः, केसरी (इन्), क्रमणः, क्रान्तः,- गन्धर्वः, गूढभोजनः, ग्रहभोजनः, घोटः, घोटकः, चामरी (इन्), जवनः, जवी (इन्), जितवः, तार्क्ष्यः, तुरगः, तुरङ्गः, तुरङ्गमः, दधिक्रा (अन्), दधिक्रावा (अन्), दौर्गेहः, द्वीपः, धाराटः, नरः, पतङ्गः, परुलः, पाकलः, पालकः, पीतिः, पीती (इन्), पीथिः, पैद्वः (ट्वः), प्रकीर्णः, प्रकीर्णकः, प्रोथी (इन्), ब्रध्नः, मरुद्रथः, मांश्चत्वः, माषाशनः, माषाशी (इन्), मुद्गभुक् (ज्), मुद्गभोजी (इन्), मुद्गगाशनः, युयुः, राजस्कन्धः, लक्ष्मीपुत्रः, ललामः, वह्निः, वाजी (इन्), वातस्कन्धः, वातायनः, वारुः, वासुदेवः, वाट् (ह्), वाहः, वाहनश्रेष्ठः, विमानकः, वीतिः, वीती (इन्), व्रती (इन्), शालिहोत्रः, शालिहोत्री (इन्), श्येनः, श्येनासः, श्रीपुत्रः, श्रीभ्राता (तृ), सप्तिः, सविक्रमः, सिंहविक्रमः, सुपर्णः, सैन्धवः, स्थौर्य्यः, हंसः, हंसास्यः, हयः, हरिः, हरिक्रान्तः, हेंषी (इन्), ह्वर्य्यः।

चन्द्रपर्यायाः—(१) ऊः, ग्लौः, चः, द्रुः, भेट् (श्), मः, माः (स्)।

(२) अंशुः, अजः, अब्जः, इन्दुः, ऋक्षेट् (श्), कलेट् (श्), कान्तः, क्रुष्टः, क्लेदुः, गौरः, चन्दः, चन्द्रः, चूडा?, जर्णः, तपः, तपाः (अस्), तुङ्गी (इन्) ? तृपत् (द्), तृपिः, नेमिः, पीतुः, पैद्वः, बुधः, भगः, भपः, भार्य्यः, भेनः, भेशः, मासः, राजा (अन्, रात्रीट् (श्), विधुः, व्याप्वः, शशी (इन्), सिप्र, सृप्रः, सोमः, स्नेहूः, स्पन्दः ?, स्यन्दः, हरिः।

(३) अत्रिजः, अब्जारिः अमितिः, अमृतः, अम्बुजः, उडुपः, उषार्य्यः, उषेशः, ऋक्षपः, ऋक्षेशः, एकभूः, एणभृत् (द्), एणाङ्कः, कलापः, कलाभृत् (द्), कलावान् (मतुः), कलेशः, क्षपाकृत् (द्) क्षपेशः, खसिन्धुः, गौरगुः, गौरभाः (अस्), गौरांशुः, चन्दिरः, चन्द्रमाः (अस्), चिक्लिदः, छायाङ्कः, छायाभृत् (द्) जडांशुः, जडोस्रः, जयन्तः, जरणः, ज्योत्स्नेशः, तपसः, तमीशः, तमोनुत् (द्), तापसः, तारेशः, तुङ्गीशः, त्रियामेट् (श्), दशाश्वः, द्विजेन्द्रः, द्विजेशः, धिष्ण्यपः, धिष्ण्येशः, ध्वान्तारिः, निट्पतिः, निशाकृत् (द्), निशेशः, पक्षजः, परिच्छः, परिज्मा (अन्), परिज्वा (अन्), परिज्ञः, पर्वधिः, पर्वरिः, भधवः, भनाथः, भपतिः, भभर्त्ता (तृ), भविभुः, भुवन्युः, भूपतिः, मृगाङ्कः, यजतः, यज्ञराट् (ज्), यामिनीट् (श्), युवनः, रजनीट् (श्) रात्रिपः, रात्रीशः, लक्ष्मणः, विकुस्त्रः, विक्लिदः, विश्वप्साः (आकारान्तः), शपितः, शयतः, शशभृत् (द्), शशाङ्कः, शीतगुः, शीतभा? शीतभाः (अस्), शीतलः, शीतांशुः, शुभांशुः, शुभ्रगुः, शुभ्रभाः (अस्), शुभ्रांशुः, श्वेतगुः,

श्वेतवाट् (ह्), श्वेतांशुः, श्वेताश्वः, षोडशी (इन्), सितगुः, सितभाः (अस्), सितरुक् (च्), सितांशुः, सिन्धुजः, सिन्धूत्थः, सुधाङ्गः, सुधांशुः, सुधासूः, सुधास्रुत् (द्), स्तृपतिः ? हिमगुः, हिमत्विट् (ष्), हिमभाः (अस्), हिमस्रुत् (द्), हिमांशुः, ह्द्यांशुः।

(४) अत्रिजनिः, अत्रिजनुः (ष्), अत्रिजन्मा (अन्), अत्रिदृग्जः, अत्रिभवः, अत्रिसुतः, अनुष्णगुः, अनुष्णभाः (अस्), अमृतसूः, अमृताङ्गः, इन्द्वभिधः, उडुनाथः, उडुपतिः, उडुप्रभुः, उडुराजः, उषाधिपः, उषापतिः, उषाविभुः, उषेश्वरः, ऋक्षनेमिः, ऋक्षभर्ता (तृ), ऋक्षाधिपः, एणलक्ष्मा (अन्), ओषधीशः, कर्केश्वरः, कलाधिभूः, कलानाथः, कलानिधिः, कुमुदेशः, क्षणदेशः, क्षपाकरः, क्षपानाथः, क्षपापतिः, क्षपाप्रभुः, क्षपाभर्त्ता (तृ), खचमसः, गौरद्युतिः, गौररश्मिः ग्रहनेमिः, ग्रहपतिः, चित्राटीरः, छायापिद्मुः, (प्लुः), जडच्छविः, जडद्युति;, जडरश्मिः, जडरोचिः (ष्), जडाभीशुः, जडोद्भवः, जुहुराण, जुहुवाणः; ज्योत्स्नाकरः, तपोराजः, तमीपतिः, तमीभर्ता (तृ), तमोनुदः, तमोहरः, तारकेशः, ताराजानिः, ताराधिपः, ताराधीशः, तारानाथः, तारानेता (तृ), तारापतिः, तारापीडः, तारास्वामी (इन्), तिथिप्रणीः, तिमिरारि, तुङ्गीपतिः, तुषारगुः, तुषारत्विट् (ष्), तुषारभाः (अस्), तुषारांशुः, तुहिनगुः, तुहिनरुक् (च्), तुहिनांशुः, दर्शविपत् (द्), दशवाजी (इन्), दशहयः, दोषाकरः, दोषाधीशः, दोषानाथः, द्विजपतिः, द्विजराजः, द्विजविभुः, धवलगुः, धवजलभाः (अस्), धवलरुक् (च्), धवलांशुः, नक्षत्रपः, नक्षत्रेशः, नभोदीपः निशाकरः, निशाकेतुः, निशाचरः, निशानाथः, निशानेताः (तृ), निशापतिः, निशामणिः, निशारत्नम्, नीहारगुः, नीहारांशुः, पक्षजन्मा (अन्), पक्षधरः, पर्वविपत् (द्), पाण्डरांशुः, पीयूषगुः, पीयूषत्विट् (ष्), पीयूषसूः, पीयूषांशुः, पीयूषोस्रः, पुनर्युवा (अन्), प्रालेयभाः (अस्), प्रालेयांशुः, भदयितः, भनायकः, भरमणः, भाधिनाथः, मासहोत्थः, मिहिकांशुः, मृगधरः, मृगपिप्लुः (द्मुः), मृगलक्ष्मा (अन्), यजतनुः, यज्वपतिः, यथासुखः, यामिनीशः, रजनिपः, रजनीशः, राकानाथः, राकापतिः, राकेश्वरः, राजराजः, रात्रिनाथः, रात्रिनेता (तृ), रात्रिपतिः, रात्रिमणिः, रात्रीनाथः, रोहिणीशः, लोकम्पृणः, वलक्षगुः, वार्मण्डलः, विभावसुः, विरोचनः, शताक्षीशः, शर्वरीशः, शशधरः, शशलक्ष्मा (अन्), शशाङ्कभृत, (द्), शिशिरगुः, शिशिरांशुः, शीतकरः, शीतकेतुः, शीतच्छविः, शीतज्योतिः (ष्), शीतदीप्तिः, शीतद्युतिः, शीतपादः, शीतभानुः, शीतमहाः (अस्), शीतरश्मिः, शीतरुचिः, शीतरोचिः (ष्), शीतलगुः, शीतलभाः (अस्), शीतलांशुः, शुचिरोचिः (ष्), शुभ्रकरः, शुभ्रभानुः, शुभ्राम्बरः, श्यामाकरः, श्यामानाथः, श्वेतकेतुः, श्वेतद्युतिः, श्वेतधामा (अन्), श्वेतभानुः, श्वेतरुचिः, श्वेतरोचिः (ष्), श्वेतवाजी (इन्), श्वेतांशुकः, समुद्रजः, सागरभूः, सितकरः, सितदीप्तिः,

सितद्युतिः, सितरश्मिः, सितरुचिः, सितवृष्णिः, सितहयः, सिन्धुजनिः, सिन्धुजन्मा (अन्), सिन्धुमित्रम्, सिन्धुसुतः, सिन्धोर्मित्रम्, सिप्रग्रहः, सुधाकरः, सुधाघृणिः, सुधादीप्तिः, सुधाधारः, सुधानिधिः, सुधापिद्युः, सुधाभानुः, सुधारश्मिः, सुधावासः, सुधांशुकः, सुधासिन्धुः, सुधासूतिः, हरिणभृत् (द्), हरिणाङ्कः, हिमकरः, हिमदीप्तिः, हिमद्युतिः, हिमधामा (अन्), हिमभानुः, हिममहाः (अस्), हिमरश्मिः, हिमरुचिः, हिमरोचिः (ष्)।

(५) अखरकरः, अग्रजाधिपः, अघर्मधामा (अन्), अत्रिनेत्रजः, अत्रिनेत्रभूः, अत्रीतजनिः, अनिदाघांशुः, अनुष्णकरः, अनुष्णरश्मिः, अमृतकरः,. अमृततेजाः (अस्), अमृतदीप्तिः, अमृतद्युतिः, अमृतधामा (अन्), अमृतपिण्डः, अमृतमूर्तिः, अमृतरश्मिः, अमृतरोचिः (ष्), अमृताभीषुः, अरौद्रकेतुः, अवश्यायगुः, उडुनायकः, उषाधिपतिः, ऋक्षरमणः, ऋक्षाधिपतिः, एणकलङ्कः, एणतिलकः, ओषधीगर्भः, ओषधपतिः, ओषधीश्वरः कमलरिपुः, कलाधिनाथः, कलानायकः, कलानान्निधिः, कुमुदबन्धुः, कुमुदिनीशः, कुमुद्वतीशः, कुरुङ्गलक्ष्मा (अन्), कृत्तिकाभवः, कैरवबन्धुः, कौमुदीपतिः, क्षणदाकरः क्षणदाधवः क्षणदाधिपः, क्षणदाधिभूः, क्षणदापतिः, क्षपाधिपतिः, क्षपानायकः, चकोरबन्धुः, चकोरसुहृत् (द्), छायालक्षणः, छायालाञ्छनः जडमयूखः, जलनिधिभूः, जलमण्डलः, तमिस्राकरः, तमिस्राधिपः, तमीनायकः, तारकराजः, तारकानाथः, ताराधिराजः, तारानायकः तारारमणः, तिथिप्रणेता (तृ), तुषारदीप्तिः, तुषारमूर्तिः, तुषाररश्मिः, तुषारशोचिः, (ष्), तुहिनकरः, तुहिनद्युतिः, तुहिनरश्मिः, तुहिनरोचिः (ष्), तुहिनाकरः, तुहिनांशुकः, त्रियामेश्वरः, दक्षजाजानिः, दक्षजापतिः, दक्षतुतेशः, दाक्षायणीशः, द्विजन्मपतिः, द्विजाधिराजः, धवलकरः, धवलच्छविः, धवलद्युतिः, धवलवृष्णिः, धिष्ण्यरमणः, नक्षत्रनाथः, नक्षत्रनेमिः, नक्षत्रपतिः, नक्षत्रेश्वरः, नभश्चमसः, नलिनीरिपुः, नलिनीशत्रुः, नलिन्याशत्रुः, निशाधिपतिः, निशानायकः, निशावल्लभः, निशीथिनीशः, नीहारकरः, नीहारदीप्तिः, नीहररश्मिः, पद्मासहोत्थः, पद्मिनीशत्रुः, पीयूषकरः, पीयूषघनः, पीयूषद्युतिः, पीयूषपिण्डः, पीयूषभानुः, पीयूषमहाः (अस्), पीयूषमूर्तिः, पीयूषरश्मिः, पीयूषरुचिः, पीयूषवपुः (ष्), पीयूषाभीशुः, प्रालेयभानुः, प्रालेयरश्मिः, भगणनाथः, मिहिकाशोचिः (ष्), मृगलाञ्छनः, मृणालिनीद्विट् (ष्), यज्वानांपतिः, यामवतीशः, यामिनीपतिः, यामिनीश्वरः, रजनिकरः, रजनीकरः, रजनीकान्तः, रजनीनाथः, रजनीपतिः, रजनीप्रेयाः (अस्), राकाधीश्वरः, रोहिणिमित्रम्, रोहिणीकान्तः, रोहिणीजानिः, रोहिणीनाथः, रोणीपतिः, रोहिणीप्रियः, रोहिणीप्रेयाः (अस्), रोहिणीविभुः, लक्ष्मीसहजः, लक्ष्मीसहोत्थः, लोकाप्यायकः वलक्षकरः, वलक्षभानुः, वलक्षरश्मिः, विभावरीशः, शशकलङ्कः, शशलक्षणः, शशलाञ्छनः, शिशिरकरः, शिशिरतनुः, शीतकिरणः, शीतदीधितिः, शीतमयूखः, शीतमरीचिः, शीतलकरः,

शीतलभानुः, शीतलाभीषुः, शीतांशुमाली (इन्), श्वेतकिरणः, श्वेतवाहनः, समुद्राङ्गजः, सरोरुहारिः, सर्वौषधीशः, सागरात्मजः, सितकिरणः सितदीधितिः सिन्धुतनयः, सिन्धुनन्दनः, सुधाकिरणः, सुधादीधितिः, सुधामयूखः, सुधामरीचिः, स्नेहरेकभूः, हरिणलक्ष्मा (अन्), हिमकिरणः, हिमगभस्तिः, हिमततिस्रुत् (द्), हिमदीधितिः, हिमांशुमाली (इन्),

(६) अचण्डमरीचिः, अनिदाघधामा (अन्), अनुष्णदीधितिः, अब्धिनवनीतम्, अमृतकिरणः, अमृतदीधितिः, अमृतनिधानः, अमृतशरीरः, अवश्यायकरः, आकाशचमसः, इलादेवराजः, उषाधिनायकः, ऋक्षाणामधिपः, ओषधीनांनाथः, ओषधीनायकः, कमलशात्रवः, कलापरिवृढः, कुमुदबान्धवः, कुमुदात्मबन्धुः, कुमुदानन्दनः, कुमुदिनीपतिः, कुमुदेकबन्धुः, कुमुद्वतीबन्धुः, कुमुद्वतीसुहृद्, (त्), कुरङ्गलाञ्छनः, कुवलयनाथः, कृत्तिकासम्भवः, कैरववनेशः, कैरवविकासी (इन्), कैरविणीपतिः, कैरविणीश्वरः क्षणदाधिनाथः, क्षणदानायकः, क्षपापरिवृढः, क्षीरोदनन्दनः, छायामृगधरः, जलगोलमूर्तिः, तारकानायकः, तिथिप्रवर्त्तकः, तुषारकिरणः, तुषारदीधितः, तुहिनकिरणः, तुहिनमयूखः, तुहिनमरीचिः, त्रियामारमणः, दाक्षायणीकान्तः, दाक्षायणीजानिः, दाक्षायणीपतिः, धवलकिरणः, धवलदीधितिः, नयनाभिरामः, निशापरिवृढः, निशीथिनीनाथः, निशीथिनीपतिः, पीयूषकिरणः, पीयूषमयूखः, प्राचीनतिलकः, प्रालेयकिरणः प्रालेयमरीचिः, मिहिकामयूखः, मिहिकामरीचिः, यामवतीपतिः, यामिनीनायकः, रजनीनायकः, रजनीरमणः, रोहिणीरमणः, रोहिणीवल्लभः, विभावरीभर्ता (तृ),विभावरीविभुः, शम्भुशिरोमणिः, शर्वरीनायकः, शिशिरकिरणः, शिशिरमयूखः, शीतलदीधितिः, श्रविष्ठरमणः, श्वेतपद्मबन्धुः, सितकरवपुः, (ष), हरचूडामणिः, हरिणलक्षणः, हरिणलाञ्छनः, हिमरश्मिमाली (इन्),

(७) अत्रिनेत्रप्रसूतः, अनिदाघदीधितिः, अब्धिनवनीतकम्, ओषधीनामधीशः, कुमुदवनबन्धुः, कुमुदाकरबन्धुः, कुमुदानन्दकरः, कुमुदिनीदयितः, कुमुदिनीरमणः, कैरववनबन्धुः, कैरवाणां विकासी (इन्), कैरविणीवनेशः, क्षणदाधिनायकः, चण्डघृणीतरांशुः, चण्डीशचूडामणिः, चण्डीशचूडारत्नम्, जलनिधितनयः, तारकाविनोदकः, त्रिनेत्रचूडामणिः, दाक्षायणीरमणः, द्विजराजखेचरः, नक्षत्रसम्पालकः, नभोमण्डलदीपः, प्रौढपाथोधिपुत्रः, यामवतीनायकः, शीतमयूखमाली (इन्), समुद्रनवनीतम्, सारङ्गकलङ्कभृत्,

(८) अत्रिनयनप्रभव, कुमुदकाननबन्धुः, कुमुदगहनबन्धुः, कुमुदवनसुबन्धुः, कुमुदाकरबान्धवः, कुमुदिनीप्राणेश्वरः, कुमुदनीवधूवरः, कुमुदिनीवनभर्त्ता (तृ), कैरववनबान्धवः, त्रिनयनचूडारत्नम्, दाक्षायणीपरिवृढः, द्रुहिणपादजातकः,

(९) कुमुदकाननबान्धवः, कुमुदषण्डबोधपदः, कुमुदिन्यसुनायकः,

(१०) कुमुदिनीकानननायकः, कैरवकाननाधिनायकः, अत्रिनयनसमुत्थज्योतिः (ष्);

(११) कामिनीवदनसौरभचौरः, विभावरीविलासदन्तपत्रः, कैरविणीवनिताजनभर्त्ता (तृ),

पीतचकोरमरीचिचयः, (१२) धूर्जटिजटामण्डलचूडामणिः।

रात्रिपर्यायाः—क्षणदा, क्षपा, तमी, त्रियामा, दोषा, निशा, निशीथिनी, यामवती यामिनी, रजनी, रात्रिः, विभावरी, शर्वरी। शेषपर्यायास्तु कालवर्गे द्रष्टव्याः।

दर्शरात्रिप०—तमसी, तमिस्रा, दर्शरात्रिः।

पूर्णिमारात्रिप०—ज्योतिष्मती, ज्योत्स्नी, पूर्णिमारात्रिः।

चन्द्रप्रभाप०—कौमुदी, चन्द्रगोलिका, चन्द्रप्रभा, चन्द्रातपः, चन्द्रिका, चन्द्रिमा, चान्द्री चार्वी, ज्योत्स्ना।

नक्षत्रप०—उडु, ऋक्षम्, तारका, तारा, धिष्ण्यम्, नक्षत्रम्, भम्। शेषास्तु पञ्चाङ्गव

चिह्नप०—अङ्कः, अभिज्ञानम्, कलङ्कः, चिह्नम्, लक्षणम्, लक्ष्म (अन्), लच्छनम् लाञ्च्छनम् लिङ्गम्।

मृगप०—अजिनयोनिः, एणः, कुरङ्गः, मृगः, वातायुः, शशः, सारङ्गः, हरिणः, शेषास्त्वन्यत्र।

हिमपर्यायाः—अवश्यायः, आकाशबष्पः इन्द्राग्निधूमः, सबाष्पऽ, तुषारः, तुहिनम्, नीहारः, प्रालेयम्, महिका, मिहिका, रजनीजलम्, हिमम्।

हिमसंहतिप०—हिमसंहतिः, हिमानी।

शीतप०—जडः, तुषारः, शिशिरः, शीतः, शीतलः, सुशीमः, सुषिमः, सुषीमः, हिमः।

शुक्लवर्णप०—अच्छः, अमलः, अर्जुनः, अवदातः, अवलक्षः, उज्ज्वलः, गौरः, धवलः, पाण्डरः, पाण्डुः, पाण्डुरः, पुण्ट्र (ण्ड्र) कः, वदातः, वलक्षः, विशदः, शुक्रः, शुक्लः, शुचिः, शुभ्रः, शुभ्रम् (अ०), श्येतः, श्वेतः, सितः, हरिणः।

कमलकुमुदादीनां सामान्यप०—उत्पलम्, कुवम्, कुवलम्, कुवलयम्, कुवेलम्। 'कुवलयं चन्द्रविकासि, पद्मम्, सूर्यविकासि इत्यनयोर्भेदो ज्ञेयः।

सितोत्पलप०—कुमुत् (द्), कुमुद्वती, कैरवम्, गर्दभाह्वयम्।

कुमुदलताप०—कुमुदिनी, कुमुद्वती, कैरविणी।

अमृतप०—अमृतम्, पीयूषम्, पेयूषम्, सुधा, शेषस्तु देववर्गे।

चकोरप०—अङ्गारभक्षः, उत्पिबः, कौमुदीजीबनः, कौमुदीजीवी (इन्), चकोरः, चकोरकः, चन्द्रिकापायी (इन्), चन्द्रिकाप्रियः, चन्द्रिकाशनः, चलच्चञ्चुः, जीवजीवः, जीवजीवकः, जीवजीवः, ज्योत्स्नाप्रियः, रक्ताक्षः, विषदर्शनमृत्युकः, विषमृत्युः, विषमृत्युसूचकः।

चन्द्रपितृपः—अब्धिः, समुद्रः, सागरः, सिन्धुः, शेषास्त्वन्यत्र (देववर्गे)।

चन्द्रपितृप०—अत्रिः (सप्तर्षिविशेषः), अत्री (इन्), अनसूयापतिः, कदमकन्यापतिः, अत्रिदृग्, अत्रिनेत्रः, अत्रिलोचनः।

चन्द्रभगिनीप०—इन्दिरा, रमा, लक्ष्मीः, शेषस्तु देवे।

चन्द्रपुत्रप०—चान्द्रिः, ज्ञः, बुधः, विद्, वैधवः, सौम्यः, शेषस्तु बुधपर्याये।

चन्द्रपुरीप०—चन्द्रपुरी, विभा, सोमपुरी, एषोदिच्यां वर्तते।

चन्द्रकलाप०—(१) अमृता, (२) मानदा, (३) विश्वा, (४) तुष्टिः, (५) पुष्टिः, (६)

रतिः, (७) धृतिः, (८) शशिनी, (९) चन्द्रिका, (१०) कान्तिः (११) ज्योत्स्ना, (१२) श्री, (१३) प्रीतिः, (१४) अङ्गदा, (१५) पूर्णा, (१६) पूर्णामृता, चैताश्चद्रस्य षोडशकलाः सन्ति।

क्षीणचन्द्रपर्यायाः—अपचिततनुः, उपचयपरिच्युतः, कलुषितः, कुज्योतिः (ष्), कृशः, क्षयकायः, क्षयरोचिः (ष्), क्षयी (इन्), क्षीणः, क्षीणकरः, क्षीणकलः, क्षीणकान्तिः, क्षीणतनुः, गलितः, दीप्तिरहितः, दुर्बलः, नष्टः, प्रक्षीणः, मूढः, विकलः, विगलितः, विनष्टः, वृद्धिकलाविहीनः।

दुर्विधुप०—दुश्चन्द्रः, दुर्विधुः, (नीचादिक्षीणमारकादिभागगः)।

पूर्णचन्द्रप०—अखण्डमण्डलः, अखण्डितवपुः (ष्), अधिकलः, अन्यूनकलः, आपूर्णमण्डलकलाकलितः, कलाकलापाधिकृताधिशाली, कलाभिभूषितः, कलाभिरभिभूषितः गोक्षीरशंखधवलः, दिनम्मन्या, पूर्णेन्दुस्तु दिनम्मन्या इति वैजयन्ती। परिपूरिताङ्गः, पर्य्याप्तचन्द्रः, पूतद्युतिः, पूर्णः, पूर्णकलः, विभ्रद्रश्मिकरालपूर्णपरिधिः, वर्धमानतनुः, वद्धिष्णुः, विपुलरश्मिशिखाकलापः, विवर्द्धमानः, शंखधवलः, संवर्द्धमानः, सकलाभिराममूर्तिः, सुधामृणालोपमबिम्बशोभितः।

मङ्गलपर्यायाः—(१) हः, (२) असृक् (ज्), अस्रः, आरः, कुजः, कुभूः, क्रूरः, क्ष्माजः, क्ष्मोत्थः, चरः, जिह्मः, नतः, पापी (इन्), भुग्नः, भूजः, भूभूः, भौमः, रक्तः, वक्रः,

(३) अङ्गारः, अरालः, अरुणः, आविद्धः, इराजः, इलाजः, इलाभूः, इलोत्थः, उर्वीजः, उर्वीभूः, ऊर्मिमान् (मतु०), ऐरेयः, ऐलेयः, और्वेयः, कर्षकः, कुञ्चितः, कुजनिः, कुजन्मा (अन्), कुटिलः, कुपुत्रः, कुभवः, कुसुतः कुसूनुः, क्रूरकृत् (द्), क्रूरदृक् (श्), क्रूराक्षः, क्षमाजः, क्षमाभूः, क्षितिजः, क्षितिभूः, क्षैतेयः, क्षोणिजः, क्षोणीभूः, क्ष्माजनिः, क्ष्माजन्मा (अन्), क्ष्मापत्यम्, क्ष्मापुत्रः, खोल्मुकः, गोत्राजः, गोत्राभूः, गौत्रेयः, घातुकः, धराजः, धराभूः, नवार्चिः (ष्), नृशंसः, पृथ्वीजः, पृथ्वीभूः, प्रव्यालः, बलाजः, भूजनिः, भूपुत्रः, भूभवः, भूमिजः, भूमिभूः, भूसुतः, भूसूनुः, मङ्गलः, महिजः, महीजः, महोभूः, माहेयः, रक्ताङ्गः, रसाजः, रसाभूः रुधिरः, रोहितः, लोहितः, वृजिनः, वेल्लितः, शोणित्, अङ्गारकः, अचलाजः, अनन्ताभूः, अवनिजः, अवनीजः, अवनीभूः, आषाढाभूः, असृक्तनुः अस्रकरः,अस्रवासाः (अस्), आवनेयः, आषाढाभूः, इलाजन्मा (अन्), इलाभवः, इलासुतः, उर्वीपुत्र, उर्वीभवः, उर्वीसूनुः, ऋणान्तकः, काश्पीजः, काश्प्युत्थः, काश्यपेयः, कुकुमारः, कुतनयः, कुदायादः, कुदारकः, कुनन्दनः, क्रूरनेत्रः, क्षमापुत्रः, क्षमासुतः, क्षमासूनुः, क्षितिजनिः, क्षितिपुत्रः क्षितिभवः, क्षितिसुतः, क्षितिसूनुः, क्षोणिजन्मा (अन्), क्षोणीपुत्रः, गोत्रापत्यम्, गोत्रापुत्रः, धराङ्गजः, धरात्मजः, धरापुत्रः, धरासुतः, धरित्रीजः, धात्रीपुत्रः, पृथिवीजः, पृथ्वीपुत्रः, पृथ्वीसूनुः, बलासवः, भूकुमारः,

भूतनयः, भूदारकः, भूनन्दनः, भूमि- जातः, भूमिपुत्रः, भूमिसुतः, भूमीभवः महिपुत्रः, महीसुत मेदिनीजः, मेदिनीभूः, रक्तकरः, रक्तद्युतिः, रक्तरश्मिः, रसात्मजः, रसाभवः, रुधिराङ्गः, रोहिताङ्ग लोहिताङ्गः, लोहितांशुः, वक्रचारः, वसुधाजः, वाचनजः ?, वाचनभूः ?, वासुधेयः, व्योमोल्मुक

(५) अचलासुतः, अनन्ताजनिः, अरुणतनुः, अरुणावासाः (अस्), अरुणाम्बर अवनीजनिः, अवनेर्जनिः, अषाढाभवः, आषाढाभवः, इलाकुमारः, इलातनूजः, इलात्मजात उर्वीतनयः, ऋणस्य हर्ता (तृ), कुतनुभवः, क्रूरलोचनः, क्षमातनयः, क्षितिकुमारः, क्षितितनय क्षितिनन्दनः, क्षोणिकुमारः, क्षोणीतनूजः, क्षोणीनन्दनः, गगनोल्मुकः, धरणिसुतः, धरणीपुत्र धरणीभवः, धरण्याः पुत्रः, धराकुमारः, धरातनयः, धरित्र्यात्मजः, धरित्र्याः पुत्रः, धात्रीतनय धात्रीनन्दनः, पृथिवीसुतः, पृथ्वीतनयः, पृथ्वीतनूजः, बलाकुमारः भूमिदायादः, भूमीतनय महितनयः, महितनूजः, महीकुमारः, महीनन्दनः, मेदिनीजनिः, रोहितच्छविः, रोहितदेह रोहितद्युतिः, लोहितदेहः, वक्रचारगः, वसुन्धराजः, वसुन्धराभूः, वसुधाभवः, वाचनसूनुः? वासुन्धरेयः, विपुलात्मजः, विश्वम्भराजः, वृश्चिकनाथः, शिववीर्यजः, शोणविग्रहः, सर्वसहाजः,

(६) अचलातनयः, अनन्तातनूजः, अवनितनयः, अवनिनन्दनः, अवनीतजन्मा (अन्), इरमानन्दनः, इरमासम्भवः, इलादेहोद्भवः, काश्यपीकुमारः, कोकनदच्छविः, क्रूरविलोचनः, क्षितितनुजनिः, जगतीनन्दनः तीव्रविलोचनः धरणिकुमारः, धरणितनयः, धरणीतनूजः धरादेहभवं, धरित्रीतनयः, धात्रीतनुजनिः, पृथिवीतनूजः, पृथिवीसम्भवः, मेदिनीनन्दनः, रुधिरकिरणः, लोहितदीधितिः, लोहितविग्रहः, वसुन्धरात्मजः, वसुन्धरापुत्रः, वसुन्धराभवः, वसुन्धरासुतः, वसुधातनूजः, वसुधात्मजातः, वसुमतीपुत्रः, वसुमतीसुतः, विश्वम्भराजनिः, सर्वसहात्मजः, सर्वसहायोनिः, सर्वसहासूनुः

(७) महिमूर्तिसम्भवः, मेदिनीगर्भभूतः, मेदिनीतनुजन्मा (अन्), वसुन्धरानन्दनः, वसुमतीतनयः, विपुलातनुजातः, विश्वम्भरानन्दनः, शोणितसंहननः, सर्वसहातनूजः, सागराम्बरासुतः,

(८) अचलाविग्रहोद्भवः, वसुन्धराङ्गसम्भवः, सर्वसहाशरीरजः।

(९) काश्यपीकलेवरोद्भवः, (१०) विश्वम्भराविग्रहसम्भवः।

रक्तपर्यायाः—असृक् (ज्), अस्रम्, आग्नेयम्, आसुरम्, कीलालम्, क्षतजम्, प्राणदम्, मांसकरम्, मांसकारि, रक्तम्, रसतेजः (अस्), रसभवम्, रसोद्भवम्, रुधिरम्, रोक्यम्, लोहितम्, वाशिष्ठम्, विस्रम् , शोणितम्, शोध्यम्।

रक्तवर्णप०—अरुणः, अव्यक्तरागः, कोकनदच्छविः, बालसन्ध्याभः, माञ्जिष्ठः, रक्तः, रोहितः, लोहितः, शोणः, सन्ध्याभः।

ऋणप०—उद्धारः, ऋणम्, पर्य्युंदञ्चनम्, प्रमात्यम् ? प्रामार्ज्यम्, प्रामित्त्यम् ? प्रामीत्यम्।

अङ्गप०—अङ्गम्, कायः, तनुः, देहः, शेषस्त्वन्यत्र।

भूमिप०—अचलकीला, अचला, अदितिः, अद्रिकीला, अनन्ता, अन्तरिक्षम्, अब्धिद्वीपा,

अब्धिमेखला, अब्धिवस्त्रा, अम्बरस्थली, अवनिः नी, आदिमा, आद्या, इडा, इडिका, इरा, इला, इलिका, ईला, उदधिवस्त्रा, उर्वरा, उर्वी, कान्ता, काश्यपी, कीलिनी, कुः, कुम्भिनी, कुह्वरी, केलिनी, क्रोडकान्ता, क्षमा, क्षरिः, क्षान्ता, क्षान्तिः, क्षितिः, क्षोणिः—णी, क्षौणिः णी, क्ष्मा, खगवती, खण्डनी, गन्धमाता (तृ), गन्धवती, गह्वरी, गातुः, गिरिकर्णिका, गिरिस्तनी, गौः (गो), गोत्रकीला, गोत्रा, ग्मा, घनश्रेणी, जगती, जगद्वहा, ज्या, दक्षा, देहिनी, द्विरा, धरणिः—णी, धरणीधरा, धरा, धराधारा, धरित्री, धात्री, धारणी, धारयित्री, नगाधारा, निर्ऋतिः, निश्चला, पर्वतकीला, पर्वताधारा, पारा, पूषा, पृथवी, पृथिवी, पृथुः, पृथ्वी, पेरा, बला, बीजप्रसूः, बीजसूः, भुवनमाता (तृ), भूः, (स्) (अ०), भूतधात्री, भूतमाता (तृ), भूमिः-मी, मध्यमलोकः, मध्यमलोकवर्त्मा (अन्), मध्यलोकः, मर्त्यः, महाकाण्डा, महास्थाली, महिः-ही, माधवी, मेदिनी, मेर्वद्रिकीला, रत्नगर्भा, रत्नवती, रत्नसूः रत्नावती, रसा, वरा, वसुन्धरा, वसुधा, वसुधारिणी, वसुमती, विपुला, विश्वम्भरी, विश्वा, शैलाधारा, श्यामा, समुद्रकाञ्ची, समुद्रमेखलना, समुद्ररसना, समुद्रवसना, समुद्राम्बरा, सर्पभृता, सर्वसहा, सलिलेशाम्बरा, सहा, सागरनेमी, सागरमेखला, सागराम्बरः, सुधा, स्थगणा, स्थिरा, स्वसूः, स्वस्थली, हेमा।

एकयोक्त्या द्यावापृथिवीपर्यायाः—अपारे, घृतवती, घृतवत्यौ, दिवः पृथिव्यौ, दिवस्पृथिव्यौ, द्यावाक्षमे, द्यावापृथिवी, द्यावापृथिव्यौ, द्यावाभूमी, बृहती, बृहत्यौ, भूद्यावौ, रोदसी, रोदसौ, रोदस्यौ, रोधसी, रोधस्यौ।

पुत्रपर्यायाः—अङ्गजः, अङ्गभूः, आत्मजः, आत्मजन्मा (अन्), आत्मजातः, आत्मनीनः, उद्वहः, कुलधारकः, तनयः, तनुजः, तनूजः, दायादः, दारकः, द्वितीयः, नन्दनः, पिण्डदः, पुत्रः, सुतः, सूनुः, स्वजः।

एकयोक्त्या पुत्रपुत्रीपर्यायाः—अपत्यम् (न०) (अजहल्लिङ्गम्), तुक् (ज्) (पुं०), तोकम् (न०), प्रजा (स्त्री०), प्रसूतिः (स्त्री०), बीजम् (न०), सन्तातिः (स्त्री०), सन्तानः (पुं०)

बुधपर्यायाः—(१) ज्ञः, विद् (त्), सत् (द्),

(२) आब्जिः, ग्लौजः, ग्लौभूः, चान्द्रिः, बुधः, मजः, राज्यः, वर्चाः (अस्), शान्तः, सौम्यः, हेमा (अन्)? हेम्नः,

(३) अब्जभूः, आत्रेयः, इन्दुजः, इन्दुभूः, इन्दूत्थः, इलेशः, एकाङ्गः, ऐन्दवः, कुमारः, कोविदः, चन्द्रजः, ताराजः, तारेयः, नेमिजः, पञ्चार्चिः (ष्), पण्डितः, बोधनः, मार्गाङ्किः, रोधनः, विधुजः, विधुभूः, विधूत्थः, विबुधः, वैधवः, वैबुधः, शशिजः, शशिभूः, शशङ्किः, श्यामाङ्गः, हर्षुलः,

(४) अतिदीर्घः, अत्रिपौत्रः, दृक्पथः, अब्जजन्मा (अन्), अब्जसुतः, अब्जसूनुः, अब्जापत्यम्, इन्दुजनिः, इन्दुपुत्रः, इन्दुभवः, इन्दुसुतः, इन्दुसूनुः, इलाजानिः, इलानाथः, इलेश्वरः, एकदेहः, चन्द्रजनिः, चन्द्रजन्मा (अन्), चन्द्रपुत्रः, चन्द्रसुतः, चन्द्राङ्गजः, चन्द्रात्मजः, चान्द्रमसः, जैवातृकिः, तारकेयः, तारासुतः, द्वैजराजिः, धनिष्ठाभूः, प्रहर्षणः, प्रहर्षुलः, भेशजातः, मृगाङ्कजः, राजपुत्रः, राजसुतः, रोहिणीजः, रौहिणेयः,

विधुजनिः, विधुसुतः, शशाङ्कजः, शार्वहीशिः, शाशधरिः, शीतांशुजः, शीतांशुभूः श्यामगात्रः श्रविष्ठाजः, श्रविष्ठाभूः, सोमजनिः, सोमसुतः, सोमसूनुः, हिमांशुजः, हैमांशवः,

(५) अब्जनन्दनः, इन्दुतनयः, इन्दुनन्दनः इलारमणः, इलावल्लभः, उषेशजातः, ऋक्षपजनिः, कलापजनिः कलेशजनिः, कलेशपुत्रः, चन्द्रतनयः, जडांशुजन्मा (अत्), जडांशुभवः, जडांशुसूनुः, जैवातृकजः, तारकासूनुः, ताराङ्गजातः, तारातनयः, तारानन्दनः, तौहिनांशुजः, तौहिनांशवः, द्विजराजजः, धनिष्ठाभवः, परिज्वपुत्रः, पर्वरिपुत्रः, पालाशवासाः (अस्), पालाशाम्बरः, मृगाङ्कसूनुः, यामिनोशजः, रजनीशभूः, राकेशात्मजः, रोहिणीभवः, रोहिणीसुतः, विधुतनयः, विधुदारकः, शशाङ्कसूनुः। शशिकुमारः, शशितनुजः, शशिनन्दनः शिशिरांशुजः, शीतगुसूनुः, शीतभानुजः, शीतलांशुजः शीतांशुजातः, शीतांशुपुत्रः, शीतांशुसूनुः, शैतलांशवः, शैशिरांशवः, श्रविष्ठाभवः, सोमनन्दनः, हरिणाङ्कजः, हिमकरजः, हिमांशुजन्मा (अन्), हिमांशुसूनुः, हिमांशोः सुतः,

(६) अत्रिजनुः सुतः, अमृतरश्मिजः, अमृतांशुजन्मा (अन्), अमृतांशुसूनुः, इन्दुदेहभवः, उडुनाथपुत्रः, उषाधिताथजः, अक्षेश्वरजन्मा (अत्), एणाङ्कतनूजः, ओषधीशसुतः, कलाधरपुत्रः, कलानिधिसुतः, चन्द्रमसः सुतः, चान्द्रमसायनः, चान्द्रमसायनिः, छायाङ्कतनयः, जैबातृकजनिः, तमिस्राकरजः, तमीनाथजातः, तमीभर्तृपुत्रः, तमीशतनयः तुषारांशुजनिः, तुषारांशुसुतः, तुहिनोस्रसुतः, द्विजराजपुत्रः, द्विजराज सूनुः, धनिष्ठासम्भवः, नक्षत्रेशसुतः, निशानाथसुतः, पीयूषरश्मिजः, प्रालेयभानवः, प्रालेयभानुजः, भनाथनन्दनः, मृगधरजनिः, मृगाङ्कदेहजः, यामिनीशसूनुः, यामवतीशजः, रजनीश्वरभूः, रात्रिनाथात्मजः, रोहिणीनन्दनः, लोकम्पृणात्मजः, वलक्षगुपुत्रः वार्मण्डलभवः, विधुतनुभवः, विधुदेहजातः, शशाङ्कतनयः, शशिशरीरजः, शिशिरांशुसूनुः, शीतकरात्मजः, सितकेतुसूनुः, सितांशुतनुभूः, सुधाकराङ्गजः, सूर्यसहचरः, हरिणाङ्कजन्मा (अन्), हिमकरजनिः, हिमकिरणभूः, हिमरश्मिपुत्रः,

(७) अत्रिदृग्जातसूनुः, अत्रीतजन्माङ्गजः, अमृतभानुसूनुः, गौरमरीचिपुत्रः, जडमयूखसुतः, जैवातृकतनयः, तुषारकरपुत्रः, तुहिनदीधितिजः, द्विजराजदेहजः, धवलभानुभवः, पर्वरिदेहजातः, पीयूषांशूतनयः, प्रालेयरश्मिसुतः, मिहिकाकरजनिः, मृगधरदेहभूः, यामवतीशसुतः, रजनीकरपुत्रः, राकाधिराजजन्मा (अन्), वलक्षवृष्णिभवः, शर्वरीशप्रसूतः, शिशिरगुतनयः, शीतदीधितिसुतः, शीतलभानुभवः, हिममरीचिजनिः,

(८) अमृतकिरणजन्मा (अन्), कलावतोदेहभावः, कुमुदिनीपतिपुत्रः, कुरङ्गलक्ष्मप्रभवः तारकराजतनूजः, द्विजराजाङ्गसम्भवः धवलदीधितिपुत्रः, नक्षत्रनाथनन्दनः, निशीथिनीनाथसुतः, निशीथिनीवल्लभजः, नीहारकरप्रसूतिः, रोहिणीरमणात्मजः, हिमकिरणतनूजः

(९) क्षणदाधिनाथनन्दनः,

(१०) दक्षजाररमणात्मसम्भवः,

(११) दाक्षायणीनायकदेहजन्मा (अन्),

(१२) दाक्षायणीपरिवृढाङ्गसमुद्भवः।

बुधपितृपर्यायाः—अब्जः, इन्दुः, चन्द्रः, चन्द्रमाः (अस्), विधुः, सोमः, शेषस्तु चन्द्रे।

बुधमातृप०—तारा, रोहिणी, शेषस्तु चन्द्रे।

बुधपत्नीप०—इला, वेला।

बुधपुत्रप०—उर्वशीरमणः, ऐलेयः, पुरूरवाः (अन्), बौधः।

पण्डितप०—कोविदः, पण्डितः, बुधः, विद् शेषस्तु प्रकीर्णे।

हरितवर्णप०—पलाशः, पालाशः, पीतनीलः, हरित् (द्), हरितः।

बृहस्पतिपर्यायाः—(१) ज्योग्, ज्ञः,

(२) अर्च्यः, आर्यः, इज्यः, ईड्यः, गुरुः, गौरः, चक्षाः (अस्), जीवः, तपाः (अस्), धीमान् (मतु०), धीशः, पूज्यः, प्रख्याः (अस्), मंत्री (इन्), वाग्मी (इन्), सूरिः,

(३) अङ्गिराः (अस्), अमात्यः, अर्चितः, आचार्यः, इन्द्राचर्यः, इन्द्रेज्यः, गिरीशः, गीः पतिः, गीष्पतिः, गीरथः, गोपतिः, गोविन्दः, दीदिविः, देवार्च्यः, देवेज्यः, देवेड्यः, धिषणः, पारुष्यः, पुरोधाः (अस्), पूजितः, प्रख्यावाक् (च्), प्रचक्षाः, (अस्), प्रशान्तः, मतिमान् (मतु०), लेखार्च्यः, लेखेज्यः, वाक्पतिः, वागीशः, वाग्वाग्मी (इन्), सचिवः, सिन्धुजः, सुरार्च्यः, सुरार्यः, सुरेज्यः, सुरेड्यः, सुरेयः, हरीज्यः, हरीड्यः, हर्य्यर्च्यः,

(४) अङ्गिरोजः, अङ्गिरोभूः, अनिर्वापः, अमरार्च्यः, अमरेज्यः, अमर्त्येज्यः, आङ्गिरसः, आदित्यार्च्यः, आदित्येज्यः, इन्द्रमंत्री (इन्), इन्द्रवन्द्यः, इन्द्राचार्य्यः, इन्द्रार्चितः, गिरांपतिः गिरांस्वामी (इन्), गीर्वाणेज्यः, गीर्वाणेड्यः, ताराजानिः, त्रिदशार्च्यः, त्रिदशेज्यः, त्रिदशेड्यः, दिविजेज्यः, देवगुरुः, देवनुतः, देवपूज्यः, देवमंत्री (इन्), देववन्द्यः, देवाचार्य्यः, देवामात्यः, देवार्चितः, देवोपनीः, दैवतेज्यः, द्वादशार्चिः (ष्), निर्जरिज्यः, पीतवासाः, (अस्), बृहस्पतिः, मतिसखा, मरुत्पूज्यः, मरुदार्य्यः, मरुदीड्यः, मरुद्गुरुः, मरुद्वन्द्यः, मरुन्नुतः, मरुन्मंत्री (इन्), महामति, यूपध्वजः, लेखगुरुः, लेखवन्द्यः, वागधीशः, वागीश्वरः, वाचांपतिः, वाचांप्रभुः, वाचामीशः, वाचांविभुः, वासवेज्यः, वासवेडयः, शक्रगुरुः, शक्रपूज्यः, शक्रमंत्री (इन्), शेमुषीशः, सुरगुरुः, सुरनुतः, सुरपूज्यः, सुरपेज्यः, सुरमंत्री (इन्), सुरवन्द्यः, सूरसूरिः, सुराचार्य्यः, सुरार्चितः, सुरेशार्य्यः, सुरेशेड्यः, हरिप्रियः,

(५) अङ्गिरः पुत्रः, अङ्गिरः सुतः, अङ्गिरोभवः, अद्रिभिन्मंत्री (इन्), अमरगुरुः, अमरनुतः, अमरपूज्यः, अमरमंत्री (इन्), अमराचार्य्यः, अमरार्चितः, अमर्त्यगुरुः, अमर्त्यामात्यः, आखण्डलेज्यः, इन्द्रपूजितः, इन्द्रमहितः, इन्द्रयाजकः, इन्द्रवन्दितः, इन्द्रसचिवः, उतथ्यसोत्थः, उतथ्यानुजः, गिरोरमणः, गीर्वाणगुरुः, गीर्वाणवन्द्यः, गोपतिवन्द्यः, जम्भारिगुरुः, त्रिदशगुरुः, त्रिदशवन्द्यः, त्रिदशाचार्य्यः, त्रिदशार्चितः, दिविजगुरुः, देवतापूज्यः, देवनमस्यः, देवयाजकः, देवोपाध्यायः, दैवताचार्य्यः, द्वादशकरः, निर्जरगुरुः, निलिम्पमंत्री (इन्), निलिम्पाचार्य्यः, पर्ज्यन्यपूज्यः, पाखण्डकर्त्ता (तृ), पीतवसनः, पीताम्बरभृत्, पुरन्दरेज्यः, पुरुहूतार्च्यः, प्राक्फाल्गुनेयः, फाल्गुनीभवः,

बृहतांपतिः, मघवद्गुरुः, मरुदर्चितः, मरुदा- चार्य्यः, मरुन्नमस्यः, मरुद्याजकः, महेन्द्रगुरुः, वचसांपतिः, वाचामधीशः, वासवगुरुः, वासवपूज्यः, वासवार्च्चितः, विबुधपूज्यः, विबुधाचार्य्यः, विबुधामात्यः, वृत्रारिपूज्यः, वृत्रारिवन्द्यः, वृषवन्दितः, शक्रस्य मंत्री (इन्), शासितदेवः, सरस्वतीशः, सुरनमस्यः, सुरपूजितः, सुरमहेज्यः, सुरयाजकः, सुराणांगुरुः, सुराधिदेवः, सुरेन्द्रगुरुः, सुरेन्द्रवन्द्यः, सुरेशगुरुः, सुरेशनुतः, सुरेशपूज्यः, सुरेशमंत्री (इन्), सुरेशाचार्य्यः, सुरेशार्च्चितः, सुरोपाध्यायः स्वरर्चितांघ्रि, (६)अनिमिषाचार्यः, अनिमिषार्चितः, अमरपुरोधाः (अस्), अमरार्चितांघ्रिः, अमरेशमंत्री (इन्), आदितेयगुरुः, आदित्यार्चितांघ्रिः, इन्द्रपुरोहितः, इन्द्रसुवस्तिकः उतथ्यसोदरः उतथ्यावरजः,गीर्वाणेशवन्द्यः, चित्रशिखण्डिजः, त्रिदशपगुरुः, त्रिदशपतीज्यः, त्रिदशसचिवः, दम्भोलिभृदिज्यः, दम्भोलिभृन्मंत्री (इन्), दिविचराचार्य्यः, देवपतिपूज्यः, देवपतिमंत्री (इन्), देवपुरोहितः, देवराजार्च्चितः, देवसमर्चितः, निर्जरसचिवः, पर्जन्यार्चितपत् (द्), पविपाणिपूज्यः, पविपाणिमंत्री (इन्), पुरन्दरगुरुः, पुरन्दराचार्य्यः, पुरन्दरामात्यः, पुरुहूतपूज्यः, पुरुहूतवन्द्यः, प्राक्फाल्गुनीसुतः, बलारातिगुरुः, मघोनः सचिवः, मरुतां पुरोधाः (अस्), मरुताममात्यः, मरुत्पुरोहितः, मरुदधिदेवः, मरुदुपाध्यायः, महेन्द्रसचिवः, लेखपुरोहितः वचसामधीशः, विबुधवन्दितः, विबुधसचिवः, विबुधेन्द्रमंत्री (इन्), शक्रपुरोहितः, शक्रसुवस्तिकः, शच्याः प्रभोर्मंत्री (इन्), शतक्रतुगुरुः, संवर्तपूर्वजः, सुमनोनमस्यः, सुरनाथगुरुः, सुरपतिगुरुः, सुरपपुरोधाः (अस्), सुरपुरोहितः, सुरराजगुरुः, सुरराजपूज्यः, सुरराजवन्द्यः, सुरवन्द्यमानः, सुरार्च्यचरणः, सुरेन्द्रयाजकः, सुरेशनमस्यः, सुरेशपूजितः, सुरेशयाजकः, सुरेशसचिवः, सुरेशाधिदेवः सुरेशोपाध्यायः

(७) अदितिजनिगुरुः, अदितिसुतामात्यः, अमरनाथपूज्यः, अमरपार्चितांघ्रिः, अमरपूजितांघ्रिः, अमरपूज्यपादः, अमरराजपूज्यः, अमरराजमंत्री (इन्), अमरवन्द्यमानः, अमरधीसहायः, अमरेन्द्रोपाध्यायः, इन्द्रस्यपुरोहितः, कुलिशधरनुतः, कुलिशभृत्सचिवः, गणपतिगणकः, गीर्वाणराजार्चितः, चित्रशिखण्डिसूनुः, त्रिदशपतिगुरुः, त्रिदशराजगुरुः, त्रिदिवेशवन्दितः, दानवारिसचिवः, देवताराजपूज्यः, देवदेवसचिवः, देवदेवाधिदेवः, देवनायकगुरुः, देवेशपुरोहितः, निर्जरराजपूज्यः, पविपाणिपूजितः, मरुत्पतिपूजितः, मरुद्वन्दितपदः, मेघयानार्च्चितांघ्रिः, वचसांपरिवृढः, विबुधपतिगुरुः, शचीपतेः पुरोधाः (अस्), संक्रन्दनसचिवः, सुनासीरपुरोधाः (अस्), सुरनाथपूजितः, सुरनाथयाजकः, सुरपतिवन्दितः, सुरराजपुरोधाः (अस्), सुरराजवन्दितः, सुरवन्दितपदः, सुरेशपुरोहितः,

(८) अदितिनन्दनपूज्यः, अमरनाथवन्दितः, अमर्त्यपूज्यचरणः, अमृतान्धसांपूजितः, अस्वप्नदेवसचिवः, ऋभुविभुवन्दितांघ्रिः, क्रतुभुजांपतिपूज्यः, गीर्वाणनाथसचिवः, चित्रशिखण्डिप्रसूतः, दिविषन्नुतचरणः, दिवौकसांदेवगुरुः, निर्जरराजवन्दितः, निलिम्पराजपूजितः बहिर्मुखवन्दितांघ्रिः, यज्ञभुजां सौवस्तिकः, वृन्दारकार्चितपदः, सुपर्वनाथमहितः, सुरकुलपतिपूज्यः, सुरेशवन्दितपदः, सुरेश्वरपूजितांघ्रिः, स्वर्लोकराजसचिवः, (९) अमृतादनार्चितपदः,

नाकनायकयाजकः, निलिम्पेश्वरपूजितांघ्रिः, शचीपतिबुद्धिसहायः, सुरराजवन्दितपदः, सुरवृन्दवन्दितपदः, (१०) अनिमिषेशपूजितपादः, निलिम्पनायकपुरोहितः, (११) अदितिनन्दननाथपुरोधाः (अस्), निर्जरनायकपूजितपादः, वृन्दारकवृन्दवन्दितपदः, (१२) अदितिदारकदेववन्दितपादः, (१३) अदितिदारकदेववन्दितचरणः।

गुरुपर्यायाः—उपनीः, क्षाणी (इन्), गुरुः, तीर्थः, दिशातः, देशिकः, देशिकोत्तमः, धर्मोपदेशकः, निषेकादिकृत् (द्), बोधानः, ब्राह्मिकः।

आचार्य्यप०—अनुयोगकृत् (द्), आचार्य्यः, गुरुः, मंत्रव्याख्याकारः, मंत्रव्याख्याकृत् (द्)।

उपाध्यायप०—अध्यापकः, उपाध्यायः, पाठकः।

पूज्यप०—अञ्चितम्, अर्चितम्, अर्च्यः, इज्यः, ईड्यः नमस्यः, नुतः, पूजितम्, पूज्यः, महितम्, वन्दितम्, वन्द्यः,वन्द्यमानः, समिर्चितम्, सम्पूजितम्।

मंत्रिप०—अमात्यः, धीकर्मसहायः, धीसखः, धीसचिवः, बुद्धिसहायः, मंत्री (इन्), सचिवः, सामवयिकः।

पुरोहितप०—ऋत्विक् (ज्), पुरोधाः (अस्), पुरोहितः, याजकः, सौवस्तिकः (सुवस्तिकः?)।

सदस्यप०—देशिकः, देशिकोत्तमः, सदस्यः, सभासद् (त्), सभास्तारः, सभ्यः, सामाजिकः, स्थेयः।

याजकनामानि—(१) अध्वर्युः, (२) प्रस्थाता (तृ), (३) नेष्टा (ष्टृ), (४) उन्नेता (तृ), (५) ब्रह्मा (अन्) (६) ब्राह्मणाच्छंसी (इन्), (७) अग्नीध्रः, (८) पोता (तृ), (९) उद्गाता (तृ), (१०) प्रस्तोता (तृ), (११) प्रतिहर्ता (तृ), (१२) अस्तुब्राह्मणः, (१३) होता (तृ), (१४) मैत्रावरुणः, (१५) अच्छवाकः, (१६) ग्रावस्तुत् (द्)।

वैजन्त्यां तु—

याजकाः, भरताः, यज्ञलिहः, कुरवः, ऋत्विजः, यतस्रुचः, देवयवः, वाघ्रतः, वृक्तबर्हिषः, अध्वर्यवः, उद्गातारः, होतारः, ब्रह्मा चेति महर्त्विजः।

वाक्पर्यायाः—गिर्, गिरा, गौः, (गो), ब्राह्मी, भारती, भाषा, वचः (अस्), वाक् (च्), वाणी, श्रुतदेवी, सरस्वती।

पादप०—अंह्रिः, अंघ्रिः, क्रमः, क्रमणः, चरणः, चलनः, पत् (द्), पदम्, पात् (द्), पादः।

पीतवर्णप०—गौरः, तालकाभः, पीतः, पीतलः, सितरञ्जनः, सितरूपः, हरिद्राभः, हरिद्रासदृशः, हारिद्रः।

गुरुपितृप०—अङ्गिराः (अस्) (सप्तर्षिविशेषः), चित्रशिखण्डी (इन्)।

गुरुज्येष्ठभ्रातृप०—उतथ्यः, जीवाग्रजः।

गुरुपत्नीप०—तारा।

गुरुपुत्रप०—कचः।

गुरुरथप०—नीतिघोषः।

शुक्रपर्यायाः—(१) ञः, भः, (२) अच्छः, इनः, कविः, काणः, कामः?, काव्यः, दूतः, धिष्ण्यः, भगः, भृगुः, शुक्रः, शुक्लः, श्वेतः, सितः, (३) आस्फुजिः आस्फुजित् (द्), उशना (अस्), एकदृग् (श्), एकाक्षः दैत्यर्त्विक् (ज्), दैत्यार्च्यः, दैत्येज्यः, दैत्येड्यः, दैत्येशः, बलीज्यः, भसञ्ज्ञः, भागवान् (मतु०), भार्गवः, भृगुजः, भृगुभूः, भृगूत्थः, मघाजः, मघाभूः, मघोत्थः, सुकविः, (४) असुरार्च्यः, असुरेज्यः, असुरेड्यः, आसुरेज्यः, एकचक्षुः (स्), एकनेत्रः, कविसूनुः, काव्यसुतः, चित्रवासाः (अस्), चित्राम्बरः, तिर्यग्गामी (इन्), दनुजार्च्यः, दानवेज्यः, दानवेड्यः, दिनदृश्यः, दिवाचरः, दैतेयार्च्यः, दैतेयेज्यः, दैतेयेड्यः, दैत्यगुरुः, दैत्यनुतः, दैत्यनुतः, दैत्यपूज्यः, दैत्यप्रियः, दैत्यभर्त्ता (तृ), दैत्यमंत्री (इन्), दैत्त्यवन्द्यः, दैत्यसुहृत् (द्), दैत्याचार्य्यः, दैत्यामात्यः, दैत्यार्चितः, दैत्येन्द्रेड्यः, दैत्येशेज्यः, दैत्येशेड्यः, दैत्योपनीः, प्राक्सुरेज्यः, प्राग्देवेज्यः, बलिगुरुः, बलिपूज्यः, बलिमंत्री (इन्), बलिवन्द्यः, बल्यमात्यः, भृगुजनिः, भृगुजन्मा (अन्), भृगुपुत्रः, भृगुभवः, भृगुसुतः, भृगुसूनुः, भृग्वपत्यम्, मघाजनिः, मघाजन्मा (अन्), मघाभवः, मदग्रहः, श्वेतरथः, षोडशार्चिः (ष्), षोडशांशुः, सितरथः, (५) असुरगुरुः, असुरप्रियः, असुरसूरिः, असुराचार्य्यः, असुरार्चितः, एकनयनः, एकलोचनः, चित्रवसनः, दनुजगुरुः, दनुजनुतः, दनुजपूज्यः, दनुजमंत्री (इन्), दनुजवन्द्यः, दनुजसूरिः, दनुजाचार्य्यः, दनुजामात्यः, दनुजार्च्चितः, दानवगुरुः, दानवपूज्यः, दानवप्रियः, दानवमंत्री (इन्), दानववन्द्यः, दानवसुहृत् (द्), दानवाचार्य्यः, दानवामात्यः, दानवार्चितः, दितिजगुरुः, दितिजपूज्यः, दितिजमंत्री (इन्), दितिजाचार्य्यः, दितिजामात्यः, दैतेयपूज्यः, दैतेयवन्द्यः, दैतेयार्च्चितः, दैत्यनमस्यः, दैत्यपुरोधाः (अस्), दैत्यपूजितः, दैत्यमहितः, दैत्यवन्दितः, दैत्यसचिवः, दैत्येन्द्रमंत्री (इन्), दैत्येन्द्रवन्द्यः, पूर्वदेवेज्यः, पूर्वसुरेज्यः, प्राक्सुरवन्द्यः, प्राग्देवतेज्यः, प्राग्देवपूज्यः, प्राग्देवाचार्यः, प्राग्दैवतार्च्यः, प्राग्दैवतेज्यः, बलिपूजितः, बलिवन्दितः, बलिसचिवः, बलेःपुरोधाः (अस्), भार्गवदेवः, भृगुतनयः, भृगुनन्दनः, भृगुप्रसूतिः, भृगुवंशजः, भृगोरपत्यम्, भृगोर्नन्दनः, शतपर्वेशः, सुरारिवन्द्यः, (६) अमरारिगुरुः, अमरारिपूज्यः अमर्त्यारिमंत्री (इन्), अमर्त्यारिवन्द्यः, असुरदयितः, असुरनमस्यः, असुरपूजितः, असुरमहेज्यः, असुरवन्दितः, असुरेन्द्रगुरुः, आसुरपूजितः, इन्द्ररिपुमंत्री (इन्), इन्द्रारिवन्दितः, त्रिदशारातीज्यः, त्रिदिवेशारीड्यः, दनुजनाथार्च्यः, दनुजसचिवः, दनुजाधिपेज्यः, दनुजेन्द्रमंत्री (इन्), दानवपूजितः, दानवयाजकः, दानववन्दितः, दानवोपाध्यायः, दितितनयेज्यः, दितिसुताचार्य्यः, देवरिपूपनीः, दैतेयनमस्यः, दैतेयमहितः, दैत्यपुरोहितः, पूर्वदेवतेज्यः पूर्वदेवपूज्यः, पूर्वदैवतेड्यः, प्रथमदेवार्च्यः, प्रथमसुरेज्यः, प्राग्देवतावन्द्यः, प्राग्देववन्दितः, पाग्दैवतार्चितः, बलिपूज्यपादः, भार्गवनन्दनः, भृगुनन्दकरः, विबुधारातीज्यः, विबुधारिपूज्यः, विबुधारिवन्द्यः, शतपर्वाजानिः, शतपर्वानाथः, शतपर्वापतिः, शासितदानवः, सुरारिदयितः, सुरारिसचिवः, (७) अनिमिषारातीज्यः, अनिमेषारिपूज्यः,

अमरवैरिवन्द्यः, अमर्त्यसपत्नेज्यः, असुरकुलगुरुः, असुराणां दयितः, असुरेन्द्रपुरोधाः (अस्), असुरेन्द्रमहितः, असुरेन्द्रसचिवः, दनुजराजगुरुः, दनुतनयार्चितः, दनुनन्दनमंत्री (इन्), दानवराजपूज्यः, दानवाधीशवंद्यः, दानववृन्ददेवः, दानवार्च्यचरणः, दानवेन्द्रार्चितांघ्रिः, दितिनन्दनवन्द्यः, दितिसुतसचिवः, दितिसूनुपूजितः, दैतेयराजार्च्चितः, दैत्यपतिपुरोधाः (अस्), दैत्यराजवन्दितः, पूर्वदेवसचिवः, पूर्वदेवार्चितर्घ्रिः, प्रथमदेवगुरुः, प्रथमसुरनुतः, प्रथमसुरपूज्यः, प्राग्देवतार्च्चितांघ्रिः, प्राग्देवतावन्दितः, (८) अनिमिषरिपुपूज्यः, असुरपूज्यचरणः, असुरराजपूजितः, असुरवन्दितपादः, असुराधिपपूजितः, दनुजनुः सौवस्तिकः, दानवनाथनमस्यः, दानवराजवन्दितः, दितिसूनुपुरोहितः, देवेन्द्रसपत्नगुरुः, दैत्यपतेः पुरोहितः, दैत्येन्द्रपूजितपादः, पूर्वदेवार्चितपादः, प्रथमदेवपुरोधाः (अस्), प्राग्दैवतपुरोहितः, सुरेन्द्रशत्रुमहितः, सुरेशसपत्नसचिवः, (९) अनिमिषद्विषदर्चितः, अमरराजरिपूपनीः, अमरवैरिपुरोहितः, दनुजराजपुरोहितः, (१०) अनिमिषेश्वरवैरिवन्द्यः, अमरशात्रवपूजितांघ्रिः, असुरवृन्दवन्दितपदः, दानवराजपूजितपादः, (११) अदितिसूनुसपत्नसचिवः, असुरनायकपूजितपादः, प्रथमदैवतवन्दितपादः, प्राग्देवतापूजितपादपद्मः (कः), प्राग्देवताराजसुपूजितांघ्रिः, दितिजबुद्धिसहायनभश्चरः, वृन्दारकवैरिवृन्दवन्दितपादः, वृन्दारकवैरिवृन्दवन्दितपदः।

शुक्रपितृपर्यायाः—भृगुः, महर्षिविशेषः, भगवद्विभूतिः।

शुक्रपत्नीप०—शतपर्वा, शतपर्विका, शतपर्वी।

शुक्रपुत्रप०—असुरपुरोहितः, शण्डः।

शुकपुत्रीप०—देवयानी, ययातिपत्नी, शुक्राचार्य्यपुत्री।

चित्रवर्णप०—एतः, कर्वुरः, कल्माषः किर्मीरः, चित्रम्, चित्रलः, शबलः।

शिष्यप०—अन्तेवासी (इन्), अन्तेषत् (द्), छात्रः, मोकः, विनेयः, शिष्यः।

दैत्यप०—असुरः, इन्द्रारिः, कश्यपापत्यम्, क्षारः?, दितिजः, दितिसुतः, दित्यपत्यम्, दृष्टिमुट् (ष्), देवशत्रुः, दैतेयः, दैत्यः, पातालौकाः (अस्), पूर्वदेवः, पूर्वदेवता, पूर्वसुरः, प्रथमदेवः, प्रथमदेवता, प्रथमसुरः, प्राग्देवः, प्राग्देवता, प्राक्सुरः, यज्ञशत्रुः, रसागेहः, वेदविद्विट् (ष्), शुक्रशिष्यः, सुरद्विट् (ष्), सुरारिः, हरिद्विट् (ष्)।

दानवप०—असुरः इन्द्रारिः, दनुजः, दनुतनुजन्मा अन्), दनुपुत्रः, दनुभवः, दनुभूः, दनुसूनुः, दानवः, शुक्रशिष्यः।

कालेयपर्यायाः—असुरः, इन्द्रारिः कालीजः, कालीतनयः, कालीपुत्रः, कालीभवः, कालीभूः, कालीसूनुः, कालेयः, महिषासुरः, महिषीजः, महिषीभवः, महिषीभूः, महिषीसुतः, माहिषेयः, सुरद्विट् (ष्)।

दैत्यवर्द्धकिप०—असुरशिल्पी, दैत्यवर्द्धकिः, मयः, सूर्यसिद्धान्तकर्ता (तृ)।

शनिपर्यायाः—(२) अर्किः, आरः, आर्किः, ऐनिः, कालः, कृष्णः, कोणः, कोलः,

क्रूरः, क्रोडः, खोडः, दीर्घः, नीलः, पङ्गुः, पौष्णः ब्राध्निः, भागिः, भाग्यः, मन्दः, मृदुः, मैत्रः, मैत्रिः, यमः, वक्रः, शनिः, शनैः (स्) (अ०), शौरः, शौरिः, श्यामः, सौरः, सौरिः, स्थिरः, हांसिः, (३) अंशुजः, अंशुभूः, अन्तकः, अर्कजः, अर्कभूः, अशुक्लजः, अश्वेतः, असितः, आंशवः, आरुणिः, इनजः, इनभूः, इनोत्थः, कृशाङ्गः, क्रूरात्मा (अन्), घटपः, घटेशः, छायाजः, छायाभूः, छायेयः, तापनिः, नीलरुक् (च्), पपीभूः, पातङ्गिः, पैङ्गलः, प्रभाजः, प्रभाभूः, प्राभेयः, ब्रघ्नजः, ब्रह्मण्यः, भगजः, भगभूः, भगोत्थः, भानवः, भानुजः भानुभूः, भास्करिः, भास्वज्जः, भास्वद्भः, मन्दगः; मन्देतिः, मार्तण्डिः, मार्ताण्डिः, मित्रजः, मृदुगः, मेचकः, मैहिरिः, रविजः, रविभूः, रावेयः, सप्तार्चिः (ष्), सप्तांशुः, सप्तोस्रः, हंसजः, हेलिजः, हैलेयः, (४) अरुणजः, अरुणोत्थः, अर्कजनिः, अर्कजन्मा (अन्), अर्कपुत्रः, अर्कभूतः, अर्कसुतः, अर्कात्मजः, असितगुः, असितभाः (अस्), असितरुक् (च्), आदित्यजः, आदित्योत्थः, इनजनिः, इनजनुः (ष्), इनसुतः, इनात्मजः, उष्णांशुजः, औष्णांशवः, कपिलाक्षः, कृष्णप्रभः, कुष्णरुचिः, कृष्णवासाः (अस्), कृष्णाम्बरः, खरांशुजः, खरोस्रभूः, खारांशवः, गभस्तिजः, गाभस्तेयः, घटनाथः, घटविभुः, घटाधिपः, चण्डांशुजः, चाण्डकरिः, चाण्डांशवः, छायाजनिः, छायात्मजः, छायापुत्रः, छायाभवः, छायासुतः, छायासूनुः, तपनजः, तारणेयः त्रिमूर्तिभूः, त्रैमूर्त्तेयः दैनकरिः, दैवाकरिः, ध्वान्तद्विड्भूः, नीलद्युतिः, नीलरुचिः, नीलरोचिः, (ष्), नीलवस्त्रः, नीलवासाः (अस्), नीलाम्बरः, नीलांशुकः, पतङ्गजः, पतङ्गभूः, पपीजनिः, पप्यःपुत्रः, पीथपुत्रः, पूषजातः, प्रभासुतः, प्राभाकरिः, ब्रध्नजनिः, ब्रध्नभवः, भगभवः, भगात्मजः, भानुजन्मा (अन्), भानुपुत्रः, भास्करजः, भास्वद्भवः, मन्दगतिः, मन्दगामी (इन्), मन्दचरः, मन्दभुक्तिः, मन्दमार्गः, मन्दरयः, महाग्रहः, मृदुगतिः, मृदुगामी (इन्), मार्तण्डजः, मार्ताण्डभूः, मित्रपुत्रः, मिहिरजः, यमानुजः, रविजन्मा (अन्), रविभवः, रवेः सुतः, रेवतीजः, रेवतीभूः, वैकर्त्तनिः, वैरोचनिः, वैवस्वतः, शनैश्चरः, शनैश्चारी (इन्), शितिदीप्तिः, शितिरुचिः, शितिवासाः (अस्), श्यामतनुः, श्यामलाङ्गः, श्यामवासाः (अस्), श्रुतकर्मा (अन्), सूनुपुत्रः, सूनुसूनुः, सूरसुतः, सूर्यपुत्रः, सूर्यात्मजः, हंसजनिः, हेलिसुतः, (५) अर्कतनयः, अशुभ्ररोचिः (ष्), असितशोचिः (ष्), असिताम्बरः अहेरङ्गभूः, आदित्यसुतः, इनप्रसूतः, उष्णांशुपुत्रः, क्रूरदृक्पथः, खरांशुपुत्रः, ग्रहनायकः, चण्डांशुसूनुः, छायाकुमारः, जगज्जन्मजः, तपनात्मजः, तरणिपुत्रः, तरणिबन्धुः, तिग्ममहोभूः, त्रिमूर्तिपुत्रः, दिनमणिजः, दिनेशसूनुः, दिवानाथजः, दैनमणेयः, द्युमणिसुतः, नलिनीशजः, नीलवसनः, नीलाम्बरभृत् (द्), पतङ्गपुत्रः, पिङ्गलात्मजः, प्रेतपुरीशः, भगसम्भवः, भानुतनयः, मार्तण्डाङ्गजः, मिहिरात्मजः, मेचकरुचिः, यमवरजः, युगवर्त्तकः, रेवतीभवः, लोकबन्धुभूः, विकर्त्तनजः, विरोचनभूः, वैभावसवः, श्यामलशोचिः, (ष्) सप्ताश्वसूनुः,

सवितृसुतः, सहस्रांशुजः, साहस्रांशवः हंससन्ततिः, हेलिनन्दनः, (६) अरुणतनयः, अर्कतनुजन्मा (अन्), असितवसनः, आदित्यतनुजः, इनदेहजन्मा (अन्), उष्णांशुतनयः, कपिलनयनः, कपिललोचनः, कमलिनीशजः, खररश्मिसूनुः, गभस्तिसम्भवः, घटरूपभर्त्ता (तृ), तपनन्दनः, तमोहन्तृ सुतः, तरणितनुजः, तीक्ष्णोस्रतनुभूः, तीव्रकरजातः, दिनकरात्मजः, दिननायकोत्त्थः, दिनपतिपुत्रः, दिनेशतनयः, दिवसेशसूनुः, दिवाकरसुतः, द्युमणिनन्दनः, नलिनीशजनिः, पतङ्गतनयः, पिङ्गलात्मभवः, ब्रध्नतनुजन्मा (अन्), भास्करात्मभवः, भास्वत्तनुजनिः, मिहिराङ्गजातः, यमसहोदरः, लोकबन्धुपुत्रः, विभावसुसुतः, विवस्वत्तनूजः, श्रुतश्रवोऽनुजः, सप्तांशुपुंगवः, सवितुःकुमारः, सहस्रांशुसुतः, हंसशरीरजः, हेलिविग्रहभूः, (७) अर्कसंहननजः, अहस्करनन्दनः, आदित्यसमुद्भवः, उष्णदीधितिसूनुः, कमलिनीशजन्मा (अन्), जगत्साक्षिसन्तन्तिः, तपनतनुभवः, तरिणदेहजातः, पद्मिनीपालपुत्रः, प्रखरकरजन्मा (अन्), मार्तण्डकायभवः, मिहिराङ्गसम्भवः, वासरनाथपुत्रः, वासरमणिसूनुः, सप्तगन्धर्वजातः, सप्तसप्त्यङ्गजन्मा (अन्), सुवर्चलाजानिभुः, (८) अम्बुजहितप्रभवः, अम्भोजमित्रतनयः, अम्भोजिनीपतिसुतः, दशशतकरपुत्रः, (९) अम्भोभवमित्रनन्दनः, घर्मघृण्यात्मसमुद्भवः, नलिनीश्वरशरीरजः पद्मिनीप्राणपतिपुत्रः, (११) नाथशरीरजन्मा (अन्), पुटकिनीशकलेवरजातः, (१२) मृणालिनीनाथकलेवरोद्भवः, नालीकिनीनायकदेहसम्भवः, (१४) पङ्केरुहाधिपतिसंहननप्रसूतिः।

शनिपितृपर्यायाः—अर्कः, इनः, पपीः, रविः, सूर्यः, शेषस्तु रवौ।

शनिमातृप०—छाया, प्रभा, विभा, शेषस्तु रवौ।

शनिभ्रातृप०—अन्तकः, कालः, यमः, शेषस्तु यमे।

शनिपत्नीप०—चित्ररथकन्या, चित्ररथपुत्री, शनिपत्नी।

कृष्णवर्णप०—अशुक्लः, अशुभ्रः, अश्वेतः, असितः, कालः, कृष्णः, नीलः, मेचकः, रामः, शितिः, श्यामः श्यामलः।

राहुपर्यायाः—(१) वः, (२) अगुः, अहिः, चक्री (इन्), तमः तमः (अस्) (न०), दैत्यः, धाता (तृ), ध्वान्तः, नागः, पंङ्कः, पातः, फणी (इन्), भोगी (इन्), राहुः वक्रः, विदुः, व्यालः, सर्पः, (३) अनंशुः, अब्जारिः, अरश्मिः,अहिराट् (ज्), उरगः, कुण्डली (इन्), ग्रहारिः, गूढपात् (द्), जिह्मगः, तिमिरः, दनुजः, दानवः, नागराट् (ज्), पन्नगः पृदाकुः, फणिपः, फणीन्द्रः, फणीशः, भानुभुक् (ज्), भुजगः, भुजङ्गः, भुजङ्गेट्, भोगिपः, भोगीन्द्रः, भोगीशः, व्यालेशः, शश्यरिः, शीर्षकः, सर्पेन्द्रः, सुरद्विट् (ष्), सैंहेयः, स्वर्भाणुः, स्वर्भानुः, (४) अन्धकारः, अमयूखः, असुरेशः, अहिनाथः, अहिपतिः, अहिविभुः, अहेः प्रभुः, आशीविषः, इन्दुतपः (अस्), इन्दुन्तुदः, इन्दुदुर्हृत् (द्), इन्दुरिपुः, उपप्लवः, उपरागः, उरगपः, उरगेशः, काकोदरः, कृष्णवर्णाः, चक्षुः श्रवाः (अस्), चन्द्रन्तुदः, चन्द्रन्दुनः, चन्द्रपातः, चन्द्रमर्दी,

चन्द्ररिपुः, तमः खेटः, तमोगुणः, दन्दशूकः, दनुजेशः, दर्वीकरः, दानवपः, दानवेन्द्रः, देवरिपुः, देवशत्रुः, दैत्यग्रहः दैत्यच्छायाः, दैत्याधिभूः, नागराजः, फणिपतिः, फणीश्वरः, ब्रध्नवैरी (इन्), भरणीभूः, भुजङ्गमः, भुजगराट् (ज्), भुजगेन्द्रः, भोगिनाथः, भोगिपतिः, मलयजः, रविरिपुः, विधुन्तुदः, विधुमर्दी, विधुवैरी (इन्), बिलेशयः, विषधरः, व्यालपतिः, व्यालपालः, शशिमर्दी (इन्), शिरोग्रहः, शिरोवक्त्रम्, शीर्षदेहः, सिंहिकाभूः, सिहसूनुः, सैहिकेयः, सोमशत्रुः,

(५) अभ्रपिशाचम् :, अमृतचौरः, असुरनाथः, असुराधीशः, इन्दुप्रत्यर्थी (इन्), उरगाधिपः, उरगाधिभूः, ग्रहकल्लोलः, तिमिरदीप्तिः, दनुजनाथः, दानवेश्वरः, नागाधिराजः, निशाकरारिः, पवनाशनः, फणिनायकः, भुजगपतिः, भुजगविभुः, भुजङ्गनाथः, भुजङ्गमेशः, भुजङ्गविभुः, भुजङ्गाधिभूः, विधुबाधकः, शिरोद्युचरः, सिंहिकापुत्रः, सिंहिकासुतः, सिंहिकासूनुः, सिहीतनूजः, सिहीनन्दनः, सोमसपत्नः,

(६) अभ्रपिशाचकम्, इन्दुविमर्दनः, उरगाधिनाथः, उषाविभुशत्रुः, तुहिनांशुन्तुदः, दानवाधिपतिः, पवनभुक्पतिः; फणिनामधिपः, भरणीसम्भवः, भुजगनायकः, रविचन्द्ररिपुः, विहङ्गकल्लोलः, सिंहिकानन्दनः, सिंहीतनुजन्मा (अन्), स्वर्गदिवामणिः, हिमकररिपुः,

(७) कुमुदपतिरिपुः, तमीनाथसपत्नः, दानववृन्दनाथः, दिवसकररिपुः, फणिनामधीश्वरः, सिंहिकाकायजातः, सिंहिकागर्भभूतः, सिंहिकादेहभवः, सिंहीसंहननभूः,

(८) कुमुदिनीपतिपातः, त्रिदशसद्मदिवाकृत् (द्), धवलकरसपत्नः, रविचन्द्रविमर्दनः, सूर्याचन्द्रमसोररिः,

(९) देवनिकेतनभास्करः, रजनीश्वररश्मिहरः,

(११) विभावरीनाथमरीचिहर्ता (तृ), दाक्षायणीनायकरश्मिहर्त्ता (तृ),

(१२) निशीथिनीनायकदीधितेर्हरः।

सर्पपर्यायाः—अहिः, नागः, सर्पः, शेषस्त्वन्यत्र।

अन्धकारप०—अन्धकारम्, अन्धतमसम्, अन्धातमसम्, अवतमसम्, आततिः, आसक्तम्, तमः, तमः (अस्) (न०), तमिस्रम्, तामिस्रम्, तिमिरम्, दिगम्बरः, दिनकेसरः, दिनाण्डम्, ध्वान्तम्, निशावर्म (अन्), नीलपङ्कम्, भूच्छायम्, भूच्छाया, रजोवलम्, रात्रिरागः, वियद्भूतिः, वृत्रः, शार्वरम्, सन्तमसम्।

केतुपर्यायाः—(२) अहिः, कृशः, केतुः, गुदम्, गुह्यम्, चूडी (इन्), तटम्, ध्वजः, पुच्छम्, वक्रः, शिरवी (इन्), श्रीमान् (मतु०), सर्पः, (३) अकचः, अनिलः, आहिकः, उत्पातः, कबन्धः, केतनः, केतवः, धूमजः, पताकः, मृत्युभूः, वारुणः, विकचः, विकेशः, शिखाभृत् (द्), शिखावान् (मतु०), (४) अचिकुरः, आश्लेषाभूः, ऊर्ध्वकचः, केशपाशी (इन्), ग्रहान्तिमः, चन्द्रारातिः, तमः पुच्छः, धूम्रकायः, बिलेशयः, ब्रह्मपुत्रः, मृत्युपुत्रः, मृत्युसुतः, राहुपुच्छः, विषगर्भः, वैजयन्तः, (५) अश्लेषाभवः, आर्द्रालुब्धकः, कबन्धखगः, कबन्धग्रहः, वैजयन्तकः, शिखिविकासी (इन्), (६) उपप्लवाकचः विभावसुसुतः (७) अकचनाकवासः, कबन्धनभश्चरः, कमलजतनयः, केशपाशिखचरः, हिमकरदमनः, (८) विधुवर्गविमोचनः।

प्रकाशकग्रहनामनी—सूर्यः, चन्द्रश्चेति द्वौ प्रकाशकौ ग्रहौ स्तः।

ताराग्रहनामानि—भौमः, बुधः, बृहस्पतिः, शुक्रः, शनिश्चैते पञ्च ताराग्रहाः सन्ति।

तमःस्वरूपग्रहनामनी—राहुः, केतुश्चैतौ द्वौ तमः स्वरूपग्रहौ स्तः।

शुभग्रहनामानि—अर्द्धबिम्बाधिकेन्दुः, निष्पापबुधः, गुरुः, शुक्रश्चैते शुभग्रहाः सन्ति।

अतिशुभग्रहनामानि—बृहस्पतिः, शुक्रः, यमक (घ) ण्टकश्चैतेऽतिशुभग्रहाः सन्ति।

पापग्रहनामानि—अर्द्धबिम्बोनेन्दुः, भौमः, रविः, सपापबुधः, शनिः, राहुः, केतुश्चैते पापग्रहाः सन्ति।

क्रूरग्रहनामनी—भौमः, शनिश्चैतौ द्वौ क्रूरग्रहौ स्तः।

अतिपापग्रहनामानि—केतुः, गुलिकः, मान्दिः राहुश्चैतेऽतिपापग्रहाः सन्ति।

गुलिकपर्यायाः—अतिपापी (इन्), गुलिकः, प्राणहरः।

मान्दिप०—आर्किजः, आर्किपुत्रः, आर्किसूनुः, आर्केर्जनिः, कालसुतः, कृष्णात्मजः, दिनकरसुतपुत्रः, पङ्गुजः, प्रेतपुरीशजः, प्रेतपुरीशसूनुः, भास्वज्जभुः, मन्दजः, मन्दपुत्रः, मन्दसुतः, मन्दोत्थः, मान्दिः, यमात्मजः, शनिसुतः शनेःसूनुः, शनेस्तनूजः।

प्राणपर्यायाः—असुः, प्राणः, प्राणपदः।

ताजिकशास्त्रीयमुन्थाग्रहप०—अन्थिहा, इन्थाः, इन्थहा, मुथा, मुन्था, मुथिहा।

उपग्रहनामानि—(१) कालः, (२) परिवेशः (परिधिः), (३) धूमः, (४) अर्द्धयामः, (अर्द्धप्रहरः), (५) यमघण्टकः (यमकण्टकः), (६) इन्द्रधनुः (शक्रचापः), (७) गुलिकः (मान्दिः), (८) व्यतिपातकः (व्यतीपातः), (९) ध्वजः (उपकेतुः) इत्येते नवोपग्रहाः सन्ति।

रव्याद्यंशानां नामानि—रव्यंशः (कालः) भौमांशः (मृत्युः), बुधांशः (अर्द्धप्रहरः), गुर्वंशः (यमघण्टकः), शन्यंशः (गुलिको मान्दिर्वा), चैते रव्याद्यंशनामानि सन्ति।

नूतनग्रहनामानि—(१) हर्शलः (इन्द्रः), (२) नेप्च्यूनः (वरुणः), प्लुटोः (?), चैते नव्यग्रहाः सन्ति।

एकयोक्त्या ग्रहाणां पर्यायाः

रवीन्द्वोः पर्यायाः—गावौ, ग्रहराजौ, तिमिरारी, दर्शतौ, ध्वान्तारी, पचतौ, पीतू, पुष्पदन्तौ, पुष्पवन्तौ, भगौ, भासन्तौ, भेनौ, हरी, उष्णहिमकरौ।

चन्द्रगुर्वोःप०—गौरौ, सिन्धुजौ, सिन्धुभवौ।।

ज्ञार्क्योःप०—हरिजौ।

ज्ञेन्द्वोःप०—बुधौ।

रवीज्ययोःप०—गोपती।

रव्यारयोःप०—अरुणौ, काश्यपेयौ।

तमोऽर्कयोःप०—असुरौ, अही।

राहुकेत्वोःप०—अर्केन्दुवैरिणौ, उपखगौ, उपग्रहौ, तमोग्रहौ, रवीन्दुरश्मिहरौ, रवीन्दुविमर्दनौ।

भेन्द्वोःप०—भमौ।

चन्द्रेज्ययोः प० —मेज्यौ।

चन्द्राच्छयोः प० —माच्छौ।

गुरूभयोः प० —अनिमिषानिमिषद्विषदर्चितौ, अमात्यौ, अर्चितौ, अर्च्यौ, आचार्यौ, उपनियौ, उपाध्यायौ, गुरू, पूजितौ, पूज्यौ, मंत्रिणौ, महितौ, वन्दितौ, वन्द्यौ वाडवखगौ, विप्रौ, शासितदेवदैत्यौ।

शुक्रगुर्वोः प० —भेज्यौ।

शुक्रशन्योः प० —शुक्ल्लाशुक्लौ, सितासितौ, सितसौरी।

गुरूशुक्ररविभौमप० —द्विजराजखेचराः।

सूर्यारमन्दप० —विषमग्रहाः।

रविभौमप० —राजग्रहौ।

भौमार्किप० —भूमीसूर्यपुत्रौ।

भौमबुधप० —कुचन्द्रसूनू।

उच्चराशिपर्यायाः—उच्चम् (पु०, न०), उच्चगृहम्, उच्चभम्, उच्चभवनम्, उच्चराशिः, उच्चर्क्षम्, तुङ्गम्, तुङ्गगृहम्, तुङ्गभम्, तुङ्गभवनम्, तुङ्गराशिः, तुङ्गर्क्षम्।

ग्रहोच्चराशिनामानि—(१) मेषः, (२) वृषः, (३) मकरः, (४) कन्या, (५) कर्कः, (६) मीनः, (७) तुला, एतेऽर्कात्क्रमत उच्चराशयः सन्ति।

ग्रहोच्चांशसंख्याः—दश, त्रयः, अष्टाविंशतिः, पञ्चदश, पञ्च, सप्तविंशतिः, विंशतिश्चैते रवेः क्रमादुक्तोच्चराशिषूच्चांशाः सन्ति।

नीचराशिपर्यायाः—अधरम्, अधरगृहम्, अधरभम्, अधरभवनम्, अधरराशिः, अधरर्क्षम्, निम्नम्, निम्नगृहम्, निम्नभम्, निम्नभवनम्, निम्नराशिः, निम्नर्क्षम्, नीचः, नीचगृहम्, नीचभम्, नीचभवनम्, नीचराशिः नीचर्क्षम्।

ग्रहनीचराशिनामानि—(१) तुला, (२) वृश्चिकः, (३) कर्कः, (४) मीनः, (५) मकरः, (६) कन्यां, (७) मेषः, एतेऽर्कात् क्रमतो नीचराशयः सन्ति, नीचांशास्तूच्चांशवद् बोध्याः।

मूलत्रिकोणराशिपर्यायाः—त्रिकोणम्, त्रिकोणगृहम्, त्रिकोणभम्, त्रिकोणभवनम्, त्रिकोणराशिः, त्रिकोणर्क्षम्, मूलत्रिकोणम्, मूलत्रिकोणगृहम्, मूलत्रिकोणभम्, मूलत्रिकोणभवनम्, मूलत्रिकोणराशिः, मूलत्रिकोणर्क्षम्।

ग्रहमूलत्रिकोणराशिनामानि—(१) सिंहः, (२) वृषः, (३) मेषः, (४) कन्या, (५) धनुः, (६) तुला, (७) कुम्भः, इत्येतेऽर्कात् क्रमतो ग्रहाणां मूलत्रिकोणराशयः सन्ति।

ग्रहमूलत्रिकोणांशसंख्याः—विंशतिः, सप्तविंशतिः, द्वादश, पञ्च, दश, पञ्चदश, विंशतिश्चैते रवेः क्रमान्मूलत्रिकोणांशाः सन्ति।

कालपुरुषाङ्गेग्रहविभागः—(१) शीर्षं, मुखं च, (२) गलः, (३) पृष्ठ उदरं च, (४) करः अंघ्रिश्च, (५) कटी जघने च, (६) गुह्य मुष्कं च, (७) जानू, इत्येतेषु कालपुरुषशरीरावयवेषु एकादिसंख्याक्रमतो रव्यादिग्रहाणां विभागो बोध्यः।

ग्रहधातुनामानि—(१) अस्थि, (२) रुधिरम्, (३) मज्जा, (४) त्वचा, (५) वसा, (६) वीर्यम्, (७) स्नायुश्चैते धातवोऽर्कात् क्रमात्सन्ति।

ग्रहवर्णनामानि—(१) रक्तः, (२) श्वेतः, (३) लोहितः, (४) हरितः, (५) पीतः, (६) सितः, (७) श्यामलः, चैते वर्णा रवेः क्रमात्सन्ति।

दिगीशनामानि—(१) रविः (२) शुक्रः, (३) मङ्गलः, (४) राहुः, (५) शनिः, (६) चन्द्रः, (७) बुधः, (८) गुरुश्चैते पूर्वादीनां दिशां प्रदक्षिणक्रमेण रव्यादयोऽधिपाः सन्ति।

पुरुषग्रहनामानि—रविः, कुजः गुरुश्चैते पुरुषग्रहाः सन्ति।

स्त्रीग्रहनामनी—चन्दः, शुक्रश्चैतौ स्त्रीग्रहौ स्तः।

नपुंसकग्रहनामनी—बुधः, शनिश्चैतौ क्लीबग्रहौ स्तः।

सजल (आर्द्र) ग्रहनामनी—चन्द्रः शुक्रश्चैतौ सजलावार्द्रग्रहौ स्तः।

निर्जल (शुष्क) ग्रहनामानि—रविः, मङ्गलः शनिश्चैते निर्जल (शुष्क) ग्रहाः सन्ति।

सजलनिर्जलग्रहनामनी—बुधः, गुरुश्चैतौ सजलनिर्जलग्रहावर्थात्सजलराशिगौ सजलौ निर्जलराशिगौ निर्जलावित्याशयः।

ग्रहावस्थानामानि—(१) वृद्धः, (२) स्तनपानम्, (३) बाल्यम्, (४) कौमारम् (व्रतस्थितम्), (५) यौवनम्, (६) मध्यः, (७) अतिवृद्धश्चैतानि ग्रहाणां वयांसीनात् क्रमाज्ज्ञेयानि।

ग्रहरसनामानि—(१) कटुकः, (२) क्षारम्, (३) कटुकः, (४) कषायः, (५) मधुरः, (६) अम्लः (७) तीक्ष्णम्, चैतेऽर्कात् क्रमात् रसाः सन्ति।

ग्रहद्रव्यनामानि—(१) ताभ्रम्, (२) मणिः, (३) सुवर्णम्, (४) शुक्तिः, (५) रौप्यम्, (६) मुक्ताफलम्, (७) लौहं चैतानीनात् क्रमाद् द्रव्याणि सन्ति।

ग्रहरत्ननामानि—(१) माणिक्यम्, (२) मुक्ता, (३) प्रवालम्, (४) पुष्परागः (५) गारुत्मतम्, (६) वज्रम्, (७) नीलश्चैतानीनात् क्रमाद् रत्नानि सन्ति।

ग्रहवस्त्रनामानि—(१) स्थूलम्, (२) रम्यनवम् (३) अग्निहतम्, (दग्धं) (४) जलहतम् (आर्द्रं), (५) मध्यमम् (६) दृढम्, (७) जीर्णम्, चैतानीनात् क्रमाद् वस्त्राणि सन्ति।

ग्रहक्रीडास्थाननामानि—(१) देवालयः, (२) जलतटम्, (३) अग्निस्थानम्, (४) विहारस्थानम्, (५) कोशस्थानम्, (६) शयनस्थानम्, (७) उत्करप्रदेशश्चैतानीनात्, क्रमात् क्रीडास्थानानि सन्ति।

ग्रहाधिदेवनामानि—(१) अग्निः, (२) जलम्, (३) स्कन्दः, (४) विष्णुः, (५) शक्रः (६) शची, (७) ब्रह्मा, चैतेऽर्कात् क्रमादधिदेवाः सन्ति।

सुखपदग्रहनामानि—चन्द्रः, बुधः, गुरुः, शुक्रश्चैते ग्रहाः प्रकृत्या नृणां सुखप्रदाः, स्युः।

दुःखप्रदग्रहनामानि—रविः, मङ्गलः, शनिः, राहुः, केतुश्चैतेग्रहाः प्रकृत्या नृणां दुःखप्रदाः स्युः।

सत्त्वगुणप्रधानग्रहनामानि—रविः, चन्द्रः, गुरुश्चैते सत्त्वगुणप्रधानग्रहाः सन्ति।

रजोगुणप्रधानग्रहनामनी—बुधः, शुक्रश्चैतौ रजोगुणप्रधानग्रहौ स्तः।

तमोगुणप्रधानग्रहनामानि—भौमः, शनिः, राहुः, केतुश्चैते तमोगुणप्रधानग्रहाः सन्ति।

ग्रहवर्णनामानि—(१) क्षत्रियः, (२) वैश्यः, (३) क्षत्रियः, (४) शूद्रः, (५) ब्राह्मणः, (६) ब्राह्मणः, (७) अन्त्यजश्चैतेऽर्कात् क्रमाद् वर्णाधिपाः सन्ति।

ग्रहजातिनामानि—(१) क्षत्रियः, (२) तपस्वी, (३) सुवर्णकारः, (४) ब्राह्मणः, (५) वणिक् (ज्), (६) वैश्यः (७) शूद्रश्चैता अर्कात् क्रमाद् ग्रहजातयः सन्ति।

द्विपदग्रहनामनी—गुरुशुक्रश्चैतौ द्विपदौ स्तः।

चतुष्पदग्रहनामनी—भौमः शनिश्चैतौ चतुष्पदौ स्तः।

पक्षिग्रहनामनी—रविः बुधश्चैतौ विहङ्गमौ स्तः।

सरीसृपाकारग्रहनाम—चन्द्रोऽयं सरीसृपाकारोऽस्ति।

॥ इति बिहारप्रान्तसहरसामण्डलान्तर्गतदोरमाग्रामवास्तव्येन दैवज्ञचूडामणिश्रीसूर्यनारायणसूनुना डॉ० सुरकान्तझाख्येन ज्योतिर्विज्ञानशब्दकोषे ग्रहसर्गः पञ्चमः॥५॥

अथ मानसर्गः—६

मानपर्यायाः—इयत्ता, परिमाणम्, परिमितिः, प्रमाणम्, (अजहल्लिङ्गम्), प्रमितिः, मानम्।

मानार्थवाचकशब्दाः—(१) यौतवम् (पौतवम्) (२) द्रुवयम्, (३) पाय्यम्, चेति त्रयोमानार्थवाचकशब्दाः स्युः।

तदुक्तममरेण—'यौ (पौ) तवं द्रुवयं पाय्यमिति मानार्थकं त्रयम् इति अम०२/९/८/५

मानभेदाः—(१) तुलामानम् (२) प्रस्थमानम्, (३) अङ्गुलिमानम्, चेति मानस्य त्रयो भेदाः स्युः।

अत्राहामरसिंहः—

'मानं तुलाङ्गुलिप्रस्थैः' इति अम०२/९/८५।

हेमचन्द्रेण तु स्पष्टमुक्तम्—

'तुलाद्यैः पौ (यौ) तवं मानं द्रुवयं कुडुवादिभिः। पाय्यं हस्तादिभिः' इति अभि०चि०४/२००/८८३

मानप्रभेदाः—(१) उन्मानम्, (२) परिमाणम्, (३) प्रमाणं चेति मानस्य त्रयः प्रभेदाः स्युः।

तदुक्तममरस्यामरविवेकविवृत्तौ—

ऊर्ध्वमानं किलोन्मान, परिमाणं तु सर्वतः। आयामस्तु प्रामणं स्यात्संख्या भिन्नार्थसर्वतः।' इति।

अमरस्यामरविवेकटीकायाम् ९/८५/२३१

उन्मानपर्यायाः—उन्मानम्, ऊर्ध्वमानम्, तुलामानम् 'वट्ट' 'वाट' इति च भाषा।

परिमाणप०—परिमाणम्, प्रस्थमानम्, सर्वतोमानम।

प्रमाणम०—अङ्गुलिमानम्, आयामः, प्रमाणम्।

शास्त्रीयमाने तुलामानभेदा[1] (१) गुञ्जा, (२) माषः, (३) कर्षः, (४) पलम्, (५)

---

[1] *तदुक्तं नामलिङ्गानुशासने—'गुञ्जाः पञ्चाद्यमाषकः। ते षोडऽशाक्षकर्षोऽस्त्री पलं कर्षचतुष्टयम्॥*
सुवर्णविस्तौ 'हेम्नोऽक्षे' कुरुविस्तस्तु तत्पले॥ तुला स्त्रियां पलशतं भारः स्याद्विंशतिस्तुला॥ आचितो दश भाराः स्युः शाकटो भार आचितः। कार्षापणः कार्षिकाः स्यात्कार्षिके ताम्रिके पणः।' इति नामलिङ्गानुशासने सुधाव्याख्यायाम् ९/८५,८६,८७,८८। ३३०॥

सुवर्णम्, (६) कुरुविस्तः, (७) तुला, (८) भारः, (९) आचितः, (१०) शाकटभारः, (११) राजतकर्षः, (१२) ताम्रकर्षश्चैत्येते तुलामानभेदाः स्युः।

गुञ्जापर्यायाः—काकचिञ्चा, काकचिञ्चिः, काकचिञ्ची, कृष्णला, गुञ्जा, रक्तिका 'घुघुंची' इति भाषा।

माषप०—माषः, माषकः, हेम, धान्यकः, 'मासा' इति भाषा'।

तदुक्तम्—

'दशार्द्धगुञ्जं प्रवदन्ति माषं मासाह्वयैः षोडशभिश्च कर्षम्।' इति लीलावती।

'गुञ्जाभिर्दशभिर्माषः शाणो माषचतुष्टयम्।' इति वैद्यकपरिभाषा। श०चि०पृ ६०१ स्तं०१। 'षड्भिस्तु रक्तिकाभिः स्यान्माषको हेमधान्यका। माषो गुञ्जाभिरष्टाभिः सप्तभिर्वा भवेत्त्क्वचित्।' इति भावप्रकाशे च ५/६/३०६

कर्षप०—अक्षः, उदुम्बरम्, करमध्यः, कर्षः, कवलग्रहः, किञ्चित्पाणिः तिन्दुकम् पाणितलम्, पाणिमानिका, पिचुः, विडालपदकम्, षोडशिका, सुवर्णम्, हंसपदम्।' इति।

तदुक्तम्—

'ते षोडशाऽक्षः कर्षोऽस्त्री' इत्यमरसु०व्या०९/८६/३३०'भिषजां व्यवहारे 'कर्षः स्यात्तोलकद्वयम्।।' इति श०चि०२/५१८ अशीतिररक्तिकाः। 'राजनिर्घंटुमते—'कर्षः स्याद्दशमाषकः।' इति श०चि०१/५१९

'कोलद्वयं तु कर्षः स्यात्स प्रोक्तः पाणिमानिका। अक्षः पिचुः पाणितलं किञ्चित्पाणिश्च तिन्दुकम्। बिडालपदकं चैव तथा षोडशिका मता। करमध्यो हरपदं सुवर्णं कवलग्रहः उदुम्बरं च पर्यायैः कर्षमेव निगद्यते। इति भावप्रकाशः ५/८,९,३८६।

पलपर्यायाः—आम्रम्, कर्षचतुष्टयम्, चतुर्थिका, निकुञ्चकः, पलम्, प्रकुञ्चः, बिल्बम्, मुष्टिः, मुष्टी, षोडशी, सृपाटः।

तदुक्तम्—

'शुक्तिभ्यां च पलं ज्ञेयं मुष्टिराम्रं चतुर्थिका।। प्रकुञ्चः षोडशी बिल्बं पलमेवात्र कीर्त्यते।।

इति भावप्राकशः। ५/११/३८।

'तत्तुशास्त्र तौलकचतुष्टयम्। वैद्यके अष्टतोलकम्। लौकिके साष्टरक्तिद्विमाषकतोलक-त्रितयम्। यथा—पलं तु लौकिकैर्मानैः साष्टरक्तिद्विमाषकम्। तोलकत्रितयं ज्ञेयं ज्योतिषज्ञैः स्मृतिसम्मतम्

न्यासः—

५ गुञ्जस =१ माषः। *१६ माषाः = १ कर्षः।* *४ कर्षाः १ पलम्।*
सुवर्णस्य कर्षे— *१६ माषाः = १ सुवर्णः।* *४ सुवर्णाः = १ कुरुविस्तः।*
१००पलानि = १ तुला। *२०तुलाः = १ भारः।* *१०भाराः = १ आचितः।*
१ आचितः—१ शाकटभारः। *१६ माषाः = १ राजतकर्षः। ,,,, = १ ताम्रकर्षः।*

इति तिथितत्त्वे।।' पलं सुवर्णाश्चत्वारः पञ्च वापि प्रकीर्तिताः। इति श-चि०स्तं १ पृ ९४।

सुवर्णप०—विस्तः, सुवर्णम्।

अत्राह हेमचन्द्रः—

'विस्तः सुवर्णो हेम्नोऽक्षे' इत्यभि-चि०३/२०१। ८८४

कुरुविस्तप०—कुरुविस्तः, सुवर्णपलम्।

तुलाप०—तुला, पलशतम्।

भारप०—भरः, भारः।

आचितप०—आचितः, आचितिः, शलाटः शाकटः, भारः शाकटीनः।

तदुक्तम्—

'कुरुविस्तस्तु तत्पले।। तुला पलशतं तासां विंशत्या भार आचितः। शाकटः शाकटीनश्च शलाटस्ते दशाचितः। इत्यभि०चि०३/२०१।८८५

'आचितो दशभाराः स्युः' इति हलायुधः।

'भारैर्दशभिराचितिः। इति रत्नकोषः।। 'आचितः शकटोन्मेये पलानामयुतद्वये। इति च मेदिनी। इत्यमरस्सु०व्या०९/३३१/८७

राजतकर्षप०—कार्षापणः, कार्षापणकः,कार्षिकः, राजतकर्षः।

उक्तञ्च—

'कार्षापणः कार्षिकः स्यात् ' इत्यमरसु० व्या०९/३३१/८८।

ताम्रकर्षप०—ताम्रकर्षः, ताम्रिकः, पणः (पैसा' इ०भा०)।

उक्तञ्च—

'कार्षिके ताम्रिके पणः।' इत्यम०सु०व्या०९/३३१/८८।

मागधीयमाने 'तुलामानभेदाः'—(१) त्रसरेणुः, (२) मरीचिः, (३) राजिका, (४) सर्षपः, (५) यवः, (६) गुञ्जा, (७) माषकः, (८) शाणः; (९) कोलः, (१०) कर्षः।

---

(१) मागधमानमाह भावमिश्रः—'त्रसरेणुर्बुधैः प्रोक्तस्त्रिंशता परमाणुभिः।। त्रसुरेणुस्तु पर्यायनाम्ना वशी निगद्यते। जालान्तरगतैः सूर्यकरैर्वंशी विलोक्यते।। षड्वंशीभिर्मरीचिः स्यात्ताभिः षड्भिश्च राजिका।। तिसृभी राजिकाभिश्च सर्षपः प्रोच्यते बुधैः। यवोऽष्टसर्षपैः प्रोक्तो गुञ्जा स्यात्तच्चतुष्टयम्।। षड्भिस्तु रक्तिकाभिः स्यान्माषको हेमधान्यकौ। माषैश्चतुर्भिः शाणः स्याद्धरणः सः निगद्यते। टङ्कः स एव कथितस्तद्द्वयं कोल उच्यते। क्षुद्रको वटकश्चैव द्रंक्षणः स निगद्यते।।' इति भावप्रकाशः ५/३८६/३,४,५,६,७।

न्यासः—

३०परमाणवः = १ त्रसरेणुः।
६ वंश्यः = १ मरीचिः।
६ मरीचयः = १ राजिका।
३ राजिकाः = १ सर्षपः।
८ सर्षपाः = १ यवः।
४ यवाः = १ गुञ्जा।
६ गुञ्जाः = १ माषकः।
४ माषाः = १ शाणः।
२ शाणौ = १ कोलः।
२ कोलौ = १ कर्षः।

त्रसरेणुपर्यायाः—त्रसरेणुः, वंशी।

मरीचिप०—किरणः, भानुः, मरीचिः, शेषस्तु रवौ।

राजिकाप०—असुरी, कृष्णिका, क्षवः, क्षताभिजननः, राजसर्षपः, राजिका।

तदुक्तम्—'क्षवः क्षुताभिजननो राजिका राजसर्षपः। असुरी कृष्णिका चासौ' इत्यभि०चि०३/१०१/४१८/१९।

सर्षपप०—श्वेतसर्षपः, सर्षपः, सिद्धार्थः।

तदुक्तम्—'अथ सिद्धार्थः श्वेतसर्षपः 'इत्यभि०चि०४/१२०११८०।

यवप०—तीक्ष्णशूकः, यवः, हयप्रियः।

तदुक्तम्—'यवो हयप्रियस्तीक्ष्णशूकः' इत्यभि०चि०४/२६८/११७०।

शाणपर्यायाः—टङ्कः, धरणः, निष्कः, शाणः, शाणकः।

तदुक्तम्—'तै (माषैः) श्चतुर्भिस्तु शाणकः। टङ्कोऽस्त्री धरणम्' इति कल्पद्रौ १९०/५१५-१६।

कोलप०—कोलः, क्षुद्रकः, द्रक्षणः, वटकः।

तदुक्तम्—'शाणद्वयं कोलस्तु द्रंक्षणः। क्षुद्रको वटकः' इति कल्पद्रौ १९०/५१६।

कालिङ्गीयमाने तुलामानभेदाः—(१) गौर (श्वेत) सर्षपः, (२) यवः, (३) गुञ्जा, (४) वल्लः (५) माषः, (६) शाणः, (७) गद्याणकः, (८) कर्षः, (९) पलम्, (१०) कुडवः।

शास्त्रीयमाने प्रस्थमानभेदाः[1]—(१) मुष्टिः, (२) कुडवः, (३) प्रस्थः, (४) आढकः,

---

(१) प्रस्थमानमाहामरः—'अस्त्रियामाढकद्रोणौ खारी वाहो निकुञ्चकः। कुडवः प्रस्थ इत्याद्याः परिमाणार्थकाः पृथक्। (इत्यमरामरविवेकटीकायाम्।९। २३२/८८-९ कुडव इत्येकं पावशेर इति ख्यातस्य।' कुटपः इति मुकुटः कुडवो वा। कुडवप्रमाणन्तु मृद्वेणुकाष्ठलोहादेः पात्रं यच्चतुरङ्गुलम्। विरतीर्ण च तथोच्चं च तन्मानं कुडवं वदेत्। प्रस्थः' इत्येकं शेर इति ख्यातस्य' 'आद्यशब्दाच्छूर्पभारादिग्रहः।। यदाहुः—पलं प्रकुञ्चकं मुष्टिः, कुडवस्तच्चतुष्टम्।। चत्वारः कुडवः प्रस्थश्चतुः प्रस्थं ततथाढकम्।। अष्टाढको भवेद्द्रोणो द्विद्रोणः शूर्प उच्यतें सार्द्धशूर्पो भवेत्खारी द्विशूर्पौ द्रोण्युदाहृता।। तमेव भारं जानीयाद्वाहो भारचतुष्टायमिति।' अन्यच्च। अष्टामुष्टिर्भवेत्किञ्चिदष्टौ तु पुष्कलम्। पुष्कलानीति चत्वारि आढकः परिकीर्तितः। चतुराढको भवेद् द्रोण इत्येतन्मानलक्षणम्' इत्युक्तम्।।' इत्यमरस्यामरविवेकटीकायाम् ९/२३३/८९।

न्यासः—

४ मुष्टयः = १ कुडवः (कुडपः)। ४ कुडवाः = १ प्रस्थः।
४ प्रस्थाः = १ आढकः। ४ आढकाः = १ द्रोणः।
४ द्रोणाः = १ खारी। ५ खार्य्यः = १ प्रवर्त्तः। (प्रवर्तिका)।
२०खार्य्यः = १ वाहः (भविका)।

(५) द्रोणः, (६) शूर्पः, (७) खारी, (८) प्रवर्तिका, (९) वाहः।

मुष्टिपर्यायाः—१ मुष्टिः (पु०स्त्री०) मुष्टी, मुचुटिः, मुचुटी, मुस्तुः, संग्राहः।

तदुक्तम्—

सम्पिण्डिताङ्गुलिः पाणिर्मुष्टिर्मुचुट्यपि।' इत्यभि०चि०३/१३७/५९७।

मुष्टिवाचकशब्दाः—आम्रम्, चतुर्थिका, निकुञ्चकम्, पलम्, प्रकुञ्चकम्, बिल्वम्, मुष्टिः, षोडशी, सृपाटः।

उदमानप०—उदमानः, आढकस्य पञ्चाशत्तमो भागः।

तदुक्तम्—'कुल्या स्यादष्टभिर्द्रोणैर्द्रोणपादेन चाढकः। अतोऽर्द्धशतिको भाग उदमान उदाहृतः॥' इति श०चि०२/३५७।

कुडवपर्यायाः—अर्द्धशरावकः, अष्टमानम्, कुटपः, कुडपः, कुडवः, पादः, प्रस्थतुर्यांशः। 'माणा' इति। 'पौवा' इति च भाषा।

प्रस्थप०—कुडवचतुष्टयम्, प्रस्थः, शेटकः, शेरः, सेरः, 'पाथा' इति। 'सेर' इति च भाषा।

आढकप०—आढकः, कांस्यपात्रं, चतुःषष्टिपलः, द्रोणचतुर्थांशः, प्रस्थचतुष्टयम्, भाजनम्।

द्रोणप०—अर्मणः, आढकचतुष्टयम्, उन्मानम्, कलशः, खारीतुर्यभागः, घटः, द्रोणः, नल्वणः, राशिः।

खारीप०—खारः, खारिः, खारिका, खारी, द्रोणचतुष्टयम्, प्रवर्तिकपञ्चमांशः, वाहविंशत्यंशः, षण्णवत्यधिका चतुःसहस्रपालिका।

प्रवर्त्तप०—खारिपञ्चकम्, प्रवर्त्तः, प्रवर्तिका।

वाहप०—खारिविशम्, वाहः।

---

१. मागधीयमाने तुला (प्रस्थ) मानस्य

न्यासः—

२ कर्षौ = १ शुक्तिः।
२ शुक्ती = १ पलम् ।
२ पले = १ प्रसृतिः।
२ प्रसृती = १ अञ्जलिः।
२ अञ्जली = १ मानिका (कुडवः)।
२ मानिके = १ प्रस्थः।
४ प्रस्थाः = १ आढकः।
४ आढकाः = १ द्रोणः।
२ द्रोणौ = १ शूर्पः।
२ शूर्पौ = १ द्रोणी।
४ द्रोण्यः = १ खारी।
२०००पलानां द्विसहस्रं = १ भारः।
१००पलानां शतं = १ तुला।

अथवा—

४ माषा = १ टङ्कः।
४ टङ्काः = १ अक्षः।
४ अक्षाः = १ विल्वम्
४ बिल्वानि = १ कुडवः॥
४ कुडवाः = १ प्रस्थाः
४ प्रस्थाः १ आढकः।
४ आढकाः = १ राशिः।

४ राशयः = १ गोण्यः।
४ गोण्यः = १ खारि।

मागधीयमाने प्रस्थ[1]मानभेदाः—(१) कर्षः, (२) शुक्तिः, (३) पलम्, (४) प्रसृतिः (५) अंजलिः, (६) कुडवः, (७) मानिका, (८) प्रस्थः, (९) आढकः, (१०) द्रोणः, (११) शूर्पः, (१२) द्रोणी, (१३) खारी, (१४) भारः, (१५) तुला, चेति मागधीयमाने प्रस्थमानभेदाः।

कर्षपर्यायाः—कर्षः, कोलद्वयम्।

शुक्तिप०—अर्द्धपलम्, अष्टमिका, शुक्तिः।

प्रसृतिप०—अर्द्धाञ्जलिः, प्रसृतम्, प्रसृतिः

अञ्जलिप०—अञ्जलिः, अर्द्धशरावकः, अष्टमानम्, कुडवः।

मानिकाप०—अष्टपलम्, शरावः।

शूर्पप०—कुम्भः, गोणी, चतुःषष्टिशरावकः, भारः, शूर्पः।

द्रोणीप०—गोणी, द्रोणी, वाहः।

भारप०—पलद्विसहस्रम्, भरः, भारः।

तुला[2]प०—तुला, पलशतम्।

कालिङ्गीयमाने प्रस्थभेदाः—(१) कुडवः, (२) प्रस्थः, (३) आढकश्चेत्यादयः पूर्ववन्मताः। चतुष्पलैः कुडवः स्यात्।

तदुक्तम्—'चतुष्पलैश्च कुडवः प्रस्थाद्याः पूर्ववन्मताः। इति भावप्रकाशे ५/३८७/२७।

उक्त च—

१. 'स्यात्कर्षाभ्यामर्द्धपलं शुक्तिरष्टमिका तथा। शुक्तिभ्यां च पलं ज्ञेयं मुष्टिराम्रं चतुर्थिका। प्रकुञ्चः षोडशी बिल्वं पलमेवात्र कीर्त्यते।।। पलाभ्यां प्रसृतिर्ज्ञेया प्रसृतं च निगद्यते। प्रसृतिभ्यामञ्जलिः स्यात्कुडवोऽर्द्धशरावकः। अष्टमानं च संज्ञेयः कुडवाभ्यां च मानिका। शरावोऽष्टपलं तद्वज्ज्ञेयमत्र विचक्षणैः।। शरावाभ्यां भवेत्प्रस्थश्चतुः प्रस्थैस्तथाढकः। भाजनं कांस्य पात्रं चतुःषष्टिपलश्च..। सः।। चतुर्भिराढकैर्द्रोणः कलशो नल्वणोऽर्मणः। उन्मानं च घटो राशिर्द्रोणपर्यायसंज्ञितः।। द्रोणाभ्यां शूर्पकुम्भौ च चतुः षष्टिशरावकः। शूर्पाभ्यां च भवेद् द्रोणी वाहो गोणी च सा स्मृता। द्रोणीचतुष्टयं खारी कथिता सूक्ष्मबुद्धिभिः। चतुःसहस्रपलिका षण्णावत्यधिका च सा।। पलानां द्विसहस्रं च भार एकः प्रकीर्तितः। तुलापलशतं ज्ञेयं सर्वत्रैवैष निश्चयः।। माषटङ्काक्षविल्वानि कुडवः प्रस्थमाढकम्। राशिर्गोणी खारिकेति यथोत्तरचतुर्गुणम् इति भा. प्र. ५/३८७/१०तः १९ या।

२. मतान्तरे तुलामानस्य न्यासः—
४ मुष्टयः = १ कुडवः।
४ कुडवाः = १ प्रस्थः।।
४ प्रस्थाः = १ आढकः।
८ आढकाः = १ द्रोणः।
२ द्रोणौ = १ शूर्पः।
१।। सार्द्धशूर्पः = १ खारी।
४ भाराः = १ वाहः।

३. पुनर्मतान्तरे तुलामानस्य न्यासः—
८ मुष्टयः =१ किञ्चित्।
८. किञ्चित् = १ पुष्कलम्।
४ पुष्कलानि = १ आढकः।
४ आढकाः = १ द्रोणः।

वराटकादीनां[१] नामानि—(१) वराटकः, (२) काकिणी, (३) पणः, (४) द्रम्मः, (५) निष्कः, चेत्येतानि वराटकादीनां नामानि स्युः।

वराटकपर्यायाः—कपर्दः, कपर्दकः, पणास्थिकः, वराटः, वराटकः, श्वेतकपर्दकः, हिरण्यः। 'कौडी' इति भाषा।

काकिणीप०—काकणिः, काकणी, काकनिः, काकनी, काकिणिः, काकिणी, काकिनिः, काकिनी, एकवराटी, 'एक कौडी' इति भाषा। पणतुर्यांशः, पणपादः, पञ्चगण्डकः, वराटकानां दशकद्वयम्, उदमानचतुर्थभागः, उदमानतुर्यांशः।

तदुक्तम्—

'पणगण्डकयोस्तुर्य उदमानस्य काकिणी।' इति रुद्रः। रभसस्तु नान्तेष्वप्याह—'पणोदमानगण्डानां तुर्यांशोऽपि च काकिनी।' इति सु०व्या०९/४५२।

पणप०—कार्षापणः, पणः, वराटकानां विंशतिगण्डकः।

द्रम्मप०—द्रम्मः, पणानां षोडषकः।

निष्कप०—चतुः सौवर्णिकः, दीनारः, व्यावहारिकरूपकम्, षोडशद्रम्मः।

तदुक्तम्—

'चतुः सौवर्णिको निष्को विज्ञेयस्तु प्रमाणतः।' इति श०चिं०२/१४३६।

---

(१) वराटकादीनां मानान्याह भास्करः—'वराटकानां दशकं द्वयं यत्सा काकिणी ताश्च पणश्चतस्त्रः। ते षोडश द्रम्म इहावगम्यो द्रम्मैस्तथा षोडषभिश्च निष्कः॥' इति लीलावत्याम्।

अपि च—ताम्रिकः कार्षिकः पणः। इति याज्ञवल्क्यवचनेन गुञ्जाः पञ्चाद्यमाषकः, ते षोडशाक्षः कर्षोऽस्त्री' त्यमरसिंहोक्तेन च अशीतिरक्तिकापरिमितताम्रे पणशब्दः सङ्केतितः। स च तावत्संख्यकैर्वराटकैर्लभ्यते इति वराटकेष्वपि तथा व्यवहारः। एतन्मूलकं भविष्यमत्स्यसूक्तयो वचनं यथा—

'अशीतिभिर्वराटकैः पण इत्यभिधीयते।
तैः षोडशैः पुराणं स्याद्रजतं सप्तभिस्तु तैः।' इति प्रायश्चित्तत्वे।' इति श०चिं०स्तं०पृ०२०६

(२) अंगुलादीनां मानान्यप्याह भास्करः—

'यवोदरैरंगुलमष्टसंख्यैर्हस्तोऽङ्गुलैः षड्गुणितैश्चतुभिः।
हस्तैश्चतुर्भिर्भवतीह दण्डः क्रोशः सहस्रद्वितयेन तेषाम्॥
स्याद्योजनं क्रोशचतुष्टयेन तथा कराणां दशकेन वंशः।' इति लीलावत्याम्।

अनेन विधिना द्वात्रिंशत्सहस्रहस्तैर्योजनमानं ज्ञेयम्। मानशास्त्रे तु षोडशसहस्रहस्तैर्योजनमुक्तम्। तद्यथा—

'द्वादशांगुलिकः शंकुस्तद्द्वयं तु शयः स्मृतः।
तच्चतुष्कं धनुः सहस्रिकः। तक्चतुष्कं योजनं स्यात् ' इति श०चिं०१/४

न्यासः—

२०वराटकाः = १ काकिणी।   ४ काकिण्यः = १ पणः।
१६ पणाः = १ द्रम्मः।   १६ द्रम्माः = १ निष्कः।

अङ्गुलमानभेदाः[१]—(१) रजः (स्), (२) परमाणुः, (३) त्रसरेणुः, (४) ध्वंसी (वंशी), (५) बालाग्रम्, (६) लिक्षा, (७) यूका, (८) यवः, (९) अङ्गुलम्, (१०) वितस्तिः, (११) हस्तः, (१२) चापः, (दण्डः), (१३) क्रोशः, (१४) योजनम्।

रजःपर्यायाः—धुलिः, धूली, पांशुः, पांसुः, रजः (स्), रेणुः।

ध्वंसीप[२]**०**—त्रसरेणुः, ध्वंसी, वंशी।

वालाग्रप०—कचाग्रम् बालाग्रम्, त्रसरेण्वष्टकम्।

लिक्षाप०—यूकाण्डः, रिक्षा, लिछा, लिक्षा, लिक्षिका।

यूकाप०—केशकीटः, यूका, षट्पदी।

---

(१) उक्तञ्च—

'जालान्तरगते भानौ यत्सूक्ष्मं दृव्यते रजः।

प्रथमं तत्प्रमाणानां त्रसरेणुं प्रचक्षते।' इति। वैद्यकपरिभाषया त्रिंशतपरमाणुपरिमाणं ध्वंसी। 'जालान्तरगते सूर्यकरे ध्वं (वं) सी (शी) विलोक्यतें त्रसरेणुस्तु विज्ञेयस्त्रिंशता परमाणुभिः॥' इति श०चि० २/१२२०

मनुस्मृतौ तु—'त्रसरेणवोऽष्टौ विज्ञेया लिक्षैका परिमाणतः।' इति मनुः। इति श०चिं० १/१५६।

अपि च—'जालान्तरगते भानौ यच्चाणुर्दृश्यते रजः। तैश्चतुर्भिर्भवेल्लिक्षा लिक्षाषड्भिश्च सर्षपः॥' इति श०चिं० १/१५६।

अस्य न्यासः यथा—

६ षड्भिः परमाणुभिः = १ त्रसरेणुः। ८ त्रसरेणुभिः =१ कचाग्रम्।

८ कचाग्रैः = १ लिक्षा। ८ लिक्षाभिः = १ यूका।

८ यूकाभिः = १ यवः। ८ यवोदरैः = १ अङ्गुलम्।

१२ अंगुलैः = १ वितस्तिः (शंकुः)। २ वितस्तिभ्यां वा २४ अंगुलैः = १ हस्तः (किष्कुः)।

२ हस्ताभ्यां = १ गजः (हस्तद्वयं)। ४ हस्तैः = १ चापः (दण्डः)।

१०हस्तैः = १वंशः। ४००० चतुःसहस्रैर्हस्तैः = १ नल्वः।

२०००द्विसहस्रमितैर्धनुभिः = १ क्रोशः। २ द्वाभ्यां क्रोशाभ्यां = १ गव्यूतिः।

४ चतुःक्रोश्या = १ योजनम्।

मतान्तरे तु—

१ रजः = १ परमाणुः। ३०परमाणुः = १ त्रसरेणुः।

८ त्रसरेणवः = १ लिक्षा।

पुनर्मतान्तरे—

१ परमाणुः = १ रजः। ४ परमाणवः = १ लिक्षा। ५ लिक्षाः = १ सर्षपः।

यवप०—अश्वप्रियः, तीक्ष्णशूकः, यवः। इह षड्भिर्गौरसर्षपैः परिमितं यवपरिमाणमुक्त मनुना—'सर्षपाः षड्यवो मध्यः' मध्यो न स्थूलो नापि सूक्ष्मो यवो भवतीत्यर्थः।

अपि च—

'जालान्तरगते भानौ यच्चाणुर्दृश्यते रजः।

तैश्चतुर्भिर्भवेल्लिक्षा लिक्षाषड्भिश्च सर्षपः। षट्सर्षपैर्यवस्त्वेको गुञ्जैका तु यवैस्त्रिभिः।' इति श०चिं०१/१५।

अङ्गुलप०—अंगुलम्, शंकुद्वादशभागः, हस्तचतुर्विंशत्यंशः, अष्टसंख्ययवोदरमानम्।

तदुक्तम्—अष्टभिस्तैर्भवेज्ज्यैष्ठं मध्यमं सप्तभिर्यवैः, कन्यस षड्भिरुद्दिष्टमङ्गुलं मुनिसत्तम। इति। मानं तु पार्श्वेन—'षड्यवाः पार्श्वसम्मिताः।' इति कात्यायनदर्शनात्। इति श०चि०१/२५।

वितस्तिप०—कनिष्ठया सह विततोऽङ्गुष्ठः, द्वादशांगुलपरिमाणम्, वितस्तिः, हस्तार्द्धम्, शंकुतुल्यम्, 'वालिस्त' इति भाषा।

हस्तप०—करः, किंष्कुः, पञ्चशाखः, पाणिः, शयः, हस्तः। 'हाथ' इति भाषा।

तदुक्तम्—'यवानां तण्डुलैरेकमंगुलं चाष्टभिर्भवेत्।। अदीर्घयोजितैर्हस्तश्चतुर्विंशद्भिरंगुलैः। इति कालिकापुराणैः, इति श०चि०२/१००२।

गजप०—गजः, हस्तद्वयम्, षट्त्रिशदंगुलपरिमितम्।

चापप०—चापः, धनुः, मतान्तरे तु 'दण्डः'।

तदुक्तम्—'चतुर्विंशांगुलो हस्तस्तच्चतुष्कं धनुः स्मृतम्।' इति श०चिं०१/१२८९

वंशप०—वंशः, हस्तदशकम्, 'वाँस' इति भाषा।

उक्तं च—'तथा कराणां दशकेन वंशः।' इति लीलावत्याम्।

नल्वप०—किष्कुचतुःशतम्, नल्वः, हस्तचतुःशतम्।

उक्तं च—नल्वः किष्कुचतुःशतम्। इत्यमरः १८/११६ अम०सु०व्या०'कात्यस्तु' 'नल्व हस्तशतम् ' इत्याह। भट्टक्षीरस्वामी तु 'नल्वं विंशहस्तशतम् ' इति दर्शितवान्। मुकुटस्तु— 'नल्वो विशं हस्तशतम् ' इति च दर्शितवान् इत्यमर सु०व्या०टिप्पण्याम् १८/११६

क्रोशप०—क्रोशः, क्रोशम्, क्रोशी, दण्डसहस्रद्वितयम्, सहस्रधनुः, 'कोस' इति भाषा।

उक्तं च—धन्वन्तरं सहस्रं तु क्रोशः' इति वाचस्पतिः इत्यमरसु०व्या०२/१/११५/१८।

'स्यादङ्गुलं तैर्द्वादशभिर्वितस्तिस्तद्युगेन च।

हस्तो हस्तैश्चतुर्भिः स्याद्धनुर्दण्डश्च तैः पुनः। द्विसहस्रमितैः क्रोशः क्रोशाभ्यां गोरुत पुनः।

गव्यूतं च स्त्रियां गव्या द्वयोर्गव्यूतिरित्यपि।' इति कल्पद्रौ २०/१०३।

गव्यूतिःप०—क्रोशद्वयम्, क्रोशयुगम्, गव्या, गव्यूतम्, गव्यूतिः, गोमतम्, गोरुतम्, द्विसहस्रधनुः। 'दो कोस' इति भाषा।

उक्तं च—'गव्यूतिः स्त्री क्रोशयुगम् ' इत्यमरः। सु०व्या०२/१/११५/१८

'धन्वन्तरसहस्रं तु क्रोशः क्रोशद्वयं पुनः।

गव्यूतं स्त्री तु गव्यूतिर्गोरुतं गोमतं च तत्।' इति वाचस्पतिः। धनुर्हस्तचुष्टयम्। द्वाभ्यां धनुः सहस्राभ्यां गव्यूतिः पुंसि भाषितः। इति शब्दार्णवः इत्यमरसु०व्या०२/१/११६/१८।

योजनप०—चतुः क्रोशी, क्रोशचतुष्टयम्, योजनम्।

उक्तं च—' योजनं परमात्मनि। चतुष्क्रोश्यां च योगे च'। इति मेदिन्याम् ९१/११-१२।

दिनमानपर्यायाः—अहर्मितिः दिनप्रमाणम्, दिनमानम्, दिनमितिः, दिवसप्रमाणम्, दिवसमानम्, दिवसमितिः, द्युप्रमाणम्, द्युमानम्, द्युमितिः, वासरप्रमाणम्, वासरमानम्, वासरमितिः।

दिनार्द्धप०—अहर्दलम्, घस्रार्द्धम्, दिनखण्डम्, दिनदलम्, दिनशकलम्, दिनार्द्धम्, दिवसखण्डम्, दिवसदलम्, दिवसशकलम् दिवसार्द्धम्, वासरखण्डम्, वासरदलम्, वासरशकलम्, वासरार्द्धम्।

रात्रिमानप०—रजनीप्रमाणम्, रजनीमानम्, रजनीमितिः रात्रिप्रमाणम्, रात्रिमानम्, रात्रिमितिः, निशाप्रमाणम्, निशामानम्, निशामितिः, शर्वरीमानम् तमीमानम्।

अर्द्धरात्रिमानप०—अर्द्धरात्रः, निशीथः, निशीथमानम्।

रात्र्यर्द्धप०—निशाखण्डम्, निशादलम्, निशार्द्धम्, निशाशकलम्, रात्रिखण्डम्, रात्रिदलम्, रात्रिशकलम्, रात्र्यर्द्धम्, शर्वरीखण्डम्, शर्वरीदलम्, शर्वरीशकलम्, शर्वर्यर्द्धम्।

कालप०—अनेहा, कालः, दिष्टः, शेषस्तु कालवर्गे।

कालमानप०—अनेहोमानम्, कालमानम्, दिष्टमितिः, समयप्रमाणम्।

कालभेदौ—(१) मूर्त्तः, (२) अमूर्त्तश्चेत्येतौ कालस्य द्वौ भेदौ स्याताम्।

तदुक्तम्—'प्राणादिः कथितो मूर्त्तस्त्र्युट्याद्योऽमूर्तसंज्ञकः'। इति सूर्यसिद्धान्ते १/११॥

कालप्रभेदाः—(१) ब्राह्मम, (२) दैवम्, (३) मानवं चैते कालस्य त्रयः प्रभेदाः स्युः।

मूर्त्तकालभेदाः[१]—(१) निमेषः, (२) काष्ठा, (३) कला, (४) घटिका, (५) मुहूर्त्तः, (६) दिनम् (नाक्षत्रम्), चैते मूर्त्तकालस्य षड्भेदाः स्युः।

---

(१) मूर्त्तकालभेदानां न्यासः—

१८ निमेषैः = १ काष्ठा।
३०काष्ठाभिः = १ कला।
३०कलाभिः = १ घटिका।
२ घटिकाभ्यां = १ मुहूर्त्तः।
३०मुहूर्तैः = १ दिनम् (नाक्षत्रम्)।

मूर्त्तकालान्यभेदानां न्यासः—

१०गुर्वक्षरैः = १ असुः (प्राणः)
६ असुभिः = १ पलम्।
६०पलैः = १ घटी।
६०घटीभिः = १ दिनम् (नाक्षत्रम्)
३०दिनैः = १ मासः।
१२ मासैः = १ वर्षम्।

मूर्त्तकालस्यान्यभेदाः—(१) गुर्वक्षरम्, (२) असुः, (३) पलम्,(४) घटी, (५) क्षणः, (६) दिनम् (नाक्षत्रम्), (७) मासः, (८) वर्षम्, चैते मूर्त्तकालस्यान्यभेदाः स्युः।

तदुक्तम्—'योऽक्ष्णोनिमेषस्य खरामभागः स तत्परस्तच्छतभाग उक्ता।
त्रुटिर्निमेषैर्धृतिभिश्च काष्ठा तत्त्रिंशता सद्गणकैः कलोक्ता।
त्रिंशत्कलाऽऽक्षीं घटिका क्षणः स्यान्नाडीद्वयं तैः खगुणैर्दिनं च।
गुर्वक्षरैः खेन्दुमितैरसुस्तैः षड्भिः पलं तैर्घटिकाखषड्भिः।
स्याद्वा घटीषष्टिरहः खरामैर्मासो दिनैस्तैर्द्विकुभिश्च वर्षम्।। इति सिद्धान्तशिरोमणौ।

अपि च—'षड्भिः प्राणैर्विनाडी स्यात्तत्षष्ट्या नाडिका स्मृता।
नाडीषष्ट्या तु नाक्षत्रमहोरात्रं प्रकीर्तितम्।
तत्त्रिंशता भवेन्मासः, इति। मासैर्द्वादशभिर्वर्षं दिव्यं तदह उच्यते।
इति च-सू. सि. १/११,१२,१३।

मासभेदाः—(१) चान्द्रः, (२) सौरः, (३) सावनः (४) नाक्षत्रः (आर्क्षः) चैते मासस्य चत्वारो भेदाः स्युः।

तदुक्तम्—'दर्शावधिं मासमुशन्ति चान्द्रं सौरं तथा भास्करराशिचारात्।
त्रिंशद्दिनं सावनसंज्ञमार्या नाक्षत्रमिन्दोर्भगणाश्रयाच्च।' इति ग्रन्थान्तरे।
'तत्त्रिंशता भवेन्मासः सावनोऽर्कोदयैस्तथा।

ऐन्दवस्तिथिभिस्तद्वत्संक्रान्त्या सौर उच्यते। मासैर्द्वादशभिर्वर्षं दिव्यं तदह उच्यते। इति च सू. सि. १/१२,१३।

चान्द्रमासभेदौ—(१) दर्शान्तः, (२) पूर्णिमान्तश्चैतौ चान्द्रमासस्य द्वौ भेदौ स्याताम्।
तदुक्तम्—'चान्द्रस्तु द्विविधो मासो दर्शान्तः पूर्णिमान्तिमः।
देवार्थे पौर्णमास्यन्तो दर्शान्तः पितृकर्मणि' इति ग्रन्थान्तरे।

वर्षभेदाः—(१) ब्राह्मम्, (२) दिव्यम् (दैवम्), (३) पित्र्यम्, (पैत्रम्) (४) प्राजापत्यम् (मानवम्), (५) गौरवम् (बार्हस्पत्यं, जैवम्), (६) सौरम्, (७) सावनम्, (८) चान्द्रम् (ऐन्दवम्), (९) आर्क्षम् (नाक्षत्रम्), चैतानि वर्षाणां नवमानानि स्युः।

तदुक्तम्—'ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यं (मानवं) गुरोस्तथा (जैवम्)।
सौरं च सावनं चान्द्रमार्क्षं मानानि वै नव।' इति सू. सि.

अपि च— एवं पृथङ्मानव-दैव-जैव-पैत्रा-ऽऽर्क्ष-सौरे-न्दव-सावनानि।
ब्राह्मं च काले नवमं प्रमाणं ग्रहास्तु साध्या मनुजैः स्वमानात्।
ज्ञेयं विमिश्रं तु मनुष्यमानं मानैश्चतुभिर्व्यवहारवृत्तेः।
एवं सौरचान्द्र-सावन-नाक्षत्रमानैश्चतुर्भिरेभिर्मिश्रितैर्मनुष्यमानं ज्ञेयम् इति सि. शि.।

तत्रैव सौरादिमासप्रयोजनमुक्तम्—

'वर्षायनर्तुयुगपूर्वमत्र सौरान्मासास्तथा च तिथयस्तुहिनांशुमानात्।
यत्कृच्छ्रसूतकचिकित्सितवासराद्यं तत्सावनाच्च घटिकादिकमार्क्षमानात्।' इति सि. शि.।

प्राजापत्यब्राह्ममानयोर्ज्ञानमित्थम्—

'मन्वन्तरव्यवस्था च प्राजापत्यमुदाहृतम्।
न तत्र द्युनिशोर्भेदो ब्राह्मं कल्पस्ततो नृणाम्। इति सू. सि.।

इह ग्रहगणिते [1]विकलादिसंज्ञाः—(१) विकला, (२) कला, (३) अंशः (भागः), 'त्रिंशांशकस्तथा राशेर्भाग इत्यभिधीयते।' इति श. चि. २/४२०। (४) राशिः, (५) भगणश्चेता विकलादिसंज्ञाः स्युः।

अत्र कलौ शककारकनृप[2]नामानि—(१) युधिष्ठिरः, (२) विक्रमः, (३) शालिवाहनः,

---

(१) विकलादिसंज्ञाक्रममाह भास्करः—'क्षेत्रे समाद्येन समाविभागाः स्युश्चक्रराश्यंशकलाविलिप्ताः।' इति सिद्धान्तशिरोमणौ।

(१) विकलादिसंज्ञामान

न्यासः—

६०विकलाः = १ कला। *६०कलाः = १ अंशः।*
३०अंशाः = १ राशिः। *१२ राशयः = १ चक्रम्।*

उक्तं च—

'विकलानां कला षष्ट्या तत्षष्ट्या भाग उच्यते। तत्त्रिंशता भवेद्राशिर्भगणो द्वादशैव ते' इति सू०सि०१/२८।

(२) शकक्कारकनृपाणा मानानां

न्यासः—

नृपतयः—	*तद्वर्षाणि—*
(१) युधिष्ठिरः—	*३०४४*
(२) विक्रमः—	*१३५*
(३) शालिवाहनः—	*१८०००*
(४)विजयाभिनन्दनः—	*१००००*
(५) नागार्जुनः—	*४००००००*
(६) कल्किः—	*८२१*
योगः	*४३२०००*

शेष पृष्ठ ७०पर

(४) विजयाभिनन्दनः, (५) नागार्जुनः, (६) कल्किश्चैते कलौ षट् शक (संवत्सर) कर्त्तारो नृपतयः स्युः।

युगनामानि—(१) सत्यम्, (२) त्रेता, (३) द्वापरः, (४) कलि-श्चैतानि चत्वारि युगानि स्युः।

॥ इति बिहारप्रान्तसहरसामण्डलान्तर्गतदोरमाग्रामवास्तव्येन दैवज्ञचूड़ामणिश्रीसूर्यनारायणसूनुना डॉ० सुरकान्तझाख्येन ज्योतिर्विज्ञानशब्दकोषे मानसर्गः षष्ठः ॥६॥

गणनादिसर्गः-७

अङ्कवाचकशब्दाः—अङ्कः, एकद्व्यादिः, संख्या।

अङ्कभेदाः—(१) एकः, एका, एकम्। (२) द्वौ, द्वे, द्वे। (३) त्रयः, तिस्रः, त्रीणि। (४) चत्वारः, चतस्रः, चतुर। (५) पञ्च (अन्) (त्रि.ब.)। (६) षट् (ष्) (त्रि. ब.) (७) सप्त

उक्तं च—

युधिष्ठिरो विक्रमशालिवाहनौ, ततस्तु राजा विजयाभिनन्दनः।
ततस्तु नागार्जुनकल्किभूपतिः, कलौ षडेते शककारका नृपाः।
क्रमादमीषां कृतवेदखाग्नयः, शरत्रिचन्द्राः खखखाष्टभूमयः।
ततोऽयुतं लक्षचुष्टयं च कुदस्त्रनागाः शकमानवत्सराः।' इति ज्योतिर्विदाभरणे।

(१) युगमानानां न्यासः—

४३२०००वर्षै = कलियुगम्।
८६४०००,, = द्वापरयुगम्।
१२९६०००,, = त्रेतायुगम्।
१७२८०००,, सत्ययुगम्।
४३२००००,, = चतुर्युगम्।
७१ महायुगैः = १ मन्वन्तरम्।
३०६७२००००सौरवर्षैः = १मन्वन्तरम्।

उक्तं च—

'युगानां सप्ततिः सैका मन्वन्तरमिहोच्यते।' इति सू०सि०१/१८

(२) जैमिनीये जातकशास्त्रे संख्याद्योतनार्थं सङ्केतमाह यथा—

'क, ट, प, य, वर्गभवैरिह, पिण्डान्त्यैरक्षरैरङ्काः।
निञ्चि शून्यं ज्ञेयं, तथा स्वरे केवले कथितम्॥' इति जै. टी.।

अस्यार्थः—

काद्याः ९, टाद्याः ९ पाद्याः ५, याद्याः ८, यथा—१ क, २ ख, ३ ग, ४ घ, ५ ङ, ६ च, ७ छ, ८

(शेष पृष्ठ ७१ पर)

(अन्) (त्रि. ब.), (८) अष्ट (अन्) (त्रि. ब.)। (९) नव (अन्) (त्रि. ब.) इत्येतेऽङ्कानां नवभेदाः सन्ति।

संख्याप०—संख्या (स्त्री), संख्यातम् (न.), संख्यानम् (न.)।

संख्याभेदौ—(१) गणना, (२) अङ्कश्चैतौ संख्याया द्वौ भेदौ स्याताम्।

[1]**गणनापर्यायाः**—अङ्कगणितम् (न.) गणनम् (न.), गणना (स्त्री), गणितम् (न.), परिग-

---

(७०पृष्ठ से)

ज, ९ झ।। १ट, २ ठ, ३ ड, ४ ढ, ५ ण, ६ त, ७ थ, ८ द, ९ ध।। १ प, २ फ, ३ ब, ४ भ, ५ म। १ य, २ र, ३ ल, ४ व, ५श, ६ ष, ७ स, ८ ह।। इत्यक्षरसंख्याविन्यासः। इहास्मिन् शास्त्रे वर्गभवैः कादिवर्गोत्पन्नैः पिण्डानां यौगिकशब्दानां यानि अन्त्यानि अक्षराणि तैरङ्काः बोध्याः।। नि = नकारः, ञि = ञकारः, अचि अकारादिस्वरे च शून्यं ज्ञेयम्। यत्र केवले स्वरे वर्णयोगरहिते स्वरे तत्रैव तथा (शून्यं) कथितमुक्तमित्यर्थः।

उदाहरणं प्रदर्शयति—

'देवा ४९, धवो ४९, धीग ३९, वश ५४, स्तमौ ५६, रमा ५२, धूलिः ३९ क्रमादुष्णकरादिबिन्दवः। सालोलसंख्या ३३७ समुदायबिन्दवः' इति जातकपारिजाते १०/२ यथा—दकारोऽष्टौ, वकारश्चत्वारः अत्रापि अङ्कानां वामतो गतिः' इतिः परिभाषया जाता अष्टचत्वारिंशन्मिता रविबिन्दवः, एवमन्येऽपि ज्ञेयाः।

महासिद्धान्ते तु संख्याद्योतनार्थं सङ्केतमाह—

'रूपात् क, ट, प, य, पूर्वा, वर्णा वर्णक्रमाद् भवन्त्यङ्काः।
ञनौ शून्यं प्रथमार्थे, आ छेदे, ऐ तृतीयार्थे।।१।। इति।।

अस्यार्थः—

'क, ट, प, य पूर्वा वर्णा वर्णक्रमादक्षरक्रमादेकत अङ्का भवन्ति। क, का कि .... क् इत्यादिभिरेकः। ख खा, खि .... ख् इत्यादिभिर्द्वौ इत्यादि। अत्र व्यञ्जनेषु स्वराणां योगेन संख्यायां न भेदो भवतीति ज्ञेयम्। यथा—क = का = कि = ..., = १। अत्रैतदुक्तं भवति।

अत्र प्रथमो वर्गः—क ख ग घ ङ च छ ज झ ञ।
द्वितीयो वर्गः—ट ठ ड ढ ण त थ द ध न।
तृतीयो वर्गः—प फ ब भ म।
चतुर्थो वर्गः—य र ल व श ष स ह।

एवमत्र वर्णक्रमतोऽङ्काः वर्गाक्षरैः क्रमेण च शतस्थानीय-दशस्थानीयैकस्थानीयेत्यादि-दक्षिणक्रमेण संख्या भवन्ति। 'अङ्कानां वामतो गतिः' इहैषा परिभाषा नादरणीया। ञ् नौ वर्णौ शून्यद्योतकौ स्तः। पदविग्रहे तु आ प्रथमाबहुवचनविभक्त्यर्थे। ऐ च तृतीयाबहुवचनविभक्त्यर्थ बोध्या न 'आः' 'ऐः' इति।

(१) गिनती।

णनम् (न.), परिगणना (स्त्री.) परिगणितम् (न.), संख्या (स्त्री), संख्यानम् (न.)।

अङ्कगणितभेदौ—(१) व्यक्तगणितम् (पाटी-गणितम्), (२) अव्यक्तगणितम् (बीजगणितं रेखागणितं च), इत्येतौ अङ्कगणितस्य द्वौ भेदौ, स्याताम्।

गणितपर्यायाः—कृतसंख्यकम्, गणितः, परिगणितः, संख्यानः, संख्यावत् (मतु.) एते त्रिलिङ्गाः स्युः।

संख्येय (गण्य) प०—गणनीयः, गणितव्यः, गणेयः, गण्यः, परिगणनीयः, परिगणितव्यः, परिगण्यः, संख्यातुमर्हः, संख्यातुं योग्यः, संख्यायोग्यः, संख्येयः। एते त्रिलिङ्गाः स्युः।

संख्येयम् = द्रव्यम्, 'अत्राहामरसिंहः—

..................संख्या, संख्येये ह्यादश त्रिषु। विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः १/२, ९, ८३। संख्यार्थे द्विबहुत्वे स्त-स्तास्तु चानवतेः स्त्रियः। पंक्तेः शतसहस्रादि क्रमाद्दशगुणोत्तरम्। २, ९, ८४ इति।

अस्यार्थः—

आदश दशशब्दमभिवाप्य। आङ्मर्यादाभिविध्योरित्यव्ययीभावः। 'नपुंसकादन्यत्रस्याम्' इति पक्षे टच् न। एकादिका नवदशपर्य्यन्ताः संख्याः संख्येये त्रिलिङ्गा च। तेन संख्यासंख्येययोः समानाधिकरण्येन वृत्तिः। यथा—एकः पटः। एका शाटी। एकं वस्त्रम्। हि शब्दोऽवधारणे, संख्येय एव, न तु संख्यायामित्यर्थः। तेन एको विप्र इत्यादि भवति न तु विप्रस्यैक इत्यादि।' 'किन्तु' 'द्वयेकयोर्द्विवचनैकवचन' इति सूत्रे द्वयेकयोरितिनिर्देशात् संख्यामात्रेऽपि सम्भवः। तेन घटानां पञ्चेत्यपि स्यादिति सुभूतिः। 'वार्ताकुरेषा गुणसप्तयुक्ते'ति वैद्यकं च सङ्गच्छते। विंशतिराद्या या शतान्ताः संख्याः, संख्येयसंख्ययोर्वर्त्तन्ते, एकवचनान्ताश्च, यथा—विंशतिर्गावः, गवां विशंतिः। विंशत्यादीनां यदा संख्यार्थस्तदा द्विवचनबहुवचनेऽपि स्तः। यथा—द्वे विंशति गावः, गवां वा तिस्रो विंशतय इति। तासु विंशत्या नवतिमभिव्याप्य स्त्रीलिङ्गाः। भिन्नलिङ्गेनापि समानाधिकरण्ये स्त्रीलिङ्गाः। यथा—विंशत्या पुरुषैः कृतम्। विशंतिः कुण्डानीति। इति सुखानन्दनाथः। श.चिं. २-६८५। १-६८६।

भाष्येऽपि—

'आदशभ्यः संख्या संख्येये वर्तते। ऊर्ध्वं संख्याने संख्येये च' इति। विशंतिः पटाः। विंशतिः पटानाम्। शतं गावः।। शतं गवाम् - इति क्षीरस्वामी। विंशत्याद्यास्तु संख्याशब्दा एकत्वे वर्त्तमानाः संख्येये संख्याने च वर्त्तन्ते। यथा—विंशतिर्घटां, विशतिर्घटानाम्। शतं गावः, शतं गवाम् ' इति। यदाह वाचस्पतिः—'ऊनविंशत्यादिकास्तु सर्वाः संख्येयसंख्ययोः' इति—इति हेमचन्द्राचार्य्यः। पंक्तेर्दशगुणोत्तरं क्रमात् शतसहस्रादि विज्ञेयम्। यथा—एकं दशगुणितं पंक्तिरुच्यते, दशपंक्तयः शतम्, दशशतानि सहस्रम्, दशसहस्राण्ययुतमित्यादि ज्ञेयम्। अ. सु. व्या. टि. ८३-३२९।

यथा हि लीलावत्याम्—

एक-दश-शत-सहस्रा-युत-लक्ष-प्रत्युत-कोटयः क्रमशः।
अर्बुद-मब्जं खर्व-निखर्व=महापद्म-शङ्कवस्तस्मात्।
जलधि-श्चान्त्यं मध्यं परार्द्धमिति दशगुणोत्तराः संज्ञा।
संख्यायाः स्थानानां व्यवहारार्थं कृता पूर्वैः।। इति ली०व०।

संख्यास्थानभेदाः—(१) एकम्, (२) दश, (३) शतम् (दशदशकम्), (४) सहस्रम् (दशशतानि), (५) अयुतम् (दशसहस्राणि), (६) लक्षम् (शतसहस्राणि), (७) प्रयुतम् (दशलक्षाणि), (८) कोटिः (शतलक्षाणि), (९) अर्बुदम् (दशकोटयः), (१०) अब्जम् (शतकोटयः), (११) खर्वम् (दशाब्जानि), (१२) निखर्वम् (शताब्जानि), (१३) महापद्म (दशनिखर्वाणि), (१४) शङ्कुः (शतनिखर्वाणि), (१५) जलधिः, (दशशङ्कवः), (१६) अन्त्यकम् (शतशङ्कवः), (१७) मध्यम् (दशान्त्यकानि), (१८) परार्द्धम् (शतान्त्यकानि),। इति।

संख्याभेदाः—(१) एकः, एका, एकम्, (२) द्वौ, द्वे, द्वे (३) त्रयः, तिस्रः, त्रीणि (४) चत्वारः, चतस्रः, चत्वारि, (५) पञ्च, (६) षट् (ष्), (७) सप्त, (८) अष्ट, (९) नव, (१०) दश, (११) सप्तदश, (१८) अष्टादश, (१९) नवदश (ऊनविशतिः), इह पञ्चतो नवदशान्ताः संख्याः अन्नन्ताः त्रिलिङ्गाः स्युः। अत ऊर्ध्वः सर्वा नवनवत्यन्ताः संख्याः स्त्रीषु वर्त्तन्ते। यथा—(२०) विंशतिः, (२१) एकविंशतिः, (२२) द्वाविंशतिः, (२३) त्रयोविंशतिः, (२४) चतुर्विंशतिः, (२५) पञ्चविंशतिः, (२६) षड्विंशतिः, (२७) सप्तविंशतिः, (२८) अष्टाविंशतिः, (२९) नवविंशतिः (ऊनत्रिंशत्), (३०) त्रिंशत्, (३१) एकत्रिंशत्, (३२) द्वात्रिंशत्, (३३) त्रयस्त्रिंशत्, (३४) चतुस्त्रिंशत्, (३५) पञ्चत्रिंशत्, (३६) षट्त्रिंशत्, (३७) सप्तत्रिंशत्, (३८) (अष्टत्रिंशत्), (३९) नवत्रिंशत् (ऊनचत्वारिंशत्), (४०) चत्वारिंशत्, (४१) एकचत्वारिंशत्, (४२) द्वि (द्वा) चत्वारिंशत्, (४३) त्रयश्चत्वारिंशत्, (४४) चतुश्चत्वारिंशत्, (४५) पञ्चचत्वारिंशत् (४६) षट्चत्वारिंशत्, (४७) सप्तचत्वरिंशत्, (४८) अष्टचत्वारिंशत्, (४९) नवचत्वारिंशत् (ऊनपञ्चाशत्), (५०) पञ्चाशत्, (५१) एकपञ्चाशत्, (५२) द्वि (द्वा) पञ्चाशत्, (५३) त्रयःपञ्चाशत्, (५४) चतुःपञ्चाशत्, (५५) पञ्चपञ्चाशत्, (५६) षट्पञ्चाशत्, (५७) सप्तपञ्चाशत्, (५८) अष्टपञ्चाशत्, (५९) नवपञ्चाशत् (ऊनषष्टिः), (६०) षष्टिः, (६१) एकषष्टिः, (६२) द्वि (द्वा) षष्टिः, (६३) त्रयः षष्टिः, (६४) चतुःषष्टिः, (६५) पञ्चषष्टिः, (६६) षट्षष्टिः, (६७) सप्तषष्टिः, (६८) अष्टषष्टिः, (६९) नवषष्टिः (ऊनसप्ततिः), (७०) सप्ततिः, (७१) एकसप्ततिः, (७२) द्वि (द्वा) सप्ततिः, (७३) त्रयःसप्ततिः, (७४) चतुः सप्ततिः, (७५) पञ्चसप्ततिः, (७६)

षट्सप्ततिः, (७७) सप्तसप्ततिः, (७८) अष्टसप्ततिः, (७९) नवसप्ततिः (ऊनाशीतिः) (८०) अशीतिः, (८१) एकाशीतिः, (८२) द्व्य (द्वा) शीतिः, (८३) त्रयोऽशीतिः, (८४ चतुरशीतिः, (८५) पञ्चाशीतिः, (८६) षडशीतिः, (८७) सप्ताशीतिः, (८८) अष्टाशीतिः (८९) नवाशीतिः (ऊननवतिः), (९०) नवतिः, (९१) एकनवतिः (९२) द्वि (द्वा) नवतिः (९३) त्रयोनवतिः, (९४) चतुर्णवतिः, (९५) पञ्चनवतिः, (९६) षण्णवतिः, (९७ सप्तनवतिः (९८) अष्टनवतिः, (९९) नवनवतिः (ऊनशतम्), (१००) शतम्, इति।

शून्यपर्यायाः—पूर्णम्, बिन्दुः, शून्यम्।

शून्यवाचकशब्दः—आकाशनाम[1]।

एकपर्यायः—एकः (पु०) एका (स्त्री), एकम् (न०)।

एकवाचकशब्दाः—इन्द्रहस्तिनाम, इन्द्राश्वनाम, उक्ता (स्त्री०) (छन्दोजातिविशेषः), गणेशदन्तनाम, चन्द्रकः, चन्द्रनाम, पृथ्वीनाम, ब्रह्म (अन्) (न०), रूपम् (न०) शाली (इन्) (त्रि०), शुक्राक्षिनाम, चैते शब्दा एकवाचका विज्ञेयाः।

द्विपर्यायाः—द्वौ (पु०), द्वे (स्त्री०), द्वे (न०), द्वयम्, द्विकम्, द्वितयम्, एते त्रिलिङ्गाः।

द्विवाचकशब्दाः—ओष्ठौ, कर्णौ चरणौ, दस्रौ, नयने, बाहू, स्तनौ, हस्तौ चेत्येषां नामानि। अत्युक्ता (स्त्री०) (छन्दोजातिविशेषः), असिधारे, इन्द्राग्नी, उभौ, जकुटे, द्वन्द्वे, द्वैते, द्व्यात्मकम्, नदीकूले, नारदपर्वतौ, पक्षौ, भार्यापत्नी, यमले, यमे, यमौ, यामले, युग्मे, रामनन्दनौ, सहचरौ, चेत्येते द्विवाचकशब्दा बोध्याः।

त्रिपर्यायाः—त्रयः (पुं०ब०), तिस्रः (स्त्री०ब०), त्रीणि (न०ब०), त्रयम्, त्रिकम्, त्रितयम्, एते क्लीबलिङ्गाः।

त्रिवाचकशब्दाः—अनलाख्या, कालाख्या, क्रमाः, गङ्गामार्गाः, गुणाः, ग्रामाः, त्रिपुष्कराः, पुरः, पुराणि, भुवनानि, मध्या (स्त्री०) छन्दोजातिविशेषः, रामाः, लोकाख्या, विष्णुक्रमाः, शिवनयनाख्या, चेत्येते त्रिवाचकाः शब्दाः।

त्रिपुष्करभेदाः—(१) भद्रातिथयः, क्रूरवाराः, (३) त्रिपादनक्षत्राणि, चैते त्रिपुस्कराः स्युः।

चतुःपर्यायाः—चत्वारः (पुं०ब०) चतस्रः (स्त्री०), चत्वारि (न०ब०), द्विकृतिः (स्त्री०), द्विद्विकम्, (न०), द्विवर्गः, (पु०), चतुष्कम् (त्रि०)।

---

[1] *आख्या, नाम, संज्ञा इत्यादयो नामपर्याया येषाँ स्युस्तेषां सर्वे पर्यायास्तत्तसंख्या नामानि ज्ञेयानि। येषां शब्दानामन्ते नामपर्याया न स्युस्ते केवलं तत्संख्यावाचका बोध्याः।' इति।*

चतुर्वाचकशब्दाः—

अब्धिसंज्ञा[1] (नाम), अश्रमाः[2], उपायाः[3], ऐरावतदन्तनाम, कृताः, कृतायाः (उभौ द्यूतक्रीडासाधनीभूताऽक्षशब्दितस्य चतुरङ्कभागः' इति श०चि०) जातयः[4] (वर्णाः), प्रतिष्ठा (स्त्री०) (छन्दोजातिविशेषः), ब्रह्ममुखनाम्, यामनाम, युगानि, वेदाख्या, सुखभावः, सेनाङ्गानि, हरिबाहवश्चेत्येते चतुर्वाचकाः, शब्दाः स्युः।

पञ्चपर्यायौ—

पञ्च (अन्) अस्य त्रिषु लिङ्गेषु त्रिषु वचनेषु च समानरूपाणि, पञ्चकम् (त्रि०)।

अत्राह यादवः—

'षट्सञ्ज्ञा युष्म-दस्म-च्च-त्रिषु लिङ्गेष्वभेदवत्।।' इति वैजयन्ती। 'ष्णान्ता षट् १/१/२४ षान्ता नान्ता च संख्या षट् संज्ञा स्यात्।। इति पाणिनीयेऽपि षान्ता (षष्), नान्ता (पञ्चन्नादयः) संख्या त्रिषु लिङ्गेषु वचनेषु च समानरूपाणि भवन्तीत्यर्थः।

पञ्चवाचकशब्दाः—

अग्नयः, अर्थाः, असुसंज्ञा, इन्द्रियाख्या, एताः[5], पाण्डवाः[6], भूताः (पञ्चमहाभूताः), रुद्रमुखनाम, वाताख्या, विषयाः, शरनाम, सुप्रतिष्ठा (स्त्री०) (छन्दोजातिविशेषः), स्मरबाणाः, स्वर्गतरवश्चैत्येते पञ्चवाचकशब्दाः।

षट्पर्यायौ—

षट् (ष्) त्रिषु लिङ्गवचनेषु समानरूपाणि।। षट्कम् (त्रि०)।

षड्वाचकशब्दाः—

अङ्गानि, अरिसञ्ज्ञा, ऋतुनाम, कार्तिकेयमुखनाम, गायत्री (स्त्री०) (छन्दोजातिविशेषः), गुणाः[7], चक्रवर्तिनः[8], चक्रार्द्धम्, ज्वरबाहुनाम्, तर्काः[9], त्रिशिरोनेत्रनाम, दर्शनानि, भदलम्,

---

(१) समुद्रस्य सर्वे पर्यायाश्चतुः संख्यावाचका बोध्याः। चतुः समुद्रभेदाः—

(२) ब्रह्मचर्याश्रमः, गार्हस्थाश्रमः, वानप्रस्थाश्रमः, सन्यासा (भैक्षुका) श्रमः—श्चेति चत्वार आश्रमाः स्युः।।

(३) भेदः, दण्डः, साम (अन्), दानम् चेति चत्वार उपायाः स्युः।।

(४) ब्राह्मणः, क्षत्रियः, वैश्यः, शूद्रश्चेति चतस्रो जातयः (वर्णाः), स्युः।

(५) अर्थाः = विषयाः,

(६) युधिष्ठरः, भीमः, अर्जुनः, नकुलः, सहदेव—श्चैते पञ्चपाण्डवाः स्युः।

(७) ऊक्तं च (१) सन्धि (२) विग्रह (३) यानानि (४) संस्थाप्या (५) ऽऽसनमेव च। (६) द्वैधीभावश्च विज्ञेयाः षड्गुणा नीतिवेदिनाम्।।' इ०श०चिं०१/९१६

(८) उक्तं च—(१) मान्धाता (२) धुन्धुमारश्च (३) हरिश्चन्द्रः (४) पुरूरवाः। (५) भरतः (६) फार्तवीर्णश्च षडेते चक्रवर्तिनः।।, इति ग्रन्थान्तरे।

(९) षट्तर्कभेदाः—

भार्द्धम्, भ्रमरपादनाम् रसा:[१], रागा:, वज्रकोणानि, शास्त्राणि, समयाख्या, चेत्येते षड्वाचक शब्दा:।

सप्तपर्यायौ—सप्त (अन्) (त्रि०ब०), सप्तकम् त्रि०)।।

सप्तवाचकशब्दा:—अश्वनाम, उष्णिक् (ह्) (छन्दोजाति विशेष:), ऋषिसंज्ञा द्वीपा:[२] धान्यानि, नृपा:[३], पर्वताख्या, पातालाख्या, भारतीयकुलाचला:, राज्याङ्गानि[४], लोका:, बह्निशिख (जिह्व:), वायव:, वारा:, समुद्रा:, सूर्याश्वा:, स्वराश्चेत्येते सप्तवाचकशब्दा:।

अष्टपर्याया:—अष्ट (अन्), (त्रि०ब०), अप्टकम् (त्रि०), चतुर्द्विकम् (त्रि०), द्विघन (पु०), द्विचतुष्कम् (त्रि०)।

अष्टवाचकशब्दा:—अनुष्टुव् (भ्) (स्त्री०) (छन्दोजातिविशेष:), कुलाचला:, दिक्पाला: (लोकपाला:), दिग्गजा:, मङ्गलानि[५], योगाङ्गानि[६], वसव:, शिवमूर्त्तय:, सर्पाख्या, सिद्धय: हस्त्याख्या, चैतेऽष्टवाचकशब्दा:।

नवपर्याया:—नव (अन्), (त्रि०ब०), त्रिकृत्ति: (स्त्री०), त्रित्रिकम् (त्रि०), त्रिवर्ग: (पु०), नवकम् (त्रि०)।

---

(१) मधुर:, अम्ल:, लवण:, कटुक:, कषाय, श्चैते षड्रसा: स्यु:।

(२) जम्बूद्वीप:, प्लक्षद्वीप:, शाल्मलिद्वीप:, कुशद्वीप:, क्रौञ्चद्वीप:, पुष्करद्वीप—श्चैत सप्तद्वीपा: स्यु:।

(३) तदुक्तं ग्रन्थान्तरे

(१) भरता (२) र्जुन (३) मान्धातृ (४) भगीरथ (५) युधिष्ठीरा:।
(६) सगरो (७) नहुषश्चैव सप्तैते चक्रबर्तिन:।' इति।

(४) उक्तञ्च कामन्दकीये—
स्वाम्यमात्यश्च राष्ट्रं च दुर्गं कोशो बलं सुहृत्।
परस्परोपकारीदं सप्ताङ्गं राज्यमुच्यते।।' इति श०चिं० १/९९।

*(५) **मङ्गलभेदा:**—(१) ब्राह्मण:, (२) गौ:, (३) अग्नि: (४) सुवर्णम्, (५) घृतम (६) सूर्य:, (७) जलानि, (८) राजा, चैतान्यष्टौ मंगलानि स्यु:।*

उक्तं च—'मत्स्यसूक्त महातंत्र ४३ पटले—

'लोकेऽस्मिन्मङ्गलान्यष्टौ ब्राह्मणे गौर्हुताशन:।
हिरण्यं सर्पिरादित्य आपो राजा तथाष्टम:।
एतानि सततं पश्येन्नमस्येदर्चयेतत:।
प्रदक्षिणं तु कुर्वीत तथा चायुर्न हीयते।।' इति।

(६) (१) यम (२) नियमा (३) सत (४) प्राणायाम (५) प्रत्याहार (६) धारणा (७) ध्यान (८) समाधय: इत्येतात्यष्टौ योगाङ्गानि स्यु:।

नववाचकशब्दाः— अङ्काः, गावः[क] (गो), ग्रहाख्या, छिन्नरावणमस्तकनाम, नन्दाः[१], निधिसञ्ज्ञा, बृहती (स्त्री०) (छन्दोजातिर्विशेषः), भारतीयवर्षाणि[२] (भूखण्डानि), रन्ध्रनाम[३], रसाः[४], वर्षाणि[५], व्याघ्रीस्तना, चेत्येते नववाचकशब्दाः।

दशपर्यायाः—दश (अन्) (त्रि०ब०), दशकम् (त्रि०), दशत् (द्) (स्त्री०), दशतयः (त्रि०), द्विपञ्चकम् त्रि०),।।

दशवाचकशब्दाः—अवस्थाः, आशाख्या, करङ्गुलयः, कृष्णावताराः, चन्द्राश्वाः, पंक्तिः (स्त्री०) (छ०जा०वि०), रावणमौलिनाम, विश्वदेवाः, शम्भुवाहुनाम, सुशर्म्माणश्चेत्येते, दशवाचकशब्दाः।

एकादशपर्यायाः—एकादश (अन्) (त्रि०ब०), एकादशकम् (त्रि०), एकाधिकदश (त्रि०)।

एकादशवाचकशब्दाः—कुरुराजसेनाः, त्रिष्टुब् (भ्) (स्त्रि०) (छ०जा०वि०), शिवनाम, चेत्येते एकादशवाचकशब्दाः।

द्वादशपर्यायाः—द्वादश (अन्) (त्रि०ब०), त्रिचतुष्कम् (त्रि०), द्विदश (अन्) (त्रि०ब०), द्विषट् (ष्) (त्रि०ब०) द्विषट्कम् (त्रि०), द्व्यधिकदश (अन्) (त्रि०ब०)।

द्वादशवाचकशब्दाः—कार्तिकेयनेत्रबाह्वोर्नाम, चक्रम् (न०), जगती (स्त्रि०) (छ०जा०वि०) भगणनाम, भावाः, मासाः, रविनाम, राजमण्डलानि, राशयः, राशिगणनाम, संक्रान्तयः, साध्याः, सारिकोष्ठानि चेत्येते, द्वादशवाचकशब्दाः।

(क) गो भेदाः—

(१) नन्दभेदोः।

(२) भारतीयभूखण्डभेदाः—(१) ऐन्द्रम्, (२) कशेरुशकलम्, (३) ताम्रपर्णम्, (४) गभस्तिमत्, (५) कुमरिकाख्या (भरतखण्डम्) (अत्रैव वर्णव्यवस्था), (६) नागम्, (७) सौम्यम्, (८) वारुणम्, (९) गान्धर्वम् चैते नव भारतीयवर्षभेदाः।

(३) रन्ध्रपर्यायाः—छिद्रम्, द्वारम्, रन्ध्रम्।

रन्ध्रभेदाः—(२) नेत्र (२) श्रवण (२) नासानां द्वे द्वे रन्ध्रे प्रकीर्तिते। (१) मुख (१) मेहन (१) पायूनामेकैकं रन्ध्रमुच्यते।' इति भावप्रकाशे। २/३१४/५७।

(४) उक्तं च शृङ्गार-हास्य-करुणा, रौद्र-वीर-भयानकाः। बीभत्सा-द्भुत-शान्ताश्च रसा भावा पुनस्त्रिधा। इत्यभिधानचिन्तामणौ पृ०७४, २९४-५।

(५) वर्षभेदाः—(१) भारतवर्षम् (नाभिवर्षम्) (अजनाभवर्षम्), (२) किन्नरवर्षम्, (३) हरिवर्षम्, (४) कुरुवर्षम्, (५) हिरण्मयवर्षम्, (६) रम्यकवर्षम्, (७) भद्राश्ववर्षम्, (८) केतुमालवर्षम्, (९) इलावृतवर्षम्, चैतानि नव वर्षाणि स्युः।

त्रयोदशपर्यायाः—त्रयोदश, त्र्यधिकदश, सानलदश, एतेऽन्नन्ताः, त्रिलिङ्गाः।

त्रयोदशवाचकशब्दाः—गुणाः[१], ताम्बुलानि, [२]विश्वेदेवाः, विश्वघस्रपक्षःश्चैते त्रयोदशवाचकशब्दाः।

चतुर्दशपर्यायाः—चतुर्दश (अन्) (त्रि०ब०), चतुरधिकदश (अन्) (त्रि०ब०), द्विसप्त (अन्) (त्रि०ब०), द्विसप्तकम् (त्रि०)।

चतुर्दशवाचकशब्दाः—इन्द्रनाम, त्रिदिवाः, ध्रुवतारकाः, भुवनानि, मनवः, रत्नसञ्ज्ञा, राजानः, विद्याः, वैकुण्ठाः, शक्वरी (स्त्री०) (छ०जा०वि०) चेत्येते चतुर्दशवाचकाः शब्दाः।

पञ्चदशपर्यायाः—पञ्चदश (अन्) (त्रि०ब०), पञ्चाधिकदश (अन्) (त्रि०ब०), त्रिपञ्च (अन्) (त्रि०ब०), त्रिपञ्चकम् (त्रि०), सेषुदश (अन्) (त्रि०ब०)।

पञ्चदशवाचकशब्दाः—अतिशक्वरी (स्त्री०) (छ०जा०वि०) तिथिसञ्ज्ञा, दिनाख्या, सामिधेनी, चेत्येते पञ्चदशवाचकशब्दाः।

षोडशपर्यायाः—षोडश (अन्) (त्रि०ब०), षोडश (पु०ब०), नित्यबहुवचनान्ताः, एकाधिक पञ्चदशसंख्या, चतुश्चतुष्कम् (त्रि०), द्व्यष्ट (त्रि०ब०), षडधिकदश (अन्) (त्रि०ब०)।

षोडशवाचकशब्दाः—अष्टिः (स्त्री०) (छ०जा०वि०), कर्कटपादाः (पुं०) कलाः (स्त्री०), चन्द्रकलाः (स्त्री०), चतुष्कृतिः (स्त्री०), चतुर्वर्गः (पु०), नृपाश्चेत्येते षोडशवाचकाःशब्दाः।

सप्तदशपर्यायाः—सप्तदश, सप्ताधिकदश, सागदश एतेऽन्नन्ताः त्रिलिङ्गाः।

---

(१) उक्तं च—

(१) मानुष्य, (२) वरवंशजन्म, (३) विभवो, (४) दीर्घायु, (५) रारोग्यना,
(६) सन्मित्रं, (७) सुसुतः, (८) सती प्रियतमा, (९) भक्तिश्च नारायणे।
(१०) विद्वत्त्वं, (११) सुजनत्व, (१२) मिन्द्रियजयं, सत्पात्रदाने रति-
स्ते पुण्येन विना त्रयोदश गुणाः संसारिणां दुर्लभाः॥' इति ग्रन्थान्तरे।

(२) विश्वेदेवभेदाः—(१) ऋतु, (२) दक्षः, (३) सत्यः, (४) वसुः, (५) कामः, (६) कालः, (७) धूरिः, (८) लोचनः, (९) पुरूरव. (१०) आर्द्रव, (११) धनुः, (१२) रुचिः, (१३) रुद्रश्चैतें त्रयोदश विश्वेदेवाः सन्ति।

तदुक्तं हेमाद्रौ शंखबृहस्पती—
दृष्टिश्राद्धे ऋतूदक्षौ सत्यौ नान्दीमुखे वसू।
सापिण्ड्यके कामकालौ तीर्थे च धूरिलोचनौ॥
पुरूरवाद्रवौ चैतौ पार्वणे समुदाहृतौ।
हेमश्राद्धे धनरुची कथ्येते विश्वदेवकौ॥
एकोद्दिष्टे रुद्रसंज्ञो विश्वेदेवास्त्रयोदश इति॥

सप्तदशवाचकशब्दाः—अत्यष्टिः (स्त्री०) (छं०जा०वि०), धान्यानि, मेघनाम[१] चैते सप्तदशवाचकशब्दाः।

अष्टादशपर्यायाः—'अष्टादश, अष्टाधिकदश, सेभदश चैतेऽन्नन्ताः त्रिलिङ्गाः। द्विनवकम् (त्रि०) त्रिषट्कम् (त्रि०)।

अष्टादशवाचकशब्दाः—खगयुक् (ज्) ग्रहद्वयम्, द्वीपाः[२], धान्यानि,[३] धृतिः (स्त्री०) (छ०जा०वि०), पुराणानि[४], विद्याः[५], स्मृतय[६]श्चेत्येतेऽष्टादशवाचकशब्दाः।

एकोनविंशतिपर्यायाः—ऊनविंशतिः, एकाद्वनविंशतिः, एकान्नविंशतिः, एकोनविंशतिश्चैते स्त्री लिङ्गाः, नवदश, नवाधिकदश, साङ्कदश चैतेऽन्नन्तास्त्रिलिङ्गाः।

एकोनविंशतिवाचकशब्दः—अतिधृतिः (स्त्री०) (छं०जा०वि०),

विंशतिपर्यायाः—विंशकम् (त्रि०), विंशत्, विंशतिः, विंशतिका, विंशती चैते स्त्रीलिङ्गाः। चतुःपञ्चकम् (त्रि०), द्विदशकम् (त्रि०), द्विदशतः परिमाणमस्य।

विंशतिवाचकशब्दाः—अङ्गुलिनाम, आशाद्वयम्, काष्ठायुक् (ज्), कृतिः (स्त्री०) (छं०जा०वि०), नखाख्या, रावणहस्तनाम, चैते विंशतिवाचकशब्दाः।

एकविंशतिपर्यायाः—एकविंशत्, एकविंशतिः, एकाधिकविंशतिश्चैते स्त्रीलिङ्गाः। त्रिसप्त (अन्) (त्रि०ब०), त्रिसप्तकम् (त्रि०)।

एकविंशतिवाचकशब्दाः—प्रकृतिः (स्त्री०) (छं०जा०वि०), [७]मूर्छना: (स्त्री०), समिन्नाम्[८], स्वर्गाख्या[९] विकृतिः (स्त्री) (छ०जा०वि०)। चेत्येते एकविंशतिवाचकशब्दाः।

द्वाविंशतिपर्यायाः—द्वाविंशत्, द्वाविंशतिः, द्व्यधिकविंशतिश्चैते स्त्रीलिङ्गाः।

द्वाविंशतिवाचकशब्दाः—आकृतिः (स्त्री०) (छं०जा०तव०), जातयः[१०] (स्त्री०), रुद्रयुक् (ज्), शिवद्वयम् ' चैते द्वाविंशतिवाचकशब्दाः।

त्रयोविंशतिपर्यायाः—त्रयोविंशत् ' त्रयोविंशतिः, त्र्यधिकविंशतिः, साग्निविंशत्, चैते स्त्रीलिङ्गाः।

त्रयोविंशतिवाचकशब्दः—विकृतिः (स्त्री) (छ०जा०वि०)

चतुर्विंशतिपर्यायाः—चतुर्विंशत्, चतुर्विंशतिः, चतुरधिकविंशतिश्चैते स्त्रीलिङ्गाः, चतुःषट्कम् (त्रि०), त्र्यष्टकम् (त्रि०)।

---

(१) मेघभेदाः।

(२) एषां भेदा अन्यत्र।

(३) एषां भेदा अन्यत्र।

(४) एषां भेदा अन्यत्र॥

(५) एषां भेदा अन्यत्र।

(६) एषां भेदा अन्यत्र।

(७) आसां भेदा अन्यत्र।

(८) समिद्भेदाः।

(९) स्वर्गभेदाः।

(१०) आसां भेदा अन्यत्र।

चतुर्विंशतिवाचकशब्दाः—जिननाम, रवियुक् (ज्), सङ्कृतिः (स्त्री०) (छ०जा०वि०), सिद्धाः[१], सूर्यद्वयम्, चैते चतुर्विंशतिवाचकशब्दाः।

पञ्चविंशतिपर्यायाः—पञ्चविंशत्, पञ्चविंशतिः, पञ्चाधिकविंशतिश्चैते स्त्रीलिङ्गाः। पञ्चपञ्चकम् (त्रि०)।

पञ्चविंशतिवाचकशब्दाः—अतिकृतिः, अभिकृति-श्चेमौ स्त्रीलिङ्गौ (छ०जा०वि०), तत्त्वानि[२], पञ्चकृतिः (स्त्री०), पञ्चवर्गः (पुं०), चैते पञ्चविंशतिवाचकशब्दाः।

षड्विंशतिपर्यायाः—षड्विंशत्, षड्विंशतिः, षडधिकविंशतिः, साङ्गविंशतिश्चैते स्त्रीलिङ्गाः।

षड्विंशतिवाचकशब्दाः—अहोकृतिः, उत्कृतिश्च स्त्रीलिङ्गौ (छं०जा०वि०), विश्वद्वयम्, विश्वयुक् (ज्), विश्वयुगम् (त्रि०), चैते षड्विशतिवाचकशब्दाः।

सप्तविंशतिपर्यायाः—सप्तविंशत्, सप्तविंशतिः, सप्ताधिकविंशतिः, सागविंशति,-श्चैते स्त्रीलिङ्गाः, त्रिनवकम् (त्रि०),।

सप्तविंशतिवाचकशब्दौ—त्रिघनः, नक्षत्रनाम, चैतौ सप्तविंशतिवाचकशब्दौ।

अष्टाविंशतिपर्यायाः—अष्टाविंशत्, अष्टाविंशतिः, अष्टाधिकविंशतिः, सेभविंशति,-श्चैते स्त्रिलिङ्गाः।

अष्टाविंशतिवाचकशब्दाः—इन्द्रद्वयम्, इन्द्रयुक्, इन्द्रयुगम्, मनुद्वयम्, मनुद्वितयम्, मनुयुक्, मनुयुगम्, मोहश्चेत्येतेऽष्टाविंशतिवाचकशब्दाः।

ऊनत्रिंशत्पर्यायाः—ऊनत्रिंशत्, ऊनत्रिंशतिः, एकादूनत्रिंशत्, एकान्नत्रिंशत्, एकोनत्रिंशत् चैते (स्त्री०)।

त्रिंशत्पर्यायाः—त्रिंशत्, त्रिंशतिः, साशाविंशतिश्चैते स्त्रीलिङ्गाः। त्रिदशकम् (त्रि०), पञ्चषट्कम् (त्रि०), त्रिदशतः परिमाणमस्य।

त्रिंशद्वाचकशब्दाः—अहर्द्वयम्, तिथिद्वयम्, तिथियुक्, दिनयुक्, द्युद्वितयम् चैते त्रिंशद्वाचक शब्दाः।

एकत्रिंशत्पर्यायाः—एकत्रिंशत्, एकत्रिंशतिः, एकाधिकत्रिंशतिः, सेशविंशति श्चैते स्त्रीलिङ्गाः।

द्वात्रिंशत्पर्यायाः—द्वात्रिंशत्, द्वात्रिंशतिः, द्व्यधिकत्रिंशति-श्चैते स्त्रीलिङ्गाः, चतुरष्टकम् (त्रि०)।

द्वात्रिंशद्वाचकशब्दाः—अष्टिद्वयम्, दन्तनाम, नृपयुक्, चैते द्वात्रिंशद्वाचकशब्दाः।

त्रयस्त्रिंशत्पर्यायाः—त्रयस्त्रिंशत्, त्रयस्त्रिशतिः, त्र्यधिकत्रिंशतिः, सविश्वविंशतिः चैते (स्त्री०)

त्रयस्त्रिंशद्वाचकशब्दाः—देवाख्या, रुद्रत्रिकम्, शिवत्रितयं, चैते त्रयस्त्रिंशद्वाचकशब्दाः।

चतुस्त्रिंशत्पर्यायाः—चतुस्त्रिशत्, चतुस्त्रिंशतिः, चतुरधिकत्रिंशत्, सेन्द्रविंशतिः चैते स्त्री०।

---

(१) सिद्धभेदाः—

(२) तत्त्वभेदाः—

चतुस्त्रिंशद्वाचकशब्दाः—अत्यष्टिद्व्यम्, घनयुक्, मेघयुगं, चैते चतुस्त्रिंशद्वाचकशब्दाः।

पञ्चत्रिंशत्पर्यायाः—पञ्चत्रिंशत्, पञ्चत्रिंशतिः, पञ्चाधिकत्रिंशतिः, सतिथिविंशतिः, सतत्त्वपंक्तिश्चैते स्त्रीलिङ्गाः, पञ्चसप्तकम् (त्रि०)।

षट्त्रिंशत्पर्यायाः—षट्त्रिंशत्, षट्त्रिंशतिः, षडधिकत्रिंशति, श्चैते स्त्रीलिङ्गाः चतुर्णवकम् (त्रि०), नवचुतष्कम् (त्रि०), षट्षट्कम् (त्रि०)।

षट्त्रिंशक्षचकशब्दाः—तुषिताः, धृतिद्वयम्, पुराणयुक्, रागिण्यः, विद्यायुगम्, षट्कृतिः, षड्वर्गः, स्मृतिद्वयम् चैते षट्त्रिंशद्वाचकशब्दाः॥

सप्तत्रिंशत्पर्यायाः—सप्तत्रिंशत्, सप्तत्रिंशतिः, सप्ताधिकत्रिंशतिः, साम्बुदविंशतिश्चैते स्त्रीलिङ्गाः।

अष्टत्रिंशत्पर्यायाः—अष्टत्रिंशत्, अष्टात्रिंशत्, अष्टत्रिंशतिः, अष्टात्रिंशतिः, अष्टाधिकत्रिंशतिश्चैते स्त्रियाम्।

अष्टत्रिंशद्वाचकशब्दाः—अतिधृतिद्वयम्, अतिधृतियुक्, अतिधृतियुगम् (त्रि०), चैतेऽष्टत्रिंशद्वाचकशब्दाः।

ऊनचत्वारिंशत्पर्यायाः—ऊनचत्वारिंशत्, एकादूनचत्वारिंशत्, एकान्नचत्वारिंशत्, एकोनचत्वारिंशत्, नवत्रिंशतिश्चैते स्त्रियाम्।

चत्वारिंशत्पर्यायाः—अष्टपञ्चकम् (त्रि०), चतुर्दशकम् (त्रि.), चत्वारिंशत् (स्त्री), पञ्चाष्टकम् (त्रि०) चतुर्दशतः परिमाणमस्य।

चत्वारिंशद्वाचकशब्दाः—कृतिद्वयम्, कृतियुक्, नखद्वयम्, नखरयुगम् चैते त्रिलिङ्गाः, चत्वारिंशद्वाचकशब्दाः।

एकचत्वारिंशत्पर्यायाः—एकचत्वारिंशत्, एकाधिकचत्वारिंशत्, सेशत्रिंशत्, सस्वर्गविंशत्, स्त्रियाम्।

द्विचत्वारिंशत्प०—द्वाचत्वारिंशत्, द्विचत्वारिंशत्, द्वयधिकचत्वारिंशत्, सेनत्रिंशत् स्त्रियाम्।

द्वाचत्वारिंशद्वाचकशब्दाः—प्रकृतियुक्, मूर्च्छनाद्वयम्, स्वर्गयुगम् चैते त्रिलिङ्गाः द्वाचत्वारिंशद्वाचकशब्दाः।

त्रयश्चत्वारिंशत्पर्यायाः—त्रयश्चत्वारिंशत्, त्रिचत्वारिंशत्, त्र्यधिकचत्वारिंशत्, सविश्वत्रिंशत् स्त्रियाम्।

चतुश्चत्वारिंशत्पर्यायाः—चतुश्चत्वारिंशत्, चतुरधिकचत्वारिंशत्, ससिद्धविंशतिः, सेन्द्रत्रिंशत् स्त्रियाम् रुद्रचतुष्कम् (त्रि०)।

चतुश्चत्वारिंशद्वाचकशब्दाः—आकृतिद्वयम्, आकृतियुक्, जातिद्वितयम्, जातियुगं चैते त्रिलिङ्गाश्चतुश्चत्वारिंशद्वाचकशब्दाः।

पञ्चचत्वारिंशत्पर्यायाः—पञ्चचत्वारिंशत्, पञ्चाधिकचत्वारिंशत् स्त्रियाम्, नवपञ्चकम्, पञ्चनवकम्, तिथित्रिकम् चैते त्रिलिङ्गाः।

षट्चत्वारिंशत्पर्यायाः—षट्चत्वारिंशत्, षडधिकचत्वारिंशत्, साष्टित्रिंशत् स्त्रियाम्।

षट्चत्वारिंशद्वाचकशब्दाः—विकृतिद्वयम्, विकृतियुक्, विकृतियुगम् चैते त्रिलिङ्गाः।

सप्तचत्वारिंशत्पर्यायाः—सप्तचत्वारिंशत्, सप्ताधिकचत्वारिंशत्, सर्क्षविंशतिः स्त्रियाम्।

अष्टचत्वारिंशत्पर्यायाः—अष्टचत्वारिंशत्, अष्टाचत्वारिंशत्, अष्टाधिकचत्वारिंशत् स्त्रियाम्। अष्टषट्कम्, षडष्टकम् चैतो त्रिलिङ्गौ।

अष्टचत्वारिंशद्वाचकशब्दाः—जिनद्वयम्, जिनयुक्, सिद्धद्वितयम्, सिद्धयुगम् चैते त्रिलिङ्गाः।

एकोनपञ्चाशत्पर्यायाः—ऊनपञ्चाशत्, एकादूनपञ्चाशत्, एकान्नपञ्चाशत्, एकोनपञ्चाशत्, नवचत्वारिंशत् स्त्रियाम्।

ऊनपञ्चाशद्वाचकशब्दाः—तानाः (पुं०ब०), मरुद्गणः (पु०), सप्तकृतिः (स्त्रि०), सप्तवर्ग (पुं०) श्चैते ऊनपञ्चाशद्वाचकशब्दाः।

पञ्चाशत्पर्यायाः—पञ्चाशत्, दशाधिकचत्वारिंशत् स्त्रियाम्। पञ्चदशकम् (त्रि०) पञ्चदशतः परिमाणमस्य।

पञ्चादशद्वयाचकशब्दाः—अतिकृतिद्वयम्, अभिकृतिद्वयम्, तत्त्वयुगम् चैते त्रिलिङ्गाः।

एकपञ्चाशत्पर्यायाः—एकपञ्चाशत् (स्त्री०), एकाधिकपञ्चाशत् (स्त्री०), अत्यष्टित्रिकम् (त्रि०), मेघत्रिकम् त्रि०)।

द्वापञ्चाशत्पर्यायाः—द्वापञ्चाशत्, द्विपञ्चाशत्, द्व्यधिकपञ्चाशत् स्त्रियाम्।

त्रयःपञ्चाशत्पर्यायाः—त्रयःपञ्चाशत्, त्रिपञ्चाशत्, त्र्यधिकपञ्चाशत् स्त्रियाम्।

चतुःपञ्चाशत्पर्यायाः—चतुःपञ्चाशत्, चतुरधिकपञ्चाशत्, स्त्रियाम्। नवषट्कम् (त्रि०), षण्णवकम् (त्रि०)।

चतुःपञ्चाशद् वाचकशब्दाः—धिष्ण्ययुक्, नक्षत्रद्वयम्, भयुगम् (त्रि०)।

पञ्चपञ्चाशत्प०—पञ्चपञ्चाशत्, पञ्चाधिकपञ्चाशत्, सतिथिचत्वारिंशत् (स्त्रियाम्)।

षट्पञ्चाशत्पर्यायाः—षट्पञ्चाशत्, षडधिकपञ्चाशत् स्त्रियाम्। अष्टसप्तकम् (त्रि०), सप्ताष्टकम् (त्रि०)।

सप्तपञ्चाशत्प०—सप्तपञ्चाशत्, सप्ताधिकपञ्चाशत् स्त्रियाम्।। अतिधृतित्रिकम्। त्रि०)।

अष्टपञ्चाशत्प०—अष्टपञ्चाशत्, अष्टापञ्चाशत्, अष्टाधिकपञ्चाशत् स्त्रियाम्।

एकोनषष्टिप०—ऊनषष्टिः, एकादूनषष्टिः, एकान्नषष्टिः, एकोनषष्टिः, नवपञ्चाशत् स्त्रियाम्।

षष्टिप०—षष्टिः (स्त्री०) एकाधिकोनषष्टिः (स्त्री०) षड्दशकम् (त्रि०), षड्दशतः परिमाणमस्य।

एकषष्टिप०—एकषष्टिः, एकाधिकषष्टिः स्त्रियाम्।

द्विषष्टिप०—द्वाषष्टिः, द्विषष्टिः, द्व्यधिकषष्टिः (स्त्री०)।

त्रयःषष्टिप०—त्रयःषष्टिः, त्रिषष्टिः, त्र्यधिकषष्टिः स्त्रियाम्। नवसप्तकम् (त्रि०), सप्तनवकम् (त्रि०)।

चतुःषष्टिप०—चतुःषष्टिः, चतुरधिकषष्टिः स्त्रियाम्। अष्टाष्टकम्, (त्रि०), षोडशचतुष्कम् (त्रि०)।

चतुःषष्टिवाचकशब्दाः—अष्टकृतिः (स्त्री०), अष्टवर्गः (पुं०), आभास्वराः (पुं०ब०), कलाः (स्त्री०ब०), चतुर्घनः (पुं०), दन्तद्वयम् (त्रि०)।

पञ्चषष्टिपर्यायाः—पञ्चषष्टिः (स्त्री०), पञ्चाधिकषष्टिः (स्त्रि०), त्रयोदशपञ्चकम् (त्रि०)।

षट्षष्टिप०—षट्षष्टिः (स्त्रि०), षडधिकषष्टिः (स्त्री०)। एकादशषट्कम् (त्रि०)।

सप्तषष्टिप०—सप्तषष्टिः (स्त्रि०) सप्ताधिकषष्टिः (स्त्री०)।

अष्टषष्टिप०—अष्टषष्टिः, अष्टाषष्टिः, अष्टाधिकषष्टिः (स्त्री०)।

एकोनसप्ततिप०—ऊनसप्ततिः, एकादूनसप्ततिः, एकान्नसततिः, एकोनसप्ततिः, नवषष्टिः स्त्रियाम्।

सप्ततिप०—सप्ततिः (स्त्रि०), एकाधिकोनसप्ततिः (स्त्री०), सप्तदशकम् (त्रि०), सप्तदशतः परिमाणमस्य।

एकसप्ततिप०—एकसप्ततिः, एकाधिकसप्ततिः (स्त्री०)।

एकसप्ततिवाचकशब्दाः—मन्वन्तरम् (न०)।

द्विसप्ततिप०—द्वासप्ततिः, द्विसप्ततिः द्व्यधिकसप्ततिः (स्त्री०), अष्टनवकम् , द्वादशषट्कम्, नवाष्टकम् (त्रि०)।

त्रिसप्ततिप०—त्रयःसप्ततिः, त्रिसप्ततिः, त्र्यधिकसप्ततिः (स्त्री०)।

चतुःसप्ततिप०—चतुःसप्ततिः,चतुरधिकसप्ततिः (स्त्री०)

पञ्चसप्ततिप०—पञ्चसप्ततिः, पञ्चाधिकसप्ततिः (स्त्री०), पञ्चदशपञ्चकम् (त्रि०)।

षट्सप्ततिप०—षट्सप्ततिः, षडधिकसप्ततिः (स्त्री०)।

सप्तसप्ततिप०—सप्तसप्ततिः, सप्ताधिकसप्ततिः (स्त्री०), एकादशसप्तकम् (त्रि०)।

अष्टसप्ततिप०—अष्टसप्ततिः, अष्टासप्ततिः, अष्टाधिकसप्ततिः (स्त्री०)।

ऊनाशीतिप०—ऊनाशीतिः, एकादूनाशीतिः, एकान्नाशीतिः, एकोनाशीतिः, नवसप्ततिः (स्त्री०)।

अशीतिप०—अशीतिः, एकाधिकोनाशीतिः (स्त्री०), अष्टदशकम्, दशाष्टकम्, विंशतिचतुष्कम्, षोडशपञ्चकम् त्रि०)। अष्टदशतः परिमाणमस्य।

एकाशीतिप०—एकाशीतिः, एकाधिकाशीतिः (स्त्री०), नवनवकम् (त्रि०)।

एकाशीतिवा०—नवकृतिः (स्त्री०), नववर्गः (पुं०)।

द्व्यशीतिप०—द्व्यशीतिः, द्व्यधिकाशीतिः (स्त्री०)।

त्र्यशीतिप०—त्र्यशीतिः, त्र्यधिकाशीतिः (स्त्री०)।

चतुरशीतिप०—चतुरधिकाशीतिः (स्त्री०), द्वादशसप्तकम् (त्रि०)।

पञ्चाशीतिप०—पञ्चाशीतिः, पञ्चाधिकाशीतिः (स्त्री०), सप्तदशपञ्चकम् (त्रि०)।

षडशीतिप०—षडशीतिः, षडधिकाशीतिः (स्त्री)।

सप्ताशीतिप०—सप्ताशीतिः, सप्ताधिकाशीतिः (स्त्री)।

अष्टाशीतिप०—अष्टाशीतिः, अष्टाधिकाशीतिः (स्त्री०), एकादशाष्टकम् (त्रि०)।

ऊननवतिप०—नवनवतिः, एकाद् ऊनवतिः, एकान्ननवतिः, एकोननवतिः, नवनवतिः (स्त्री०)।

नवतिप०—एकाधिकोननवतिः, नवतिः, नवतिका, नवती (स्त्री०)। दशनवकम्, नवदशकम्, अष्टादशपञ्चकम् (त्रि०), नवदशत परिमाणमस्य।

एकनवतिप०—एकनवतिः, एकाधिकनवतिः (स्त्री)।

द्विनवतिप०—द्वानवतिः, द्विनवतिः, द्व्यधिकनवतिः (स्त्री)।

त्रिनवतिप०—त्रयोनवतिः, त्रिनवतिः, त्र्यधिकनवतिः (स्त्री०)।

चतुर्णवतिप०—चतुर्णवतिः, चतुरधिकनवतिः (स्त्री०)।

पञ्चनवतिप०—पञ्चनवतिः, पञ्चाधिकनवतिः (स्त्री०) ऊनविंशत्पञ्चकम् (त्रि०)।

षण्णवतिप०—षण्णवतिः, षडधिकनवतिः (स्त्री०), दन्तत्रिकम्, द्वादशाष्टकम्, रदत्रितयम् (त्रि०)।

सप्तनवतिप०—सप्तनवतिः, सप्ताधिकनवतिः (स्त्री०)।

अष्टनवतिप०—अष्टनवतिः, अष्टानवतिः, अष्टाधिकनवतिः (स्त्री०)।

एकोनशतप०—ऊनशतम्, एकाद् ऊनशतम्, एकान्नशतम्, एकोनशतम्, एकादशनवकम् (त्रि०) नवनवतिप०(स्त्री०), देवत्रयम्, सुमनस्त्रितयम् (त्रि०)।

शतप०—शतम् (न०), दशतिः (स्त्री०), दशदशकम् (त्रि०), दशदशतः परिमाणमस्य।

शतवाचकशब्दाः—इन्द्रयज्ञाः, दशकृतिः, दशवर्गः, धृतराष्ट्रपुत्राः, पद्मदलानि, पुरुषायूंषि, रावणाङ्गुल्यः, शतभिषक्तारकाश्चैते शतवाचकाः शब्दाः।

विंशत्युत्तरशतद्वयस्य षट्त्रिंशदुत्तरशतद्वयस्य वा पर्यायः—महाराजिकाः (पुं०ब०)।

षष्ट्युत्तरशतत्रयपर्यायाः—भगणभागाः, भगणलवाः, भगणांशकाः, भगणांशाः, भचक्रभागाः, भचक्रलवाः भचक्रांशकाः, भचक्रांशाः।

सहस्रप०—सहस्रम्, दशशतम्, दशघ्नशतम् (त्रि०)।।

सहस्रवाचकशब्दाः—अनन्तशीर्षाः, अर्जुनहस्ताः, इन्द्रचक्षूंषि, जाह्नवीपथाः, पद्मदलानि, भागीरथीवक्त्राणि, रविकराः, रविबाणाः, वेदशाखाश्चैते सहस्रवाचकाः शब्दाः सन्ति।

द्विशतपर्यायाः—द्विशतम्, शतद्वयम्, शतयुगम् (न०)।

त्रिशतप०—त्रिशतम्, शतत्रयम् (न०)।

द्विसहस्रप०—द्विसहस्रम्, सहस्रद्वयम् (न०)।

अयुतप०—अयुतम् (न०), दशसहस्राणि (न०ब०)।

पूर्णार्थकैकप०—आदिमः (पुं०),आदिमा (स्त्री०), आदिमम् (न०), आद्यः (पुं०), आद्या (स्त्री०), आद्यम् (न०), [१]प्रथमः (पुं०), प्रथमा (स्त्री), प्रथमम् (न०), प्रथमा = प्रतिपदा तिथिविशेषः।

पूर्णार्थकद्विप०—[२]द्वितीयः (त्रि०), द्वितीया (स्त्री०), ति०वि०।

---

(१) 'पहिला = पहिली' इति भाषा। (२) दूसरा = दूसरी इति भाषा।

पूर्णार्थकत्रिप—[1]तृतीयः (त्रि०), तृतीया (स्त्री०), ति०वि०।

पू० चतुःप०—[2]चतुर्थः (त्रि०), चतुर्थी (स्त्री०), ति०वि०।

पू० पञ्चप०—[3]पञ्चम (त्रि०), पञ्चमी (स्त्री०), ति०वी०।

पू० षट्प०—[4]षष्ठः (त्रि०), षष्ठी (स्त्री०), ति०वि०।

पू० सप्तप०—[5]सप्तमः०(त्रि०) सप्तमी (स्त्री०), ति०वि०॥

पू० अष्टप०—अष्टमः[6] (त्रि०), अष्टमी (स्त्री०) ति०वि०।

पू० नवप०—नवमः[7] (त्रि०), नवमी (स्त्री०), ति०वि०।

पू० दशप०—दशमः[8] (त्रि०), दशमी (स्त्री०), ति०वि०।

पू० एकादशप०—एकादशः[9], एकादशकः, एकादशतमः (त्रि०), एकादशी (स्त्री०), तिथिविशेषः।

पू० द्वादशप०—द्वादशः[10], द्वादशकः, द्वादशतमः (त्रि०), द्वादशी (स्त्री०), ति०वि०।

पू० त्रयोदशप०—त्रयोदशः[11], त्रयोदशकः, त्रयोदशतमः (त्रि०), त्रयोदशी (स्त्री०), तिथिविशेषः।

पू० चतुर्दशप०—चतुर्दशः[12] चतुर्दशकः; चतुर्दशतमः (त्रि०)। चतुर्दशी (स्त्री०), ति०वि०।

प० पंचदशप०—पञ्चदशः, [13]पञ्चदशकः, पञ्चदशतमः (त्रि०), पञ्चदशी (स्त्री०) अमावास्या, पूर्णमासी।

पू० षोडशप०—षोडशः[14] षोडशकः, षोडशतमः (त्रि०)।

पू० सप्तदशप०—सप्तदशः, [15]सप्तदशकः, सप्तदशतमः (त्रि०)।

पू० अष्टादशप०—अष्टादशः[16] अष्टादशकः, अष्टादशतमः (त्रि०)।

पू० एकोनविंशति—ऊनविंशः,[17] ऊनविशतितमः, एकोनविंशः, एकोनविंशत्तमः, एकोनविंशतितमः (त्रि०)।

पू० विंशतिप०—विंशः,[18] विशत्तमः, विंशतितमः (त्रि०)।

---

(१) तीसरा = री इति भाषा।
(२) चौथा = थी इ. भा.।
(३) पाँचवाँ = वीं इ. भा.।
(४) छठा = ठी इ. भा.।
(५) सातवां = इति भाषा।
(६) आठवां = वीं (इ.भा.)
(७) नवां = वीं (इ. भा)।
(८) दसवां = वीं (इ.भा.)
(९) ग्यारहवां = वीं (इ. भा.)
(१०) बारहवाँ = वीं (इ. भा.)
(११) तेरहवां = (इ. भा.)
(१२) चौदहवाँ वीं (इ. भा.)
(१३) पन्दरहवां = वीं (इ. भा.)।
(१४) सोलहवाँ = वीं (इ. भा.)।
(१५) सत्रहवां = वीं (इ. भा.)
(१६) अट्ठारहवां = वीं (इ. भा.)
(१७) उन्नीसवां = वीं (इ. भा.)
(१८) बीसवां = वीं (इ. भा.)।

पूर्णार्थकविंशतिप०—एकविंशः, एकविंशत्तमः, एकविंशतितमः (त्रि०)।

पू० द्वाविंशतिप०—द्वाविंशः, द्वाविंशत्तमः, द्वाविंशतितमः (त्रि०)।

पू० त्रयोविंशतिप०—त्रयोविंशः, त्रयोविंशत्तमः, त्रयोविंशतितमः (त्रि०)।

पू० चतुर्विंशतिप०—चतुर्विंशः, चतुर्विंशत्तमः, चतुर्विंशतितमः (त्रि०)।

पू० पंचविशतिप०—पंञ्चविंशः, पञ्चविशत्तमः पञ्चविंशतितमः (त्रि०)।

पू० षड्विंशतिप०—षड्विंशः षड्विशत्तमः, षड्विशतितमः (त्रि०)।

पू० सप्तविंशंतिप०—सप्तविंशः, सप्ततविंशत्तमः, सप्तविंशतितमः (त्रि०)।

पू० अष्टाविंशतिप०—अष्टाविंशः, अष्टाविंशत्तमः, अष्टाविंशतितमः (त्रि०)।

पू० ऊनत्रिंशत्प०—ऊनत्रिंशः ऊनत्रिशत्तमः, एकोनत्रिंशः, एकोनत्रिंशत्तमः (त्रि०)॥

पू० त्रिंशत्प०—त्रिंशः, त्रिंशत्तमः (त्रि०)।

पू० एकत्रिंशत्प०—एकत्रिंशः, एकत्रिंशत्तमः (त्रि०)॥

पू० द्वात्रिंशत्प०—द्वात्रिंशः, द्वात्रिंशत्तमः (त्रि०)।

पू० त्रयस्त्रिंशत्प०—त्रयस्त्रिंशः त्रयस्त्रिशत्तमः (त्रि०)।

पू० चतुस्त्रिंशत्प०—चतुस्त्रिंशः, चतुस्त्रिंशत्तमः (त्रि०)।

पू० पञ्चत्रिंशत्प०—पञ्चत्रिशः, पञ्चत्रिंशत्तमः (त्रि०)॥

पू० षट्त्रिंशत्प०—षट्त्रिंशंः, षट्त्रिंशत्तमः (त्रि०)।

पू० सप्तत्रिंशत्प०—सप्तत्रिंशः, सप्तत्रिंशत्तमः (त्रि०)।

पू० अष्टत्रिंशत्प०—अष्टत्रिंशः, अष्टात्रिंशः, अष्टत्रिंशत्तमः, अष्टात्रिंशत्तमः (त्रि.)

पू० ऊनचत्वारिंशत्प०—ऊनचत्वारिंशः, ऊनचत्वारिशत्तमः एकोनचत्वारिंशः, एकोनचत्वारिंशत्तमः (त्रि०)।

पू० चत्वारिंशत्प०—चत्वारिंशः, चत्वारिंशत्तमः (त्रि०)।

पू० एकचत्वारिंशत्प०—एकचत्वारिंशः, एकचत्वारिंशत्तमः (त्रि०)।

पू० द्विचत्वारिंशत्प०—द्वाचत्वारिंशः, द्वाचत्वारिंशत्तमः, द्विचत्वारिंशत्तमः (त्रि०)।

पू० त्रयश्चत्वारिंशत्प०—त्रयश्चत्वारिंशः, त्रयश्चत्वारिशत्तमः, त्रिचत्वारिंशः, त्रिचत्वारिंशत्तमः (त्रि०)।

पू० चतुश्चत्वारिंशत्प०—चतुश्चत्वारिंशः चतुश्चत्वारिंशत्तमः (त्रि०)।

पू० पञ्चचत्वारिंशत्प०—पञ्चचत्वारिंशः, पंचचत्वारिंशत्तमः (त्रि०)।

पू० षट्चत्वारिंशत्प०—षट्चत्वारिंशः, षट्चत्वारिंशत्तमः। (त्रि०)।

पू० सप्तचत्वारिंशत्प०—सप्तचत्वारिंशः, सप्तचत्वारिंशत्तमः (त्रि०)।

पू० अष्टचत्वारिंशत्प०—अष्टचत्वारिंशः, अष्टचत्वारिंशत्तमः, अष्टाचत्वारिंशः, अष्टाचत्वारिंशत्तमः (त्रि०)।

पू० ऊनपञ्चाशत्प०—ऊनपञ्चाशः, ऊनपञ्चाशत्तमः, एकोनपञ्चाशः, एकोनपञ्चाशत्तमः त्रि०)।

पू॰ पञ्चाशत्प॰—पञ्चाशः, पञ्चाशत्तमः (त्रि॰)।

पू॰ एकपञ्चाशत्प॰—एकपञ्चाशः, एकपञ्चाशत्तमः (त्रि॰)।

पू॰ द्विपञ्चाशत्प॰—द्वापञ्चाशः, द्वाषञ्चाशत्तमः, द्विपञ्चाशः, द्विपञ्चांशत्तमः (त्रि॰)॥

पू॰ त्रिपञ्चाशत्प॰—त्रयःपञ्चाशः, त्रयःपञ्चाशत्तमः, त्रिपञ्चाचांशः, त्रिशपञ्चाशत्तमः (त्रि॰)

पू॰ चतुःपञ्चाशत्प॰—चतुःपञ्चाशः, चतुःपंचाशत्तमः (त्रि॰)।

पू॰ पञ्चपञ्चाशत्प॰—पञ्चपञ्चाशः, पञ्चपञ्चाशत्तमः (त्रि॰)

पू॰ षट्पञ्चाशत्प॰—षट्पञ्चाशः, षट्पञ्चाशत्तमः (त्रि॰), षट्पञ्चाशिका (स्त्री॰)॥

पू॰ सप्तपञ्चाशत्प॰—सप्तपञ्चाशः, सप्तपञ्चाशत्तमः (त्रि॰)।

पू॰ अष्टपञ्चाशत्प॰—अष्टपञ्चाशत्तमः, अष्टपञ्चाशः, अष्टापञ्चाशः, अष्टापञ्चाशत्तमः (त्रि॰)।

पू॰ ऊनषष्टिप॰—ऊनषष्टः, ऊनषष्टितमः, एकोनषष्टिः, एकोनषष्टितमः (त्रि॰)

पू॰ षष्टिप॰—षष्टः, षष्टितमः (त्रि॰)।

पू॰ एकषष्टिप॰—एकषष्ठः, एकषष्टितमः, (त्रि॰)।

पू॰ द्विषष्टिपर्यायाः—द्वाषष्टः, द्वापष्टितमः, द्विषष्टः द्विषष्टितमः (त्रि॰)।

पू॰ त्रिषष्टिप॰—त्रयः षष्टः, त्रयः षष्टितमः, त्रिषष्टः, त्रिषष्टितमः (त्रि॰)।

पू॰ चतुःषष्टिप॰—चतुःषष्टः, चतुःषष्टितमः (त्रि॰)।

पू पञ्चषष्टिप॰—पञ्चषष्टः, पञ्चषष्टितमः, (त्रि॰)।

पू॰ षट्षष्टिप॰—षट्षष्टः, षट्षष्टितमः, (त्रि॰)।

पू॰ सप्तषष्टिप॰—सप्तषष्टः, सप्तषष्टितमः, (त्रि॰)।

पू॰ अष्टषष्टिप॰—अष्टषष्टः, अष्टषष्टितमः, अष्टाषष्टः, अष्टाषष्टितमः (त्रि॰)।

पू॰ ऊनसप्ततिप॰—ऊनसप्ततः ऊनसप्ततितमः, एकोनसप्तः, एकोनसप्ततितमः (त्रि॰)।

पू॰ सप्ततिप॰—सप्ततः, सप्ततितमः (त्रि॰)।

पू॰ एकसप्ततिप॰—एकसप्ततः, एकसप्ततितमः (त्रि॰)।

पू॰ द्विसप्ततिप॰—द्वासप्ततः, द्वासप्ततितमः, द्विसप्ततः, द्विसप्ततितमः (त्रि॰)।

पू॰ त्रिसप्ततिप॰—त्रयःसप्ततः, त्रयःसप्ततितमः, त्रिसप्ततः, त्रिसप्ततितमः (त्रि॰)।

पू॰ चतुःसप्ततिप॰—चतुःसप्ततः, चतुःसप्ततितमः (त्रि॰)।

पू॰ पञ्चसप्ततिप॰—पञ्चसप्ततः, पञ्चसप्ततितमः (त्रि॰)।

पू॰ षट्सप्ततिप॰—षट्सप्ततः, षट्सप्ततितमः (त्रि॰)।

पू॰ सप्तसप्ततिप॰—सप्तसप्ततः, सप्तसप्ततितमः (त्रि॰)।

पू॰ अष्टसप्ततिप॰—अष्टसप्ततः, अष्टसप्ततितमः, अष्टासप्ततः, अष्टासप्ततितमः (त्रि॰)।

पू० ऊनाशीतिप० —ऊनाशीतः, ऊनाशीतितमः, एकोनाशीतः एकोनाशीतितमः (त्रि०)

पू० अशीतिप० —अशीतः, अशीतितमः (त्रि०)।

पू० एकाशीतिप० —एकाशीतः, एकाशीतितमः (त्रि०)।

पू० द्व्यशीतिप० —द्व्यशीतः, द्व्यशीतितमः (त्रि०)।

पू० त्र्यशीतिप० —त्र्यशीतः, त्र्यशीतितमः (त्रि०)।

पू० चतुरशीतिप० —चतुरशीतः, चतुरशीतितमः (त्रि०)।

पू० पञ्चाशीतिप० —पञ्चाशीतः, पञ्चाशीतितमः (त्रि०)।

पू० षडशीतिप० —षडशीतिः, षडशीतितमः (त्रि०)।

पू० सप्ताशीतिप० —सप्ताशीतिः, सप्ताशीतितमः (त्रि०)।

पू० अष्टाशीतिप० —अष्टाशीतिः, अष्टाशीतितमः (त्रि०)।

पू० ऊननवतिप० —ऊननवतः, ऊननवतितमः, एकोननवतः, एकोननवतितमः (त्रि०)।

पू० नवतिप० —नवतः, नवतितमः (त्रि०)।

पू० एकनवतिप० —एकनवतः, एकनवतितमः (त्रि०)।

पू० द्विनवतिप० —द्वानवतः, द्वानवतितमः, द्विनवतिः, द्विनवतितमः (त्रि०)।

पू० त्रिनवतिप० —त्रयोनवतः, त्रयोनवतितमः, त्रिनवतिः त्रिनवतितमः (त्रि०)।

पू० चतुर्णवतिप० —चतुर्णवतः, चतुर्णवतितमः (त्रि०)।

पू० पञ्चनवतिप० —पञ्चनवतः, पञ्चनवतितमः (त्रि०)।

पू० षण्णवतिप० —षण्णवतः, षण्णवतितमः (त्रि०)।

पू० सप्तनवतिप० —सप्तनवतः, सप्तनवतितमः (त्रि०)।

पू० अष्टनवतिप० —अष्टनवतः, अष्टनवतितमः, अष्टानवतः, अष्टानवतितमः (त्रि०)।

पू० नवनवतिप० —ऊनशततमः एकोनशततमः, नवनवतः, नवनवतितमः (त्रि०)।

पू० शतप० —शततमः (त्रि०)। शतस्य पूरणे।

प्रकारार्थवाचकसंख्याशब्दाः—द्विधा, द्वेधा, द्वैधा, चैतेऽव्ययाः। द्वैविध्यम् (न०), (द्विप्रकारम्)।

त्रिधा, त्रेधा, त्रैधा, चैतेऽव्ययाः। त्रैविध्यम् (न०) (त्रिप्रकारम्)। चतुर्धा (अ०) (चतुःप्रकारम्)। पञ्चधा (अ०) (पञ्चप्रकारम्)। षट्धा, षोढा उभावव्ययौ (षट्प्रकारम्)। सप्तधा (अ०) (सप्तप्रकारम्), अष्टधा (अ०) (अष्टप्रकारम्), नवधा (अ०) नवप्रकारम् (एवमग्रे ऊहनीयाः)।

संख्यावाचशब्दानां क्वचिद्विशेषरूपाणि—सप्ताहः (पुं०) (सप्तदिवसाः) (सप्तदिनात्मकः कालः)। नवाहः (पुं०) (नवदिवसाः) (नवदिनात्मकः कालः)।

एकद्वौ (त्रि०) (एको वा द्वौ वा)। द्वित्राः ((त्रि०)। (द्वौ वा त्रयो वा) परिमाणं येषां तेषु बहुवचनान्तोऽयम्। त्रिचतुराः (त्रि०)। (त्रयो वा चत्वारो वा)। त्रिपञ्चाः (त्रि०) त्रयो वा पञ्च वा)।

चतुःपञ्चाः (त्रि०) (चत्वारो वा पञ्च वा)। पञ्चषाः (त्रि०) (पञ्च वा षड्वा) परिमाणं येषां तेषु बहुवचनान्तोऽयम् (पाँच या छः इति भाषा)।। षट्सप्ताः (त्रि०) (षट्वा सप्त वा)।

सप्ताष्टाः (त्रि०) (सप्त वा अष्ट वा)। एवमग्रे। द्विकृत्वः (अ.०) (द्विवारम्)।। त्रिकृतवः (अ०) (त्रिवारम्)। चतुःकृत्वः (अ०) (चतुर्वारम्), एवमग्रेऽपि।

[१]**सर्वपर्यायाः**—अखण्डः, अखिलः, अनूनः, अनूनकः, अन्यूनः, अशेषः, कृत्स्नः, निःशेषः, निखिलः, न्यक्षः, पूर्णः, विश्वः, सकलः, समः, समग्रः, समस्तः, सर्वश्चैते वाच्य—(त्रि०) लिङ्गाःस्युः।।

[२] **पादोनप०**—त्र्यंघ्र्यूनः, चरणोनः, त्रिचरणः, त्रिपदः त्रिपादः, त्र्यंघ्रिः, पदोनः, पादोनः, विचरणः, विपदः, विपादः, व्यंघ्रिश्चैते त्रिलिङ्गाः स्युः।

[३]**अर्धप०**—अर्धः (त्रि०), खण्डः (पुं०न०), खण्डलम् (न०), दलम् (न०) नेमः (पुं०), भित्तम् (न०), शकलम् (पुं०न०), शल्कम् (न०)।।

[४]**दलितप०**—अर्धितः, खण्डितः, दलितश्चैते त्रिलिङ्गाः।

[५]**सार्द्धप०**—सखण्डः, सखण्डलम्, सदलम्, सनेमः, सभित्तम्, सशकलम्, सार्द्धम्।

[६]**साद्रप०**—सचरणः, सपदः, सपादः, सांघ्रिः।

चतु[७]र्थांशप०—अंघ्रिः, अर्धार्धः, चतुर्थभागः, चतुर्थांशः, चरणः, तुरीयः तुरीयकः, पदः, पादः।

[८]**अंशप०**—अंशः, भागः, वण्टः, वण्टकः।

संख्यानाम्नां विषये विशेषसूचना

विविधग्रन्थेषु गुणाः, अग्नयश्च त्रयः। समुद्राश्चत्वारः। वायवः पञ्च। कालाः, रसाश्च षट्। द्वीपाः सप्त। विश्वेदेवा एकादश। भुवनानि चतुर्दश।। कलाः, नृपाश्च षोडश। मेघाः सप्तदश। धान्यानि अष्टादश। शेषसंख्याः समानाः।

अङ्कन्यासवाचकशब्दाः—अङ्कनिवेशनम्, अङ्कन्यासः, अङ्कस्थापनम्।

अङ्कन्यासविधिप०—अङ्कन्यासक्रमः, अङ्कन्यासनियमः, अङ्कन्यासविधिः।

अत्र गणितविदां सम्प्रदायागतपरिभाषा—

अङ्कानां वामतो गतिः।, इति।

अङ्कानां स्थापनं सव्य—(वाम) क्रमेण कर्त्तव्यमित्यर्थः।

अत्रोदाहरणं प्रदर्शयति—

आकाशपक्षक्षितिसम्मिताः समाः पूर्णायुरुक्तं मनुजस्य हस्तिनः। इतिग्रं०का०।

आकाशः शून्यम्, पक्षौ द्वौ, क्षितिः एका, चैतेषामङ्कानां सव्य-(वाम) क्रमेण स्थापनमित्थम् -१२०अर्थाद् विशत्युत्तरशतं समानां मनुजस्य नरस्य हस्तिनश्च पूर्णायुः परमायुरुक्तं कथितम्। एवं सर्वत्र बोध्यम्।

---

१. सब, सारा। २. तीन पाद, (पौन, पौणा), ३. आधा, दोपाद। ४. आधा किया हुआ। ५. अर्धयुक्त (ड्योढ़ा) एक ६. चतुर्थांश युक्त (सवैया) एक ७. चौथा भाग (पौवा)। ८. बाँट (हिस्सा)।

[१]**संङ्कलनवाचकशब्दाः**—संयोगः, संगूढः, मेलः, योगश्चैते पुंसि। युतिःस्त्रियाम्। ऐक्य मिलनम्, मिलितम्, मेलनम्, मेलितम्, योजनम्, योजितम्, संयोजनम्, संयोजितम्, सङ्कलन सङ्कलितं चैते क्लीबे, अन्वितः, आढ्यः, उपाहितः, प्रयुक्तः, प्रयुतः, प्रयोज्यः, युक्तः, यु युज्यः, युतः, योज्यः, संयुक्तः, संयुक्, संयुतः, संयोज्यः, समन्वितः, समाढ्यः, समेत सहितश्चैते त्रिषु।

[२]**योगफलप०**—योगफलम् (न०), सङ्कलितः, (त्रि०)

सङ्कलनप्रकारमाह भास्करः—

कार्यः क्रमादुत्क्रमतोऽथवाङ्कयोगो यथास्थानकमन्तरं वा।’ इति ली.व.।

[३]**व्यवकलनवाचकशब्दाः**—वियोगः (पु०), वियुतिः (स्त्री०), परिशोधनम्, परिशोधितम् वर्जनम्, वर्जितम्, वियोजनम्, वियोजितम्, विवर्जनम्, विवर्जितम्, विश्लेषितम्, विश्लेष्यम् व्यवकलनम्, व्यवकलितम्, संशोधनम्, संशोधितम् चैते क्लीबे। अपास्यः, ऊनः, ऊनितः न्यूनः, पतितः, परिशोधितः, परिशोध्यः, रहितः, वियुक्तः, वियुक्, वियुतः, वियोज्यः विरहितः, विवर्ज्यः, विशोधितः, विशोध्यः, विहीनः, शुद्धः, शोधितः, शोध्यः, संविहीनः, संशुद्धः, संशोध्य-श्चैते त्रिषु।

[४]**वियोगफलप०**—वियोगफलम् (न०), व्यकलितः (त्रि०)।

अत्र व्यवकलनप्रकारमाह भास्करः—

कार्यः क्रमादुत्क्रमतोऽथवाङ्कयोगो यथास्थानकमन्तरं वा।’ इति ली०व०।

[५]**गुणनवाचकशब्दाः**—घातः वधश्चैतौ पुंसि। निघ्नी, विनिघ्नी, हतिश्चैते स्त्रियाम्। गुणनम्, ताडनम्, ताडितम्, निहननम्, पिण्डनम्, विवर्द्धनम्, संगुणनम्, सन्ताडनम्, संवर्द्धनम्, हननं चैते क्लीबे। अभिहतः, अभ्यस्तः, आहतः, उपाहतः, क्षुण्णः, गुणः, गुणितः, गुण्यः, निहतः, पिण्डितः, पूरितः, प्रणिघ्नः, विगुणितः, विनिघ्नः, विनिहतः, विवर्द्धितः, संवर्द्धितः, संगुणितः, संताडितः, सुताडितः, सम्पिण्डितः हतश्चैते त्रिषु।

[६]**गुणनफलप०**—गुणनफलम् (न.), गुणितः (त्रि)।

अत्र गुणनप्रकारमाह भास्करः—

गुण्यान्त्यमङ्कं गुणकेन हन्यादुत्सारितेनैव पुनश्च राशिम् इति ली. व.।

[७]**भजनवाचकशब्दाः**—भागः, विभाग-श्चैतौ पुंसि। भजनम्, विभाजनम्, हरणं चैते क्लीबे। अपनीतः, अपहृतः, उद्धृतः, परिभाजितः, परिहृत्, परिहृतः, भक्तः, भाजितम्, विभक्तः, विभाजितः, विभाज्यः विहृत्, विहृतः, संविहृतः, समुद्धृतः, हार्य्यः, हृत्, हृतश्चैते त्रिषु।

[८]**भजनफलप०**—भजनफलम् (न०), विभाजितः (त्रि)।

---

१. जोड़ना २. जोड़, जोड़किया हुआ, ३. घटाना ४. अन्तर, घटाया हुआ ५. गुणना ६. गुणितसंख्या, गुणा हुआ। ७. भाग देना ८. मिला, मिला हुआ।

इह भजनप्रकारमाह भास्करः—

भाज्याद्धरः शुद्ध्यति यद्गुणः स्यादन्त्यात्फलं तत्खलु भागहारे।' इति ली. व.।

लब्धिवाचकशब्दाः—लाभः (पुं०)। अवाप्तिः, प्राप्तिः, लब्धिः, समवाप्तिश्चैते स्त्रियाम्। अवाप्तम्, प्रापणम्, फमम्, भजनफलम्, भागफलम्, लभनम्, चैते क्लीबे। आप्तः, प्राप्तः, लब्धश्चैते त्रिषु।

क्वचिद्भजनवाचकशब्दाः—अवाप्तः, आप्तः, आप्तिः, फलम्, लब्धम्, लब्धिश्चेत्यादयः शब्दाः क्वचिद्भजनार्थेऽपि प्रयुज्यन्ते।

उदाहरणानीह

अमरफलाधिमासयुक्तमिति। 'अब्धिषडङ्कलब्धैरूनाहैरिति।

'क्विभाब्जैरवाप्तांशयोग इति च ग्रहलाघवे।

शेषवाचकशब्दाः—अवशिष्टः, अवशेषः, अवशेषितः, उच्छिष्टः, उर्वरितः, परिशिष्टः, परिशेषः, परिशेषितः, शेषः शेषितश्चैते त्रिषु। एते क्वचिद् भजनार्थमपि प्रयुज्यन्ते।

निःशेषपर्यायाः—निःशेषः, निरवशिष्टम्, निरवशेषः, निरवशेषितश्चैते त्रिषु।

तष्टवाचकशब्दाः—कृशः, कृशारव्यकः, क्षयितः, तक्ष्यम्, तनु, तनूकृतम्, तष्टः, त्वष्टः, सूक्ष्मकृतश्चैते त्रिषु। सूक्ष्मीकरणम् (न०)।

अन्तरवाचकशब्दाः—अन्तरम् (न०), अन्तरितः (त्रि०), छिद्रम्, रन्ध्रम्, विलम्, विवरम् चैते क्लीबे।

* **योज्यादीनां नामानि**—१. योज्यः, (२) योजकः, (३) वियोज्यः (शोध्यः), (४) वियोजकः (शोधकः), (५) गुण्यः, (६) गुणकः, (७) भाज्यः, (८) भाजकश्चैते पुंल्लिङ्गाः।

* **सङ्कलनीयवाचकशब्दाः**[1]—परियोजनीयः, परियोजितव्यः, परियोज्यः, प्रयोजनीयः, प्रयोजितव्यः, प्रयोज्यः, योजनीयः, योजितव्यः, योज्यः, सङ्कलनीयः, सङ्कलितव्यः, सङ्कल्यः, संयोजनीयः, संयोजितव्यः, संयोज्यश्चैते त्रिषु।

* **वियोजनीयवाचकशब्दाः**[2]—पतनीयः, पतितव्यः, पात्यः, परिशोधनीयः, परिशोधितव्यः, परिशोध्यः, वियोजनीयः, वियोजितव्यः, वियोज्यः, विशोधनीयः, विशोधितव्यः, विशोध्यः, व्यवकलनीयः, व्यवकलितव्यः, व्यवकल्यः, शोधनीयः, शोधितव्यः, शोध्यः, संशोधनीयः, संशोधितव्यः, संशोध्यश्चैते त्रिषु।

---

* १. वह अंक जिसमें कोई अंक जोड़ा जाय २. वह अंक जो किसी अंक में जोड़ा जाय ३. वह अंक जिसमें से कोई अंक घटाया जाय। ४. वह अंक जो किसी अंक में घटाया जाय ५. वह अंक जो किसी अन्य अंक से गुणा किया जाय ६. वह अंक जिससे कोई अंक गुणा किया जाय ७. वह अंक जिसमें किसी अंक से भाग दिया जाय ८. वह अंक जिससे किसी अंक में भाग दिया जाय।

[1] जोड़ने योग्य अंक [2] घटाने योग्य अंक।

अन्तरितवाचकशब्दाः[१]—अन्तरितः, परिशोधितः, विशोधितः, शोधितः, संशोधिश्चैते

गुणनीयवाचकशब्दाः[२]—गुणनीयः, गुणितव्यः, गुण्यः, ताडनीयः, ताडितव्यः, ताड संगुणनीयः, संगुणितव्यः, संगुण्यः, संताडनीयः, संताडितव्यः, संताड्यः, हननीयः, हन्तव्

हन्यश्चैते त्रिषु।

भजनीयवाचकशब्दाः[३]—परिभजनीयः, परिभजितव्यः, परिभज्यः, परिभाजनी परिभाजितव्यः, परिभाज्यः, परिहरणीयः, परिहर्त्तव्यः, परिहार्यः, भजनीयः, भजितव्यः, भज्य भाजनीयः भाजितव्यः, भाज्यः, विभजनीयः, विभजितव्यः, विभज्यः, विभाजनीयः, विभाजितव्य विभाज्यः, हरणीयः, हर्तव्यः, हार्यश्चैते (त्रिषु)।

उत्सृष्ट[४](परित्यक्त) वाचकशब्दाः—उज्झितः, उत्सृष्टः, कृतत्यागः, त्यक्तः, धूत परित्यक्तः, परिवर्जितः, प्रोज्झितः, मुक्तः, वर्जितः, विधुतः, विधूतः विवर्जितः, विहीन समुज्झितः, हीनश्चैते त्रिषु।

त्यागप०[५]—छोरणम् (न०), त्यजनम् (न०), त्यागः (पु०), परित्यजनम् (न०) परित्यागः (पु०), परिवर्जनम् (न०), वर्जनम् (न०), विवर्जनम् (न०)।

त्याज्य[६]पर्यायाः—अपनेयः, त्यक्तव्यः, त्यजनीयः, त्यागयोग्यः, त्यागार्हः, त्याज्यः, परिवर्जनीयः, परिवर्जितव्यः, परिवर्ज्यः, वर्जनीयः, वर्जितव्यः, वर्ज्यः, विवर्जनीयः, विवर्जितव्यः, विवर्ज्यः, हातव्यः, हातुंयोग्यः, हेयश्चैते त्रिषु।

पृथक्प०[७]—पृथक् (अ०), पृथक् स्थापितम्, (त्रि०), अनष्टम् (त्रि०), अविनष्ट (त्रि०)।।

द्विष्ठप०[८]—द्विष्ठः (त्रि०), स्थानद्वये स्थापितम्।

त्रिष्ठप०[९]—त्रिष्ठः, (त्रि०), स्थानत्रये स्थापितम्।

आवृत्तिप[१०]—आवृत्तिः (त्रि०), गुणः (पुं०), यथा षड्गुणः।

प्राप्त[११]प०—आप्तः, आसादितः, प्राप्तः, भावितः, भूतः, लब्धः, विन्नश्चैते त्रिषु।।

प्राप्तव्य[१२]प०—प्रापणीयः, प्राप्तव्यः, प्राप्यः, लब्धव्यः, लभनीयः, लभ्यश्चैते त्रिषु।

परिगण्याव्ययपर्यायाः[१३]—गणयित्वा, परिगणय्य, सङ्गण्य्य, परिगण्य, सङ्गण्य, चैतेऽव्ययाः।

संयोज्याव्ययवाचकशब्दाः[१४]—एकीकृत्य, नियोज्य, मिलित्वा, मेलयित्वा, संयोज्य, समेत्य, सम्मिल्य, सम्मेल्य, चैतेऽव्ययाः।

---

१. घटाया हुआ,
२. गुणन, गुणा करने योग्य
३. विभाग करने योग्य, बाँटने योग्य
४. छोड़ा छोड़ा हुआ
५. छोड़ना
६. छोड़ने योग्य
७. अलग रखना, अलग रखा हुआ
८. दो स्थान में रखा हुआ
९. तीन स्थान में रखा हुआ
१०. गुना, छः गुना
११. पाया या मिला हुआ
१२. मिलने योग्य।
१३. गिनकर
१४. जोड़कर

वियोज्याव्ययवाचकशब्दाः[१]—अपनीय, अपास्य, परिशोध्य, शोधयित्वा, वियोज्य, विशोध्य, व्यवकल्य, संशोध्य, चैतेऽव्ययाः।

गुणयित्वाऽ व्ययवाचकशब्दाः[२]—अभिहत्य, गुणयित्वा, गुणित्वा, ताडयित्वा, निहत्य, प्रणिहत्य, विनिहत्य, संहत्य, सङ्गुणय्य, सन्ताड्य, सम्पिण्ड्य, हत्वा, चैतेऽव्ययाः।

हत्वाऽ व्ययवाचकशब्दाः[३]—छित्वा, परिहत्य, भंक्त्वा, भक्त्वा, भाजयित्वा, विभज्य, विभाज्य, विहत्य, संविभज्य, संविभाज्य, संविहत्य, हत्वा, चैतेऽव्ययाः।

त्यक्त्वाऽ व्ययवाचकशब्दाः[४]—अपनीय, अपहाय, त्यक्त्वा, परित्यज्य, परिहत्य, प्रोज्झ्य, वर्जयित्वा, विवर्ज्य, विहाय, सन्त्यज्य, हित्वा, चैतेऽव्ययाः।

सम्प्राप्याऽ व्ययवाचकशब्दाः[५]—अधिगम्य, प्रापय्य, प्राप्य, सम्प्राप्य, संलभ्य, चैतेऽव्ययाः।

कृत्वाऽ व्ययवाचकशब्दाः—कारयित्वा, कृत्वा, विधाय, संविधाय।

प्राप्तिप०[६]—आयः (पु०), लाभः (पुं०), आप्तिः (स्त्री०), उपलब्धिः (स्त्री०), प्राप्तिः (स्त्री०), लब्धिः (स्त्रि०), वित्तिः (स्त्रि०), फलम् (न०)।

व्ययप०[७]—अर्थवर्तनम् (न०), अर्थात्ययः, अर्थापगमः, अर्थापचयः, वित्तापगमः, वित्तात्ययः, वित्तापचयः, व्यय-श्चैते पुंल्लिङ्गाः।

धनप०—अक्षयम्, अनृणम्, धनम्, स्वम्।

ऋणप०—अधनम्, अस्वम् , ऋणम्, क्षयम्।

धनाधनपर्यायाः—धनक्षयम्, धनर्णम्, धनाधनम्, स्वर्णम्।

योगप०—ऋणर्णयुतिः, क्षयक्षययुतिः, धनधनयुतिः, धनर्णान्तरम्, स्वर्णान्तरम्, स्वस्वयुतिः।

तदुक्तं बीजगणिते—

योगे युतिः स्यात्क्षययोः स्वयोर्वा धनर्णयोरन्तरमेव योगः। इति।

खण्डगुणनप०—खण्डगुणनम् (न०), गुणनविशेषः।

अत्राहभास्करः—

गुण्ययस्त्वधोऽधो गुणखण्डतुल्यस्तैः खण्डकैः संगुणितो युतो वा।' इति लीलावत्याम्।

अपवर्तकप०[८]—अपवर्त्तकः (त्रि०)।

अपवर्त्तनप०[९]—अपवर्तनम् (न०)।

अपवर्त्यनप०[१०]—अपवर्त्त्यः (त्रि०)।

---

१. घटा कर, २. गुन कर ३. भाग देकर, ४. छोड़कर ५. पाकर, ६. मिलना, लाभ, आमदनी, ७. खरच, उठाव। ८. वह संख्या जिससे अन्य दो या अधिक संख्याओं को भाग देने पर शेष कुछ न रहे ९. बड़ी संख्याओं को संक्षेप करना, लाघव, उलटफेर, पलटावा १०. जिस संख्या को दूसरी किसी संख्या से भाग देने पर कुछ न बचे वह उस संख्या का 'अपवर्त्य' कहलाता है।

तदुक्तं भास्करेण—

'समेन केनाप्यपवर्त्य हारभाज्यौ भवेद्वा सति सम्भवे तु। इति ली०व।

अपवर्तितप०[1]—अपवर्तितः (त्रि०)।

तथा च भास्करः—

'मिथो हराभ्यामपवर्तिताभ्यां यद्वा हरांशौ सुधियात्र गुण्यौ। इ०ली०ब०।

सवर्णनप०[2]—सवर्णनम् (न०)।

तदुक्तं भास्करेण—

'लवा लवघ्नाश्च हरा हरघ्ना भागप्रभागेषु सवर्णनं स्यात्। इति ली०व०।

अंशप०[3]—अंशः (पुं०), लवः (पुं०), भाज्याङ्कः (पुं०)।

राशिप०[4]—राशिः (पुं०), पुञ्जः (पुं०), समूहः (पुं०)।

हरप०[5]—छिद्, छेदः (पुं०) छेदनम् (न०), भाजकः, विभाजकः, हरः, हारश्चैते पुंसि

समच्छेदप०[6]—समच्छिद्, समच्छित्तिः (स्त्री०), समच्छेदः (पुं०), छेदसाम्यम् (न०)।

उक्तं च भास्करेण—

अन्योन्यहाराभिहतौ हरांशौ राश्योः समच्छेदविधानमेवम्।
मिथो हराभ्यामपवर्तिताभ्यां यद्वा हरांशौ सुधियात्र गुण्यौ।' इति लीलावत्याम्।

शम्भुहोराप्रकाशेऽपि—

'निघ्नावन्योन्यश्च हारैर्हरांशावेवं राश्योश्छेदसाम्यं भवेद्वा।
सच्छिष्याणां सम्यगेवं मयात्र बोधायैतत्प्रोक्तमन्ततर्दशासु।। इति पुञ्जिराजः।

वर्गपर्यायाः—कृतिः (स्त्री०), वर्गः (पु०), समद्विघातः (पुं०), (सदृशद्विराशिघातो वा स्वगुणोऽङ्को वर्ग इत्यर्थः)।

वर्गानयनविधिं प्राह भास्करः—

'समद्विघातः कृतिरुच्यतेऽथ स्थाप्योऽन्त्यवर्गो द्विगुणान्त्यनिघ्नाः।
स्वस्वोरिष्टाच्च तथापरेऽङ्कास्त्यक्त्वाऽन्त्यमुत्सार्य पुनश्च राशिम्।। इ०ली०व०।

वर्गसंख्यायामुपरि विषम (।) सम (-) रेखास्थानप्रकार उक्तो ग्रन्थान्तरे—

अन्त्यं यावदिहेच्छाङ्कादूर्ध्व (।) तिर्यक्स्थ (-) रेखया। संज्ञः स्थानाङ्ककानां च विषमाख्यं समं क्रमात्।।' इति।

- । - ।
यथा न्यासः—२ ५ ७ ८

वर्गमूलपर्यायाः—पद्म, मूलम्, वर्गमूलं चैते क्लीबे।

वर्गमूलानयनप्रकारं प्राह भास्करः—

'त्यक्त्वाऽन्त्याद्विषमात्कृतिं द्विगुणयेन् मूलं समे तद्धृते,

---

१. पलटी हुई या बदली हुई संख्या। २. अंशों से अंशों को गुणना एवं हरों से हरों को गुणना उसे 'सवर्णन' कहते हैं। ३. भिन्न की लकीर के ऊपर की संख्या या राशि। ४. भिन्न की लकीर के ऊपर तथा नीचे की संख्या, ५. भिन्न की लकीर के नीचे की संख्या। ६. भिन्न की लकीर के नीचे की गुणी हुई समान संख्या।

त्यक्त्वा लब्धकृतिं तदाद्यविषमात् लब्धं द्विनिघ्नं न्यसेत्।
पंक्त्यां पंक्तिहते समेऽन्त्यविषमात् त्यक्त्वाऽऽप्तवर्गं फलं,
पंक्त्यां तद्द्विगुणं न्यसेदिति मुहु:पंक्तेर्दलं स्यात्पदम्।। इति ली.व.।

आर्य्यभट्टीयेऽपि—

भागं हरेदवर्गान्नित्यं द्विगुणेन वर्गमूलेन।
वर्गाद्वर्गे शुद्धे लब्धं स्थानान्तरे मूलम्।। इति आ. भ.।

घनपर्यायाः—घनः (पुं०न०), वृन्दम् (त्रि०)। समत्रिघातः (पुं०), समत्रिराशिहतिः, वर्गो वर्गमूलाहतो वा।

तदानयनप्रकारं प्राह भास्करः—

समत्रिघातश्च घनः प्रदिष्टः स्थाप्यो घनोऽन्त्यस्य ततोऽन्त्यवर्गः।
आदित्रिनिघ्नस्तत आदिवर्गस्त्र्यन्त्याहतोऽथादिघनश्च सर्वे।।
स्थानान्तरत्वेन युता घनःस्यात् प्रकल्प्य तत्खण्डयुगं ततोऽन्त्यम्।
एवं मुहुर्वर्गघनप्रसिद्धावाद्यङ्कतो वा विधिरेष कार्यः।।

घनमूलप०—घनमूलम् (न०)

तदानयनप्रकारं प्राह भास्करः—

आद्यं घनस्थानमथाघने द्वे पुनस्तथान्त्याद् घनतो विशोध्य।
घनं पृथक्स्थं पदमस्य कृत्या त्रिघ्न्यां तदाऽऽद्यं विभजेत्फलं तु।।
पक्त्यां न्यसेत्तत्कृतिमन्त्यनिघ्नीम् त्रिघ्नीं त्यजेत्तत्प्रथमात्फलस्य।
घनं तदाद्याद् घनमूलमेवं पङ्क्तिर्भवेदेवमतः पुनश्च।।

त्रैराशिकपर्यायाः—अनुपातः (पुं०), अनुपातकम् (न०), त्रैराशिकम् (न०)।

त्रैराशिकगणितविधिमाह भास्करः—

'प्रमाणमिच्छा च समानजाती आद्यन्तयोः स्तः फलमन्यजातिः।
मध्ये तदिच्छाहतमाद्यहृत्स्यात् इच्छाफलं व्यस्तविधिर्विलोमे।। (इति ली.व.।)
'प्रमाणम् फलम्, इच्छा चेत्येतत् त्रैराशिकम्।

पराशरहोरायामपि—

प्रमाणमिच्छा तुल्यं च स्थाप्यमाद्यन्तयोर्द्वयोः।
मध्ये फलेऽन्यजाती च सङ्गुणेदिच्छया द्विजः।।
प्रमाणा संस्फुटफलं तदाख्यमनुपातकम्।' इति

अनुपातं पुंस्याह वराहः—

'नीचेऽतोऽर्द्धं ह्रसति ततश्चान्तरस्थेऽनुपातः' इति बृ०जा०।

(१) त्रैराशिकम्, (२) व्यस्तत्रैराशिकम्, चैतौ त्रैराशिकस्य द्वौ भेदौ स्याताम्।

तल्लक्षणादिकं आह भास्करः—

'इच्छा वृद्धौ फले ह्रयसौ ह्रासे वृद्धिः फलस्य तु।
व्यस्तं त्रैराशिकं तत्र ज्ञेयं गणितकोविदैः।।
जीवानां वयसो मौल्ये तौल्ये वर्णस्य हेमनि।
भागहारे च राशीनां व्यस्तं त्रैराशिकं भवेत्।। (इति ली. व.।)

(१) पञ्चराशिकम्, (२) सप्तराशिकम्, (३) नवराशिकम्। एवमग्रेऽपि। इह पञ्चराशिकादौ करणसूत्रमाह भास्करः—

पञ्चसप्तनवराशिकादिके अन्योन्यपक्षनयनं फलमिच्छदाम्।।
संविधाय बहुराशिजे वधे स्वल्पराशिवधभाजिते फलम्।। इति ली. व.।

गणितशुद्धिपर्यायः—गणितशुद्धिः (स्त्री०)।

तत्प्रकारमाह बीजदत्तः—

गुण्ये गुणे नवहते परिशेषघाते नन्दैर्हते भवति यः परिशेषराशिः।
घातेन गुण्यगुणयोर्नवशेषितेन साम्येन तस्य निगदेद्गणितस्य शुद्धिम्।। इति ग्रन्थान्तरे।

पाटीगणितेऽपि—

'हाराप्त्या नवशेषस्तद्यत्तेनाढ्यशेषनवशेषः।
भाज्याङ्को नवशेषस्तुल्यः स्यात्तदा शुद्धः।।' इति।

।। इति बिहारप्रान्तसहरसामण्डलान्तर्गतदोरमाग्रामवास्तव्येन दैवज्ञचूडामणिश्रीसूर्यनारायणसूनुना डॉ० सुरकान्तझाख्येन ज्योतिर्विज्ञानशब्दकोषे गणनासर्गः सप्तमः ।।७।।

अथ ग्रहगणितसर्गः–८

ग्रहपर्यायाः—खगः, खचरः, ग्रहः, नभश्चरः शेषपर्यायास्तु ग्रहवर्गे द्रष्टव्यः।

ग्रहभेदाः—(१) प्रकाशकग्रहौ, (२) ताराग्रहाः, (३) तमः स्वरूपग्रहौ। इति ग्रहाणां त्रयो भेदाःस्युः।

प्रकाशकग्रहनामनी—सूर्यः, चन्द्रः।

ताराग्रहनामानि—भौमः, बुधः, गुरुः, शुक्रः, शनिः।

तमः स्वरूपग्रहनामनी—राहुः, केतुः।

ग्रहगणितपर्यायाः[१]—खचरगणितम्, ग्रहगणितम्, द्युचरगणितम्।

---

[१] भारते ग्रहगणितस्य त्रयोभेदाः।

१. सिद्धान्तः, २. तंत्रम्, ३. करणम्, चेति त्रयोभेदाः स्युः। सिद्धान्तस्यापि त्रयः पक्षाः।

१. सूर्यसिद्धांतः, २. आर्यसिद्धान्तः, ३. ब्रह्मसिद्धांतश्चेति त्रयः पक्षाः। इह सिद्धांते सृष्ट्यादितोऽहर्गणानयनमुक्तम्। तंत्रे युगादितस्तत्। करणे तु शकादितस्तदानयनं ज्ञेयम्। सृष्ट्याद्यहर्गणभवग्रह उदयान्तरसंस्कारेण संस्कृतः कार्यस्तदा लङ्का (रेखास्थनगर) मध्यमार्कोदयकालिकमध्यमग्रहः स्यात्।

तदुक्तं भास्करेण—

'दशशिरः पुरिमध्यमभास्करे क्षितिजसन्निधिगे सति मध्यमः।' इति सि०शि०।

अस्मिन् ग्रहे चरसंस्कारो देयस्तदा रेखार्कोदयकालीनमध्यमग्रहः स्यात्। यद्यभीष्टो ग्रामो रेखाया (भूमध्यरेखायाः) बहिःस्थितस्तदा रेखान्तरसंस्कारः प्रोक्तः। स च यथाहं—

'रेखा स्वदेशांतरयोजनघ्नी गतिर्ग्रहस्याभ्रगजैर्विभक्ताः। लब्धं विलिप्ताः खचरे विधेयाः प्राच्यामृणं पश्चिमतो धनं ताः, इति करणकुतूहले।

अनेन संस्कारेण स्वाभीष्टग्रामे मध्यमार्कोदयकालिको मध्यमग्रहः स्यात्। अथवा स्वदेशीयमध्यमग्रहः स्यात्। एवं तंत्रसोऽपि मध्यमग्रहानयनं ज्ञेयमिति।

स्पष्टग्रहसाधनाय विकलादिभेदाः—(१) विकला, (२) कला, (३) अंशः, (४)राशिः, (५)भगणार्द्धम्, (६) चक्रम्, (७) भगणांशः। इति विकलादयः सप्तभेदाः।

विकलापर्यायाः—विकला, विकलिका, विलिप्ता, विलिप्तिका, कलाषष्टिभागैकभागः, विकलाचिह्नम् (″)।

कलाप०—कला, कलिका, लिप्ता, लिप्तिका, षष्टिविकलोन्मिता, अंशषष्टिभागैकभागः, कलाचिह्नम् (′)।

अंशप०—अंशः, अंशकः, भागः, भागकः, लवः, लवकः, षष्टिकलोन्मिताः, राशित्रिंशद्भागैकभागः। अंशचिह्नम् (°)।

राशिप०—अपमण्डलार्कांशं, भम्, राशिः, शेषपर्याया राशिपर्याये द्रष्टव्याः।

भगणार्द्धप०—चक्रदलम्, चक्रार्द्धम्, भगणार्द्धम्, भदलम्, भार्द्धम्, भषट्कम्, राशिदलम्, राशिषट्कम्, राश्यर्द्धम्।

भगणप०—चक्रम्, पर्ययगणः, भगणः, भचक्रम्, भसंघः, राशिगणः, राशिचयः, राशिसमूहः, षष्ट्युत्तरशतत्रयभागाः।

भगणांशप०—भगणलवाः, भगणभागाः, भगणांशकाः, भगणांशाः, राशिगणभागाः, राशिगणलवाः, राशिगणांशकाः, राशिगणांशाः।

भचक्रकलाप०—भचक्रकला, भचक्रकलिका, भचक्रलिप्त, भचक्रलिप्तिका।

विकलागणप०—विकलागणः, विलिप्तागणः, विमौरिकगणः।

[1]**समूहप०**—आकरः, उत्करः, ओघः, कदम्बकम्, कलापः, काण्डम्, कूटम्, गणः, चक्रम्, चक्रवालः, चयः, जटा, जातम्, जालम्, जालकम् , निकरः, निकुरम्बम्, निचयः, निवहः, पटलम्, पटली, पिण्डः, पुञ्जः, पुञ्जकः, पुञ्जी, पूगः, पेटकम्, प्रकरः, प्रचयः, मण्डलम्, राशिः, राशी, वारः, विसरः, वृन्दम्, व्यूहः, व्रजः, व्रातः, संहतिः, संघः, संघातः, सञ्चयः, सन्दोहः, समवायः, समुदयः, समुदायः, समूहः, स्कन्धः, स्तोमः।

[2]**वर्षगणप०**—अब्दगणः, वर्षगणः, शकगणः, शरद्गणः, संवत्सरगणः।

चक्रप०—गणः, चक्रम्, व्रजः कतिवर्षावध्यात्मकः कालः।

मासगणप०—मागणः, मासगणः, माश्चयः, मासचयः, मासनिचयः, मासपिण्डः, मासव्रजः, माससंघः, माससञ्चयः, मासौघः।

अवमदिनपर्यायाः—अवमः, अवमतिथिः, अवमदिनम्, ऊनदिनम्, ऊनाहः, क्षयाहः, तिथिक्षयः, तिथिप्रणाशः, तिथ्यन्तस्पृष्टैकदिनवारः, न्यूनाहः, हीनः ।

अहर्गणप०—अहःसंघः, अह्नांचयः, अह्नांनिचयः, अहर्गणः, गणः, घस्रसंघः, घस्रौघः,

---

१. इहास्य पर्याया यौगिकशब्दसिद्ध्यर्थं प्रोक्ताः।

२. करणारम्भकालीनशकवर्षेण रहितोऽभीष्टशकाब्दो जातो वर्षगण इति।

दिनगणः, दिनचयः, दिननिचयः, दिवृन्दम्, दिनव्रजः, दिनसंघः, दिनसञ्चयः, दिनौघः, दिवसगणः, दिवसनिकरः, दिवसव्रजः, दिवसव्रातः, दिवागणः, दिवाचयः, दिवाव्रजः, द्युचयः, द्युपिण्डः, द्युराशिः, द्युवृन्दम्, द्युव्रजः, द्युगणः, वासरनिवहः, वासरवृन्दम्, वासरसञ्चयः, वासरौघः।

अहर्गणभेदौ—(१) औदयिकदिनगणः, (२) सावयवदिनगणः।

औदयिकदिनगणपर्यायाः—औदयिकदिनगणः, निरवयवदिनगणः, प्रातःकालीनदिनगणः।

सावयवदिनगणप०—साभीष्टकालिकदिनगणः, सावयवदिनगणः, सेष्टकालीनदिनगणः।

अहर्गणजखगप०—अहर्गणजखगः, दिनगणभवखेटः, द्युगणोद्भवग्रहः, वासरौघभवखचरः।

क्षेपक[1]प०—क्षेपः, क्षेपकः।

ध्रुवक[2]प०—ध्रुवः, ध्रुवकः।

चक्रघ्नध्रूव[3]प०—चक्रगुणितध्रुवः, चक्रघ्नध्रुवः, चक्रनिघ्नध्रुवः, चक्रहतध्रुवकः।

संस्कारप०—भावना, वासना, संस्कारः।

संस्कारभेदाः—(१) उदयान्तरम्, (२) रेखान्तरम्, (३) चरान्तरम्, (४) भुजान्तरम्, (५) बीजान्तरम्, (६) आकर्षणम्। चैते षट्संस्कारा: स्युः।

देशान्तरसंस्कारभेदौ—(१) प्रागपरम् (रेखान्तरम्), (२) याम्योत्तरम् (चरान्तरम्), चैतौ द्वौ संस्कारौ स्याताम्।

योजन[4]पर्यायाः—क्रोशचतुष्टयम्, चतुष्क्रोशम्, चतुष्क्रोशी, योजनम्।

भूप०—भूः, भूमिः, शेषपर्यायास्तु भौमपर्यायेषु द्रष्टव्याः।

परिधिप०—कक्षा, परिधिः, मण्डलम्, वृत्तम्, वृत्ताकारपथः।

१, २. करणग्रन्थेऽत्राचार्यैर्मध्यमग्रहानयनार्थद्वे संज्ञे कल्पिते 'क्षेपको' ध्रुवकश्चेति। क्षेपको नाम करणारम्भकाले लङ्कामध्यमार्कोदये यो मध्यमग्रहः स ग्रहस्य क्षेपकः। एकचक्रदिनगणभवमध्यमग्रहः परमदिनगणभवमध्यमग्रहो वा 'ध्रुवक' इति ज्ञेयः।

३. सोऽभीष्टचक्रेण गुणितो जातश्चक्रनिघ्नध्रुवकः। स्वक्षेपकः, चक्रनिघ्नध्रुवकः, 'दिनगणभवग्रहश्चैषां त्रयाणां योगसमा उज्जयिनीरेखायां मध्यमार्कोदयसमये मध्यमभौमबुधशुक्रा भवेयुः।

गुरुशन्योरतिदूरस्थत्वात्तयोराकर्षणसंस्कारोऽपि विधेयः॥

रवौ तु देशांतरसंस्कारः कर्त्तव्यः।

***चन्द्रेविशेषः**—पूर्वपरामृष्टग्रहगणवच्चन्द्रोऽप्युक्तप्रकारानीतो लङ्कायां मध्यमार्कोदयकालीनो मध्यम एव ज्ञेयः।*

स च रेखान्तर-चरान्तर-बीजो दयान्तरभुजान्तराणि एभिः संस्कृतः प्रातःकाले औदयिको मध्यमचन्द्रः स्यात्।

राहुचन्द्रोच्चयोरपि बीजसंस्कारो देयः। ग्रहलाघवे त चक्रनिघ्नध्रुवक ऋणमस्ति। तेन तत्राप्यस्वं कार्यम् । शेषक्रिया प्राग्वज्ज्ञेया।

४. योजनज्ञानं मानवर्गे द्रष्टव्यम्।

भूपरिधिप[1]०—कुपरिधिः, भूकक्षा, भूपरिधिः, भूभगोलः, भूमण्डलम्, भूमिकक्षा, भूमिगोलपरिधिः, भूवृत्तम्, भूवेष्टनम्, महीमण्डलम्, महीवृत्तम्।

भूव्यासप०—कुविस्तृतिः, भूकर्णः, भूविस्तृतिः, भूव्यासः, महीव्यासः, मेदिनीविस्तृतिः।

भूव्यासार्द्धप०—कुविस्तृतिदलम्, भूवेष्टनार्द्धम्, भूव्यासार्द्धम्।

रेखाप०—रेखा, रेषा।

रेखायोजनप०—रेखाचतुष्क्रोशम्, रेखाचतुष्क्रोशी, रेखायोजनम्।

रेखांशप०—रेखाभागाः, रेखालवाः, रेखांशकाः, रेखाशाः।

भूमध्यरेखाप०—कुमध्यरेखा, भूमध्यरेखा, भूमिमध्यरेखा, महीमध्यरेखा, मेदिनीमध्यरेखा।

रेखाभूमिप०—रेखाकुः, रेखाभूः, रेखाभूमिः, भूमध्यरेखापुरम्, भूमध्यरेखानगरम्, लंकासुमेर्वार्मध्यसूत्रगतदेशः, वारप्रवृत्तिस्थलम्।

भूमध्यस्थरेखापुरनामानि—लंका[2], देवकन्या, काञ्ची। कल्लिकोटम्[3], मड्केरिपुरम्,[4], चिकमङ्गलूरम[5], हरिहरम्[6], वागलकोटम्[7], माहिष्मती[8] च, [9]सह्यकुलाचलः, सोलापुरं[10]च, [11]असायिपुरम्, बिड[12] च, [13]भुसावलम्, [14]उज्जयिनी, [15]कोटपुरम् (कोटा), [16]टोंकम्, [17]जयपुरम्, [18]रोहितकम्, [19]जालन्दरम्, [20]स्थानेश्वरम्, [21]कुरुक्षेत्रं च, [22]हिमालयः, [23]सुमेरुः।

---

१. भूपरिधिव्यासावाह भास्करः—

'प्रोक्तो योजनसंख्यया कुपरिधिः सप्ताङ्गनन्दाब्धयः
४९६७ तद्व्यासः कुभुजाङ्गसायकभुवः १५८१ इति सि०शि०।

२. कुमध्ये वर्त्तते। ३. मल्ल्यालदेशे समुद्रतीरस्थम्। ४. कुर्गप्रान्ते (५,६,७,८) घटप्रभा तीरवर्तिमैसूरराज्ये कर्नाटदेशे। (९,१०) (महाराष्ट्रदेशे) विदर्भापरपर्यायवह्राडदेशादपि निकट एव वरीवर्ति। गोदावर्य्यां नातिदूरप्रदेशे। ११,१२ निजामराज्यमध्ये। इमे भारतवर्षदक्षिणभागे। (१३) खानदेशे, (१४) मालवप्रान्ते। मध्यभागे। १५, १६, १७ राजपुतानाराज्ये (१८,१८,२०,२१) पञ्चनद (पंजाब) प्रान्ते। (२२,२३) इमे भारतवर्षोतरदिग्भागे।

इह तु सिद्धान्तशेखरे विशेषः—

लङ्का कुमारी नगरी च काञ्ची पानाटमद्रिश्च सितः षडास्यः।
श्रीवंत्सगुल्मं च पुरी ततश्च माहिष्मती चोज्जयिनी प्रसिद्धा।।
स्यादाश्रमोऽस्मान्नगरं सुरम्यं ततः पुरं पट्टशिवाभिधानम्।
श्रीगर्गराटं च सरोहितार्क्षस्थानेश्वरं शीतगिरिः सुमेरुः।।
इतीव याम्योत्तरगां धराया रेखामिमां गोलविदो वदन्ति।
अन्यानि रेखास्थितिभानि लोके ज्ञेयानि तज्ज्ञैः पुटभेदनानि।। इति।

लङ्कापर्यायाः—दशशिरःपुरी, रक्षसांपुरी, राक्षसालयः, रावणराजधानी, लंका।

देवकन्याप०—कन्या, कन्याकुमारी, कुमारी, देवकन्या, देवसुतापुरी।

काञ्चीभेदौ—(१) शिवकाञ्ची, (२) विष्णुकाञ्ची।

माहिष्मतीपर्यायाः—चैद्यपुरी, माहिष्मती, शिशुपालनगरी।

सह्यकुलाचलप०—सह्यकुलपर्वतः, सह्यकुलाचलः, सह्यकुलाद्रिः।

उज्जयिनीप०—अवन्तिका, अवन्ती, उज्जयनी, उज्जयिनी, विशाला।

कुरुक्षेत्रप०—कुरुक्षेत्रम्।

हिमालयःप०—पार्वतीगुरुः, शीतगिरिः, हिमाचलः, हिमाद्रिः, हिमालयः।

मेरुप०—देवौकः, मेरुः, सुमेरुः, सुरालयः। शेषं तु देववर्गे।

मध्यमग्रहप०—अस्पष्टग्रहः, अस्फुटखगः मध्यनभश्चरः, मध्यमग्रहः, मध्यमद्युचरः।

मध्यमग्रहभेदाः—(१) तात्कालिकमध्यमग्रहः, (२) स्वपुरौदयिकमध्यमग्रहः, (३) लंकामध्यमार्कोदयकालिकमध्यमग्रहः।

गतिपर्यायाः—इतिः, गतिः जवः, भुक्तिः।

मध्यमगतिप०[1]—मध्यगतिः, मध्यभुक्तिः, मध्यमगतिः, मध्यमजवः, मध्यमभुक्तिः, मध्यमेतिः।

ग्रहतनुप०[2]—ग्रहतनुः, ग्रहदेहः, ग्रहवपुः, ग्रहशरीरम्।

तात्कालिकमध्यमग्रहप०—इष्टकालीनमध्यमग्रहः, तात्कालिकमध्यमग्रहः, सावयवदिनगणभवमध्यमग्रहः।

स्वपुरौदयिकमध्यमग्रहप०—औदयिकमध्यमग्रहः, प्रातःकालीनमध्यमग्रहः, स्वपुरौदयिकमध्यमग्रहः।

लङ्कामध्यमार्कोदयकालिकमध्यमग्रहप०—रेखास्थनगरमध्यमार्कोदयकालीनमध्यमग्रहः, लङ्कामध्यमार्कोदयकालिकमध्यमग्रहः।

---

(१) रव्यादीनां मध्यमगतयः कलादिकाः।

सू०	चं०	मं०	बु०	गु०	शु०	श०	रा०	चं०	उ०	ग्रहाः
५९	७९०	३१	५९	५	५९	२	२	३	६	कलाः
८	३५	२६	८	०	८	०	११	४१		विकलाः

ग्रहलाघवीयबुधकेन्द्रगतिः १८६/२४, शुक्रकेन्द्रगतिः ३७/०
केतकीयबुधकेन्द्रगतिः २४५/३२, शुक्रकेन्द्रगतिः ९६/८

(२) महाभास्करीये—ग्रहतनुसाधनं यथा—षष्ट्युत्तरशतत्रयनिघ्नो वर्षगणो ग्रहतनुः (देहः) स्यात्। तेन समेता विहगा ध्रुवका उक्ताः।

मन्दपर्यायाः—मन्दम्, मृदुः।

शीघ्रप०—अरम्, अविलम्बितम्, आशु, क्षिप्रम्, चञ्चलम्, चपलम्, चलम्, तूर्णम्, त्वरितम्, द्रुतम्, लघु, शीध्रम्, सत्वरम्।

शीघ्रवाचकाव्ययशब्दाः—अञ्जसा, अरम्, अह्नाय, आशु, झटिति, द्राक्, मंक्षु, सपदि, स्राक्।

वेगपर्यायाः—जवः, तरः (अस्) (न०), प्रसरः, रयः, रंहः (अस्) (न०), वाजः, वेगः, स्यदः।

उच्चपर्यायाः—उच्चम्, उच्छ्रितम्, उदग्रम्, उद्धुरम्, उन्नतम्, तुङ्गम्, प्रांशु।

केन्द्रम्[१] =-केन्द्रम्, ग्रहोच्चान्तरम्, वृत्तमध्यम्।

तदुक्तम् :—

वृत्तस्य मध्यं किल केन्द्रमुक्तं केन्द्रं ग्रहोच्चान्तरमुच्यतेऽतः।

यतोऽन्तरे तावति तुङ्गदेशान्नीचोच्चवृत्तस्य सदैव केन्द्रम्॥, इति सिद्धान्तशिरोमणौ।

केन्द्रांशप०—केन्द्रभागः केन्द्रलवः, केन्द्रांशः, केन्द्रांशकः।

केन्द्रभेदौ—(१) मन्दकेन्द्रम्, (२) शीघ्रकेन्द्रम्, चैतौ केन्द्रस्य द्वौ भेदौ स्याताम्।

केन्द्रान्यभेदाः—(१) आकर्षणकेन्द्रम्, (२) च्युतिकेन्द्रम्, (३) तिथिकेन्द्रम्, चैते केन्द्रस्यान्ये भेदाः स्युः।

[२]**मन्दकेन्द्रपर्यायौ**—मन्दकेन्द्रम्, मृदुकेन्द्रम्।

शीघ्रकेन्द्र[३]**पर्यायाः**—आशुकेन्द्रम्, ग्रहोनचलोच्चम्, चञ्चलकेन्द्रम्, चलकेन्द्रम्, तूर्णकिन्द्रम्, द्रुतकेन्द्रम्, द्राक्केन्द्रम्, द्वाक्केन्द्रकम्, शीघ्रकेन्द्रम्।

उच्चभेदौ—(१) मन्दोच्चम् (२) शीघ्रोच्चम्, चैतो द्वौ उच्चंभेदौ स्याताम्।

[४-५]**मन्दोच्चपर्यायाः**—मन्दतुङ्गम्, मन्दोच्चम्, मृदुतुङ्गम्, मृदूच्चम्।

---

(१) ग्रहोच्चान्तरम्, गोलमध्यस्थानम्, वृत्तमध्यम्, वृत्तक्षेत्रमध्यस्थलं वा।

(२) सिद्धांतशिरोमणौ केतकीग्रहणिते च मन्दोच्चोनग्रहो मन्दकेन्द्रं भवति।
सूर्यसिद्धांते ग्रहलाघवे च ग्रहोनमन्दोच्चं मन्दकेन्द्रं भवति।

(३) केतकीग्रहगणिते मन्दस्फुटार्कोनमन्दस्पष्टग्रहः शीघ्रकेन्द्रं भवति। सूर्यसिद्धांते सिद्धांतशिरोमणौ च ग्रहोनशीघ्रोच्चं शीघ्रकेन्द्रं भवति। ग्रहलाघवे तु मध्यमभौमार्कीज्यविहीनमध्यमार्कस्तेषां शीघ्रकेन्द्रं भवति।

(४) केतकीयग्रहगणिते ग्रहाणां राश्यादयो मन्दोच्चाः।

ग्र०	रविः	भौमः	बुधः	गुरः	शुक्रः	शनिः
रा०	२	४	७	५	९	८
अं०	१८	११	२३	२०	१७	८
क०	४१	४१	२६	१३	४०	२७
वि०	०	०	०	०	०	०

(शेष पृष्ठ १०२ पर देखें)

शीघ्रोच्चप०—आशुतुङ्गम्, आशूच्चम्, चलतुङ्गम्, चलोच्चम्, द्राक्तुङ्गम्, द्रागुच्चम्, शीघ्रतुङ्गम्, शीघ्रोच्चम्।

पदप०—पदम्, स्थानम्, राशित्रयात्मकम्।

पदभेदौ—(१) विषमपादम्, समपदम्, चैतौ द्वौ पदभेदौ स्याताम्।

विषमपदवाचकशब्दाः—अयुक् (ज्), अयुग्मम्, असमम्, असमानम्, ओजः, विषमम्, विषमसंख्या।

तदुक्तम्—

'ओजेनौजः समः पादे' इति भरतादयः, इति श०र्चि०१/४४२।

समपदवाचकशब्दाः—अनोजः, नौजः, युक् (ज्), युग्मम्, समानम्।

त्रिभपर्यायाः—त्रिभम्, भत्रयम् भत्रयसमुदायः, राशित्रयम्, राशित्रयसमुदायः।

भुजप०—दोः (स्) (पुं०न०), प्रविष्टः, बाहुः (पुं०स्त्री०), भुजः (पुं०स्त्री०) वाह (स्त्री०)।

भुजभेदाः—(१) त्रिभाल्यकेन्द्रम्, (२) त्रिभाधिकषड्भोंनकेन्द्रम्, (३) षड्भाधिकषड्भोनकेन्द्रम्, (४) नवभाधिकभचक्रच्युतकेन्द्रम् चेत्येते भुजस्य चत्वारो भेदाः स्युः।

भुजांशपर्यायाः—भुजभागः, भुजलवः, भुजांशः, भुजांशकः।

स्वभा = कर्णः, श्रुतिः, श्रवणम्।

कर्णप०—ध्वनिग्रहः, पैङ्गूषः (पुं०न०), महानादः, वचोग्रहः, शब्दग्रहः, शब्दाधिष्ठानम्, श्रवणम्, श्रवः (स्) (न०), श्रुतिः (स्त्री०), श्रोत्रम् (पुं०न०)।

कर्णभेदौ—(१) मन्दकर्णः, (२) शीघ्रकर्णश्चैतौ द्वौ कर्णस्य भेदौ स्याताम्।

(पृष्ठ १०१ का शेषांश)—

बुधशुक्रयोस्तु। मध्यमाधिकारोक्तविधिना तयोः शीघ्रकेन्द्रे साधनीये। भौमार्कीज्यानां मध्यमरविरेव शीघ्रोच्चम् स्यात्। ज्ञसितयोस्तु पूर्वागते शीघ्रकेन्द्रे मध्यमरविणा सहिते तयोः शीघ्रोच्चे स्याताम्। 'तदुक्तम्'—मध्यमार्कसहितं चलकेन्द्रं स्याद्बुधस्य' सितस्य च चलोच्चम्। मेदिनीतनयजीवशनीनां मध्यमार्क उदितं तु चलोच्चम्॥' इति ग्रन्थांतरे।

(५) ग्रहलाघवीयग्रहगणिते ग्रहाणां मन्दोच्चराशयः।

ग्र०	रविः	भौमः	बुधः	गुरुः	शुक्रः	शनिः
रा०	२	४	७	६	३	८
अं०	१८	०	०	०	०	०

(१) अयुग्मे पदे यातं भुजः स्यात्। युग्मे तु एष्यं भुजः स्यात्। ग्रहलाघवे तु कथितम्—दोस्त्रिभोनं त्रिभोर्ध्वं विशेष्यं रसैश्चक्रतोऽङ्काधिकं स्यादिति।

[१]मन्दकर्णप०—मन्दकर्णः, मन्दश्रुतिः, मृदुकर्णः, मृदुश्रुतिः, मृदुश्रवः (अस्) (न०)।

मध्यममन्दकर्णप०—मध्यममन्दकर्णः मध्यममृदुकर्णः।

स्पष्टमन्दकर्णप०—स्पष्टमन्दकर्णः, स्पष्टमृदुकर्णः, स्फुटमन्दकर्णः, स्फुटमृदुकर्णः।

[२]शीघ्रकर्णप०—आशुकर्णः, चलकर्णः, द्राक्कर्णः, द्राक्श्रुतिः, शीघ्रकर्णः।

स्पष्टशीघ्रकर्णप०—स्पष्टचलकर्णः, स्पष्टद्राक्कर्णः, स्पष्टशीघ्रकर्णः, स्पष्टाशुकर्णः, स्फुटचलकर्णः, स्फुटद्राक्श्रुतिः, स्फुटशीघ्रकर्णः, स्फुटाशुकर्णः।

कर्णान्यभेदाः—(१) अक्षकर्णः (पलकर्णः), (२) अभिमतकर्णः (इष्टकर्णः), (३) उद्वृत्तकर्णः, (४) उन्मण्डलकर्णः, (५) कलाकर्णः (लिप्ताश्रुतिः) (६) छायाकर्णः (भाकर्णः), (७) द्युदलकर्णः (मध्याह्नकर्णः), (८) मध्यकर्णः, (९) योजनकर्णः, (१०) विषुवत्कर्णः, (११) समकर्णः, (१२) सममण्डलकर्णः (समवृत्तकर्णः) चैते कर्णस्यान्ये भेदाः स्युः।

परिधिभेदौ—(१) मन्दपरिधिः, (२) शीघ्रपरिधिश्चैतौ द्वौ परिधिभेदौ स्तः।

विभापर्यायाः—कोटिः, कोटी, विभा।

कोटिप०[३]—कोटिः, कोटी, बाहुहीनत्रिभम्, भुजोनत्रिभम्।

तदुक्तम्—

दिक्सूत्रसम्पातगतस्य शंकोश्छायाग्रपूर्वापरसूत्रमध्यम्।
दोर्दोः प्रभावर्गवियोगमूलं 'कोटि'र्नरांत्प्रागपरा ततः स्यात्।।

इति सिद्धान्तशिरोमणौ।

कोट्यंशप०—कोटिभागः, कोटिलयः, कोट्यंशः, कोट्यंशकः।

रविमन्दकर्णप०[४]—रविमन्दकर्णः, रविमृदुश्रवः, रविमृदुश्रुतिः।

चन्द्रमन्दकर्णप०[५]—चन्द्रमन्दकर्णः, चन्द्रमृदुश्रवः, चन्द्रमृदुश्रुतिः।

ज्यापर्यायाः—गव्या, गुणः, गुणा, जीवा, ज्यका, ज्या, द्रुणा, धनुर्गुणः, पतञ्चिका, पतञ्जिका, प्रतिकायः, प्रत्यञ्चा, बाणासनम्, मारवम्, मौर्विका, मौर्वी, व्यधः, शिञ्जा, शिञ्जिनी, शिञ्ज्या, सिञ्जा, सिञ्जिनी।

ज्यार्द्धप०—जीवाखण्डम्, जीवादलम्, जीवार्द्धम्, ज्याखण्डम्, ज्यादलम्, ज्यार्द्धम्, ज्याशकलम् मौर्वीदलम्।

---

(१) ग्रहसूर्ययोरन्तरं मन्दकर्णः।

(२) भूमिग्रहयोरंतरं शीघ्रकर्णः। अथवा—
भूमिमध्याद् ग्रहावधिर्यदन्तरं स एव शीघ्रकर्णो ज्ञेयः।

(३) राशिचक्रतृतीयांशः कोटिः। अथवा—
विमण्डलापमण्डलान्तरं कोटिः सा विक्षेपतुल्या भवति।

(४) पृथिवीसूर्ययोरंतरम् 'सूर्यमन्दकर्णः'।

(५) भूमीन्द्वोरंतरं चंद्रमन्दकर्णः।

ज्याभेदा:—(१) अक्षज्या, (२) अग्रज्या, (३) अर्द्धज्या, (४) इष्टत्रिज्या:, (५ उत्क्रमज्या, (६) कुगुणा, (कुजीवा, कुज्या, क्षितिज्या) (७) कोटिगुणा, (कोटिजीवा, कोटिज्य लम्बज्या), (८) क्रमज्या, (९) क्रान्तिज्या (अपमज्या), (१०) चरज्या (चरदलज्या), (११ जिनांशजीवा, (१२) त्रिगुणा (त्रिजीवा, त्रिज्या, त्रिभज्या), (१३) दिग्ज्या, (१४) दृग्ज्य (१५) द्युजीवा (द्युज्या[1], द्युमौर्वी), (१६) नतज्या, (१७) परमक्रान्तिज्या (परमापमज्या) (१८) भुजज्या (दोर्ज्या, बाहुज्या), (१९) लम्बज्या[2] चैते ज्याया भेदा: स्यु:।

धनु:पर्याया:—अस्त्रम्, आयुधाग्र्यम्, आस:, इष्वास:, काण्डम्, कार्मुकम्, कोदण्डम् गुणी, चाप:, तारकम्, तृणता, त्रिणता, द्रुणम्, धनु (न०), धनु: (पुं०स्त्री०), धनु: (उस् (अस्त्री), धनू: (स्त्री०) धन्वम्, धन्व (अन्), शरारोप:, शरावाप:, शरासनम्, शेष:, सरासनम् स्थावरम्।

करणग्रन्थेष्वङ्कभेदौ—(१) मन्दांक:, (२) चलांकश्चैतावंकानां द्वौ भेदौ स्त:।

मन्दाङ्कपर्याया:—मन्दांक:, मान्द:, मृद्वंक:।

शीघ्राङ्कप०[3]—चञ्चलांक:, चल:, चलांक:, शैघ्र:, शीघ्रांक:।

मन्दफलप०—मन्दफलम्, मन्दसंज्ञफलम्, मान्दम्, मृदुफलम्, मृदुसञ्ज्ञफलम्।

शीघ्रफलप०—आशुफलम्, चञ्चलफलम्, चलफलम्, द्राक्फलम्, शीघ्रफलम्, शैघ्र्यम्।

स्पष्टपर्यायौ—स्पष्टम्, स्फुटम्।

मन्दस्पष्टरविप०—मन्दस्पष्टरवि:, मन्दस्पष्टार्क:, मृदुस्फुटरवि:, मृदुस्फुटार्क:।

तदुक्तम्—

'मृदुसञ्ज्ञफलेन मध्यमस्तरणि: संस्करणीय उक्तवत्।
स्फुटतामुपयाति मध्यमस्तरणिर्मन्दफलेन केवलम्।।
इति केतकीग्रहणगणिते।

---

(१) द्युज्यानाम क्रांतिकोटिज्या।

(२) लम्बज्या नाम अक्षकोटिज्या। इति ज्योतिर्विदां परिभाषा सुप्रसिद्धा।

(३) भौमादीनां प्रथमद्वितीयशीघ्रफलयो: साधने यदा गताङ्कस्यापेक्षया भोग्याङ्कोऽधिकस्तदा तदंतर चय:।

यदा गताङ्कस्यापेक्षया भोग्याङ्कोऽल्पस्तदा तदंतरं क्षय:।

चयक्षयाभ्यामन्तराभ्यां शेषांशादिकं गुणितं पञ्चदशविभक्तं तदा यत्फलं लभ्यते तदा चयेऽन्तरे तद्भोग्यांके योज्यं क्षयेऽन्तरे तु भोग्यांके वियोज्यं ततो दशभक्तमंशादिकं शीघ्रफलं स्यात्।

प्रथमशीघ्रकलार्द्धं द्वितीयशीघ्रफलम् सर्वं मध्यमग्रहे मेषादौ शीघ्रकेन्द्रे तद् धनं तुलादौ तु ऋणं कार्यम्।

मन्दस्पष्टग्रहप०[१]—मन्दस्पष्टग्रहः, मन्दस्फुटग्रहः, मृदुस्पष्टग्रहः, मृदुस्फुटग्रहः।

अयनप०—अयनम्, चलम्, चलनम्।

अयनांशप०[२]—अयनभागः, अयनलवः, अयनांशः, अयनांशकः, चलभागः, चललवः, चलांशः, अयनचलनभागः, अयनचलनः, अयनचलनलवः, अयनचलनांशः, अयनचलनांशकः।

सम्पातार्कप०—सम्पातार्कः, सायनार्कः।

छायाप०—आभा, छाया, दीप्तिः, द्युतिः, प्रभा, भा, विभा।

पलभाप०[३]—अक्षः, अक्षच्छाया, अक्षप्रभा, अक्षभा, अक्षाभा, पलच्छाया, पलप्रभा, पलभा, पलविभा, पलाभा, विषुवच्छाया, विषुवत्प्रभा, विषुवद्भा, विषुवती, विषुवतीच्छाया, वैषुवती, शंकुतलगतच्छाया।

चरप०[४]—चरम्।

चरखण्डप०[५]—चरखण्डम्, चरखण्डकम्, चरदलम्, चरभित्तम्, चरशकलम्, चरार्द्धम्।

स्पष्टरविप०—स्पष्ट रविः, स्पष्टार्कः, स्फुटरविः, स्फुटार्कः।

स्पष्टग्रहप०[६]—स्पष्टखगः, स्पष्टग्रहः, स्फुटखगः, स्फुटग्रहः।

रविमन्दकेन्द्रपर्यायाः—रविमन्दकेन्द्रम्, रविमृदुकेन्द्रम्, सूर्यमन्दकेन्द्रम्, सूर्यमृदुकेन्द्रम्।

रविमन्दफलप०—रविमन्दफलम्, रविमृदुफलम्, द्युमणिमन्दफलम्।

स्वर्णताप०—धनर्णता, धनर्णत्वम्, धनाधनम्, स्वक्षयत्वम्, स्वर्णता, स्वास्वता।

तदुक्तम्—

'केन्द्रे स्यात्स्वमृणं फलं क्रियतुलाद्ये' इति।

अपि च—

'गतौ धनर्णं केन्द्रे कुलीरमृगषट्कगते' इति च ग्रहलाघवे २/२।

चन्द्रकेन्द्रभेदाः—(१) च्युतिकेन्द्रम् (२) तिथिकेन्द्रम् (३) मन्दकेन्द्रम्, (४) राहुकला, चैते चन्द्रकेन्द्रभेदाः स्युः।

---

(१) मंदस्पष्टग्रहोविक्षेपवृत्ते अर्थात् स्वकक्षायां तिष्ठति।

(२) वेदाब्ध्यब्ध्यूनः खरसहृतः शकोऽयनांशाः। इति ग्रहलाघवे २।

(३) एवं विषुवतिच्छाया स्वदेशे या दिनार्द्धजा दक्षिणोत्तररेखायां सा तत्र विषुवत्प्रभा। 'इति सूर्यासिद्धांते ३/१२।' 'ग्रंथांतरे तु'

चन्द्राश्विनिघ्ना पलभार्द्धिता च लङ्कावधिः स्यादिह दक्षिणोऽक्षः।' इति।

(४) लङ्कार्कोदयरेखार्कोदययोरंतरं चरं स्यात्। उन्मण्डलक्षितिजयोर्यदंतरं तच्चरं वा। स्वदेशनिरक्षदेशयोः सूर्योदयकालयोरंतरं चरसमानम्। स्वस्वदेशे क्षितिजे रव्युदयात्तद्देशीयार्कोदयांतरं चरखण्डसमानम् इति। अथवा—

'क्रान्त्यक्षभागाहतिपञ्चमांशश्चरं पलात्मकं गगना चराणाम्।' इति ग्रंथांतरे।

(५) 'त्रिष्ठा हता स्युर्दशभिर्भुजङ्गैर्दिग्भिश्चरार्द्धानि गुणोद्धृतांत्या। ' इति ग्र०ला० २/२१

(६) स्पष्टग्रहः क्रांतिवृत्ते तिष्ठति तेन क्रांतिवृत्तीयो ग्रहो भवति।

चन्द्रफलभेदाः—(१) च्युतिफलम्, (२) तिथिफलम्, (३) मन्दफलम्, (४) राहुकला चैते चन्द्रफलभेदाः।

गतिमन्दफलप०—गतिमन्दफलम्, गतिमृदुफलम्, भुक्तिमन्दफलम्, भुक्तिमृदुफलम्

मन्दस्पष्टगतिप०—मन्दस्पष्टगतिः, मन्दस्पष्टा, मृदुस्फुटा, मन्दस्पष्टभुक्तिः, मृदुस्फुटगति मृदुस्फुटभुक्तिः।

भौमादीनां केन्द्रभेदाः—(१) प्रथमशीघ्रकेन्द्रम्, (२) मन्दकेन्द्रम्, (३) द्वितीयशीघ्रकेन्द्र चैते भौमादीनां केन्द्रभेदाः स्युः।

भौमादीनां फलभेदाः—(१) प्रथमशीघ्रफलार्द्धम्, (२) मदफलम् (३ द्वितीयशीघ्रफलाखिलम्, चैते भौमादीनां फलभेदाः स्युः।

तदुक्तम्—

'प्राङ्मध्यमे चलफलस्य दलं विदध्यात्तस्माच्च मान्दमखिलं विदधीत मध्ये।
द्राक्केन्द्रकेऽपि च विलोममतश्च शीघ्रं सर्वं च तत्र विदधीत भवेत्स्फुटोऽसौ॥

इति ग्रहलाघवे

भौमादीनां गतिफलभेदाः—(१) मन्दगतिफलम्, (२) शीघ्रगतिधनफलम्, (३ शीघ्रगत्यृणफलं चैते गतिफलभेदाः स्युः।

भौमादीनां गतिभेदाः—(२) मध्यमगतिः (ग्रहमध्यभुक्तिः, (२) मन्दगतिः (मन्दपरिस्फुटा मृदुस्फुटाः), (३) शीघ्रगतिः (शीघ्रभुक्तिः, द्राक्केन्द्रभुक्तिः), (४) वक्रगतिः (कुटिलभुक्तिः) (५) स्पष्टगतिः (स्फुटभुक्तिः), (६) दैनिकीगतिः (द्युगतिः), (७) तात्कालिकीगतिश्चैते गतिभेद स्युः।

भौमादीनां गतेरन्यप्रभेदौ—(१) ऋजुगतिः, वक्रगतिश्चैतो द्वौ भेदौ स्तः।

ऋजुगतिप्रभेदाः—(१)मन्दा, (२) मन्दतरा, (३) समा, (४) शीघ्रा, (५) शीघ्रतरा ऋजुगतेः पञ्चप्रभेदाः स्युः।

वक्रगतिप्रभेदाः—(१) वक्रा (वक्रंगतिः), (२) अनुवक्रा, (३) कुटिला, चैते वक्रगतेस्त प्रभेदाः स्युः।

तदुक्तम्—

वक्रानुवक्रा कुटिला मन्दा मन्दतरा समा। तथा शीघ्रा शीघ्रतरा ग्रहाणां चाष्टधा गतिः॥'

इति सूर्यतिद्धान्ते

मतान्तरे तु—

ग्रहाणां षोढागतिनामानि—पूर्वापरा। याम्योत्तरा। ऊर्ध्वाधरा चेति षोढा गतयःस्युः।

उदयवाचकशब्दाः—उदयः, उदितः, उदगमः, दर्शनम्, दृश्यः, समुदयः, समुद्गमः।

उदयिवाचकशब्दाः—अनस्तगतः, असूर्यगः, उदयी (इन्), दिवाकरकरव्यासाङ्गमुक्तिः, दृश्ययातः, स्फुरत्प्रभः,

अस्तप०—अदर्शनम्, अदृश्यः, अस्तम्, अस्तमनम्, अस्तमयः, मुषितः, मूढः, मौढ्यः, लोपः।

अस्तगतप०—अंशुमदंशुसङ्कुलः, अंशुलीनः, अर्ककराभितप्तः, अर्कोपगतः, आदित्यरश्मिपरिभूतः, क्षीणकरः, तिग्मांशुलुप्तद्युतिः, दिनकरलुप्तमयूखः, दिनकरकराभितप्तः,

दिनकरोनकरः, दिनेशकरलुप्तः, दिनेशकान्त्याभिहतः, दिनेशकिरणच्छन्नः, दिनेश्वरकरच्छन्नः, दिवाकरकरच्छन्नः, भास्वल्लुप्तज्योतिः, रविकरच्छन्नः, रविकराभिहतः, रविकिरणमुषितदीप्तिः, रविगः, रविमुषिततनुः, रविलुप्तकरः, रविलुप्तरोचिः, लुप्तः, लुप्तकरः, विकर्त्तनकरच्छन्नः, सूर्यकिरणलुप्तः, सूर्यप्रविष्टः, सूर्यांशुलुप्तः, सूर्यमयूखलुप्तः, सूर्यलुप्तकिरणः, सूर्योच्छिन्नद्युतिः।

वक्रप०—अनृजुः, अरालम्, आविद्धम्, ऊर्मिमत् (मतुप्), कुञ्चितम्, कुटिलम्, नतम्, भङ्गुरम्, भुग्नम्, वक्रम्, वृजिनम्, वेल्लितम्।

वक्रिप०—अनृजुगः, अनृजुगतिः, वक्रगः, वक्रगतिः, वक्रस्थः, वक्री (इन्)।

मार्गप०—अजिह्मः, अनुलोमः, अवक्रः, ऋजुः, प्रगुणः, मार्गः।

मार्गिप०—ऋजुगः, ऋजुगतिः, ऋजुभुक्तिः, मार्गगः, मार्गी (इन्)।

[1]**पूर्वोदयपर्यायाः**—ऐन्द्र्युदयः, ऐन्द्र्युद्गमः, पूर्वदर्शनम्, पूर्वोदयः, पूर्वोद्गमः, प्रागुदयः, प्राग्दर्शनम्, प्राचीदर्शनम्, प्राच्युदयः, प्राच्युद्गमः।

[2]**पूर्वास्तप०**—पूर्वलोपः, पूर्वादर्शनम्, पूर्वास्तम्, पूर्वास्तमनम्, प्रागदर्शनम्, प्रागस्तम्, प्रागस्तमनम्, प्राग्लोपः, प्राचीलोपः, प्राच्यदर्शनम्, प्राच्यस्तम्, प्राच्यस्तमनम्।

[3]**पश्चिमोदयप०**—तोयदर्शनम्, तोयोदयः, तोयोद्गमः, पश्चिमदर्शनम्, पश्चिमोदयः, पश्चिमोद्गमः, प्रतीचीदर्शनम्, प्रतीच्युदयः, प्रतीच्युद्गमः, प्रत्यगुदयः, प्रत्यगुद्गमः, प्रत्यग्दर्शनम्, वारुणीदर्शनम्, वारुण्युदयः, वारुण्युद्गमः।

[4]**पश्चिमास्तप०**—तोयलोपः, तोयादर्शनम्, तोयास्तम्, तोयास्तमनम्, पश्चिमलोपः, पश्चिमादर्शनम्, पश्चिमास्तम्, पश्चिमास्तमनम्, प्रतीचीलोपः, प्रतीच्यदर्शनम् प्रतीच्यस्तम्, प्रतीच्यस्तमनम्, प्रत्यगदर्शनम्, प्रत्यगस्तम्, प्रत्यगस्तमनम्, प्रत्यग्लोपः, वारुणीलोपः, वारुण्यदर्शनम्, वारुण्यस्तम्, वारुण्यस्तमनम्।

अल्पगतिप०—अल्पगः, अल्पगतिः, लघुगः, लघुगतिः।

भूरिगतिप०—अधिकगः, अधिकगतिः, भूरिगः, भूरिगतिः, भूरिजवः, भूरिभुक्तिः।

शीघ्रगतिप०—शीघ्रगः, शीघ्रगतिः, शीघ्रभुक्तिः, शैघ्र्यगः, शैघ्र्यगतिः, शैघ्र्यभुक्तिः।

[5]**कुजप०**—कुजम्, क्षितिजम्, गर्भक्षितिजम्।

[6]**प्राक्कुजप०**— उदयक्षितिजम्, प्राक्कुजम्, प्राक् क्षितिजम्, हरिजम्[7]।

(१, ४) भौमादीनां पञ्चताराग्रहाणां प्राच्यामुदयः, प्रतीच्यामस्तो ज्ञेयः।

(२, ३) बुधभृग्वोस्तु पूर्वस्यामस्तः पश्चिमायामुदयोऽपि ज्ञेयः।

(५) खगोले आकाशमध्यान्नवत्यंशांतरं तिर्य्यग्वृतम्। स्वे स्वे कुजेऽर्कस्य समुद्गमः (उदयः), स्यात्।

(६) क्षितजवृत्तस्य पूर्वदिग्देशः

(७) तथा च प्रयोगः—यद्वाद्राशिर्व्रजंति हरिजं गर्भमोक्षस्तु तद्वत् इति वराहः।

[1]**प्रत्यक्कुजप०**—अस्तक्षितिजम्, पश्चिमक्षितिजम्, प्रत्यक्क्षितिजम्, प्रत्यक्कुजम्।

[2]**निरक्षप०**—निरक्षदेशः, पलभाशून्यदेशः, व्यक्षदेशः।

साक्षप०—साक्षदेशः पलभासहितदेशः, सपलदेशः।

अक्षप०—अक्षः, पलः।

अक्षांशप०—अक्षभागः, अक्षलवः, अक्षांशः, अक्षांशकः, पलभागः, पललवः, पलां पलाशंकः, खमध्यार्कनतांशः (दक्षिणः)।

अंशभेदाः—उन्नतांशः, क्षेत्रांशः (क्रान्तिवृत्तस्थांशः) दिगंशः, नतांशः (क्रान्त्यक्षजसंस्कृति लम्बांशः (क्षितिजादुन्नतांशः सौम्यः), तूलांशः, यंत्रांशः, यंत्रजोन्नतांशः, अभिमतयंत्रां भुजांशः, कालांशः (क्षणांशः)।

लङ्कोदयपर्यायाः—लङ्कोदयाः, लङ्कोदयप्राणाः, लंकोदयासवः, निरक्षोदयाः, व्यक्षोद

तदुक्तम्—

लंकोदया विघटिका गजभानि गोऽङ्कदस्रास्त्रिपक्षदहनाः‘ इति ग्रहलाघवे ४/१।

स्वोदयप०—स्वभोदयाः, स्वराश्युदयाः, स्वोदयाः, स्वोदयप्राणाः, स्वोदयासवः, गृहोदयाः उदयप्राणाः, उदयासवः, भोदयाः, राश्युदयाः।

तदुक्तम्—

‘क्रमगोत्क्रमस्थाः। हीनान्विताश्चरदलैः क्रमगोत्क्रमस्थै।

मेषादितो धटतउत्क्रमतस्त्विमे स्युः।। स्वोदयाः’ इति शेषः। इति ग्रहलाघवे ४/१।

भुक्तांशप०—इतभागः, इतलवः, इतांशः, इतांशकः, गतभागः, गतलवः, गतांशः गतांशकः, भुक्तभागः, भुकालवः, भुक्तांशः, भुक्तांशकः, यातभागः, यातलवः, यातांशः यातांशकः।

भोग्यांशप०—एष्यभागः, एष्यलवः, एष्यांशः, एष्यांशकः, गम्यभागः, गम्यलवः गम्यांशः, गम्यांशकः, भोग्यभागः, भोग्यलवः, भोग्यांशः, भोग्यांशकः, येयभागः, येयलवः येयांशः, येयांशकः।

भुक्तकालप०—इतकालः, गतकालः, भुक्तकालः, यातकालः।

भोग्यकालप०—एष्यकालः, गम्यकालः, भोग्यकालः, येयकालः।

---

(१) क्षितजवृत्तस्य पश्चिमदिक् प्रदेशः।

(२) चतस्रो नगर्य्योऽक्षरहितास्ताश्च यथा—कुमध्ये ‘लङ्का’ इयं भारतवर्षे दक्षिणे वर्त्त अस्याः प्राक् (पूर्वे) ‘यमकोटिः’ सा भद्राश्च वर्षे तिष्ठति। पश्चिमे केतुमालवर्षे रोमकः (रोमकपत्तनम् ततोऽधः सिद्धपुरम् (सिद्धपुरी)। अस्याः सौम्ये (उत्तरे) कुरुवर्षे सुमेरुः, तत्र सुरसिद्धसं वसन्ति। तस्या याम्ये वडवानलः, तत्र औवें सदैत्याः सर्वे नरकाः सन्ति। लङ्कापुरेऽर्कस्य यदोदयस्तदा यमकोटिपुर्य्यां दिनार्द्धम्। सिद्धपुरेऽस्तकालोऽधः। तदा रोमके रात्रिदलम्। उक्ताश्चत नगर्य्यो भूवृत्तपादविवरा अन्योन्यं प्रतिष्ठिताः। तासामुपरितो विषुवस्थो दिवाकरो याति। तासु विषुवच्छाया ध्रुवस्योन्नतिश्च न दृश्यते। तत्र दिवामानं रात्रिमानं च त्रिशन्नाडिकाः, इति सूर्यसिद्धांतमतम् इति राजा राधाकांतशब्दकल्पद्रुमे। इ०श०र्चि०।

इष्टघटीप०—अभिमतघटिका, अभिमतघटी, अभिमतनाडिका, अभिमतनाडी, इष्टघटिका, इष्टघटी, इष्टनाडिका, इष्टनाडी, अभीष्टघटी, अभीष्टनाडी।

लग्नप०—उदयः, उद्गमः, लग्नम्, विलग्नम्। शेषपर्यायास्तु तनुभावे द्रष्टव्याः।

अस्य सलक्षणपर्यायानाह—

'सूचीमुखो द्वादशभिस्तथांगुलैरधः पृथुस्तिष्ठति यो महीतले।
विना निखातं गजदन्तनिर्मितः कीलः स शंकुर्नर इत्युदीरितः॥

इति ग्रन्थान्तरे।

शंकुभेदाः—अभीष्टोन्मण्डलशंकुः, इष्टशंकुः, उन्मण्डलना (उन्मण्डलशंकुः), कोणशंकुः, दिनार्द्धशंकुः, (द्युदलशंकुः, मध्याह्नशंकुः), समनरः (समना), समवृत्तशंकुः (सममण्डलशंकुः, समशंकुः)।

अहोरात्रपर्यायाः—अहोरात्रः, अहर्निशम्, दिवारात्रम्, शेषन्त्वन्यत्र।

अहोरात्रभेदाः—(१) दिनार्द्धम्, (२) दिनमानम् (३) रात्र्यर्द्धम् (निशीथः), (४) रात्रिमानं चैतेऽहोरात्रभेदाः स्युः।

कपालभेदौः—(१) पूर्वकपालम् (२) परकपालम्, चैतौ द्वौ कपालभेदौ स्याताम्।

[1]**पूर्वकपालपर्यायौ**—पूर्वकपालम्, प्राक्कपालम्।

[2]**परकपालप०**—अपरकपालम्, परकपालम्, प्रत्यक्कपालम्, परत्रकपालम्।

नतकालप०—नतः, नतकालः, नतसमयः।

उन्नतकालप०—उन्नतः, उन्नतकालः, उन्नतसमयः।

उक्तं च—

'यातः शेषः प्राक्परत्रोन्नतः स्यात्कालस्तेनोनं द्युखण्डं नतः स्यात्। इतिग्रहलाघवे ४।

नतभेदौ—(१) पूर्वनतः, (२) पश्चिमनतश्चैतौ नतस्य द्वौ भेदौ स्तः।

पूर्वनतपर्यायौ—पूर्वनतः, प्राङ्नतः।

पश्चिमनतप०—पश्चिमनतः, प्रत्यङ्नतः।

उन्नतभेदौः—(१) पूर्वोन्नतः, पश्चिमोन्नतश्चैतावुन्नतस्य द्वौ भेदौ स्तः।

पूर्वोन्नतपर्यायौः—पूर्वोन्नतः, प्रागुन्नतः।

पश्चिमोन्नतप०—पश्चिमोन्नतः, प्रत्यगुन्नतः।

[3]**आर्क्षकालप०**—आर्क्षः, आर्क्षकालः, आर्क्षसमयः, औदयिकः, नाक्षत्रः, नाक्षत्रकालः, नाक्षत्रसमयः, विषुवकालः।

अक्षक्षेत्रप०—अक्षक्षेत्रम्, पलक्षेत्रम्।

[4]**अग्राप०**—अग्रा।

अग्राग्रखण्डप०—अग्राग्रखण्डम्, अग्रादिखण्डम्।

---

(१) सूर्योदयाद् दिनार्द्ध पर्यन्तं पूर्वदलम्, प्राक्कपालं स्यात्।

(२) मध्याह्नादुपरि सूर्यास्तपर्यन्तं पश्चिमदलं तदपरं पश्चिमकपालम्।

(३) ग्रहाणामुन्मण्डलोदयसमये तेषामार्क्षकालः आर्क्षकालो नाम विषुवकालो ज्ञेयः।

(४) क्षितिजे अहोरात्रवृत्तसममण्डलयोर्मध्यभागस्य या ज्या सा 'अग्रा' ज्ञेया।

लम्बप०—लम्बः, दीर्घम्, क्षेत्रादौ लम्बमानरेखासूत्रं वा।

तदुक्तम्—

'पश्येज्जलादौ प्रतिबिम्बितं वा खेटं दृगौच्च्यं गणयेच्चलम्बम्।
तल्लम्बपातम् ' इति ग्रहलाघवे ४।

क्रान्तिपर्यायाः—अपक्रान्तः, अपक्रमः, अपमः, अपमण्डलम्, अपवृत्तम्, क्रमणम्, क्रान्तिः।

स्पष्टक्रान्तिप०—अपक्रमः, स्पष्टक्रान्तिः, स्पष्टापमः, स्फुटक्रान्तिः, स्फुटापमः।

अपममण्डलप०—अपममण्डलम्, क्रान्तिमण्डलम्, क्रान्तिवृत्तम्, नाडीवृत्तम्।

हरप०—हरः, हारः।

इष्टहरप०—अभिमतहरः, अभिमतहारः अभीष्टहरः, अभीष्टहारः, इष्टहरः, इष्टहारः।

इष्टच्छायाप०—इष्टच्छाया, इष्टभा।

गोलप०—गोलम्, मण्डलम्।

तदुक्तम्—

'गोलं श्रोतुं यदि तव मतिर्भास्करीय शृणु त्वम् '

इति सिद्धान्तशिरोमणौ।

गोलभेदाः—(१) खगोलः, (२) ग्रहगोलः, (३) दृग्गोलः, (४) भगोलः, (५) भूगोलश्चैते गोलभेदाः स्युः।

खगोलपर्यायाः—आकाशमण्डलम्, खगोलः, व्योमकक्षा।

उक्तञ्च—

'ब्रह्माण्डमध्ये परिधिस्तुल्यवृत्तमानं व्योमकक्षोच्यते।।' इति।

ग्रहगोलप०—ग्रहकक्षा, ग्रहगोलः, ग्रहमण्डलम्।

उक्तं च—

'ब्रह्माण्डमध्ये परिधिर्व्योमकक्षाऽभिधीयते।
तन्मध्ये भ्रमणं भानामधोऽधः क्रमशस्तथा।
मन्दामरेज्यभूपुत्रसूर्यशुक्रेन्दुजेन्दवः।
परिभ्रमन्त्यधोऽधःस्थाः सिद्धविद्याधरा घनाः।' इति सूर्य सिद्धान्ते।

[1]**भचक्रप०**—आकाशकक्षा, [2]नक्षत्रकक्षा, नक्षत्रगोलः, भकक्षा, भगोलः, भचक्रम्, भमण्डलम्, राशिचक्रम्।

---

(१) तदुक्तं वह्निपुराणे भेदनामाध्याये श०चि० २.४०५

यथा-भ्रमावर्ती भचक्रेऽस्मिन् ध्रुवो नाभौ व्यवस्थितः।
आराचक्रे त्विन्दुभौमो शुक्रजीवशनैश्चराः।।
राहुः केतुरगस्त्यश्च नक्षत्राण्यथ राशयः।
यदा दिक्षुसु अष्टासु मेरोर्भूगोलकोद्भवा।।
छाया भवेत्तदा रात्रिः स्याच्च तद्विरहादिनम्।
सूर्येन्द्वोरुपरागस्तु गोलच्छायया भवेत्।।
अन्योन्ययोस्त्रयोरे ब ....कारणात्।
ग्रासमोक्षौ तु जायेते तत्रातः पूर्वपश्चिमौ।।

(शेष पृष्ठ १११ पर)

क्षेपवृत्तप०—क्षेपवृत्तम्, विक्षेपमण्डलम्, विक्षेपवृत्तम्।

विषुवप०—वासन्तिकम्, महाविषुसंक्रान्तिः, विषुवम्, विषुवत्, समरात्रिंदिवाकालः।

कक्षाच्युतिप०—कक्षाच्युतिः।

केन्द्रच्युतिप०—केन्द्रच्युतिः।

इष्टहृतिप०—अभीष्टच्छेदः, इष्टहृतिः।

यष्टिप०—यष्टिः।

इष्टयष्टिप०—इष्टयष्टिः।

[1]**दृङ्मण्डलप०**—दृक्क्षेपमण्डलम्, दृङ्मण्डलम्।

[2]**विषुवन्मण्डलप०**—नाडिकामण्डलम्, नाडीमण्डलम्, नाडीवृत्तम्, विषुवद्रेखा, विषुवद्वृत्तम्, विषुवन्मण्डलम्।

[3]**उन्मण्डलप०**—उन्मण्डलम्, उन्मण्डलवृत्तम्, लङ्काक्षितिजम्।

सममण्डलप०—विमण्डलम्, सममण्डलम्, याम्योत्तरमण्डलम् (पूर्वपराश्रिता रेखा)।

अत्राह भास्करः

प्राक्पश्चिमाश्रिता रेखा प्रोच्यते समण्डलम्।
उन्मण्डलं च विषुवन्मण्डलं परिकीर्तितम्।। इति सिद्धान्तशिरोमणौ।

दिक्प०—आशा, दिक् (श्) दिशा, शेषास्त्वन्यत्र।

दिग्भेदाः—(१) अपरा (पश्चिमा), (२) पूर्वा (प्राची), (३) उदक् (उदीची), (४) याम्या (अवाची), चैताश्चतस्रो दिशः स्युः।

(पृष्ठ ११०का शेष)

तत्र पुण्यफलाद्भागः कृतो राहोस्तु विष्णुना' इत्यादि।

अस्य भचक्रस्य भ्रमणव्यवस्थामाह भास्करः—(सिद्धांत शिरोमणौ)

'निरक्षदेशे क्षितिमण्डलोपगौ ध्रुवौ नरः पश्यति दक्षिणोत्तरौ।

तदाश्रितं खे जलयंत्र वत्सदा भ्रमदभचक्रं निजमस्तकोपरि।

उदग्दिशं याति यथा यथा नरस्तथा तथा खान्नतमृक्षमण्डलम्। उदग् ध्रुवं पश्यति चोन्नतं क्षितेस्तदंन्तरे योजनजाः पलांशकाः।

योजनसंख्या भांशै ३६०गुंणिता कुपरिधि ४९६७ हृता भवन्त्यंशाः भूमौ कक्षायां वा भागेभ्यो योजनानि च व्यस्तम्।

(२) नक्षत्रकला—नक्षत्राधिष्ठितगोलमध्यवृत्तम्।

---

[1] खस्वस्तिके चाधः स्वस्तिके चान्तः कीलकां कृत्वा समं प्रोतं श्लथं दृग्वलयं कार्यम्।

[2] तयोरेव पूर्वापरसम्पातयोर्विलग्नं, याम्योत्तरवृत्ते खस्वस्तिकाद् दक्षिणतोऽधः, स्वस्तिकादुत्तरतोऽक्षांशान्तो यद्वृत्तं निबध्यते तद् 'विषुवद्' 'वृत्तम्'। षष्ट्याऽत्र नाडीवलम् विदध्यात्। इति।

[3] क्षितिजवृतम्, निरक्षदेशस्य क्षितिजवृत्तम्, अहोरावृत्तं च दिनरात्र्योर्वृद्धिक्षयकारणं वा। इति।

तदुक्तम्

वृत्ते समभूगते तु केन्द्रस्थितशङ्कोः क्रमशो विंशत्युपैति।
छायाग्रमिहापरा च पूर्वा ताभ्यां सिद्धतिमेरुदक् च याम्या।। इति ग्रहलाघवे ४।

दिग्वलनप०—दिग्वलनम्, आशावलनम्, ककुबद्वलनम्, काष्ठावलनम्।

यंत्रप०—यन्त्रम्, दारूयन्त्रादि, 'कल' इति भाषा।

यंत्रभेदाः—(१) गोलः, (२) नाडीवलयः, (३) यष्टिः, (४) शङ्कुः, (नरयन्त्रम्), (५) घटीयन्त्रम्, (६) चक्रम्, (७) चापः, (८) तुर्यम् (तुरीयम्), (६) फलकम्, (१०) धीः, (११) सर्वतोभद्रः (१२) कपालकयन्त्रम्, (१३) नायिकायन्त्रम् चैते यन्त्रभेदाः स्युः।

[१]**घटीयन्त्रपर्यायाः**—घटिका, घटी, घटीयन्त्रम्, ताम्रिका, ताम्री, नाडिका, नाडी, मान-

---

(१) घटीयन्त्रं अर्थाज्जलघटीस्थापनक्रियामाह नारदः—
पूर्वं सञ्चिन्त्य गणितं शास्त्रोक्तं लग्नमानयेत्।
तल्लग्नं जलयंत्रेण दद्याद् ज्यौतिषिकोत्तमः।।
षडंगुलमितोत्सेधं द्वादशांगुलमायतम्।
कुर्यात्कपालवत्ताम्रपात्रं च दशभिः फलैः।।
पूर्णं षष्ट्या त्वथ पलैः षष्टिर्मज्जति वासरात्।
माससमात्रश्यंश १ १/३ युतस्वर्णवृत्तशलाकया।।
चतुर्भिरंगुलैरायतया विद्धमिति स्फुटम्।
ताम्रपात्रैः जलैः पूर्णे मृत्पात्रे वा ऽथवा शुभे।।
गंधपुष्पाक्षतैः सार्द्धैरलंकृत्य प्रयत्नतः।
तण्डुलस्थे स्वर्णयुते वस्त्रयुग्मेन वेष्टिते।।
मण्डलार्द्धोदयं वीक्ष्य रवेस्तत्र विनिक्षिपेत्।
मंत्रेणानेन पूर्वोक्तलक्षणं यंत्रमुत्तमम्।। इति।

अथवा

एकान्तपक्षेऽनिलवर्जितेऽस्मिन् दध्यक्षतैः पूजितमण्डले च।
कुण्डेऽम्बुपूर्णे घटिका प्रवाह्या सूर्यार्द्धबिम्बे उदितेऽस्तगे वा।।'
अत्र मंत्रः—
'मुख्यं त्वमसि यंत्राणां ब्रह्मणा निर्मितं पुरा।
भ (शि) वाभ (शि) वाय मर्त्यानां कालसाधक कारणम्।। इति

ज्यौतिषकल्पद्रुमे तु यथा—

'कुम्भार्द्धकृतिशुद्धताम्रदशभिः पात्रं पलैर्निर्मितं
शंक्वार्द्धोन्ननिशंकुविस्तृतिरिदं मासाङ्गुलैरायतम्।
विद्धा हेमशलाकया सुसलिले उन्मज्य तस्किन् घटी
उन्मज्या खलुषष्टिवारपठिते श्लोकेन सा पूर्यते।। इति।

(शेष पृष्ठ ११३ पर)

रन्ध्रा, मेरुका, यामघोषिणी, यामनाडी, विकालिका, षष्टिदीर्घाक्षरोच्चारा।

तदुक्तम् केशवे पृ ४०७ श्लो २१,२२ ()
षष्टिदीर्घाक्षरोच्चारा मेरुका घटिका घटी।
नाडी च नाडिकायामनाडी स्याद्यामघोषिणी।।
विकालिका मानरन्ध्रा ताम्रिकाऽपयथ तद द्वयम्।। इति।

(पृष्ठ ११२ का शेष)

अस्य यन्त्रस्य व्यासोऽर्काङ्गुलात्मकः, उन्नतिः षडंगुलप्रमिता विधेया। इह पञ्चभिर्गुञ्जाभिरेको माषः, अस्य चतुः षष्ट्या पलमेकं भवति। सत्र्यंशमाषमात्र १/१/३ स्वर्णस्य चतुरंगुलप्रमिता शलाः का कार्या तया तत्पात्रं विद्धं जलघटी भवतीति।

ज्योतिर्विदाभरणेऽपि—

गुर्वक्षराणामुदितं च षष्ट्या, पलं पलानां घटिका किलेका।' इति।।
ग्रन्थान्तरेऽपि—
शीर्षे प्रसूतेर्घटिका निधेया कालोऽतिसूक्ष्मः कथितो मुनीन्द्रैः।
इत्थं घटीयन्त्रविधानमाद्यैरुदीरितं सूक्ष्मफलावबुध्यै।।
यंत्रैर्दिवासाधनमेव कैश्चिन्निट्साधनं कैश्चिदिह प्रयुक्तम्।
प्रसाध्यते येन दिवानिशांतं मुख्यं घटीयत्रमहं प्रवक्ष्ये।।
दशपला तुलयोत्तमशुल्बजा घटदलाकृतिरुच्छ्रयताऽङ्गुलैः।
रसमितैर्विसृतार्कमितांगुलैः समघना तु घटी समुदीरिता।।
चतुर्भिर्व्रीहिभिर्गुञ्जा त्रिगुञ्जा वल्ल उच्यते।
वल्लैः षोडभिर्गद्यं गद्यैः षोडशभिः पलम्।।
तौल्यै तु सार्द्धद्वयमाषहेम्नो दशार्द्धगुञ्जं प्रवदन्ति माषम्।
शला विधेया चतुरंगुलाऽऽयैस्तलैस्तु घट्या विवरं विधेयम्।। इति।

विष्णुपुराणे तु घटिकाज्ञानोपायो यथा—

निमेषो मानुषो यो यं मात्रामात्रप्रमाणकः।
तैः पञ्चदशभिः काष्ठा त्रिंशत्काष्ठास्तथा कला।।
नाडिका तु प्रमाणेन कलादश च पञ्च च।
उन्मानेनाम्भसः सा तु पलान्यर्द्धत्रयोदश।।
हेममाषैः कृतच्छिद्रा चतुर्भिश्चतुरंगुलैः।
मागधेन प्रमाणेन जलप्रस्थस्तु संस्मृतः।। इति

(शेष पृष्ठ ११४ पर)

त्रिकाण्डशेषेऽपि पृ० २७२ श्लोक ६४ अथ ताम्री स्यान्मानरन्ध्रा विकालिका।। इति।

नलिकापर्यायाः—नलः, नलकसुषिरम्, नलिंका, नलिकाबन्धः।

छिद्रप०—छिद्रम्, रंन्ध्रम्, सुषिरम्।

इह नलिकाछिद्रतो ग्रहदर्शनहेतुमाह भास्करः—'दर्शयेद्दिविचरं दिवि के वाऽनेह्रसि द्युचर' दर्शनयोग्ये।

पूर्वमेव विरचय्य यथोक्तं रञ्जनाय सुजनस्य नृपस्य।। इति सि०शि०।

[1]**दृग्ग्रहप०**—दृक्खगः, दृक्खचरः, दृग्ग्रहः, दृग्द्युचरः।

दृक्कर्मप०—दृक्कर्म, दृष्टिकर्म।

दृक्कर्मलवप०—दृक्कर्मलवः, दृष्टिकर्मलवः।

प्राग्दृग्ग्रहप०—पूर्वदृग्ग्रहः, प्राग्दृग्ग्रहः।

पशिमदृग्ग्रहप०—पश्चिमदृग्ग्रहः, प्रत्यग्दृग्ग्रहः।

[2]**ताराग्रहकुजलम्वनप०**—ताराग्रहकुजलम्बनम्।

ताराभेदाः—(१) प्रजापतिः, (२) मृगव्याधः (व्याधः), (३) ब्रह्महृद् (ब्रह्महृदयः), (४) अग्निः (हुतभुक्) (५) अगस्त्यः, (६) अपांवत्सः (आपः), (७) लुब्धकः (लुब्धः), (८) इन्द्रः (नेप्च्यूनः), (९) वरुणः (हर्शल), (१०) अभिजित् (ब्राह्मम्) चैते दशतारा अपि नभसि दृश्यन्ते।

(पृष्ठ ११३ का शेष)

नैमित्तिकलयं प्रपञ्चयिष्यन् निमेषादिक्रमेण प्रथमांशोक्तेमेव कल्पप्रमाणमनुस्मारयति निमेषः इति सप्तभिः। मात्रैव मात्रं प्रमाणं यस्य। एकमात्रलघ्वक्षरोच्चारणकालसम्मितो हि निमेषः—

निमेषकाल तुल्या हिम मात्रा लघ्वक्षरं च यत्।' इति ब्राह्माण्डोक्तेः।।

नाडिकाज्ञानोपायमाह—

उन्मानेनेति सार्द्धेन। अभ्भ स उन्मानेन उन्मीयतेऽनेनेत्युन्मानं पात्रम्। अर्द्धेन योगेन त्रयोदश सार्द्धत्रयोदशेत्यर्थः। उन्मानरूपेण घटितानि सार्द्धद्वादशपलानि सा नाडिका। सार्द्धद्वादशपलताम्रनिर्मितपात्रेण सा नाडिका ज्ञातव्येत्यर्थः। किं प्रमाणं तत्पात्रं कार्यं तदाह।

'मागधेन प्रमाणेन जलप्रस्थस्तु संस्मृतः।'

इति सार्द्धद्वादशपल जलेन हि मागधदेशप्रस्थः प्रपूर्यते। तत्प्रमाणं पात्रं कार्यमित्यर्थात्सिद्धम्। ननु तथापि पात्रेण कथं नाडिकाज्ञानं क्रियापरिच्छेद्यत्कात्कालस्येत्याशंक्य क्रियासिद्धयै प्रस्थादि विशिनष्टि। हेमेति। माषः पञ्चगुञ्जः। हेम्नो माषैश्चतुर्भिश्चतुरङ्गुलेन शलाकारूपेण रचितैः कृतच्छिद्रा। एतदुक्तं भवति। सार्द्धद्वादशपलताम्रमयं मागधप्रस्थसम्मितमूर्ध्वायित पात्रं चतुर्माषचतुरंगुलहेमशलाकया कृताधश्छिद्रं जले स्थापितं तेन च्छिद्रेण यावता कालेन पूर्यते तावान् कालो नाडिकेति। तथा च शुकः—

द्वादशार्द्धपलोन्मानं चतुर्भिश्चतुरंगुलैः।
स्वर्णमाषैः कृतच्छिद्रं यावत्प्रस्थजलप्लुतमिति।

इति तट्टीकायां श्रीधर स्वामिनः। इति श०चिं० २/८६३।

(१) दृक्कर्म्मदत्तो ग्रह आकाशे दृग्गोचरो भवति।

(२) भौमादीनां कुजलम्बनानि (क्षितिजलम्बनानि) नाम स्वस्वोदयास्तकाले लम्बनानि स्युः।

गतपर्यायाः—अतीतः, इतः, गतः, प्रगतः, यातः, व्यतीतः।

गम्यपर्या०—अगतः, एष्यः, गम्यः, भविता, भाव्यः, येयः।

तात्कालिकप०—तत्कालजः, तत्कालभवः, तात्कालिकः, तात्कालीनः।

[1]**पर्वप०**—पर्व (अन्), (न०) पूर्णिमाप्रतिपत्सन्धिः, दर्शप्रतिपत्सन्धिः।

पर्वान्तप०—अमान्तः, कृष्णगमः, कृष्णान्तः, दर्शान्तः, पर्वविरामः, पर्वविरामकालः, पर्वान्तः, पौर्णमास्यन्तः, शुक्लगमः, सितान्तः, सूर्येन्दुसङ्गमान्तः।

तिथिविरामप०—तिथिविरतिः, तिथिविरामः, तिथ्यन्तः, तिथ्यपायः स्फुटतिथ्यवसानम्।

प्रतिपदन्तप०—प्रतिपदन्तः, प्रतिपद्गमः।

विराह्वर्कप०—विपातः, विपातार्कः, विराह्वर्कः, व्यगुः, व्युगुरविः, व्यग्वर्कः।

विराहुचन्द्रप०—विराहुचन्द्रः, व्यगुचन्द्रः, व्यगुविधुः।

साग्वर्कप०—साग्वर्कः, साग्विनः।

ग्रहणप०—ग्रहः, ग्रहणम्, प्रग्रहः।

सम्भवप०—विनिश्चयः, सम्भवः।

शरप०—इषुः, कलम्बः, पृषत्कः, बाणः, शरः, सायकः शेषपर्यायास्तु कामपर्याये द्रष्टव्याः।

स्पष्टशरप०—स्पष्टबाणः, स्पष्टशरः, स्फुटबाणः स्फुटशरः।

चन्द्रशरप०—चन्द्रबाणः, चन्द्रविक्षेपः, चन्द्रशरः, विक्षेपः।

अत्राह भास्करः—

'विक्षेपइन्दोः स च बाणसंज्ञः' इति शिरोमणौ।

बिम्बप०—तनुः (स्त्री०), बिम्बः (अस्त्री), मण्डलम् (त्रि०), मानम् (न०), वपुः (उस्) (न०)।

बिम्बकलाप०—बिम्बकला, बिम्बकलिका, बिम्बलिप्ता, बिम्बलिप्तिका, मण्डललिप्ता।

[2]**अंगुलादिप०**—अंगुलादि, अगुलमुखम्, अंगुलवदनम्।

भूभाप०—अवनीभा, उर्वीप्रभा, कुभा, क्षितिभा, क्ष्माभा, भूच्छाया, भूभा, भूमिभा, मेदिनीच्छाया, राहुबिम्बम्।

सूर्यग्रहणप०—रविग्रहः, सूर्यग्रहणम्।

चन्द्रग्रहणप०—चन्द्रग्रहणम्, विधुग्रहः, विधुपिहितम्।

[3]**छाद्यप०**—ग्राह्यः, छाद्यः, पिधेयः।

[4]**छादकपर्यायाः**—ग्राहकः, छादकः, पिधानम्, सञ्छादकः।

---

(१) पर्वशब्दः पूर्णिमाऽमावस्या वाची ज्ञेयः।

(३) छादनीयो वा छादितुं योग्यश्छाद्यः।

(२) अंगुलाधो 'व्यंगुल' मपि ग्राह्यम्।

(४) छादयति यः सच्छादकः। चन्द्रग्रहणे छादको भूभा। छाद्यश्चन्द्रः। रविग्रहणे छादकश्चन्द्रः, छाद्यो रविः। ग्राह्यग्राहकयोर्योगो ग्रहणम्, योगो नामान्तराभावः ग्राह्यग्राहकयोरन्तराभावो ग्रहणम्।

मानैक्यप०—बिम्बयोगः, बिम्बैक्यम्, मण्डलयोगः, मण्डलैक्यम्, मानयोगः, मानैक्यम्।

मानैक्यखण्डप०—बिम्बयोगार्द्धम्, बिम्बैक्यखण्डम्, बिम्बैक्यार्द्धम्, मण्डलयोगार्द्धम्, मण्डलैक्यखण्डम्, मण्डलैक्यार्द्धम्, मानयोगार्द्धम्, मानैक्यखण्डम्, मानैक्यार्द्धम्।

ग्रासप०—ग्रसनम्, ग्रासः, छन्नम्, पिहितम्, स्थगितम्।

खग्रासप०—अपिहितम्, खग्रसनम्, खग्रासः, खच्छन्नम्, खच्छन्नकम्, नभश्छन्नम्, निखिलग्रहः, सर्वग्रहः, सर्वग्रहणम्।

स्थितिप०—स्थितिः।

स्थितिभेदाः—(१) स्पर्शस्थितिः, (२) मध्यंस्थितिः, (३) मोक्षस्थितिश्चेति स्थितेस्त्रयोभेदाः स्युः।

स्पर्शस्थिल्पि०—स्पर्शस्थितिः, स्पार्शिका, स्पार्शिकी।

मध्यस्थितिप०—मध्यस्थितिः, माध्यमिका, माध्यमिकी।

मोक्षस्थितिप०—मोक्षस्थितिः, मौक्तिका, मौक्तिकी, मौक्षिका, मौक्षिकी।

स्थित्यर्द्धप०—स्थितिखण्डम्, स्थितिदलम्, स्थित्यर्द्धम्।

मर्दप०—मर्दम्, विमर्दम्।

मर्दार्द्धप०—मर्दखण्डम्, मर्ददलम्, मर्दार्द्धम्, विमर्दार्द्धम्।

स्पार्शिकग्रासप०—स्पार्शिकग्रसनम्, स्पार्शिकग्रासः।

मौक्षिकग्रासप०—मौक्षिकग्रसनम्, मौक्षिकग्रासः।

स्पर्शप०—स्पर्शः (ग्रासप्रारम्भः)।

मोक्षप०—मोक्षः (ग्रासाभावः)।

पिहितप०—पिहितम्, सम्मीलनम् निमीलनम्, (सर्वबिम्बग्रासः)।

अपिहितप०—अपिहितम्, उन्मीलनम् (बिम्बोन्मुक्तिप्रारम्भकालः)।

[१]**स्पर्शकालप०**—ग्रहणमुखम्, प्रग्रहः, (आरम्भः), प्रग्रहणम्, स्पर्शकालः, स्पर्शसमयः।

[२]**मध्यकालप०**—ग्रहणमध्यम्, मध्यकालः, मध्यग्रहः, मध्यग्रहणम्, तिथिविरतिः, स्फुटतिथ्यवसानम्।

[३]**सम्मीलनकालप०**—निमीलनम्, पिहितम्, मीलनम्, सम्मीलनम्।

[४]**उन्मीलनकालप०**—अपिहितम्, उन्मीलनम्, उन्मीलनकालः।

---

(१) एष स्थितेर्दलोनके स्फुटतिथ्यन्ते भवति।

(२) स्फुटतिथ्यन्त एव मध्यं मध्यग्रहणं ग्रहणमध्यं भवति। अस्मात्प्राक् स्थित्यर्द्ध नाडीषु प्रग्रहः, परतो मुक्तिर्ज्ञेया।

(३) एष मदार्द्धनाडीषु भवति।

(४) स तु मर्दजासु नाडीषु भवति।

सकलग्रहप०—अखिलग्रहः, निखिलग्रहः, सकलग्रहः, सर्वग्रहणम्।

[१]**कङ्कणप०**—कङ्कणम्, कङ्कणग्रहः, कङ्कणग्रहणम्।

[२]**मोक्षकालप०**—ग्रहणविरामः, पर्वविरामकालः, मुक्तिः, मुक्तिकालः, मोक्षः, मोक्षकालः, विमोक्षः, विमोचनम्।

पर्वकालप०—ग्रहणाखिलकालः, पर्वकालः पर्वसमयः।

परिलेखप०—आलेख्यकर्म (अन्), छेद्यकः, परिलेखः, बिम्बलेखनम्, मण्डललेखः।

यदुक्तम्—

'न च्छेद्यकमृते यस्माद्भेदा ग्रहणयोः स्फुटाः।
ज्ञायन्ते तत्प्रवक्ष्यामिच्छेद्यकज्ञानमुत्तमम्॥' (इति सूर्यसद्धिान्ते।)

नतभेदौ—(१) प्राङ्नतम् (२) पश्चिमनतम्, चेति नतस्य वलनसिद्धयै द्वौ भेदौ स्याताम्। यत्रार्केन्द्वोर्ग्रहौ क्रमेण रात्रिदिवसयोर्भवेताम्, तदोक्तनते साध्ये।

[३]**वलनभेदौ**—(१) आक्षवलनम् (२) आयनवलनं, चेति द्वौ वलनौ स्तः।

वलनांघ्रिप०—वलनचरणाः, वलनपादाः, वलनांघ्रयः।

[४]**संस्कृतिप०**—संस्करणम्, संस्कृतिः, संस्क्रिया।

ग्रासांघ्रिप०—आशांघ्रिः, ग्रासांघ्रिः, छन्नांघ्रिः, छन्नाशांघ्रिः, दिक्चरणः, दिक्पादः।

---

(१) ग्लौबिम्बमानेऽर्कतनोः सुपुष्टे सर्वग्रहः कङ्कणमन्यथा स्यात्।

अस्यार्थः—अर्कतनोः सूर्यबिम्बाद् ग्लौबिम्बमाने सुपुष्टे गुरुतरे सति सर्वग्रहो भवति। अन्यथा नाम चन्द्रबिम्बात्सूर्यबिम्बे विस्तृततरे सति 'कङ्कणग्रहणं' ज्ञेयम्। ग्राहकबिम्बे पृथुतरे ग्राह्यमाच्छाद्य खग्रासग्रहणोद्भवः। ग्राहकबिम्बे लघुतरे सति ग्राह्यबिम्बं ग्राहकबिम्बमभितः सितकङ्कणाकृतिर्भृशं भ्राजते, ततः कङ्कणग्रहणं दृश्यते।

(२) अभ्यधिके स्फुटतिथ्यन्ते स्थितिदलेनैव मोक्षो भवति।

(३) सममण्डलप्राच्याः सकाशान्नाडिकामण्डलप्राची यावतान्तरेण वलति तदाक्षं वलनमित्यन्वर्थं नाम।

अथवा

यत्सममण्डलं सा द्रष्टुः प्राची, सममण्डलनाडिकामण्डलप्राच्योर्यदन्तरं तदाक्षं वलनम्। यतो नाडिकामण्डलसममण्डलयोरन्तरं अक्षांशा एव, तथैव नाडीमण्डलप्राच्याः क्रान्तिमण्डलप्राची यावतान्तरेण वलति तदायनं वलनं अयनसम्बन्धित्वादायनं वलनं ज्ञेयम्।

(४) संस्कृतिर्यथा—धनयोर्योगः, ऋणयोरपि योगः, धनर्णयोरन्तरमेव योगः। 'यदुक्तम्'—

योगे युतिः स्यात्क्षययोः स्वयोर्वा धनर्णयोरन्तरमेव योगः। इंति बीजगणिते।

उभयसंस्कृतिर्यथा—अयनाक्षवलनयोः संस्कृतिः, एकदिशि योगो भिन्नदिशोरन्तरम्। वलनदिक् चरणाः स्यु।

खग्रासांघ्रिप०—खग्रासांघ्रिः खच्छन्नचरणः, खच्छन्नपादः, खच्छन्नांघ्रिः, खच्छन्नाशांघ्रि

प्रसार्य्यवाचकाव्ययशब्दौ—प्रसार्य्य (अ), विगणय्य (अ०), (गणना करे इति भाषा)

[1]**सव्यप०**—सव्यम्, वामभागः।

[2]**अपसव्यप०**—अपसव्यम्, असव्यम्, दक्षिणभागः।

तदुक्तम्—

'सव्यासव्यमपागुदग्वलनजाशांघ्रीन् प्रदद्याच्छराशायाः।
स्याद् ग्रहमध्यमन्यदिशि खग्रासोऽथ वाशेषकम्। इति ग्रहलाघवे।

[3]**चन्द्रग्रहणभङ्गीप०**—चन्द्रग्रहणभङ्गी, चन्द्रंग्रहणछेद्यकलेखनम्।

वर्णप०—वर्णः, शुक्लादिः।

वर्णभेदाः—(१) धूम्रः, (२) कृष्णः, (३) कृष्णरक्तः, (४) पिशङ्गश्चैते चन्द्रग्रहणस्य वर्णाः स्युः। सूर्यस्य सदैव 'कृष्णवर्णः'। अर्कस्तु कृष्णः सदैव इत्युक्तेः।

पर्वेशप०—पर्वनाथः, पर्वस्वामी, पर्वेशः।

पर्वस्वामिनामानि—(१) ब्रह्मा (अन्), (२) शशी (इन्) (३) इन्द्रः, (४) कुबेरः, (५) वरुणः, (६) अग्निः, (७) यम श्चैते पर्वस्वामिनः स्युः।

विहितप०—ग्रस्तम्, पिहितम्।

पिधानप०—अपिधानम्, आच्छनम्, तिरोधानम्, पिधानम्।

बिम्बशेषप०—बिम्बशेषम्, मण्डलशेषम्, मण्डलावशेषः।

त्रिभोनलग्नप०—त्रिभहीनम्, त्रिभहीनलग्नम्, त्रिभोनम्, त्रिभोनलग्नम्, वित्रिभम्, वित्रिभलग्नम्, खदलम्।

[4]**लम्बनप०**—लम्बनम्, विलम्बनम्, हरिजम्,[5]।

[6]**नतिप०**—अवनतिः दृङ्नतिः, नतिः।

दृक्क्षेपप०—दृक्क्षेपः, दृष्टिक्षेपः।

(१-२) प्राचीचिन्हतो दक्षिणादिक्रमेणांघ्रीन् शराशाया दद्यात्। एवं प्राचीचिन्हत उत्तरादिक्रमेणांघ्रीन् शराशाया दद्यादित्यर्थः।

(३) अस्यां स्पर्श—मीलन मध्योन्मीलन-मुक्तयश्चेत्येतत्सर्वं दुग्गोचरं भवेत्।
'उक्तश्च' अखिलमिदं भङ्ग्यां भवेद् गोचरम्। इति।

(४) दृक्सूत्राच्चन्द्रो यावतान्तरेण लम्बितस्तल्लम्बनम्।

अथवा

गर्भीयपृष्ठीययोगयोरन्तरमेव लम्बनम्।

(५) दृग्लम्बार्कान्तरजा ज्या छेदाप्ता भवेद्धरिजम्। 'सूर्यसिद्धांते'—
हरिजज्याभाव उक्तः स यथा-'मध्य १०लग्नस्थिते भानौ हरिजस्य न सम्भवः।' इति

(६) दक्षिणोत्तरान्तरं यत्तन्नतिसंज्ञम्। दृक्क्षेपजा वित्रिभनतांशदिक्का नतिः।

दृक्क्षेपभेदौ—(१) रविदृक्क्षेपः, (२) चन्द्रदृक्क्षेपश्चैतौ दृक्क्षेपभेदौ स्तः।

[1]**विक्षेप०**—विक्षेपः।

चन्द्रपर्यायाः—इन्दुः, चन्द्रः, विधुः, शेषपर्यायाश्चन्द्रपर्याये द्रष्टव्याः।

शृङ्गप०—कूणिका, विषाणम्, शृङ्गम्।

उन्नतिप०—उदयः, उन्नतिः।

[2]**चन्द्रशृङ्गोन्नतिप०**—चन्द्रशृङ्गोन्नतिः, विधुशृङ्गोन्नतिः, शशिशृङ्गोन्नतिः।.

यदुक्तम्—

'विधुशृङ्गोन्नतिरीक्ष्यते यदह्नि तपनास्ते विधुरीक्ष्यतेऽन्यथा न।' इति ग्रहलाघवे।

उदयप०—उदयः, उद्गमः, दर्शनम्।

अस्तप०—अस्तः, लोपः, अदर्शनम्।

[3]**कालांशप०**—कालांशकाः, कालांशाः, क्षणांशकाः, क्षणांशाः, दृश्यांशाः, समयांशाः।

कालांशानाह भास्करः—

'दस्रेन्दवः शैलभुवश्च शक्रा रुद्राः खचन्द्रास्तिथयः क्रमेण।
चन्द्रादितः काललवा निरुक्ता ज्ञशुक्रयोर्वक्रगयोर्द्विहीनाः।' इति शिरोमणौ।

पातांशप०—पातभागाः, पातलवाः, पातांशकाः, पातांशाः।

पातांशानाह गणेशः—

'खाम्बुधयः खयमाः खभुजङ्गाः खाङ्गमिताः खदश क्रमशः स्युः।
पातलवाः कुसुताद् बुधभृग्वोर्मध्यमचञ्चलकेन्द्रविहीनाः।' इति ग्रहलाघवे।

भप०—उडु, नक्षत्रम्, भम्।

ग्रहप०—खगः, खेटः, ग्रहः, द्युचरः, द्युगतिः।

युतिप०—युतिः, योगः, संयुतिः।

[4]**भग्रहयुतिप०**—नक्षत्रग्रहयोगः, भग्रहयुतिः।

भग्रहयुतिमाह—नृसिंहदैवज्ञः—

'द्युचरभध्रुवकान्तरलिप्तिका द्युगतिभुक्तिहता हि गताऽगतैः।
फलदिनैर्द्युचरेऽधिकहीनके युतिरिहेतरथा खलु वक्रिणि॥' इति ग्रहलाघवस्य मल्लारिविवृतौ।

युतिपर्यायाः—युतिः, युद्धम्।

---

(१) अत्र रविग्रहेऽर्कचन्द्रयोर्याम्योरमन्तरं 'विक्षेपः' 'विक्षेपो नाम कक्षामण्डलविमण्डलयोर्याम्योत्तरमन्तरं स्यात्।

(२) मासप्रथमपादे, मासान्तपादे च चन्द्रशृङ्गोन्नतिर्द्रष्टव्या।

(३) सूर्यग्रहयोरन्तरे वर्द्धमाने सति 'ग्रहदर्शनं (ग्रहोदयः), क्षीयमाणे सति ग्रहलोपः (ग्रहास्तः) स्यात्।

(४) भध्रुवकादग्रगे शीघ्रगतिग्रहे याता युतिः। पृष्ठगे शीघ्रे गम्या युतिः वक्रगतिगृहे सा विलोमा ज्ञेया।

युतिभेदाः—(१) युतिः (युद्धम्), (२) समागमः, (३) अस्तमनम्, चेति युतेस्त्र भेदाः स्युः।

[1]**युद्धभेदाः**—(१) भेदः, (२) उल्लेखः, (३) अंशुविमर्दनम्, (४) अपसव्यम् (असव्यम्), चेति युद्धस्य चत्वारो भेदाः स्युः।

तद्भेदानाह मयः—

‘उल्लेखं तारकास्पर्शाद् भेदे भेदः प्रकीर्त्यते।
युद्धमंशुविमर्दाख्यमंशुयोगे परस्परम्॥
अंशादूनेऽपसव्याख्यं युद्धमेकोऽत्र चेदणुः।
समागमश्चेदंशादधिके भवतश्चेद्बलान्वितौ॥ इति सूर्यद्धान्ते।

युतिप०—युतिः, संयुतिः।

वियुतिप०—वियुतिः, वियोगः।

भेदप०—भेदः, वियोगः।

भेदयुतिप०—भेदयुतिः, भेदवियोगः।

[2]**पराजयप०**—पराजयः, पराभवः, रणेभङ्गः।

पातप०—पातः, पुष्पवत्क्रान्तिसाम्यम्।

पातभेदौ—(१) वैधृतपातः, (२) व्यतिपातश्चेति द्वौ पातौ स्याताम्।

[3]**वैधृतपातप०**—वैधृतपातः, समक्रान्तिकालः, महापातकालः।

[4]**व्यतिपातप०**—व्यतिपातः, व्यतीपातः, क्रान्तिलिप्तासमकालः।

गण्डान्तप०—गण्डांतम् तिथिभाङ्गसन्धिः।

तदुक्तम् —

‘नक्षत्रतिथिलग्नानां गण्डान्तं त्रिविधं स्मृतम्।
न०ति०ल०न०ति०ल०नव-पञ्च-चतुर्थानां द्वयेकार्द्धघटिकामितम् श-चिं-१/७७३

गण्डप०—गण्डः, गण्डकालः, गण्डसमयः।

उक्तं च—

‘अश्विनीमघमूलानां तिस्रो गण्डाद्यनाडिकाः।
अन्त्याः पौष्णोरगेन्द्राणां पञ्चैव जवना जगुः॥

---

(१) अन्योन्यं ताराग्रहाणां योगो युद्धं समागमश्च स्याताम्। यदा ताराग्रहाणां मिल चन्द्रेण सह तदा समागमः। चेत्तेषां मिलनं सूर्येण सह तदाऽस्तमनं स्यात्।

उक्तं च—ताराग्रहाणामन्योन्यं स्यातां युद्धसमागमौ।
समागमः शशाङ्केन सूर्येणास्तमनं सह॥ इति सूर्यसिद्धान्ते।

(२) अस्य लक्षणमुक्तं भृगुसिद्धान्ते—‘श्यामो वा व्ययगतरश्मिमण्डलो वा रूक्षो व व्ययगतरश्मिवान् कृशो वा आक्रान्तो विनिपतितः कृतापसव्यो विज्ञेयो हत इति स ग्रहो ग्रहे
इति सूर्यसिद्धान्तस्य रङ्गनाथटीकाया

(३) रवीन्द्वोः क्रान्त्योः साम्यम्।

(४) विपरीतायनगतयोश्चन्द्रार्कयोर्भगणार्द्धे तयोर्युतौ क्रान्तिलिप्ताः समाश्चेत्तदा व्यतीपात नाम महापातो भवेत्।

मूलेन्द्रयोर्दिवा गण्डो निशायां पितृसर्पयोः।
सन्ध्याद्वये तथा ज्ञेयो रेवतीतुरगर्क्षयोः' इति श०चिं०२/१/७७१-७२।

खेटमण्डलान्तरप०—खेटमण्डलान्तरम्, ग्रहबिम्बकेन्द्रान्तरम्।

॥ इति बिहारप्रान्तसहरसामण्डलान्तर्गतदोरमाग्रामवास्तव्येन दैवज्ञचूड़ामणिश्रीसूर्यनारायणसूनुना डॉ० सुरकान्तझाख्येन ज्योतिर्विज्ञानशब्दकोषे ग्रहगणितसर्गः अष्टमः ॥८॥

अथ भावादिसर्गः-९

भावपर्यायौ—भावः, तन्वादिः।

भावभेदाः—(१) तनुः, धनम्, (३) सहजः, (४) सुखम् (५) सुतः, (६) रिपुः, (७) जाया, (८) मृत्युः, (९) धर्म्मः, (१०) कर्म (अन्) (न०), (११) लाभः, (१२) व्ययः,-चेत्येते द्वादशभावाः सन्ति।

तनुवाचकशब्दाः—(१) क४म्, ख१०म्, प्राक्, (२) अङ्गम्, आ५त्मा (अन्), आदिः, आद्यः, कल्पम्, कल्यम्, कायः, कु१०लम्, क्षेत्र४म्, गात्रम्, घनः, च्युतिः, जन्म (अन्), तनुः, तनूः, देहः, पिण्डम्, पुरम्, पूर्वः, पौरम्, मूर्तिः, मूर्धा (अन्), मूलम्, लग्नम्, लेखा, वपुः (उष्), वर्ष्म (अन्), श३क्तिः, शिरः (अस्), शीर्षम्, होरा (३) आदिमः, उदयः उदयन् (त्), उद्गतः, उद्गमः, पुद्गलः, प्रथमम्, प्राक्कुजम्, प्राग्लग्नम्, भूकेन्द्रम्, विग्रहः, विलग्नम्, शरीरम्, साम३र्थ्यम्, हरिजम् (४) अभ्युदितम्, उत्तमाङ्गम्, उदयाद्रिः, कञ्जासनम्, कलेवरम्, जीवगृहम्, निर्विलग्नम्, प्राक्क्षितिजम्, प्राग्विलग्नम्, संहननम्, समुदयः, समुद्गतः समुद्गमः, होरालेखा, (५) उदयगिरिः, उदयाचलः, पूर्वविलग्नम्, प्रथमलग्नम्, (६) उदयशिखरिः। इति।

धनप०—(१) गीः (गिर्), दृग् (श्), द्विः, धम्, राः (रै), वाक् (च्), स्वम्, (२) अक्षि (न्), अर्थः, आस्यम्, ऋक्थम्, कोशः-षः, गिरा, गोत्र१०म्, दृष्टिः, द्युम्नम्, द्रव्यम्, धनम्, धान्यम्, निधिः, नेत्रम्, पोष्यम्, ब्राह्मी, भाषा, उक्तिः, मुखम्, रिक्थम् वक्त्रम्, वचः (अस्), वसु, वाणी, वित्तम्, सारम्, (३) आननम्, ईक्षणम्, कुटुम्बम्, कौटुम्बम्, द्रविणम्, द्वितयम्, द्वितीयम्, नयनम्, निधानम्, भर्त्तव्यम्, भारती, लपनम्, लोचनम्, वचनम्, वदनम्, वाक्स्थानम्, विभवम्, शेवधिः, हिरण्यम्, (४) परिच्छेदः, परिजनः, परिबर्हः, परि (री) वारः, पोष्यवर्गः, भरणीयम्, विलोचनम्, सरस्वती, स्वापतेयम्।

सहजवा०—(१) त्रिः, दोः (ष्),

(२) अस्त्रम्, उरः (अस्), ऊर्जम्, ओजः (अस्), कण्ठः, करः, गलः, तरः (अस्), तेजः (अस्), त्रिकम्, दासः, धन्वी (इन्), धैर्यम्, पाणिः, प्राणः, प्रेष्यः, बलम्, बाहुः, बीजम्, भुजः, भुजा, भृत्यः, योद्धा (द्धृ), योधम्, यौधः, लोकः, वक्षः (अस्), वह्निः (इ०कैश्चित्), वीर्यम्, शक्तिः, शुष्मम्, शौर्यम्, श्रवः (अस्), श्रुतिः, श्रोत्रम्, सहः, सहः (अस्) (न०), स्थामन् (अन्), हस्तः। (३) अनुगः, अनुजः, उद्यमः, किङ्करः, तृतीयम्,

त्रितयम्, दायादः, दुश्चिक्यम्, दुश्चित्कम्, धानुष्कम्, पौरुषम्, प्रतापः, प्रभावः, भृत योधनम्, योधेयः, यौधेयः, विक्रमम्, विक्रान्तः, श्रवणम्, सगर्भ्यः, सहजः, सह सहोत्थः, सामर्थ्यम्, सेवकः, सोदरः, सौदर्य्यः, (४) अनुचरः, पराक्रमः, सह४ सहोत्पन्नः, सहोदरः, (५) समानोदर्य्यः।' इति।

सुखभाववा०—(१) आपः (अप्) (स्त्री०ब०), कम्, कुः, ख१०म्, बम्, भूः, (त्), वाः (र्), स्वः (बन्धुः), हृद् (त्), (२) अबा, अम्बा, अम्बु (न०), अम्भः (अ अर्णः (अस्), असुः?, एधा, ओकः (अस्), काण्डम्, कुटम्, कुटिः, कु१०लम्, कुर क्षितिः, क्षीरम्, क्षेत्रम्, गृहम्, गृहाः (पुं०ब०), गेहम्, चित्तम्, चेतः (अस्), जल ज्ञा६तिः, तुरम्, तुर्य्यम्, तूर्य्यम्, तोयम्, दकम्, दायः, धाम (अन्), धिष्ण्यम्, ना निष्कम्, नीरम्, पत्रम्, पयः (अस्), पस्त्यम्, पाथम्, पाथः (अस्), पुरम्, प्रसूः, प्रि प्रीतिः, बन्धुः, बहिः (ष्), बाह्यम्, मनः (अस्), माता (तृ), मित्रम् (अजहल्लिङ्गम) (न यानम्, युग्यम्, वनम्, वप्रः, वस्त्यम्, वयः (अस्), वारम्, वारि (न०), वासः, व विप५द्या, विशम्, विषम्, वृद्धिः, वेश्म (अन्), शर्म (अन्), शातम्, शाला, सखा (द्वि सद्म (अन्), सुखम्, सुहृत् (द्), सौख्यम्, स्फातिः, स्वान्तम्, हर्षः, हितम्, (३) अगा अमृतम्, आगारम्, आनन्दः, आमोदः, आलयः, आस्प१०दम् उदकम्, उरजम्, कबन्ध कमन्धम्, कमलम्, कीलालम्, कुटीरम्, कुतलम्, कृपीटम्, केदारः क्षणदम्, गोनि चतुर्थः, जननी, जनित्री, जीवनम्, तुरीयम्, धोरणम्, निकाय्यः, निकेतम्, निल निवासः, निशान्तम्, पातालम्, पानीयम्, पुष्करम्, प्रमदः, प्रमोदः, बान्धवः, भव भुवनम्, भूतलम्, मन्दिरम्, मानसम्, वयस्यम्, वसतिः, वेसस्तिः, वाहनम्, शम्ब शरणम्, सगोत्रः, सदनम्, सम्वरम्, समृद्धिः, सरिलम्, सलिलम्, सावित्री सागरः, (इ०कै सादनम्, सुहितः, स्वजनः, हिबुकम्, हृदयम्, (४) आनन्दथुः, घनरसः, जनयित्री, जीवनी नागलोकः, निकेतनम् , बलिसद्म (अन्), मेघपुष्पम्, रसातलम्, वृद्धिस्थानम्, सरित्स्था सहचरः, स्थिरातलम्, (५) अधोभुवनम्, उदवसितम्, सर्वतोमुखम्, (८) अनलहरनिल इति।

सुतभाववा०—(१) गौः (गो), चित्, धीः, (२) आत्मा (अन्), गर्भः, च ज्ञप्तिः, तन्तुः, तुन्दम्,देवः, पण्डा, पुत्रः, प्रजा, प्रेक्षा, बुद्धिः, मतिः, मनुः, मंत्रः, मे राजः? विदा, विद्या, संवित् (द्), सुतः, सूनुः, स्वजः, स्वा४न्तम् ? (३) अक्ष अपत्यम् (अजहल्लिङ्गम्) (न०), आत्मजः, आनन्दः, आस्प१०दम् ? उदरम्, कुमा चेतना, जठरम्, तनयः, तनुजः, तनुभूः, तनूजः, तनूत्थः, तनूभूः, त्रिकोणम्, दार धिषणा, नन्दनः, पञ्चकः, पञ्चमः, प्रतिपत्, (द्), प्रतिभा, प्रतिमा, प्रभ३वः, प्रसू मनीषा, वाक्स्था२नम्, विवेकः, शेमुषी, सन्ततिः, सन्तानः (४) उपलब्धिः, तनुजनि

तनुजन्म (अन्), तनुजातः, तनुभवः, तनूत्पन्नः, तनूद्भवः, तनूभवः, सचि१२वादि, (५) तनुप्रसूतिः, पितृनन्दनः, इति।

रिपुभाववा०—(१) चः, द्विट् (ष्), भीः, रुक् (ज्), (२) अंशः, अरिः, अरुः (उस्), अस्त्रम्, आमः, ईर्म्मम्, कटिः, कोपः, क्रोधः, क्लेशः, क्षतम्, क्ष१२तिः, खलः, गदः, घातः, त्रासम्, दरम्, दस्युः, सुहृद् (त्) दुष्टम् द्विषद् (त्), द्विषा (अन्), द्वेषः, द्वेषी (इन्), द्वेष्यः, नाभिः, नेष्टम्, परः, भङ्गः, भयम्, भीतिः, मान्द्यम्, रिपुः, रुजा, रोग, लोभः, विघ्नः, वैरी (इन्), व्याधिः, व्रणः, शत्रुः, शस्त्रम्, षष्ठः, हा१२निः, हतिः, (३) अनात्मा (अन्), अमित्रः, अरातिः, अहितः, आकल्यम्, आतंकः, आमयः, आयुधम्, जिघांसुः, तस्करः, द्वेषणः, प्रत्यर्थी (इन्), मत्सरः, मातुलः, मोषकः, विपक्षः, विद्विषः, व्यसनम्, शात्रवः, षट्कोणम्, सपत्नः, साध्वसम्, (४) अपाटवम्, अभिघाती (इन्), अभिभवः, अभियातिः, अभियाती (इन्), असहजः, असहनः, उपतापः, चोरस्थानम्, ज्ञातिस्थानम्, परिपन्थी (इन्), परिभवः, प्रत्यनीकम्, प्रहरणम्, वैरिस्थानम्, (५) अभिजिघांसुः, द्विषदगारम्, (७) प्रवलतररिपुः। इति।

जायाभाववा०—(१) इः, दम् (अ०), दा, स्त्री, (२) अध्वा (अन्), अर्यः, अर्या, अस्तः, कान्तः, कान्ता, कामः, क्षीर४म्, गिरिः (इ०कैश्चित्), गुडम्, गुप्तम्, जाया, तन्वी, दधि, दाराः (पुं०ब०), दारा (स्त्री), द्युनम्, द्यूतम्, द्यूनम्, नारी, पतिः, पत्निः-त्नी, पथः पन्था (पथिन्), पद्या, प्रियः-या, भार्या, भीरुः, मदः, मादः, मारः, मार्गः, रतिः, लोकः (कैश्चित्), वस्तिः, वधूः, व९र्त्म (अन्), वा९टः, सूपम्, सृ९तिः, स्मरः, (३) अङ्गना, अज्ञता, अतनुः, अनङ्गः, अय९नम्, अस्तभम्, आत्मभूः, उत्तमा, कन्दर्पः, कलत्रम् (न०), कोपना, गन्त९व्यम्, गम९नम्, गृहिणी, चित्तजः, चित्तोत्थः, जामित्रम्, दयिता, दर्पकः, दारभम्, द्वितीया, नदीशः (इति कैश्चित्), निवृत्तिः, प९दविःवी, प९द्धतिः-ती, पर्वतः (इति कैश्चित्), पुरन्ध्री, प्रद्युम्नः, प्रेयाः-सी, मनोजः, मनोभूः, मन्मथः, मुहिरः, यामित्रम्, युवतिः, रमणी, वधुटी, वधूटी, वर्तनिः-नी, विवाहः, श९रणिः, सप्तमः, स९रणिः, (४) अनन्यजः, अस्तमयम्, एकपदी, कुटुम्बिनी, कुसुमेषुः, गति९स्थानम्, चेतोजन्मा (अन्), जलजाक्षी, दारालय;, पंकजाक्षी, पञ्चबाणः, पञ्चशरः, परिणयः, पुष्पधन्वा (अन्), प्रियतमः-मा, भर्तृस्थानम्, भार्यास्थानम्, मनसिजः, मनोभवः, मूत्रकृछ्रम्, रतिपतिः, वधूगृहम्, वरारोहा, शम्बरारिः, सम्बरारिः, सुवासिनी, (५) असमहेतिः, अस्तभवनम्, कलत्रसम्पद् (त्), कुसुमशरः, दर्पप्रगेहम्, परिणयनम्, (न०), पाणिगृहीता-ती, मकरध्वजः, मकरेङ्गितः, मत्तकासिनी, मदनास्पदम्, मीनकेतनम्, वरवर्णिनी, विषयशरः, सहसर्मिणी, (६) एणनयनाङ्गम्, कामिनीमन्दिरम्, नीरजलोचना, पयोरुहचक्षुः (ष्), (७) द्रुहिणगृहमुखी, सुनयनाभवनम्। इति।

मृत्युभाववा०—(१) युत् (ध्), (२) अत्ता (तृ), अन्तः, आजिः, आयुः, आयुः (ष्), (न०), कलिः, कालः, क्षयः, गुह्मम्, च्यु१तिः, छिद्रम्, जन्यम्, ध्वस्तम्, नाशः,

बन्धः, मृतिः, मृत्युः, मृधम्, याम्यम्, युद्धम्, योधम्, रणः (पुं०न०) रन्ध्रम्, रोकम् रोऽगः, लयः, वधः, वपा, विलम्, व्याऽधिः, शान्तः (त्रि०), शुषि, श्वभ्रम्, संयत् (द्) (पुं०स्त्री), संख्यम्, समित्, (द्) (स्त्री), सुषिः, हरः, (३) अनीकः, अन्तकः, अत्ययः अ१२पायः, अष्टमः, आहवः, कलहः, कुटिलम्, कुहरम्, जीवितम्, दिष्टान्तः, निधनम् निर्याणम्, निलयः, नैधनम्, पञ्चता, पञ्चत्वम्, पन्नगः (इति कैश्चित्), प्रधनम्, प्रलयः मरणम्, माङ्ग९ल्यम्, योधनम्, विग्रहः, विनाशः, विरतिः, विरामः, विलयः, विवरम् संयुगः, संस्थानम्, संस्फेटः, संस्फोटः, सङ्गरः, संग्रामः, समरः, समितिः, समीकम् सुषिरम्, (४) अभिमर्दः, अभ्यागमः, अभ्यामर्दः, आयोधनम्, आस्कन्दनम्, कालगेहम् कालधर्मः, दीर्घनिद्रा, दुरोदरः, निपतनम्, निमीलनम्, निर्व्यथनम्, पराभवः, पराभूतिः, परिभावः, महायात्रा, लयपदम्, समाधानं, समुदायः, सम्प्रहारः, अभिसम्पातः, आयुर्विशेषः, कालभवनम्, क्षतऽपर्यायः, जीवितकालः, जीवितफलम्, देहविवरम्, निधनपदम्, प्रविदारणम् मरणपदम्, सम्परायिकम्, साम्परायिकम्, (६) कृतान्तभवनम्। इति।

भाग्यभाववा०—(१) तम्, धः, शम्, (२) अध्वा (अन्), आर्यः, ऊरुः, क्रतुः क्षेमम्, गुरुः, जपम्, ज्ञा३नम्, तपः (अस्), तीर्थम्, दया, दानम्, दिष्टम्, दैवम्, धर्म्मः नन्दः (इति कैश्चित्), पथः, पंथा (थिन्), पद्या, पुण्यम्, मंदम्, भद्रम्, भव्यम्, भाग्यम् मनः (अस्), मार्गः, यज्ञः^{१०}, वाटः, विधिः, विभुः, वृषः, शस्तम्, शिवम्, शुभम्, श्रेयः (अस्) सृतिः, स्वान्तम्, (३) अध्वरः^{१०}, अध्वयुक् (ज्), अयनम्, अर्जितम्, आचार्यः कल्याणम्, कुशलम्, तपस्या, त्रिकोणम्, दीक्षणम् देशिकः, नवमः (त्रि०), नियतिः पदविः-वी, पद्धतिः-ती, पैत्रिकम्, भविकम्, भावुकम्, मङ्गलम्, मानसम्, शरणिः, सरणिः सुकृतम्, हृदयम्, (४) एकपदी, गुरुदेवः, त्रित्रिकोणम्, पितृगृहम्^{१०}, भागधेयम्, श्वः श्रेयसम्, (५) त्र्याद्यत्रिकोणम्, (६) देवतालयपदम् ^{५}।। इति।

कर्म्मभाववा०—(१) खम्, दिव्, द्युः (अ०), द्यौः, राट् (ज्), (२) अभ्रम् आज्ञा, कर्म (अन्), कीर्तिः, कुलम्, कृत्यम्, क्रतुः, क्रिया, क्ष्मेश, जयः, जानुः, ज्ञानम् तातः, धाम (अन्), नभः (अस्), नाकः, नादः, नृपः, पंक्तिः, पदम्, पिता (तृ), मध्यः मानः, यशः (अस्), राजा (अन्), राज्यम्, वंशः, वियत् (द्), व्योम (अन्), शिष्टिः (३) अच्युतः, अनन्तम्, अन्वयः, अम्बकः, अम्बरम्, आकाशः (पुं०न०), आबुकः आशाख्या, आस्पदम्, गगनम्, जनकः, जनिता (तृ), जीव५नम्, दशमः (त्रि०) दैत्यारिः, निदेशः, पुष्करम्, प्रतिष्ठा, मध्यमः (त्रि०), मेघाध्वा (अन्), वणिज्या वाणिज्यम्, विहायः (अस्), व्यापारः, शासनम्, समज्ञा, सविता (तृ०), (४) अन्त (री) क्षम्, अववादः, उडुपथः, कीर्तिस्थानम्, जनयिता (तृ), तारापथः, नभस्थलम् निषिक्तकः, मधुहरः, महाविलय्, मेषूरणम्, राज्यपदम्, विष्णुपदम्, विहायसः, सुरवर्त्म (अन्)

(५) अमरवर्त्म (अन्), गगनतलम्, गरुडधरः, गुणप्रवृत्तिः। (६) चित्तसमुन्नतिः, (७) दनुजदलहरः। इति।

लाभभाववा०—(२) अयः, आप्तिः, आयः, ईशः (इति कै०), जंघाः, तपः९ (अस्), प्राप्तिः, फलम्, भवः (इति कै०), भावः, रुद्रः (इ०कै०), लब्धिः, लाभः, शिवः (इ०कै०), (३) अधिकम्, अयानम्, अवाप्तिः, आगमः, उपान्त्यम्, गिरीशः (इ०कै०), जघनम्, लभनम्, सम्प्राप्तिः, (४) एकादशः (त्रि०), देवदेवः (इ०कै०), नन्दिनाथः (इ०कै०), फलागमः, मनोरथः, समवाप्तिः, (५) धनाद्यागमः, (७) पशुपतिनिलयः (इति कैश्चित्)।

व्ययभाववा०—(१) पद् (त्) (२) अकम्, अंह्रि, अंघ्रिः, अन्तः, अन्त्यः, अर्तिः, आर्तिः, कष्टम्, कृच्छ्रम्, क्षतिः, त्यागः, दुःखम्, ध्वान्तम्, नाशः, पदम्, पादः, पापम्, पाप्मा (अन्), पीडा, प्रान्त्यम्, बंधः, मंत्री (इन्), रिःफम्, रिप्पम्, रिप्फम्, रिष्फम्, बाधा, व्यथा, व्ययः, हानिः, (३) अन्तिमः, अपायः, अप्राप्तिः, अमात्यः, अलब्धिः, आभीलम्, चरणः, चरमम्, जघन्यम्, द्वादशः (त्रि०), निवृत्तः, पश्चिमः, पाश्चात्यः, पीडनम्, व्यथनम्, शयनम्, सचिवः, (४) अपचयः, अपचितिः, अमानस्यम्, अवसानम्, आमनस्यम्, धीसचिवः, प्रसूतिजम्, व्ययस्थानम्, (५) क्षयसूचकम्, बुद्धिसहायः, लग्नान्त्यखण्डम्। इति।

आधेय(ग्रह)पर्यायाः—अभ्रगः, खचरः, खेटः, ग्रहः, इति। शेषपर्यायास्तु ग्रहवर्गे द्रष्टव्याः।

आधार (राशिः, स्थानम्, भावश्च) **पर्यायाः**—ऋक्षम, भम, राशिः, इति। शेषपर्यायास्तु राशिवर्गे द्र०। स्थानपर्याया भावपर्यायाश्चास्मिन्नेव वर्गे द्रष्टव्याः।

इह एतदुक्तिर्विचारणीया—

'आधेयाः स्युर्भास्कराद्या ग्रहेन्द्रा आधारा भस्थानभावा निरुक्ताः।
यद्याधारा सौम्ययुक्तेक्षिता ये तेषां पुष्टिर्हानिरुक्ताऽन्यथा तु।। इति।

स्थानवाचकशब्दाः—आयतनम्, आश्रयः, आस्पदम्, गृहम्, धाम (अन्), निकेतम्, निवासः, पदम्, भावः, संश्रयः, स्थलम्, स्थानम्। इति।

पूर्णार्थसंख्यावाचकस्थाननामानि—(१) प्रथमः, (२) द्वितीयः, (३) तृतीयः, (४) चतुर्थः, (५) पञ्चमः, (६) षष्ठः, (७) सप्तमः, (८) अष्टमः, (९) नवमः, (१०) दशमः, (११) एकादशः, (१२) द्वादशश्चैतानि लग्नादीनां द्वादशस्थानानां नामानि संति। तानि त्रिषु ज्ञेयानि।

इह दृश्यादृश्यार्द्धादिकं पूर्वापरार्द्धं चैतदुक्तितो विचार्य्यते—

'कामस्यैष्यलवाद्यमङ्गभगतांशांतंसमस्तंदलंदृश्यं वामवपुस्तथोदितमथादृश्यार्द्धमन्यत्ससम्।
दक्षाङ्गं च तथा बुधैरनुदितं मानैष्यभागादिकं पातालस्य गतांशकांतमखिलं पूर्वार्द्धमन्यत्परम्।।

इति ज्योतिस्तत्त्वे ४/१०९।

सप्तमभावस्य भोग्यांशतः आरभ्यं लग्नभुक्तांशपर्यतं समग्रखण्डं 'दृश्यभागः' वामशरीरं, उदितं चोच्यते।

एवं तनुभावस्य भोग्यांशत आरभ्य सप्तमभुक्तांशपर्यंतं समग्रखण्डं अदृश्यार्द्धम्, 'दक्षिणाङ्गम्' 'अनुदितं', चोक्तम्। इति, 'दशमतश्चतुर्थश्च' 'पूर्वार्द्ध' परार्द्धं च ज्ञेयमिति।

उपचयभावनामानि—तृतीयः, षष्ठः, दशमः, लाभश्चैतानि उपचयभावनामानि।

उपचयपर्यायाः—उपचयः, ऋद्धिः, एधा, चयः, चितिः, वृद्धिः, समुपचयः, इति।

त्रिकभावनामानि—षष्ठः, अष्टमः, द्वादशश्चैतानि त्रिकभावनामानि।

त्रिकवाचकशब्दाः—अनिष्टम्, अरिष्टभावः, त्रिकम्, दुष्टम्, दुःस्थः, पीडास्थानम्, बाधकः, बाधास्थानम् इति।

पतितभावनामनी—षष्ठः, व्ययश्चैते पतितभावनामनी।

पतितपर्यायः—पतितम्।

केन्द्रभावनामानि—लग्नम्, चतुर्थम्, सप्तम, दशमश्चैतानि केन्द्रभावनामानि।

केन्द्रपर्यायाः—कण्टकम्, कीचकम्, केन्द्रम्, चतुःकेन्द्रम्, चतुष्कचतुष्टयम्, चतुष्टयम्।

पणफरभावनामानि—द्वितीयम्, पञ्चमम्, अष्टमम्, एकादशं, चैतानि पणफरभावनामानि।

पणफरपर्यायः—पणफरम्।

आपोक्लिमभावनामानि—तृतीयम्, षष्ठम्, नवमम्, द्वादशं, चैतानि आपोक्लिमभावनामानि।

आपोक्लिमपर्यायाः—आपोक्लिमम्।

अपचयभावनामानि—लग्नम्, धनम्, सुखम्, सुतः, जाया, मृत्युः, दशमम्, एकादशं, चैतान्यपचयभावनामानि।

अपचयपर्यायाः—अपचयः, अनुपचयः, पीडभम्, पीडर्क्षम् इति।

सुभावनामानि—लग्नम्, तृतीयम्, सुखम्, पञ्चमम्, सप्तमम्, नवमम्, दशमम्, एकादशम्, चैतानि सुभावनामानि।

सुस्थानपर्यायाः—सत्स्थानम्, सत्प्रदभम्, सुस्थानम् ।

त्रिकोणभावनामनी—पञ्चमम्, नवमं, चैते त्रिकोणभावनामनी स्तः।

त्रिकोणपर्यायाः—कोणम्, त्रिकोणम्, शस्तम्।

ज्ञानभावनामानि—द्वितीयम्, चतुर्थम्, पञ्चमम् चैतानि ज्ञानभावनामानि।

ज्ञानपर्यायः—ज्ञानम्।

लीनभावनामानि—तृतीयः, षष्ठः, अष्टमः, व्ययश्चैतानि लीनभावनामानि।

लीनपर्यायः—लीनम्।

आयुर्गृहनामनी—तृतीयम्, अष्टमं, चैते आयुर्गृहनामनी।

आयुर्गृहपर्यायाः—आयुःस्थानम्, आयुर्गृहम्, आयुर्भवनम्।

मारकगृहनामनी—द्वितीयम्, सप्तमं, चैते मारकगृहनामनी।

मारकगृहपर्यायाः—मारकगृहम्, मारकभवनम्, मारकस्थानम्।

नेत्रगृहनामनी—द्वितीयम्, व्ययश्चैते नेत्रगृहनामनी।

नेत्रगृहपर्यायाः—चक्षुर्गृहम्, नयनभवनम्, नेत्रगृहम्, लोचनालयः।

मैत्रीपर्यायाः—अजर्यम्, मैत्री, सख्यम्, सङ्गतम्, साप्तपदीनम्, सौहार्दम्, सौहृदम्।

मैत्रीभेदाः—(१) तत्कालमैत्री, (२) निसर्गमैत्री, (३) पञ्चधामैत्री, चैते मैत्र्यास्त्रयो भेदाः स्युः।

तत्कालमैत्र्याः प्रभेदौ—(१) मित्रभवनानि (२) शत्रुभवनानि चैतौ द्वौ प्रभेदौ स्याताम्।

स्वतो मित्रभवननामानि—द्वितीयम्, तृतीयम्, चतुर्थम्, दशमम्, एकादशम्, द्वादशम्।

स्वतः शत्रुभवननामानि—एकभम्, पञ्चमम्, षष्ठम्, सप्तमम्, अष्टमम्, नवमम्।

निसर्गमैत्र्याःप्रभेदाः—(१) मित्राणि, (२) समाः (समानाः, उदासीनाः), (३) शत्रवश्चैते निसर्गमैत्र्यास्त्रयः प्रभेदाः स्युः।

मित्रग्रहनामानि—(१) चन्द्रारजीवाः, (२) ज्ञार्कौ, (३) रवीन्द्विज्याः, (४) भार्कौ, (५) रवीन्द्वाराः (६) ज्ञार्की, (७) ज्ञाच्छौ, चैतद्रव्यादिग्रहाणां क्रमान्मित्राणि सन्ति।

समग्रहनामानि—(१) बुधः, (२) भौमेज्यभार्कयः, (३) भार्की, (४) आरेज्यार्कयः, (५) शनिः, (६) आरेज्यौ, (७) जीवश्चैते रवेः क्रमात्सप्तग्रहाणां समाः सन्ति।

शत्रुग्रहनामानि—(१) भार्की, (२) अभावः, (३) बुधः, (४) चन्द्रः, (५) भाच्छौ, (६) रवीन्दू, (७) रवीन्द्वाराश्चैते रवेः क्रमात्सप्तग्रहाणांसपत्नाः सन्ति।

पञ्चधामैत्र्याः प्रभेदाः—(१) अधिमित्राणि, (२) मित्राणि, (३) समाः, (४) शत्रवः, (५) अधिशत्रवश्चैते पञ्चधामैत्र्याः पञ्चप्रभेदाः सन्ति।

ते च यथा—

(१) द्विधा (तत्कालनिसर्गमैत्र्योः) मित्रता = अधिमित्रता।
(२) द्विधा (तत्कालनिसर्गमैत्र्योः) शत्रुता = अधिशत्रुता।
(३) एकत्र मित्रता अन्यत्र शत्रुता = समता।
(४) एकत्र मित्रता अन्यत्र समता = मित्रता।
(५) एकत्र शत्रुता अन्यत्र समता = शत्रुता।

एवमनेन पञ्चधा मैत्री विज्ञेया।

सन्मित्रपर्यायाः—शुभसुहृत् (द्), सन्मित्रम्, स्विष्टः।

कारकपर्यायाः—कर्ता, कारकः, विधायकः।

कारकभेदौ—(१) चरकारकः (२) स्थिरकारकश्चैतौ कारकस्य द्वौ भेदौ स्याताम्।

चरकारकनामानिः—(१)आत्मकारकः, (२) अमात्यकारकः, (३) भ्रातृकारकः, (४) मातृकारक, (५) पितृकारकः, (६) पुत्रकारकः, (७) ज्ञातिकारकः, (८) दाराकारकश्चैतेंऽशाधिकतः क्रमेणाष्ट चरकारकाः स्युः।

भाव (स्थिर) कारकग्रहनामानि—(१) सूर्यः, (२) गुरुः, (३) भौमः, (४) ज्ञेन्दू, (५) गुरुः, (६) भौमार्की, (७) शुक्रः, (८) शनिः, (९) सूर्येज्यौ, (१०) ज्ञार्केज्यार्कयः, (११) गुरुः, (१२) शनिश्चैते तनुभावतः क्रमेण स्थिरभावकारकाः स्युः।

वर्गप०—कला, गणः, वर्गः।

जातके वर्गभेदाः—(१) षड्वर्गाः, (२) सप्तवर्गाः, (३) दशवर्गाः, (४) षोडशवर्गा-

श्चैते होराशास्त्रे वर्गाणां चत्वारो भेदाः स्युः तथा ताजिकशास्त्रे तु 'द्वादशवर्गी' इत्येको भेदः।

षड्वर्गप्रभेदाः—(१) गृहम्, (२) होरा, (३) द्रेष्काणः (दृगाणः), (४) नवमांशकः, (५) द्वादशांशकः, (६) त्रिशांशकश्चैते षड्वर्गप्रभेदाः स्युः। एते यात्राविवाहादिमुहूर्तेषु चिन्तनीयाः।

सप्तवर्गप्रभेदाः—(१) गृहम्, (२) होरा, (३) द्रेष्काणः (४) सप्तांशः (५) नवांशः (६) द्वादशांशः (७) त्रिशांशश्चैते सप्तवर्गप्रभैदा स्युः एते जातकपद्धत्युक्तरीत्या बलाधानयने चिन्तनीयाः।

दशवर्गप्रभेदाः—(१) गृहम् (२) होरा, (३) द्रेष्काणः, (४) सप्तांशः (५) नवांशः, (६) दशमांशः, (७) द्वादशांशः, (८) षोडशांशः, (९) त्रिंशांशः, (१०) षष्ट्यंशश्चैते दशवर्गप्रभेदाः स्युः। अमी पारिजातांशादितः फलचिन्तने चिन्तनीयाः।

षोडशवर्गप्रभेदाः—(१) गृहम्, (२) होरा, (३) द्रेष्काणः, (४) चतुर्थांशः, (५) सप्तांशः, (६) नवांशः, (७) दशमांशः, (८) द्वादशांशः, (९) षोडशांशः, (१०) विंशांशः, (११) सिद्धांशः, (१२) भांशः, (१३) त्रिंशांशः, (१४) खवेदांशः, (१५) अक्षवेदांशः, (१६) षष्ट्यंशश्चैते षोडशवर्गप्रभेदाः स्युः। इमे जातकेषु सूक्ष्मफलचिन्तने चिन्तनीयाः।

ताजिकशास्त्रे द्वादशवर्गीप्रभेदाः—(१) गृहम्, (२) होरा, (३) द्रेष्काणः, (४) चतुर्थांशः, (५) पञ्चमांशः, (६) षष्ठांशः, (७) सप्तांशः, (८) अष्टमांशः, (९) नवांशः, (१०) दशमांशः, (११) एकादशांशः, (१२) द्वादशांश,—श्चैते द्वादशवर्गीप्रभेदाः स्युः। एते वर्षफलानयने बलसाधनाय चिन्तनीयाः।

गृहादीनामंशादिप्रमाणमित्थम्—

गृहे ३०°।, होरायाम् १५°।, द्रेष्काणे १०°।, चतुर्थांशे ७°। ३०' ०'', सप्तांशे ४°। १७'। ९'।; नवांशे ३°। २०'।, दशमांशे ३°। ०'।, द्वादशांशे २°। ३०'। षोडशांशे १°। ५२'। ३०''।, विंशांशे १°। ३०'। ०'' सिद्धांशे १°। १५'। ०''।, भांशे १°। ६'। ४०'' त्रिंशांशे तु समराशिषु ५°।७°।८°।५°।५°अंशानां क्रमेण भज्ञेज्यावार्क्यारास्तदंशेशाः। ओजराशिषु ५°। ५°।। ८°। ७°। ५°अंशानां क्रमेण भज्ञेज्यार्क्यारास्तदंशेशाः। खवेदांशे०°। ४५'। ०''।, अक्षवेदांशे ०° ४०'। ०''।, षष्ट्यंशे ०°। ३०'। ०'' एतदुक्तप्रमाणं स्वस्वप्रमाणेन पृथग् गुणयेत्तदा निजनिजप्रमाणं भवेत्।

पारिजाताद्यंशानां नामानिः—(१) पारिजातांशः, (२) उत्तमांशः, (३) गोपुरांशः, (४) सिंहासनांशः, (५) पारावतांशः, (६) देवलोकांशः, (७) ब्रह्मलोकांशः, (८) ऐरावतांशः, (०) श्रीधामांश,-श्चैत्येते 'वैशेषिकांशका' ज्ञेयाः।

होरापर्यायाः—भदलम्, भार्द्धम्, राशिदलम्, राश्यर्द्धम्, होरा।

द्रेष्काणप०—त्रिभागः, त्रिलवः, त्र्यंशः, दृक्काणः, दृगाणः, द्रेष्काणः।

सप्तांशप०—सप्तमांशः, सप्तांशः नगांशः, शैलांशः।

नवांशप०—अंशः, अंशकः, अङ्कभागः, अङ्कलवः, अङ्कांशः, अङ्कांशकः, कला, गोंशः, गोंशकः, गोभागः, गोलवः, नन्दांशः, नवभागः, नवलवः, नवांशः, नवांशकः।

दशमांशप०—दशमभागः, दशमलवः, दशमांशः, दशमांशकः, दिगंशः, दिग्लवः।

द्वादशांशप०—अर्कांशः, अर्कांशकः, द्वादशभागः, द्वादशलवः, द्वादशांशः, द्वादशांशकः।

षोडशांशप०—नृपांशः, नृपांशकः, षोडशभागः, षोडशलवः, षोडशांशः, षोडशांशकः।

त्रिंशांशप०—त्रिंशद्भागः त्रिंशद्लवः त्रिंशांशः, त्रिंशांशकः, खगुणभागः, खगुणांशकः खगुणांशः।

षष्ट्यंशप०—खरसांशः, खरसांशकः, खतर्कांशः, षष्टिभागः, षष्टिलवः, षष्ट्यंशः, षष्ट्यंशकः।

अवस्थाभेदाः—(१) दीप्ताद्याः, (२) बालाद्याः, (३) जाग्रदाद्याः, (४) शयनाद्याः, (५) दृष्ट्याद्याः, (६) गर्विताद्या श्चेत्येते ग्रहाणामवस्थानां षड्भेदाः सन्ति। इति।

दीप्तादीनां नामानि—(१) दीप्तः, (२) स्वस्थः, (३) मुदितः (प्रमुदितः), (४) शान्तः, (५) शक्तः, (६) प्रपीडितः, (७) दीनः, (८) खलः, (९) विकलः, (१०) भीतश्चैतानि दीप्तादीनां नामानि।

बालादीनां नामानि—(१) बालः, (२) कुमारः, (३) युवा (अन्), (४) बुद्धः, (५) मृतश्चैतानि बालादीनां नामानि।

जाग्रदादीनां नामानि—(१) जाग्रत् (द्), (२) स्वप्नः, (३) सुषुप्तिः (स्त्री०), इत्येतानि जाग्रदादीनां नामानि।

शयनादीनां नामानि—(१) शयनम्, (२) उपवेशः, (३) नेत्रपाणिः, (४) प्रकाशः, (५) गमनम्, (६) आगमनम्, (७) सभायां वसतिः, (८) आगमः, (९) भोजनम्, (१०) नृत्यलिप्सा, (११) कौतुकम्, (१२) निद्रा, चैतानि शयनादीनां नामानि।

दृष्ट्यादीनां नामानि—(१) दृष्टिः, (२) चेष्टा, (३) विचेष्टा, चैतानि दृष्ट्यादीनां नामानि।

गर्वितादीनां नामानि—(१) गर्वितः (सगर्वः), (२) मुदितः, (३) लज्जितः, (४) संशोभितः, (५) क्षुधितः, (६) तृषार्तकश्चैतानि गर्वितादीनां नामानि।

दाराहादियोगनामानि—(१) दारहयोगः, (२) बालवैधव्ययोगः,(३) मृतापत्योगः, (४) राजयोगः, (५) राज्यपप्राप्तियोगः, (६) विवाहयोगः, (७) विषकन्यायोगः, (८) वैधव्ययोगः, (९) षट्क्लीवयोगाः, (१०) सन्ततियोगश्चेत्यन्येऽपि योगाः स्युः।

चन्द्रजनितयोगनामानि—(१) सुनफा, (२) अनफा, (३) दुरुधरा, (४) केमद्रुमश्चैते चत्वारश्चन्द्रजनितयोगास्तेष्वन्तिमो दरिद्रयोगो ज्ञेयः।

रविजनितयोगनामानि—(१) वेशिः, (२) वोशिः, (३) उभयचरिः, (४) कर्त्तरी, चैते चत्त्वारो रविजनितयोगा अत्रापि कर्त्तरी न शस्तः।

भौमादिग्रहजनितपञ्चमहापुरुषयोगनामानि— (१) रुचकः, (२) भद्रः, (३) हंसः,

(४) मालव्यः, (५) शशश्चैते भौमात् क्रमात् पञ्चमहापुरुष (राज) योगा ज्ञेयाः।

भास्करादीनां विविधयोगानां नामानि—भास्करः, इन्द्र, मसत (द्), शकटः। लग्नाधियोगः, गजकेसरी (इन्), अमला (स्त्री), शुभः। अशुभः, कर्त्तरी (स्त्री), पर्वतः, काहलः, मालिका (स्त्री), चामरः, शंखः, भेरी (स्त्री), मृदङ्गः, श्रीनाथः, शारदा (स्त्री) मत्स्यः। कूर्मः। खड्गः। लक्ष्मी (स्त्री०) कुसुमः, पारिजातः। कलानिधिः, अंशावतारः, ब्रह्म (अन्)। रज्जूः (स्त्री), मुसलः, नलः, माला (स्त्री), व्यालः, गदा (स्त्री), शकटः, विहङ्गः, शृङ्गाटकः, हलम्, वज्रः (पुं०न०), यवः, कमलम्, वापी, यूपः, शरः, शक्तिः (स्त्री), दण्डः, नौका (स्त्री), कूटः, छत्रम्, कार्मुकम्, अर्द्धचन्द्रः, चक्रम्, समुद्रः, गोलः, युगम्, शूलम्, केदारः, पाशः, दामिनी (स्त्री), वीणा (स्त्री), सिंहासनम्, ध्वजः, हंसः, राजहंसः, कारिका (स्त्री), एकावल (स्त्री) चतुःसागरः, अमरः, चापः, दण्डः, शकटः, नन्द (स्त्री) दाता (तृ), चिह्निपुच्छः,लालाटिः (स्त्री), दोला, बुधादित्यः,जलम्, श्रीछत्रम्, सिंहासनम्, चतुश्चक्रम्, प्रव्रज्या (स्त्री) इत्येते भास्करादयो विधिधयोगाः सन्ति, एषां लक्षणानि फलानि च जातकेषु द्रष्टव्यानि, अथवा सारावली, जातकपारिजात आदि ग्रन्थेऽवलोकितव्यानि।

ताजिकशास्त्रीययोगनामानि—(१) इक्कवालः, (२) इन्दुवारः, (३) इत्थशालः, (४) ईसराफः, (५) नक्तम्, (६) यमया, (७) मणऊं, (८) कम्बूलः, (९) गैरिकम्बूलः, (१०) खल्लासरम्, (११) रद्दम्, (१२) दुफालिकुत्थम्, (१३) दुत्थोत्थदिवीरः, (१४) तम्बीरः, (१५) कुत्थः, (१६) दुरुफः, इत्येते ताजिकशास्त्रीयषोडशयोगाः सन्ति। तत्र ईसराफः, मणऊं, रद्दम्, दुरुफश्चैतेऽशुभयोगाः। एते सर्वे इत्थशालस्य भेदाः सन्ति। अमीषा लक्षणादिकं विस्तरतो ताजिकशास्त्रीय ग्रन्थे द्रष्टव्यम्।

वर्षीयपञ्चाधिकारिणां नामानि—(१) जन्मलग्नेशः, (२) वर्षलग्नेशः, (३) मुन्थाराशीशः (मुन्थेशः), (४) त्रिराशीशः, (५) दिवा रविराशीशः। 'नक्तम्' चन्द्रराशीशः। एषां पञ्चाधिकारिणां मध्ये योऽधिकबली लग्नं पश्यति स वर्षराड् बोध्यः।

हर्षबलपर्यायः—हर्षबलम्, (वर्षे बलविशेषः)।

हर्षबलभेदाः—(१) स्थानबलम्, (२) स्वगृहोच्चबलम्, (३) स्थानत्रयात्मकपुंस्त्रीबलम्, (४) दिवारात्रौ क्रमेण पुंस्त्रीबलम्। तेषां योगः कार्यस्तद्धर्षबलम्। यस्य ग्रहस्य बलयोगः पञ्चाल्पः स हीनबलो बोध्यः।

हद्दापर्यायौ—हद्दम् (न०), हद्दा (स्त्री)।

द्रेष्काणप०—दृगाणः, द्रेष्काणः, शेषस्त्वन्यत्र।

नवांशप०—नवांशः, मुसल्लहः, शेषस्त्वन्यत्र।

पञ्चवर्गीयवलनामानि—(१) स्वगृहबलम्, (२) स्वोच्चबलम्, (३) हद्दाबलम्, (४) द्रेष्काणबलम्, (५) मुसल्लहबलम्, इत्येषां योगश्चतुर्भिर्विभक्तो विंशोपका स्यात्।

सहमपर्यायौ—सद्म (अन्) (न०), सहमम् (न०)।

सहमनामानि—(१) पुण्यसहमम्, (२) विद्या०(३) गुरु०(४) यशः०(५) महात्म्य०(६) आशा०(७) सामर्थ्य०(८) भ्रातृ०(९) गौरव०(१०) राज०(११) तात०(१२) मातृ०(१३) पुत्र०(१४) जीवित०(१५) जल०(१६) मित्र०(१७) कर्म०(१८) रोग०(१९) मन्मथ०(२०) कलि०(२१) क्षमा०(२२) शास्त्र०(२३) बन्धु०(२४) बन्दक०(२५) मृत्यु०(२६) देशान्तर०(२७) धन०(२८) अन्यदारा०(२९) अन्य कर्म०(३०) वणिक्०(३१) वाणिज्य०(३२) विवाह०(३३) प्रसूति०(३४) कार्यसिद्धि०(३५) सन्ताप०(३६) श्रद्धा०(३७) प्रीति०(३८) बल०(३९) सैन्य०(४०) अङ्ग०(४१) जाड्य०(४२) रिपु०(४३) शौर्य०(४४) (४४) उपाय (४५) दरिद्र (४६) व्यापार (४७) जलपात०(४८) गुरुता०(४९) जलमार्ग०(५०) बन्धनसहमं चेत्येतानि पञ्चाशत्सहमनामानि।।

पात्यांशपर्यायाः—पात्यभागाः, पात्यलवाः, पात्यांशकाः, पात्यांशाः, हीनभागाः, हीनलवाः, हीनांशकाः, हीनांशाः।

पात्यांशदशाप०—पात्यांशदशा, हीनांशदशा।

मुद्दादशाप०—मुद्दादशा, मौद्दीदशा।

त्रिपताकचक्रप०—त्रिपताकचक्रम् (न०), त्रिपताकी (स्त्री०)।

मासप्रवेशप०—मावेशः, मासनिवेशः, मासप्रवेशः।

दिनप्रवेशप०—दिनप्रवेशः, दिवसप्रवेशः द्युनिवेशः, द्युप्रवेशः।

॥ इति बिहारप्रान्तसहरसामण्डलान्तर्गतदोरमाग्रामवास्तव्येन दैवज्ञचूडामणिश्रीसूर्यनारायणसूनुना डॉ० सुरकान्तझाख्येन ज्योतिर्विज्ञानशब्दकोषे भावादिसर्गः नवमः ॥९॥

अथ मूहूर्त्तादिसर्गः–१०

मुहूर्त्तप०—दिनशुद्धिः, मुहूर्त्तः, इह गर्भाधानादीनां संस्काराणां गृहारम्भयात्रादीनां शुभकार्याणां ज्योतिर्विद्वद्भिर्निर्णयात्मकः कालविशेषः।

शुद्धिप०—विशुद्धता, विशुद्धिः, शुद्धता, शुद्धिः॥

शुद्धिवाचकशब्दाः—दोषखण्डनम्, दोषनिराकरणम्, दोषनिरासः, निर्दोषता, पवित्रता विशुद्धता, शुद्धता, स्वच्छता।

शुद्धिभेदाः—(१) पञ्चाङ्गशुद्धिः, (दिनशुद्धिः) (२) चन्द्रशुद्धिः (सर्वारम्भशुद्धिः), (३) लग्नशुद्धिः, (४) नवांशशुद्धिः, (५) रविशुद्धिः, (६) गुरुशुद्धिः, (७) नैधनशुद्धिः, (८) गोचरशुद्धिः, (९) अष्टकवर्गशुद्धिः, (१०) ताराशुद्धिः, (११) शुक्रशुद्धिः, (१२) स्थानशुद्धिश्चेत्यादयः शुद्धेर्भेदाः स्युः।

पञ्चाङ्गशुद्धिः—तिथि-वार-नक्षत्र-योग-करणानि चैतानि पञ्चाङ्गानि। एषां मुहूर्त्तशास्त्रोक्तनिर्दोषताऽऽदौ चिन्त्या। ततोऽभीष्टशुभकार्यस्य मुहूर्त्तस्य मुहूर्त्तशास्त्रोक्तविधिना निर्णयः कर्त्तव्यः।

चन्द्रशुद्धिः—चन्द्रनिर्दोषता।। अत्राह रामः—'उभयोश्चन्द्रविशुद्धितो विवाहः। 'स एव'—स्त्रीणां विधोर्वलमुशन्ति विवाहगर्भसंस्कारयोरितरकर्मसु भर्तुरिव। इति। अस्याः स्पष्टी-

करणं 'ग्रन्थान्तरे' यथा—सर्वं भपाश्रितं कर्मेति।। 'द्वयो (वरकन्ययो:) स्तथा। ग्राह्यं शशाङ्कस्य बलमिति। कलहश्चतुर्थे इति। मृत्युरिहाष्टमाख्ये इति। 'द्वादशे हानिरीरिता।' इति च।। इह गोचरे जन्मचन्द्रराशित उक्तस्थानगत अर्थाच्चतुर्थाष्टमान्त्यगतश्चन्द्रो नेष्टः। कार्यभेदतो द्वादशगतश्चन्द्रस्य परिहार उक्तः। 'पट्टबन्धनचौलान्नप्राशने चोपनयने'। पाणिग्रहे प्रयाणे च चन्द्रमा व्ययगः शुभः।' इति। क्षौरे यात्रायां च जन्मराशिस्थश्चन्द्रो नेष्टः। क्षौरे प्रयाणे न शुभो जनीन्दुः' इति।

सर्वारम्भशुद्धिः—लग्नचन्द्रयोः शुभता। 'तदुक्तं होडाचक्रग्रन्थे
'सर्वारम्भः शुभोऽन्त्याष्टशुद्धोपचयभेऽङ्गगे।
सद्दृग्युते स्वभाङ्गर्क्षात्खायत्रिषड्गते विधौ।। इति। पृ० ४४ श्लो० ११७

लग्नशुद्धिः—लग्ननिर्दोषता। अत्राह रामः—
'अयोगे सुयोगोऽपि चेत्स्यात्तदानीमयोगं निहत्यैष सिद्धिं तनोति।
परे लग्नशुद्ध्या कुयोगादिनाश मिति। अथवा—
भार्या' त्रिवर्गकरणं शुभशीलयुक्ता शीलं शुभं भवति लग्नवशेन तस्याः।
तस्माद्विवाहसमये परिचिन्त्यते हि तन्निध्नतामुपगताः सुतशीलधर्माः। इति मु०चिं०६-१

नवांशशुद्धिः—तन्वंशकौ चन्द्रयुतौ खलाढ्यौ सर्वेषु सत्कर्मसु वर्जनीयौ।
इति बृ०हो०च० १.०८/४१

रविशुद्धिः—रविनिर्दोषता। अत्राह रामः—रविशुद्धिवशाच्छुभो वाराणमिति। होडाचक्रेऽपि—भानोः शुद्धौ गृहारम्भो व्रतोद्वाहाविनेज्ययोः। इति हो० ११६/४३। वरस्य मार्तण्डबलं विलोकयेत् इति। करग्रहे। मृत्युप्रदोऽर्को निधने व्यये सुखे। सत् पूजयाऽर्को जनुरस्तधीतपः स्वगो रविस्तूपचये शुभप्रदः, इति। अत्र विशेषमाह—गर्गो मुनिश्चाथ वसिष्ठकश्यपौ पाराशराद्या मुनयो वदन्ति। द्वितीयपुत्राम्बुगतो दिवाकरस्त्रयोदशाहात्परतः शुभावहः।। इति।

गुरुशुद्धिः—गुरुनिर्दोषता। अत्राह रामः—
गुरुशुद्धिवशेन कन्यकानां समवर्षेषु षडब्दकोपरिष्टात्।' इति।
'अपि च'—वटुकन्याजन्मराशेस्त्रिकोणायद्विसप्तगः।
श्रेष्ठो गुरुः खषट्त्र्याद्ये पूजयाऽन्यत्र निन्दितः।

नैधनशुद्धिः—लग्नादष्टमस्थानस्य निर्दोषता। अर्थात्तत्र शुभाशुभग्रहाभावः। 'संशुद्धे मृतिभवने' इति रामः। 'नैधने शुद्धियुक्ते इति च।

गोचरशुद्धिः—गोचरस्य निर्दोषता। यथा—
'केतूपप्लवभौममन्दगतयः षष्ठत्रिसंस्थाः शुभा-
श्चन्द्रार्कावपि ते च तौ च दशमौ चन्द्रः पुनः सप्तमः।
जीवः सप्तनवद्विपञ्चमगतो युग्मेषु सोमात्मजः,
शुक्रः षड्दशसप्तवर्ज्जमितरे सर्वेऽप्युपान्ते शुभाः।। इति।

ताराशुद्धिः—तारानिर्दोषता। ताराशुद्धौ शुभं चौलमिति।
त्रिपञ्चाद्रिरहिंततारासु चूडाकर्म शुभं स्यादित्यर्थः।
दिनर्क्षं गणयेद्यावद्रोहच्छेषे त्वसत्त्रिभम् पञ्चाद्रिभं तथा' हो०च० ११५/४३

शुक्रशुद्धिः—शुक्रस्य निर्दोषता :

तदुक्तम् :—

'दक्षिणे दुःखदो दैत्यपूज्यो हन्त्यक्षि सम्मुखे।।मूढयो रोधयेच्छस्तं शस्तः स्यात्पृष्ठवामयोः।।

इति हो०च०११०/४१

स्थानशुद्धिः—भावानां निर्दोषता। 'उक्तञ्च' 'ग्रन्थान्तरे—

'विवाहे सप्तमं शुद्धं यात्रायामष्टमं तथा। दशमं च गृहारम्भे चतुर्थं च प्रवेशने।। इति।।

अथाष्टकवर्गशुद्धिः— 'अष्टवर्गविशुद्धेषु गुरुशीतांशुभानुषु। व्रतोद्वाहौ च कर्त्तव्यौ गोचरेण कदापि न।। इति राजमार्तण्डः।

तत्रैव—अष्टवर्गेण ये शुद्धास्ते शुद्धाः सर्वकर्मसु।
सूक्ष्माष्टवर्गसंशुद्धिः स्थूला शुद्धिस्तु गोचरे।।
'अभावतो गोचरशोभनानां शुद्धिं वदेद् भागुरिरष्टवर्गात्।
वैधव्यकन्याक्षयहेतुयोगे जीवाष्टवर्ग़स्य वदेत्तु शुद्धिम्।। इति।
'विफलं गोचरगणितं ह्यष्टकवर्गेण निर्दिशेत्पुंसाम्।
रेखाधिक्ये शुभदं बिन्द्वधिके नैव शोभनं प्रायः।। इति।

शुभपर्यायाः—प्रशस्तम्, शस्तम्, शुभम्, सत्, शेषस्तु ग्रहे।

कार्य्यप०—अर्थः, कार्यम्, कृत्यम्,प्रयोजनम्।

कर्मप०—कर्म (अन्) (न०),क्रिया (स्त्री), विधा (स्त्री)।

कर्मवाचकशब्दाः—करणम्, कर्म (अन्), कृतिः,क्रिया।

विधानपपर्यायाः—करणम्, कर्म (अन्), विधानम्, विधिः (पुं०)।

संस्कारपर्यायः—संस्कारः (पुं०) संस्क्रियतेऽनेन श्रौतेन स्मार्तेन वा कर्मणा पुरुष इति संस्कारः। 'गर्भाधानादिः।।'

संस्कारभेदाः—(१)गर्भाधानम्, (२) पुंसवनम्, (३) सीमन्तोन्नयनम्, (४) जातकर्म (अन्), (५) नामकर्म (अन्), (६) निष्क्रमः, (७) अन्नप्राशनम्, (८) चूडाकर्म (अन्) (९) उपनयनम्, (१०) वेदारम्भः, (१०) महानाम्नीव्रतम्, (१२) उपनिषद्व्रतम्, (१३) वेदव्रतम्, (१४) गोदानम्, (१५) मेखलोन्मोक्षः, (१६) विवाहश्चेत्येते षोडशमुख्यसंस्काराः सन्ति।

गर्भाधानपर्यायाः—आधानम्, आधानविधिः, आधानिकम्, कुसुमप्रतिष्ठा, गर्भप्रतिष्ठा, गर्भस्थापनम्, गर्भाधानम्, गर्भाधानविधानम्, गर्भाधानविधिः, जीवसेकः, निषेकः, निषेककर्म (अन्)।

पुंसवनप०—गर्भरक्षणम्, गर्भसंस्कारः, पुंसवम्, पुंसवनम्। पुमान् सूयतेऽनेन।

सीमन्तोन्नयनप०—सीमन्तः, सीमन्ताख्यम्, सीमन्तविधानम्, सीमन्तकर्म (अन्), सीमन्तोन्नयनम्। 'सीमन्तस्य तदाख्यगर्भसंस्कारस्योन्नयनमुद्भावनम्।

विष्णुपूजाप०—विष्णुपूजनम्, विष्णुपूजा, विष्ण्वर्चनम्, विष्ण्वर्चा।। एषा तृतीयमासे कर्त्तव्या।

जातकर्मपर्यायाः—जातकर्म (अन्), जातकर्मक्रिया, जातक्रिया, जातकृत्यम्, मेधाजनिः।

सूतिस्नानप०—प्रसववतीस्नानम्, प्रसूतास्नानम्, सूतिकास्नानम्, सूतिस्नानम्।

सूतिकाक्वाथप०—प्रसववतीक्वाथम्, प्रसूतापथ्यम्, सूतिकाक्वाथम्, सूतिक्वाथम्, सूतिपथ्यम्।

षष्ठ्युत्सवप०—षष्ठीमहोत्सवः, षष्ठ्युत्सवः।

स्तनपानप०—दुग्धपानम्, पयःपानम् स्तनपानम्,स्तन्यपानम्।

नामकरणप०—उत्थानम्, नामकरणम्, नामकृतिः, नामकृत्यम्, नामक्रिया, नामविधानम्।

निष्क्रमप०—अब्दपूर्तिः, उपनिष्क्रमणम्, निष्काशनम्, निष्क्रमः निष्क्रमणम्।

अन्नप्राशनप०—अन्नकाशनम्, अन्नप्राशनम्, अन्नादनम्, अन्नाशनम्, अशनम्, प्राशनम्, बालान्नभुक्तिः।

केशाधिवासनप०—काचाधिवासनम्, केंशाधिवासनम्, शिरसिजाधिवासनम्।

चूडाकर्मप०—चूडा, चूडाकरणम्, चूडाकर्म (अन्), चूडाकृत्यम्, चूडाक्रिया, चौलम्, चौलकर्म (अन्)।

क्षौरप०—क्षौरम् क्षौरकृत्यम्, क्षौरक्रिया, मुण्डनम्, मुण्डनक्रिया, वपनम्, वपनक्रिया।

कर्णवेधप०—कर्णच्छेदनम्, कर्णवेधः, कर्णवेधनम्, घ्राणवेधः, शब्दग्रहवेधः, श्रवणवेधनम्, श्रवणवेधविधानम्, श्रुतिवेधकर्म (अन्), श्रुतिवेधनम्।

वटुप०—आजिनी (इन्), गुरुकुलवासी (इन्), माणवकः, मेखली (इन्), वटुः, वटुकः।

मेखलाप०—मेखला, मौञ्जः, मौञ्जी

ब्रह्मसूत्रप०—उपवीतम्, देवलक्ष्म (अन्), द्विजायनम्, पवित्रम्, ब्रह्मसूत्रम्, यज्ञसूत्रम् यज्ञोपवीतम्।

ब्रह्मचारिप०—ब्रह्मचारी (इन्), मुख्याश्रमी (इन्), वर्णी (इन्), व्रती (इन्)।

व्रतबन्धपर्यायाः—आनयः, उपनयः, उपनयनम्, उपनायः, उपनायनम्, ब्रह्मसूत्रधृतिः, मेखलबन्धः, मेखलाबन्धनम्, मौञ्जरसनाबन्धः, मौञ्जीनिबन्धनम्, मौञ्जीबंधः, मौञ्जीबंधनम्, यज्ञसूत्रधारणम्, वटूकरणम्, व्रतबंधः, व्रतादेशः।

वरप०—उपयन्ता (न्तृ), कन्यार्थी (इन्), कुमारः, परिणेता (तृ), वरः, विवोढा (ढृ), वोढा (ढृ)।

वधूप०—कन्या, कुमारिका, कुमारी, वधुका, वधूः, वरार्थिनी।

जन्मपत्रीप०—जननपत्री, जन्मपत्रम्, जन्मपत्रिका, जन्मपत्री।

वरवध्वोर्जन्मपत्रीमेलनप०—मिलनम्, मेलः, मेलनम्, युक्तिः, युतिः, योगः, संयोगः, समता, सम्मिलनम्।

कूटप०—अष्टकूटः कूटः, वर्णादिः।

कूटभेदाः—(१) वर्णः, (२) वश्यम्, (३) ताराः, (४) योनिः, (५) ग्रहमैत्री, (६) गणमैत्री, (७) भकूटः (राशिकूटः), (८) नाडी, चेत्येतेऽष्टकूटाः संति।

वर्णप्रभेदाः—(१) ब्राह्मणः (२) क्षत्रियः, (३) वैश्यः, (४) शूद्रः। इत्येते चत्वारो वर्णाः सन्ति। अत्र 'वर्णाधिका वधूर्नशस्ता'।

वश्यप्रभेदाः—(१) द्विपदः (नरः), मिथुन'कन्या'-तुलाकुम्भाश्चापाद्यश्च, (२) चतुष्पदाः (पशवः) (गोसिंहमृगमेषा नक्राद्यखण्डं चापपरार्द्धं च)। (३) कीटः कुलीरः), (४) सरीसृपः (अलिः)। जलचरौ (मृगोत्तरार्द्ध मीनश्च), यथा—

'हरि' हित्वा सर्वे नृणां वश्याः अलिं विना सर्वे हरेर्वश्याः।

ताराप्रभेदाः—(१) जन्म (अन्), (२) सम्पत् (द्), (३) विपत् (द्), (४) क्षेमः, (५) प्रत्यरिः, (६) साधकः, (७) वधः, (८) मैत्रः, (९) अतिमैत्र-श्चेत्येता नवताराः संति। आसु त्रि-पञ्च सप्तः-नेष्टाः।

योनिप्रभेदाः—(१) अश्वः, (२) गजः, (३) मेषः, (४) सर्पः, (५) श्वानः, (६) मार्जारः, (७) मूषकः, (८) गौः (गो), (९) महिषः, (१०) व्याघ्रः, (११) मृगः, (१२) वानरः, (१३) नकुलः, (१४) सिंहश्चेत्येताः चतुर्दश योनयः संति। आसु याः साहजिकवैरयोनयस्ता न शस्ताः स्युः।

ग्रहमैत्रीप्रभेदाः—(१) मित्रम्, (२) समः, (३) शत्रुः। एते प्रागेवोक्ता इह तु प्रासङ्गिकाः। उभयोर्वरकन्ययो राशिनवांशपत्योर्मिथः शत्रुता चेत्तदामेलनं न शस्तम्।

गणप्रभेदाः—(१) देवः, (२) मनुष्यः, (३) राक्षस-श्चेति त्रयो गणाः सन्ति। रक्षोगणजा कन्या न शस्ता। यदा वरो मनुजगणजस्तयोर्मेलनं न शस्तम्।

भकूटप्रभेदाः—(१) त्रिकोणम् (नवमपञ्चमराशी), (२) द्विर्द्वादशः (द्वितीयद्वादशराशी), (३) षडष्टकम् (षष्ठाष्टमराशी), विषमभजायाः कन्याया भाद्वरभं षष्ठं न सत्। एवं तस्याः समभजाया भाद्वरभमष्टमं तदपि न शोभनम्। अन्यत्सर्वमविचारणीयम्।

नाडीप्रभेदाः—(१) आद्यनाडी, (२) मध्यनाडी, (३) अन्त्यनाडी-चेत्येतास्तिस्रो नाड्यः सन्ति। यदोभयोर्वरवध्वोर्जन्म मध्यनाडीनक्षत्रेषु भवेत्तदा मेलनं न सत्। मध्यनाडीदोषस्तु सर्वथा त्याज्यः।

वर्गभेदाः—(१) अवर्गः, (२) कवर्गः, (३) चवर्गः, (४) टवर्गः, (५) तवर्गः, (६) पवर्गः, (७) यवर्गः, (८) शवर्ग-श्चेत्येतेऽष्टौ वर्गाः संति।

वर्गस्वामिनामानि—(१) गरुडः, (२) विडालः, (३) सिंहः, (४) श्वानः, (५) सर्पः, (६) मूषकः, (७) मृग, (८) मेषश्चैतेऽवर्गात् क्रमादष्टवर्गाणां स्वामिनः संति। तत्र निजवर्गतः पञ्चमो वर्गो नो शोभनः।

रेवत्यादिभानां भागभेदा—(१) पूर्वभागः (तत्र रेवतीतः षण्णक्षत्राणि), (२) मध्यभागः (तत्रार्द्राभतो द्वादशनक्षत्राणि), (३) परभागः (तत्रेन्द्रभतो नव नक्षत्राणि), पूर्वभागे वरः श्रेष्ठः। परभागे वधूः श्रेष्ठा। मध्ये तु द्वयोः सुमतिः॥

नृदूरपर्यायः—नृदूरम्। 'इह कन्याजन्मभाद् द्वितीयनक्षत्रे वरजन्म न सत्।

ग्रहमेलनभेदाः—(१) वरवध्वोर्जन्माङ्गात्तनुसुखास्तमृत्यन्त्यगः कुजो नेष्टः।

(२) तत्रगताः पापा अपि नेष्टाः।

(३) वरजनने खलांतर्गतः सखलश्च सितोनेष्टः।

अथवा

सितात्सुखास्तमृतिगाः पापा न शस्ता एवं कन्याजनने चन्द्रादपि चिंतनीयाः।

विवाहपर्यायाः—उद्वाहः, उपयमः, उपयमनम्, उपयामः, करकमलपीडनम्, करकमलसंग्रहः, करग्रहः, करग्रहणम्, करतलग्रहः, करतलग्रहणम्, करनिपीडनम्, करपीडनम्, करपीडा, करवारिजसंग्रहः, कराब्जग्रहणम्, कराम्बुजार्दनम्, कराम्बुरुहग्रहणम्, करार्दनम्, करोत्पलग्रहः, दारकर्म (अन्), दारक्रिया, दारपरिग्रहः, दोर्ग्रहः, दोर्ग्रहक्रिया, दोर्वारिजार्दनम्, परिणतिः, परिणयः, परिणयनम्, पाणिग्रहः, पाणिग्रहणम्, पाणिग्रहोत्सवः, पाणिनिपीडनम्, पाणिपयोजपीडनम्, पाणिपयोजपीडा, पाणिपीडनम्, पाणिपीडनविधिः पाणिपीडा, पाणिविषोदयग्रहः, प्रवेष्टपानीयरुहार्दनम्, प्रवेष्टपीडा, प्रवेष्टोत्पलसंग्रहः, भुजग्रहः, भुजतोयजग्रहः, भुजवारिजग्रहः, भुजाब्जग्रहणम्, भुजाब्जपीडा, भुजाभ्रपुष्पप्रसवग्रहः, भुजाम्बुजग्रहः, भुजाम्बुजनिपीडनम्, वाधुक्यम्, विवाहः, विवाहकार्यम्, विवाहोत्सवः, शयकुशेशयमर्दनम्, शयग्रहः, शयग्रहणम्, शयतोयजग्रहः, शयपीडनम्, शयाम्बुजग्रहः, शयसंग्रहः, समुद्वाहः, समुद्वाहविधिः, हस्तग्रहः, हस्तग्रहणम्, हस्तपीडनम् इति।

इह पद्यान्यत्रावलोक्यन्ते—

पाणिग्रहः परिणयः करपीडनं च दारक्रियोपयम-पाणिपयोजपीड़ा।
दोर्वारिजार्दन-करग्रहणो-पयामोद्वाहा, भुजाम्बुजनिपीडन-पाणिपीडे॥
शयग्रहः, पाणिपयोजपीडनं करार्दनं हस्तनिपीडनं तथा।
भुजाब्जपीडा भुजवारिजग्रहः प्रवेष्टपीडा शयतोयजग्रहः॥
विवाह-वाधुक्य-करग्रहाश्च हस्तग्रहो दारपरिग्रहश्च।
भुजाभ्रपुष्पप्रसवग्रहश्च प्रवेष्टपानीयरुहार्दनं च॥
दारकर्म भुजतोजग्रहः पाणिपीडन-कराम्बुजार्दने।
हस्तपीडन-करोत्पलग्रहौ दोर्ग्रहः परिणतिर्भुजग्रहः॥ इति।

विवाहाग्निपरिग्रहपर्यायाः—आवसथ्याधानम्, उद्वाहपावकपरिग्रहः, विवाहाग्निपरिग्रहः।

त्रेताग्निसंग्रहपर्यायाः—त्रेताग्निसंग्रहः, त्रेतानलसंग्रहः, श्रौताधानम्।

वेदारम्भपर्यायाः—आम्नायोपक्रमः, वेदारम्भः, श्रुतिप्रक्रमः।

वेदव्रतपर्यायाः—आगमव्रतविधिः, वेदव्रतम्, श्रुतितपः श्रुतिनियमः।

महानाम्नीव्रतपर्यायाः—महानाम्नीतपः, महानाम्नीनियमः, महानाम्नीव्रतम्।

उपनिषद्व्रतपर्यायाः—उपनिषत्तपः, उपनिषन्नियमः, उपनिषत्पुण्यकम्, उपनिषद्व्रतम्।

क्षुरिकाबन्ध्यपर्यायाः—क्षुरिकाबन्धः, छुरिकाबन्धः, छुरिकाबन्धनम्।

केशान्तपर्यायाः—कचान्तः, केशान्तः, केशान्तकर्म, केशान्तकृत्यम्, केशान्तक्रिया, गोदानम्।

समावर्तनपर्यायाः—मेखलामोकः, मेखलाव्रतविमोचनम्, मौञ्जीबन्धविमोचनम्, मौञ्जीविमोक्षः,

व्रतमोक्षणम्, समावर्तः, समावर्तनम्, समावर्तनकम् स्नानम्।

वधूप्रवेशप०—नववधूप्रवेशः, नववधूप्रवेशनम्, वधूप्रवेशः, वधूसन्निवेशः, वधूसन्निवेशनम्, एष तु विवाहतोऽष्टिदिनान्तराले कार्यः।

द्विरागमप०—द्विरागमः, द्विरागमनम्।

एषु तु विषमे मासे वर्षे वा कार्यः।

यात्रापर्यायाः—अभिनिर्याणम्, गतिः, गमः, गमनम्, प्रयाणम्, प्रयाणकम्, प्रसरणम्, प्रस्थानम्, यात्रा, व्रज्या।

दोषप०—दूषणम्, दोषः।

दोषभेदाः—(१) वेधः (पञ्चशलाकासप्तशलाकाजन्यः), (२) लत्ता (लात), (३) युतिः (गोचरग्रहचारः), (४) वज्रः, (५) बाणः (मृत्युपञ्चकम्), (६) जामित्रम् (यामित्रम्), (७) पातः (रवीन्द्वोःक्रान्तिसाम्यम्), (८) खार्जुरवेधः, (९) दिग्योगः, (१०) उपग्रहश्चैते दशदोषाः सन्ति। ते विवाहादौ वर्जनीयः।

इहान्येऽपि दोषाः सन्ति। तेषां नामानि यथा—

(१) संव्वत्सरान्तिमपक्षः (चैत्रकृष्णपक्षः), (२) आश्विनकृष्ण (महालय) पक्षः, (३) भीष्मपञ्चकम्, (माघशुक्लैकादशीतः पञ्चदिनात्मकः कालः), (४) यमपञ्चकम् (कार्तिककृष्णत्रयोदशीतः पञ्चदिनात्मकः कालः), (५) विश्वघस्रपक्षः (त्रयोदशदिनात्मकः पक्षः), (६) गुर्वादित्ययोगः, (७) ग्रहणदिनम्, (८) त्रिविधोत्पातदिनम्, (९) तिथिहानिः (सवमदिनम्), (१०) तिथिवृद्धिः, (११) क्षयमासः, (१२) मलमासः (अधिकमासः), (१३) पित्रोः श्राद्ध (तिथि) दिनम्, (१४) विष्टिकरणम् (भद्रा), (१५) नष्टचन्द्रः (कृष्णचतुर्दशीतस्त्रिदिनात्मकः कालः), (१६) जन्ममासः, (१७) जन्मतिथिः, (१८) जन्मनक्षत्रम्, (१९) शुक्रास्तः, (२०) गुर्वस्तः, (२१) तयोः शैशववार्द्धके, (२२) सिंहमकरस्थेज्यः, (२३) वक्रगुरुः, (२४) अतिचारगुरुः, (२५) होलाष्टकम्, (२६) सेन्दुलग्नम्, (२७) सपापलग्नम्, (२८) सेन्दुलग्नांशः (२९) सपापलग्नांशश्चेत्यन्ये दोषाः सन्ति।

(१) चन्द्रशुद्धिः (२) लग्नशुद्धिः, (३) गुरुशुद्धिः, (४) रविशुद्धिः, (५) ताराशुद्धिः, (६) नैधनशुद्धिः-श्चेत्यादयोऽपि विवाहादीनां मुहूर्त्तेष्वपेक्षिताः।

गृहपर्यायाः—गृहम्, गेहम्, वेश्म (अन्), सद्म (अन्), शेषस्तु देवे।

वास्तुप०—आयः, गृहभूः, गृहार्हभूमिः, वास्तु, वेश्मभूमिः, सदनभूमिः।

हस्तप०—करः, पाणिः, हस्तः शेषस्त्वन्यत्र।

वास्तुभेदाः—(१) ध्वजः, (२) धूमः, धूम्रः), (३) हरिः (सिंहः), (४) श्वा (अन्) (कुक्कुरः), (५) गौः (गो) (वृषभः), (६) खरः (गर्दभः), (७) इभः (हस्ती गजो वा), (८) ध्वांक्षकः वायसः काको वा), इत्यष्टावायाः सन्ति।

दैर्ध्यपर्यायाः—आयतिः, दीर्घता, दैर्ध्यम्, (लम्बाई इति भाषा)।।

विस्तृतिप०—विस्तरणम्, विस्तारः, विस्तृतिः, (चौड़ाई इति भाषा।)।

गुणनप०—आहतम्, गुण्यम्, हतम्, शेषस्तु गणनावर्गे।

पिण्डप०—गुणनफलम्, पिण्डम्, विस्तृतिदैर्ध्याहतिः।

वास्त्वादीनां नामानि—(१) वास्तु, (आयः), (२) वारः, (३) अंशकः, (४) धनः (द्रव्यम्), (५) ऋणम्, (६) नक्षत्रम्, (७) तिथिः, (८) योगः, (९) आयुः (उष्) दै वास्त्वादयो नव वास्तुशास्त्रोक्तगणितविधिनाऽऽनेयाः इति।

वास्तुपर्यायौ—आयः, वास्तु॥

नृपमन्दिरपर्यायाः—नृपमन्दिरम्, भूपालभवनम्, राजनिकेतनम्, सौधम्।

विमानप०—विमानम्, सम्राड्भवनम्, सार्वभौमगृहम्।

तद्भेदाः—(१) नन्दावर्तः (नन्द्यावर्तः), (२) रुचक, (३) वर्द्धमानः, (४) विच्छन्दक (विच्छर्दकः), (५) सर्वतो भद्रः, (६) स्वस्तिकः। विशेषस्तु वास्तुशास्त्रे मदीये बृहत्संहिताय च द्रष्टव्यः।

प्रासादपर्यायाः—देवमन्दिरम्, प्रसादनः, प्रासादः, राजमन्दिरम्।

हर्म्यप०—धनिवासः, हर्म्यम्।

देवस्थानप०—आयतनम्, चैत्यम्,देवस्थानम्, मन्दिरम्, सुरसद्म (अन्), सुरालयः।

यज्ञस्थानप०—अध्वरशाला, क्रतुशाला, मखशाला, यज्ञशाला, यज्ञस्थानम्।

हविर्गेहपर्यायाः—हविर्गृहम्, हविर्गेहम्, हविर्भवनम्, होत्रीयम्।

शान्तिगृहप०—आथर्वणम्, शान्तिगृहम्, शान्तीनिकेतनम्, शान्तीसदनम्।

छात्रवृतिप०—आवसथः, आवसथ्यम्, छात्रालयः, मठः।

जिनमन्दिरप०—आयतनम्, चैत्यम्, जिनसद्म (अन्), विहारः।

पर्णशालाप०—उटजः, पत्रशाला, पर्णशालम्, पर्णशाला, (झोपड़ा इति भाषा)।

शयनागारप०—अपवरकः, गर्भागारम्, वासौकः (अस्), शयनागारम्, शयनास्पद

कोशप०—कोशः-षः, भाण्डागारम्, (भण्डार, खजाना, तहसील, इति च भाषा)।

सूतिकागृहप०—अरिष्टम्, प्रसूतिभवनम्, सूतिकागृहम्।

अन्नदानादिगृहप०—अन्नदानाद्युदवसितम्, प्रतिश्रयः, सत्रशालम्, सत्रशाला।

पानीयशालाप०—जलशाला, पानीयशाला, प्रपा।

गोशालाप०—गोशाला, सन्दानिनी, सुरभिशाला।

शिल्पिशालाप०—आवेशनम्, शिल्पिशाला।

अश्वशालाप०—अश्वशाला, वाजिशालम्-ला, मन्दुरा। 'घोड़शाल इति भाषा।

हस्तिशालाप०—गजशाला, चतुरम्, हस्तिशाला।

पाकस्थानप०—पाकस्थानम्, महानसम्, रसवती, सूदशाला।

मुनिस्थानप०—आश्रमः, मुनिकुटी, मुनिस्थानम्।

वृक्षप०—अंह्रिपः, अगः, अगच्छः, अगमः, अंघ्रिपः, अद्रिः, अनोकहः, आगमः, आरोहकः, उरुः, ऊर्णाः, करालिकः, कारस्करः, कुचिः, कुजः, कुञ्जः, कुटः कुटारः, कुठः, कुठारुः, कुठिः, कुरुहः, क्षितिजः, क्षितिरुहः, गच्छः, चरणपः, जन्तुः, जर्णः, जीर्णः,

तरुः, द्रुः, द्रुमः, द्वीपः धरणीरुहः, नः, नगः, नन्द्यावर्तः, नागः, पर्णी (इन्), पलाशी (इन्), पादपः, पुलाकी (इन्), पुष्पदः, पुष्पफलदः, पुष्पफली (इन्), फलदः, भूजः, भूरुट् (ह), भूरुहः, महीजः महीरुहः, रूक्षः, वनस्पतिः, वसुः, वह्निजन्मा (अन्), वह्निभूः, विटपी (इन्), विष्टरः, वृक्षः, शाखी (इन्), शालः, शिखरी (इन्), सालः, सीमाकः, सीमिकः, स्कन्धी (इन्), स्थिरः, हरित् (द्), हरितच्छदः, हरिद्रुः, पेड़ 'गाछ' 'विरुवा' इति च भाषा।

काष्ठपर्यायाः—काष्ठम्, दलिकम्, दारु, दारुमात्रः, स्थाणु 'लकड़ी' इति भाषा।

प्रस्तरप०—अश्मा (अन्), उपलः, काचकः, ग्रावा (अन्), दृश (ष) त् (द्), पारटीटः, पारारुकः, पारावुकः, पाषाणः, प्रस्तरः, मृन्मरुः, शिला, 'पत्थर' इति भाषा।

मृत्तिकाप०—तुवरी, मृत्तिः, मृत्तिका, मृत् (द्), मृदा,॥ 'मिट्टी' इति भाषा।

पाषाणचूर्णप०—पाषाणक्षोदः, प्रस्तरचूर्णः, शिलारजः (अस्), 'सिमेण्ट' इति भाषा।

सुधाप०—कटशर्करा, लेपनम्, लेपनद्रव्यम्, सुधा, सौधभूषणम्। चूना इति भाषा।

इष्टकाप०—इष्टका, दग्धमृत्खण्डम्, दग्धमृच्छकलम्। 'ईण्ट' इति भाषा।

शिल्पप०—कर्म (अन्), कला, शिल्पम्, विज्ञानम्।

शिल्पिप०—कारी (इन्), कारुः, कारुकः, प्रकृतिः, शिल्पकारः, शिल्पी (इन्), 'मिस्त्री' 'राजः' ओड इति च भाषा।

वर्द्धकिप०—काष्ठतट् (क्ष्), काष्ठतक्षकः, तक्षा (अन्), त्वष्टा (ष्टृ), रथकृत् (द्), रथकारः, वर्द्धकिः, शिल्पकारः, शिल्पकारी (इन्)। 'बढई' इति भाषा।

शयनगृहप०—अपवरकः, गर्भागारम्, वासौकः (अस्)। शेषस्त्वन्यत्र।

खट्वाप०—खट्वा, पर्य्यङ्कः, पल्यङ्कः, मञ्चः, मञ्चकः।

शय्याप०—तलिमम्, तल्पम्, शयनम्, शयनीयम्, शय्या।

निद्राप०—तन्द्रा-न्द्रिः-न्द्री, तामसी, नन्दीमुखी, निद्रा, प्रमीला, शयनम्, श्वासहेतिः, सलयः, संवेशः, स्वापः।

अधिकनिद्राप०—सुखसुप्तिका, सुप्तम्, सुष्वापः।

मनुष्यप०—मनुजः, मनुष्यः, मानवः, शेषस्तु देववर्गे॥

पुरुषप०—नरः, पुरुषः, शेषस्तु देववर्गे।

पतिप०—धवः, पतिः, भर्ता (तृ), शेषस्तु रवौ।

स्त्रीप०—नारी, महिला, स्त्री, शेषस्तु सरस्वत्याम्।

पत्नीप०—गृहिणी, पत्नी, भार्या, शेषस्तु सरस्वत्याम्।

शिश्नप०—कामलता, पुंश्चिह्नम्, मेढ्रः, मेहनम्, लङ्गुलम्, लाङ्गुलम्, लिङ्गम्, शङ्कुः, शिश्नम्, शेपः, शेपः (अस्) (न०), शेफः, शेफः (अस्) (न०)।

योनिप०—अपत्यपथः, च्युतिः, बुलिः, भगः, योनिः, स्मरकूपिका, स्मरमन्दिरम्, स्त्रीचिह्नम्।

वीर्य्यप०—आनन्दप्रभवम्, इन्द्रियम् किट्टवर्जितम्, निषेकम्, पुंस्त्वम्, पौरुषम्, प्रधान-

धातुः, बलम्, बीजसमुद्भवम्, रेतः (अस्) (न०), वीर्य्यम्, शुक्रम्।

नरनारीप०—जम्पती, जायापती, दम्पती, भार्यापती।

अथवा

द्वन्द्वम्, नृयुग्मम्, मिथुनम्, स्त्रीपुंसौ (पुं०द्वि०)।

मैथुनप०—कामकेलिः (स्त्री०), ग्राम्यधर्म्मः, निधुवनम्, पशुक्रिया (स्त्री०), पशुधर्मः, मैथुनम्, मोहनम्, रतम्, रतिः (स्त्री०), रहः (अस्) (न०), व्यवायः, संवेशनम्, सम्प्रयोगः, सम्भोगः, सुरतम्।

आधानप०—आधानम्, गर्भाधानम्, निषेकः, बीजप्रक्षेपकालः।

गर्भाशयप०—उल्बम्, गर्भाशयः, जरायुः, गर्भझिल्ली' इति भाषा।

रक्तशुक्रमिश्रणप०—ऊल्बम्, कललम्।

दौहृदप०—दोहदम्, दौहृदम्, लालसा, श्रद्धा।

दोहदान्विताप०—दोदान्विता, श्रद्धालुः।

गर्भप०—गरभः, गर्भः, दोहदलक्षणम्, भ्रूणः।

गर्भवतीप०—अन्तर्वत्नी, आपन्नसत्त्वा, उदरिणी, गर्भवती, गर्भिणी, गुर्विणी, गुर्वी।

प्रसवमासप०—वैजननः, सूतिमाः (अस्), सूतिमासः, जन्ममासः।

प्रशवप०—उद्भवः,प्रसवः, प्रसूतिः (स्त्री), विजननम्, सवः, समुद्भवः।

प्रसूताप०—जातसन्ताना, जातापत्या, नवप्रसूता, प्रजाता, प्रसववती, प्रसूता, प्रसूतिका, विजाता, सूतका, सूतिका।

उपसूतिकाप०—उपसूतका, उपसूतिका, उपप्रसूता, उपप्रसूतिका।

सूतिकागृहप०—अरिष्टम् , सुतिकागारम्, सूतिकागृहम्, सूतिकागेहम्, सूतिकाभवनम्, सूतिकावासः, सूतिगृहम्।

पुत्रप०—आत्मजः, तनयः, नन्दनः, पुत्रः, शेषस्त्वन्यत्र।

पुत्रीप०—आत्मजा, कन्या, दुहिता, पुत्री, शेषस्त्वन्यत्र।

बालकप०—अर्भः, अर्भकः, उत्तानशयः, कुमारः, कुमारकः, क्षीरकण्ठः, क्षीरकण्ठकः, क्षीरपः, गर्भः, डिम्भः, दारकः, पाकः, पृथकः, पोतः, पोतकः, बालः, बालकः, बालिशः, माणवकः, मुष्टिन्धयः वटुः, वत्सः, शावः, शावकः, शिशुः, शिशुकः, स्तनन्धयः, स्तनपः।

॥ इति बिहारप्रान्तसहरसामण्डलान्तर्गतदोरमाग्रामवास्तव्येन दैवज्ञचूड़ामणिश्रीसूर्यनारायणसूनुना डॉ० सुरकान्तझाख्येन ज्योतिर्विज्ञानशब्दकोषे मुहूर्त्तादिसर्गः दशमः ॥१०॥

आयुर्दायादिसर्गः—११

आयुः पर्यायाः—आयुः (पु०), आयुः (उस्) (नि०), जीवितकालः, परमायुः (उस्)(न०)॥

आयुष्यप०—आयुष्यम्, पथ्यम्।

अरिष्टप०—अरिष्टम्, अशुभम्, कष्टम्, जन्यं, रिष्टम्।

अरिष्टभेदाः—(१) गण्डारिष्टम्, (२) चन्द्रारिष्टम्, (सु) ग्रहारिष्टम्, (४) योगारिष्टम्,

(५) पताकीवेधजारिष्टं चैतेऽरिष्टस्य पञ्च भेदाः स्युः।

गण्डान्तप०—गण्डान्तम् (न०), तिथ्यादिसन्धिः (पुं०)।

गण्डान्तभेदाः—(१) तिथिगण्डान्तः, (२) नक्षत्र गण्डान्तः, (३) लग्नगण्डान्तश्चैते गण्डान्तस्य त्रयो भेदाः सन्ति।

तदुक्तं ग्रन्थान्तरे—श०चि०१/१७७३।

'नक्षत्रतिथिलग्नानां गण्डान्तं त्रिविधं स्मृतम्। नवपञ्चचतुर्थानां ह्येकार्द्धघटिकामितम्।। इति

अभुक्तमूलप०—अभुक्तमूलम्। मूलर्क्षघटिकाविशेषः। तद्यथा—

मूलस्यारम्भतः प्रथमाष्टघट्यः, ज्येष्ठाया अन्तिमपञ्चघट्यः।

एवं त्रयोदशघट्यात्मकः कालोऽभुक्तमूलकालो ज्ञेयः।

आयुर्भेदाः—(१) अनायुः, (२) अल्पायुः, (३) मध्यायुः (४) दीर्घायुः, (५) पूर्णायुः, (६) अमितायुश्चैते उषन्ताः क्लीबलिङ्गाः।

अनायुःप०—अनायुः (उष्) (न०), तत्कालमरणम्, तत्क्षणमरणम्, सद्योमरणम्।

अल्पायुःप०—अल्पायुः, तुच्छायुः, स्वल्पायुः।

मध्यायुःप०—मध्यमायुः, मध्यायुः।

दीर्घायुःप०—उत्तमायुः, चिरायुः, दीर्घायुः, महत्तरायुः, विपुलायुः।

पूर्णायुःप०—परमायुः, पूर्णायुः, साग्रवर्षशतम् (न०), मानवायुः (न०), सपञ्चनिशाविंशत्युत्तरसमानां शतम्।

तदुक्तम्—'जीवेद्वर्षशतसाग्रमपमृत्युविवर्जिततम्।' इति दुर्गासप्ततशत्याम्।

इह स्पष्टमाह वराहः—'समा षष्टिद्विघ्नी मनुजकरिणां पञ्च च निशा' इति बृहज्जातके।

अमितायुःप०—अमितायुः, प्रामाण्यरहितायुः।

यदुक्तं केशवेन—

'कर्कीन्द्विज्ययुतोदये बुधसितौ केन्द्रे त्र्यरीशेतरैरायुर्विद्धयमितमिति जातकपद्धतौ।

रामायणे तु तन्मानमुक्तम्—

'दशवर्षसहस्राणि दशवर्षशतानि च। वसामि मानुषे लोके पालयन् पृथिवीमिमाम्।। इति।

आयुषोऽन्यभेदाः—(१) अनियतम्,(२) नियतम्, (३) योगोत्थितम्, चैत आयुषस्त्रयो भेदाः सन्ति।

अनियतपर्यायाः—अनियतायुः, अमितायुः, दिव्यायुः।

नियतायुःप०—गणितागतम्, ग्रहगणितजम्, नियतम्।।

योगोत्थितायुःप०—जातकायुः, योगजायुः, योगोत्थितायुः।

गणितागतायुर्भेदाः—(१) अंशायुः, (२) निसर्गायुः, (३) पिण्डायुः, (४) जीवायुः, (५) मिश्रायुः, (६) भिन्नाष्टकवर्गजायुः, (७) समुदायाष्टकवर्गजायुः, (८) मिश्रायुः, (९) रश्मिजायुः, (१०) नक्षत्रजायुः, (११) नवांशजायुः, (१२) केन्द्रजायुः, (१३) जैमिनीयायुः, (१४) वादरायणायुः। आयुषोऽन्ये भेदा अपि सन्ति।

नतप०—नतम् (पुं०न०) एतद्दशमलग्नसाधनोपकरणम्)।

नतभेदौ—(१) नतम्, (२) उन्नतञ्चैतौ नतस्य द्वौ भेदौ स्याताम्।

तदुक्तं ग्रन्थान्तरे—

‘अभीष्टकालो द्युदलेन वर्जितोऽथो त्रिंशतश्चेदधिकः खषट् च्युतः।
नतं परं प्राक्खगुणाल्पकाधिके ताभ्यां विहीनाः खगुणा इहोन्नते।। इति।१/२।

नतप्रभेदाः—(१) पूर्वनतम् (दिनार्द्धतः प्राक्कालः) (२) पूर्वोन्नतम् (निशीथतः परः कालः), (३) पश्चिमनतम् (दिनार्द्धतः परो यातः कालः), (४) पश्चिमोन्नतम् (निशीथतः प्राक्कालः) चैते नतस्य चत्वारः प्रभेदाः सन्ति।

भावपर्यायाः—भावाः, तन्वादयः, तेषां पर्यायास्तु प्रागेवोक्ताः।

दृष्टिपर्यायाः—दृक् (श्) (स्त्री०), दृष्टिः (स्त्री०) शेषस्त्वन्यत्रः।

द्रष्टृप०—दर्शकः (त्रि०), दर्शयिता (तृ) (त्रि०), द्रष्टा (ष्टृ) (त्रि०), पश्यतीति।

दृश्यप०—दृश्यम्, द्रष्टव्यम्, दर्शनीयम्, द्रष्टुंयोग्यं, चैते त्रिलिङ्गाः सन्ति।

यदुक्तं केशवेन—

‘खैकाग्निद्विखवेदरामयमभूखाभ्राभ्रमेकादिभे द्रष्ट्रावर्जितदृश्यकस्येति’ जातकपद्धतौ।

बलप०—ऊर्जम्, ओजः (अस्) तरः (अस्), दृढम्, द्रविणम्, धीरः, धीरता, पराक्रमः, प्राणः, बलम्, वीर्यम्, शक्तिः, शुष्मम्, शौर्य्यम्, सत्त्वम्, सहः (अस्), सारम्, स्थाम (अन्)।

बलभेदौ—(१) ग्रहबलम्, (२) भावबलम्, चैतौ बलस्य द्वौ भेदौ स्याताम्।

ग्रहबलभेदाः—(१) स्थानबलम्, (२) दिग्बलम्, (३) कालबलम्, (४) निसर्गबलम्, (५) चेष्टाबलम्, (६) दृग्बलं, चैतानि ग्रहाणां षड्बलानि सन्ति।

स्थानबलप्रभेदाः—(१) उच्चबलम्, (२) सप्तैक्यजबलम्, (३) केन्द्रादिबलम्, (४) युग्मायुग्मबलम्, (५) द्रेष्काणबलम्, चेतेषां पञ्चानां योगः स्थानबलं ज्ञेयम्।

दिग्बलपर्यायाः—आशाबलम्, दिग्बलम्, दिशाबलम्, हरिद्बलम्।

तदानयनमुक्तं केशवेन—

‘मन्दाल्लग्नमिनात्कुजाच्च हिबुकं शोध्यं विधोर्भागवा-
न्माध्यं ज्ञाद्गुरुतोऽस्तमत्र रसभात्पुष्टं त्यजेच्चक्रतः।
दिग्वीर्यं रसहृत्’ इति जातकपद्धतौ।।

कालबलप्रभेदाः—(१) पक्षबलम्, (२) नतोन्नतबलम् (३) द्युरात्रित्र्यंशबलम्, (४) वर्षेशादिबलं चैतेषां चतुर्णां योगः कालबलं बोध्यम्।

वर्षेशादिबलप्रभेदाः—(१) वर्षेशबलम्, (२) मासेशबलम्, (३) दिनेशबलम्, (४) कालहोरेशबलं चैतेषां चतुर्ण्णां योगो वर्षेशादिबलं ज्ञेयम्।

कालहोराप०—कालहोरा (स्त्री०)। अस्या आनयनविधिरुक्तो रामेण—

‘वारादेर्घटिका द्विघ्नाः स्वाक्षहृच्छेषवर्जिताः।
सैकास्तष्टा नगैः कालहोरेशा दिनपात् क्रमात्।।’ इतिं मुहूर्त्तचिन्तामणौ।।१।।

तेनैव तत्प्रयोजनमुक्तम्—

'वारे प्रोक्तं कालहोरासु तस्यं' इति।

चेष्टाबलप्रभेदौ—(१) अयनबलम्, (२) चेष्टाबलं, चैतौ चेष्टाबलस्य द्वौ भेदौ स्याताम्। तयोर्योग एव चेष्टाबल बोध्यम्।

भावबलप०—भावबलम्, भाववीर्यम्, भावौजः।

भावबलभेदौ—(१) भावदिग्बलम्, (२) भावदृग्बलं, चैतौ भावबलस्य द्वौ भेदौ स्याताम्। तत्र बुधगुरुदृशोर्योगः कार्यस्तदा स्फुटग्रहबलं स्यात्।

रश्मिप०—अंशुः, करः, किरणः, मरीचिः, रश्मिः, शेषस्तु रवौ।

रश्मिभेदौः—(१) उच्चरश्मिः, (२) चेष्टारश्मिश्चैतौ रश्मेर्द्वौ भेदौ स्याताम्।

इष्टप०—इष्टम्, शुभम्।

कष्टप०—अशुभम्, कष्टम्।

तत्प्रभेदौः—स्पष्टशुभम्, स्पष्टाशुभम्, स्फुटशुभम्, स्फुटाशुभम्।

गुणकनामानि—उच्चगुणकः, चेष्टागुणकः, स्फुटगुणकः, मध्यमाश्रयगुणकः स्पष्टाश्रयगुणकः, कर्मयोग्यगुणकः।

अंशायुःपर्यायौ—अंशायुः, सत्यायुः।

आयुर्भागप०—आयुरंशाः, आयुर्भागाः, आयुर्लवाः।

हानिप०—अपचयः, अपहारः, हरणम्, हानिः।

हानिभेदाः—(१) चक्रार्द्धहानिः (चक्रपातार्द्धहानिः), (२) शत्रुक्षेत्रगतहानिः, (३) अस्तगतहानिः, (४) लग्नस्थपापहानिः। (५) नीचभगतहानिः, (६) नीचभस्थग्रहयुक्तहानि श्चैतानि षड्विंधहरणानि स्युः।

पिण्डायुर्गुणकाः—(१) गोडब्जाः, (२) तत्त्वानि, (३) तिथयः, (४) रवयः, (५) दिनानि, (६) स्वर्गाः (७) नरवाः, चैते रवेः क्रमात्पिण्डायुर्गुणकाः सन्ति।

निसर्गायुर्गुणकाः—(१) नखाः, (२) भूः, (३) द्वौ, (४) गावः, (५) धृतिः, (६) नखराः, (७) पञ्चाशत्, चैते खेः क्रमान्तिसर्गायुर्गुणकाः सन्ति।

पिण्डायुःप्रभृतीनामंशप०—पिण्डायुरंशाः, पिण्डायुर्भागाः, पिण्डायुर्लवाः' निसर्गायुरंशाः, निसर्गायुर्भागाः, निसर्गायुर्लवाः, जीवायुरंशाः, जीवायुर्भागाः, जीवायुर्लवाः।

हानिसंस्कृतायुरंशप०—हरणसंस्कृतायुरंशाः, हानिसंस्कृतायुर्भागाः, हानिसंस्कृतायुर्लवाः।

वर्षाद्यायुःप०—अब्दाद्यायुः, वर्षमुखायुः, वर्षाद्यायुः शरदाननायुः समावदनायुः, हायनास्यायुः।

अन्तर्दशाप०—अन्तरम्, अन्तर्दशा, पक्ता (कृ), पाचकः।

दशाप्रवेशप०—दशानिवेशः, दशाप्रवेशः, दशासन्निवेशः, दायप्रवेशः।

नक्षत्रप०—ऋक्षम्, नक्षत्रम्, भम्, शेषस्तु नक्षत्रपर्याये।

भभुक्तप०—इतः, गतः, प्रगतः, प्रयातः भभुक्तः, भयातः, यातः।

भभोग्यप०—अगतः, अयातः, एष्यः, गम्यः, भगम्यः भभोगः, भभोग्यः, भैष्यः, भोग्यः, येयः।

गतगम्ययोः पर्यायौ यात-येयावित्युक्तं

श्रीपतिना—

मिहिरविरहितेन्दोरंशकेभ्यो द्विचन्द्रैर्गततिथिनिचयः स्यात्तत्र शेषं गताख्यम्।
तदपि हरविशुद्धं गम्यकं तद्विलिप्ता गतिविवरविभक्ता यातयेया विनाड्यः।

इति सिद्धान्तशेखरे इति केतकीटीकायाम् ७२/१५३

सर्वर्क्षप०—सर्वभोगः, सर्वभोग्यः, सर्वर्क्षम्

स्पष्टभुक्तप०—स्पष्टभुक्तम्, स्फुटभुक्तम्।

स्पष्टभोग्यप०:—स्पष्टभोग्यम्, स्फुटभोग्यम्।

स्पष्टसर्वर्क्षप०—स्पष्टसर्वर्क्षम्, स्फुटसर्वक्षम्।

दशापर्यायाः—दशा, दायः।

दशानामानि—अष्टोत्तरीदशा, कालचक्रीदशा, चरदशा, महादशा, योगिनीदशा, विंशोत्तरीदशा। एवं अन्या अपि विविधा दशाः सन्ति।

विंशोत्तरीदशेशनामानि—(१) आदित्यः, (२) चन्द्रः, (३) कुजः, (४) राहुः, (५) जीवः, (६) शनिः, (७) बुधः, (८) केतुः, (९) शुक्रश्चैते विंशोतर्य्यां कृत्तिकानक्षत्रतः क्रमेण आदित्यादयो नवग्रहा दशाधिपा ज्ञेयाः।

दशेशवर्षाणि—(१) रसाः, (२) दश, (३) शैलाः, (४) धृतिः, (५) अष्टिः, (६) अतिधृतिः, (७) अत्यष्टिः (८) सप्त, (९) विंशतिः। इति आदित्यक्रमतो दशेशानां वर्षाणि सन्ति।

योगिनीदशाधिपनामानि—(१) मङ्गला (२) पिङ्गला, (३) धान्या, (४) भ्रामरी, (५) भद्रिका, (६) उल्का, (७) सिद्धा, (८) सङ्कटा, चैता अष्टौ योगिनीदशाधिपा आर्द्रानक्षत्रतः क्रमेण ज्ञेयाः।

योगिनीदशेशवर्षाणि—(१) एकः, (२) द्वौ, (३) त्रयः, (४) चत्वारः, (५) पञ्च, (६) षट् (७) सप्त, (८) अष्टौ, चेति मंगलाक्रमतो दशाधिपानां वर्षाणि सन्ति।

दशाप्रभेदाः—(१) दशा, (२) अन्तर्दशा, (३) विदशा (उपदशा), (४) सूक्ष्मदशा (५) प्राणदशा, चेत्येते दशायाः पञ्चभेदाः सन्ति।

अन्तर्दशापर्यायाः—अन्तरम्, अन्तर्दशा, अन्तर्दायः, अपहारः, अपहृतिः, भुक्तिः, हृतिः।

विदशाप०—उपदशा, विदशा।

पाचकप०—पक्ता (क्तृ), परिपाचकः, पाचकः।

फलपाककालप०—परिणतिः, परिणामः, परिपाकः, पाकः, फलपाककालः, विपाकः।

जन्मराशिप०—जन्म (अन्), जन्मभम्, जन्मराशिः, जन्मर्क्षम्।

जन्मराशिस्वामिप०—ऋक्षेशः, जन्मभनाथः, जन्मराशिनाथः, जन्मर्क्षस्वामी इन्।

॥ इति बिहारप्रान्तसहरसामण्डलान्तर्गतदोरमाग्रामवास्तव्येन दैवज्ञचूड़ामणिश्रीसूर्यनारायणसूनुना डॉ० सुरकान्तझाख्येन ज्योतिर्विज्ञानशब्दकोषे आयुर्दायादिसर्गः एकादशः ॥११॥

अथ दृष्ट्यादि वर्गः—१२

[1]**दर्शनपर्यायाः**—अवलोकः, अवलोकनम्, अवेक्षणम्, अवेक्षा, आलोकः, आलोकनम्, आलोचनम्, ईक्षणम्, ईक्षा, दर्शनम्, दृक् (श्) (स्त्री), दृशिः, (स्त्री०), दृश्या (स्त्री), दृष्टिः (स्त्री), द्योतनम्, निध्यानम्, निभालनम्, निरीक्षणम्, निर्वर्णनम्, निशमनम्, निशामनम्, परिलोकनम्, प्रेक्षणम्, प्रेक्षा (स्त्री०), लोकः, लोकनम्, विलोकः, विलोकनम्, विलोचनम्, वीक्षणम् वीक्षा (स्त्री), समालोकः, समालोकनम् समालोचनम्,समीक्षणम्, समीक्षा (स्त्री)।

[2]**प्रेक्षणक्रियाप०**—अवलोकितम् (न०) आलोकितम् (न०), ईक्षितम् (न०), निरीक्षितम् (न०), वीक्षितम् (न०) इत्यादयः सर्वेशब्दा नपुंसके ज्ञेयाः॥

[3]**दर्शितप०**—अभिवीक्षितः, अवलोकितः, अवेक्षितः, आलोकितः, ईक्षितः, दर्शितः, दृष्टः, निरीक्षितः, निभालितः, परिलोकितः, प्रदृष्टः, प्रविलोकितः, प्रसमीक्षितः, प्रेक्षितः, प्रोद्वीक्षितः, लोकितः, विलोकितः, वीक्षितः, सन्दर्शितः, सन्दृष्टः, सम्प्रदृष्टः समालोकिः, समीक्षितश्चैते सर्वे शब्दास्त्रिलिङ्गा भवन्ति।

[4]**दर्शनीयप०**—अवलोकनीयः, अवलोकितव्यः, अवलोक्यः, अवेक्षणार्हः, अवेक्षणीयः, आलोकनार्हः, ईक्षणार्हः, ईक्षणीयः, ईक्षितुंयोग्यः, ईक्षितव्यः, ईक्ष्यः,द्रष्टव्यः द्रष्टुंयोग्यः, प्रेक्षणीयः, प्रेक्ष्यः, वीक्षणीयः, वीक्ष्यः, समीक्षणीयः, समीक्ष्यश्चैते त्रिलिङ्गाः।

[5]**द्रष्टृप०**—आलोकी (इन्) (त्रि०), दर्शकः, दर्शयिता (तृ), दर्शी (इन्), दृष्टिकर्त्ता (तृ), द्रष्टा (ष्टृ), समालोकी (इन्) एते सर्वे त्रिलिङ्गाः।

[6]**दृश्यप०**—दृश्यः (त्रि०), प्रेक्ष्यः (त्रि०), वीक्ष्यः (त्रि०), समीक्ष्यः (त्रि०)

[7]**दृश्यप०**—दृश्यम् (न०), प्रेक्ष्यम् (न०), वीक्ष्यम् (न०), समीक्ष्यम् (न०)।

[8]**दृष्ट्वाव्ययप०**—अवलोक्य (अ०), आलोक्य (अ०), दृष्ट्वा (अ०), निरीक्ष्य (अ०), प्रसमीक्ष्य (अ०), प्रेक्ष्य (अ०), विलोक्य (अ०), वीक्ष्य (अ०), सम्प्रेक्ष्य (अ०)।

[9]**पश्यत्प०**—अवलोकयन् (त्) (त्रि०), आलोकयन् (त्), (त्रि०), परिलोकयन् (त्) (त्रि०), पश्यन् (त्), (त्रि०), विलोकयन् (त्), (त्रि०)।

[10]**दृश्यमानप०**—अवेक्ष्यमाणः (त्रि०), आलोक्यमानः (त्रि०), ईक्ष्यमाणः (त्रि०), दृश्यमानः (त्रि०), निरीक्ष्यमाणः, (त्रि०), परिदृश्यमानः (त्रि०), परिलोक्यमानः (त्रि०), विलोक्यमानः (त्रि०), वीक्ष्यमाणः (त्रि०), सन्दृश्यमानः (त्रि०), सन्निरीक्ष्यमाणः (त्रि०), समालोक्यमानः (त्रि०)।

---

(१) देखना (२) देखने की क्रिया (३) देखा (४) देखने योग्य (५) देखने वाला (६) देखा जाने वाला (७) दिखलाई देने वाली वस्तु (८) देख कर (९) देखता हुआ (१०) जो देखा जाता है।

[१]दृष्टिदृष्टप०—ईक्षणवीक्षितः, दर्शनप्राप्तः, दृष्टदेहः, दृष्टमूर्तिः, दृष्टशरीरः, दृष्टिदृष्टः, दृष्टिपथगतः, प्रविलोकनयुतः, प्रसमीक्षितदेहः, प्रेक्षणतांगतः, प्रेक्षणत्वयात-श्चैते सर्वे त्रिलिंगा भवन्ति।

स्थितिप०—अवस्थानम् (न०), अवस्थितः (स्त्री०), आसना (स्त्री०), आस्था (स्त्री०), आस्या (स्त्री०), उपविष्टिः (स्त्री०), निष्ठा (स्त्री), प्रतिष्ठा (स्त्री०), वासः (पुं०), व्यवस्थानम् (न०), व्यवस्थितिः (स्त्री०), संस्था (स्त्री०), संस्थितिः (स्त्री०), स्थितिः (स्त्री०), एते सर्वे षष्ठीविभक्त्यन्ते प्रयोज्याः। यथा रवेर्मेषे स्थितिः। इति।

संयोगवाचकशब्दाः—अन्वयः (पुं०), मिलनम् (न०), मेलः (पुं०), मेलकः (पु०), मेलनम् (न०), युतिः (स्त्री०), योगः (पुं०), संयुतिः (स्त्री०), संयोगः (पुं०), संसर्गः (पुं०), सङ्गः (पं०), सङ्गतिः (स्त्री०), सङ्गमः (पुं०), समन्वयः (पुं०), समागमः (पुं०), समाजः (पुं०), समायोगः (पुं०), समितिः (स्त्री०), एते सर्वेऽपि षष्ठीविभक्तयन्ते प्रयोज्याः। यथा—'खलग्रहाणां मिलनम्।' इति।

युक्तवाचकशब्दाः—अन्वितः, आढ्यः, आश्लिष्टः, आलिंगितः, प्रयुतः, प्रयुक्तः, मिलितः, मिश्रितः, युक् (ज्), युक्तः, युतः, लगितः, लग्नः, लीनः, शाली (इन्), संयुक् (ज्), संयुक्तः, संयुतः, संलग्नः, संश्लिष्टः, संसक्तः, संहितः, सक्तः, सखा, सङ्गतः, सनाथः, समन्वितः, समाढ्यः, समेतः, सम्पद्यमानः, सम्पृक्तः, सम्मिश्रः, सहितः, एते सर्वे त्रिलिङ्गा भवन्ति। ते तृतीयाविभक्त्यन्ते योज्याः। यथा—'खलैः समेतः।' इति।

व्याप्तवाचकशब्दाः—आचितः, आश्रितः, उपविष्टः, निचितः, समाक्रान्तः, एते त्रिलिंगाः, तृतीयाविभक्त्यन्ते योज्याः।

प्राप्तवाचकशब्दाः—अधिगतः, आगतः, आपन्नः, आप्तः, आयातः, आस्थितः, इतः, उपगः, उपगतः, उपयातः, उपेयिवान् (वस्वन्तः), गः, गतः, प्रगतः, प्रयातः, प्राप्तः, यातः, समधिगतः, समागतः, समासादितः, समुपस्थितः, समुपेतः, सम्प्राप्तः एते त्रिलिंगाः।

स्थितवाचकशब्दाः—अधिष्ठितः, अवस्थितः, आश्रितः, आसनावस्थितः, आसीनः, उपविष्टः, उपस्थितः, कृतावस्थानम्, प्रतिष्ठितः, विराजमानः, व्यवस्थितः, श्रितः सश्रितः, संस्थः, संस्थितः, समाश्रितः, समासीनः, समुपाश्रितः, सेवितः, स्थः, स्थितः। एते त्रिलिंगाः।

स्थानवाचकशब्दाः—आयतनम्, आश्रयः, आस्पदम्, कृतपदः, कृतस्थितिः, कृतायतनः, कृताश्रयः, कृतास्पदः, गृहम्, पदम्, संश्रयः, स्थलम्, स्थानम्।

मिलित्वाऽव्ययवाचकशब्दाः—उपेत्य, मिलित्वा (मिलकर), सम्मिल्य, समुपेत्य, समेल्य, एतेऽव्ययाः।

---

(१) आंखों से देखा गया।

प्राप्याव्ययवाचकशब्दाः—अधिगम्य (प्राप्त होकर), प्राप्य (पाकर), सम्प्राप्य।

पूर्णपर्यायाः—आचितम्, छन्नम्, निचितम्, पूरितम्, पूर्णम्, भरितम्, व्याप्तम्, एते त्रिलिङ्गाः।

सम्बन्धप०—युक्तिः, (स्त्री०), संयोगः (पुं०), संसर्गः, संस्पर्शः, समागमः, सम्पर्कः, सम्बन्धः, स्पर्शः, स्पृष्टिः, (स्त्री०)।

सम्बन्धभेदाः—(१) अन्योन्यराशिस्थितत्वं प्रथमः, (२) परस्परदृष्टिसम्बन्धो द्वितीयः, (३) एकत्र दृष्टिसम्बन्धस्तृतीयः, (४) सहावस्थानसम्बन्धश्चतुर्थः, इत्येते सम्बन्धस्य चत्वारो भेदाः, स्युः।

सम्बन्धिप०—संयोगी, संसर्गी, सम्पर्की, सम्बन्धी, एते इन्नतास्त्रिलिङ्गाः स्युः।

अण्प्रत्ययान्तशब्दाः—कौलः, कौशः, स्मारः।

युक्तस्थितादिवाचकप्रकीर्णशब्दाः—अधिकलः, अधिकृत्, अधियोगः, अधिश्रितः, अध्यासितः, अध्यासीनः, अध्युषितः, अभिगतः, अभ्युपेतः, आयातः, अवलम्बितः, अष्टमः, नवमः, षष्ठः, आकीर्णः, आक्रान्तः, आरूढः, आवासः, आश्रित्यः (अ०), कलितः, कृताधिकारः, चन्द्राधियोगः, इष्टयुतः, निरतः, निष्ठः, पतितः, प्रकल्प्य (अ०), प्रपूर्णम्, मिश्रः, यथातथा (कर्मनिवृत्त्यर्थवाचकः), याप्यः, योगाधियोगः, वहः, विराजमानः, समनुपतितः।

मतुबन्तशब्दाः—तपोवान्, तमोवान्, भानुमान्, अङ्गपवान्, अस्तपवान्, पण्डितवान्, साधुमान्, मन्दवान्, एते त्रिलिङ्गाः स्युः।

मत्वर्थीयशब्दाः—अधिकारी, अधिशाली, अवलम्बी, केन्द्री, जुः (ष्), पाली, भाक् (ज), यायी युक् (ज्), योगी, विहारी, सङ्गी, स्थायी, स्पृक् (श्), एतें त्रिलिङ्गाः स्युः।

णिनिप्रत्ययान्तशब्दाः—आलम्बी, गामी, चारी, निवासी, वर्ती, वासी, शाली, एते त्रिलिङ्गाः स्युः।

सहसमासजशब्दाः—साधिकारः, सघनः, समदः, ससुखः, ससरस्वतीशः।

दृष्टिप०—आलोकः (पुं०) आलोकनम् (न०), आलोचनम्, (न०), ईक्षणम् (न०), ईक्षा (स्त्री०), दर्शनम् (न०) दृक् (श्) (स्त्री०) दृशिः (स्त्री०), दृष्टिः (स्त्री०) द्योतनम् (न०), निध्यानम्, निभालनम् (न०), निर्वर्णनम्, (न०), निशमनम्, (न०), निशामनम् (न०)।

दृष्टप०—अवलोकितः, आलोकितः, ईक्षितः, निरीक्षितः, परिलोकितः, परीक्षितः, प्रदृष्टः, प्रेक्षितः, प्रोद्वीक्षितः, लोकितः, विलोकितः, संवीक्षितः, संदृष्टः, समालोकितः, समीक्षितः सम्प्रदृष्टः, एते त्रिलिङ्गाः स्युः।

दृष्टिदृष्टवाचकप्रकीर्णशब्दाः—दत्तनेत्रः, दृष्टदेहः, दृष्टमूर्तिः, दृष्टशरीरः, दृष्टिघटितः, दृष्टिशुद्धः, प्रेक्षणता, प्रेक्षणत्वम्।

युतीक्षणवाचकशब्दाः—ईक्षान्वयवान्, दर्शनयोगः, युतिदृक्, युतिवीक्षणम्, वीक्षणसमागमः।

दृष्ट्वावाचकाव्ययशब्दाः—अवेक्ष्य, आलोक्य, दृष्ट्वा, प्रेक्ष्य, विलोक्य, संदृश्य, समीक्ष्य, एतेऽव्ययाः स्युः।

मध्यप०—अन्तः (र्) (अ०), अन्तरम् (न०), अन्तरा (अ०), अन्तरालम् (न०), अन्तरालकम् (न०), अभ्यन्तरम् (न०), मध्यः (पुं०न०)।

मध्यगतप०—अन्तरगतः, अन्तर्गतः, मध्यगः, मध्यगतः, मध्ययातः।

विनार्थवाचकाव्ययशब्दाः—अन्तरेण, ऋते, विना, हिरुक्, एतेऽव्ययाः स्युः। क्वचित् अन्तरम्, वर्जनमपि।

वर्जितवाचकशब्दाः—उज्झितः, ऊनः, ऊनितः, च्युतः, न्यूनः, परिच्युतः, मुक्तम्, रहितः, वर्जितः, वि (अ०), विमुक्तः, वियुक्तः, वियुतः, विरहितः, विवर्जितः, विशेष्यम्, विश्लेष्यम्, विहीनः, वीतः, एते त्रिलिङ्गाः स्युः।

अन्तरवाचकशब्दाः—अन्तरम्, विवरम्।

वर्ज्यवाचकशब्दाः—परिवर्जनीयः, परिवर्जितव्यः, परिवर्ज्यः, वर्जनीयः, वर्जितव्यः, वर्ज्यः, (छोड़ने योग्य)।

वर्जयित्वावाचकाव्ययशब्दाः—अप, अपहाय, अपास्य, त्यक्त्वा, परिहृत्य, प्रोज्झ्य, वर्जयित्वा, विहाय, सन्त्यज्य, हित्वा, एतेऽव्ययाः।

क्तवतुप्रत्ययान्तशब्दाः—आश्रितवान्, इतवान्, गतवान्, प्राप्तवान्, यातवान्, स्थितवान्, एते त्रिलिङ्गाः स्युः।

शानच्-कानच्-प्रत्ययान्तशब्दाः—ईक्ष्यमाणः, वर्तमानः, विद्यमानः, विराजमानः, विलोक्यमानः, वीक्ष्यमाणः, शोभमानः, समीक्ष्यमाणः, एते त्रिलिङ्गाः स्युः।

शतृप्रत्ययान्तशब्दाः—अधितिष्ठन्, गच्छन्, चरन्, चलन्, तिष्ठन्, निवसन्, पश्यन्, प्रवसन्, भवन्, वसन्, व्रजन्, सन्, एते त्रिलिङ्गाः स्युः।

प्रकीर्णशब्दाः—अगुरुगः, गुरुगः, समभगः, एतेऽपि त्रिलिङ्गाः स्युः।

अथातः परं स्थितिपर्यायाणामुदाहरणानि **प्रदर्श्यन्ते**—(ठहरने का स्थान)।

अवस्थानम् (न०) स्थितिः, वासः, प्रतिष्ठा। यथा—'अवस्थानमङ्गे शशाङ्केज्यमभानम्' इति। ग्रन्थकारः,

अवस्थितिः (स्त्री०), वासः। यथा–अवस्थितिर्लाभगृहे सतां चेत् इति ग्रं०का०।

आसना (स्त्री०) स्थितिः। यथा—'भवति दिवसभर्तुस्त्वासनायामजर्क्षे' इति ग्रं०का०।

आस्था (स्त्री०) स्थितः। यथा—'आस्थायां यदि घटभे खरांशुसूनाः' इ०ग्रं०का०।

आस्या (स्त्री०) स्थितिः। यथा—'आस्थायां पुण्डरीके जनजनिसमये पद्मिनीनाथसूनोः' इ०ग्रं०का०।

उपविष्टिः (स्त्री०) वासः। यथा—'यदोपविष्टिर्मदने खलानाम्' इ०ग्रं०का०।

निष्ठा (स्त्री०) स्थितिः। यथा—'निष्ठाऽब्जनीलाम्बरभास्वतां भवे' इ०ग्रं०।

प्रतिष्ठा (स्त्री०) स्थितिः। यथा—'पुण्ये पपीपङ्गुकविप्रतिष्ठा' इ०ग्रं०का०।

वासः (पुं०) १ अवस्थानम् । २ गृहम् । यथा–'त्रिषडायेष्वसद्वासो विशेषेण गुरूदयः'। इ०ग्रं०का०।

व्यवस्थानम् (न०), स्थितिः। यथा–'व्यवस्थानमन्त्ये शनीनेन्दुजानाम्' इ०ग्रं०।

व्यवस्थितिः (स्त्री०), १ अवस्थानम्। २ व्यवस्था। यथा–'व्यवस्थितिर्जन्मनि वित्तभावे खलग्रहाणां धनहानिमाहुः। इति ग्रं०का०। संस्था (स्त्री०), स्थितिः। यथा–'संस्थाजनौ जीवगृहे जडांशोः, इ०ग्रं०का०।

संस्थितिः (स्त्री०) स्थितिः। यथा–बन्धुसूनुसदने कुजराह्वोः संस्थिती रचयति क्षयरोगम्।' इति जैमिनीयपद्यामृते।

अथवा—

'केन्द्रत्रिकोणरन्ध्रार्थेष्वनयोः (लग्नेन्द्वोः) शुभसंस्थितिः।' इति ग्रन्थान्तरे।

वा—

'सतां संस्थितिः सूनुभे सूनुलब्धिः' इ०ग्रं०।

स्थितिः (स्त्री०), अवस्थानम्। यथा—'उशनसः कलशे जनुषि स्थितौ' इति जातकाभरणे।

अथेदानीं संयोगवाचकशब्दोदाहरणानि—

अन्वयः (पुं०), संयोगः, सम्बन्धः, मेलः। यथा–यदान्वयोऽङ्गे गुरुभास्वतोर्जनौ' इ०ग्रं०का०।

मेलः (पुं०) सङ्गः, सङ्गमः। मेलकः, मेलनम् (न०)। यथा—'मदे मेलनं मन्दमार्तण्डनाम्नोः' इ०ग्र०का०।

युक्तिः (स्त्री०) सङ्गः। यथा–यमारयोर्युक्तिरनङ्गभावे' इ०ग्रं०का०।

युतिः (स्त्री०) योगः, समागमः। यथा–'मदनमन्दिर आरभयोर्युतिः' इ०ग्रं०का०।

योगः (पुं०), १ संयोगः, २ युक्तिः।

यथा–'अथ कण्ठकायेशयोगेऽतिपराक्रमी स्यात्' इ०ग्रं०का०।

संयुतिः (स्त्री०), संयोगः। यथा–'अजे संयुतिर्मङ्गलादित्यसून्वोः' इ०ग्रं०का०।

संयोगः, (पुं०) मेलनम्, सम्बन्धः। यथा–'संयोग आये यमयामिनीशयोः' इ०ग्रं०का०

संसर्गः (पुं०), १ संगः, सङ्गमः २ समवायादिसम्बनधः।

यथा–'संसर्ग आङ्गिरसगौररश्म्योः' इ०ग्र०का०।

सङ्गः (पुं०), १ संयोगः, सङ्गमः, मेलः, ऐक्यम् २ संसर्गः, संस्पर्शः।

यथा–'सङ्गो विसारे विधुवासरेशयोः' इ०ग्र०का०।

सङ्गतिः (स्त्री०) सङ्गमः। यथा–'वृषे सङ्गतिः षोडशांशूडुपत्योः' इ०ग्रं०का०

सङ्गमः (पुं०) संगः, मेलकः। यथा–'जम्बालनीड उडुपार्च्चितसङ्गमश्चेत्' इ०ग्रं०का०।

समन्वयः (पुं०), सयोगः, मिलनम्। यथा–'मतिपतिः सबलोऽत्र समन्वये शखपयोः सति कण्टकभे तथा।' इ०ग्रं०का०।

समागमः (पुं०) संयोगः। यथा–'उडुपतेर्वृषभेऽत्र समागमः' इ०ग्रं०का०।

समाजः (पुं०) समितिः, संयोगः। यथा–'हयाङ्गे हरीन्दुज्ञभानां समाजः' इ०ग्रं०का०

समायोगः (पु०), संयोगः, समागमः, सम्बन्धः।

यथा–'समायोगो याम्ये यमजनकनीहारकरयोः' इ०ग्रं०का०।

समितिः (स्त्री०), समाजः, संयोगः। यथा–'भग्लौविदां समितिररायगृहेऽर्थलाभः' इ०ग्रं।

अथाधुना युक्तवाचकशब्दानामुदाहरणानि प्रदर्श्यन्ते—

अन्वितः (त्रि०), युक्तः। यथा–'कल्याणयातो कविनान्वितः कलेट्' इ०ग्रं०।

आढ्यः (त्रि०), युक्तः। यथा–'शुभाशुभाढ्ये यदि जन्मलग्ने' इति जातकपारिजाते।

आश्लिष्टः (त्रि०), आलिङ्गितः। 'आये सदाऽऽश्लिष्ट इनारमन्दैः' इति ग्रं० का०।

आलिङ्गितः (त्रि०), युक्तः। यथा–'तनयभवननाथो धन्विनाऽऽलिङ्गिताङ्गः' इ०ग्रं०का०।

उपेतः (त्रि०), युक्तः। यथा–षट्त्रिव्ययाष्टमोपेता व्ययवित्तगृहाधिपाः इ०जा०पा०।

प्रयुतः (त्रि०), युक्तः। यथा—'दिनपतौ प्रयुते मदनेऽशुभैः इ. ग्रं. का.।

प्रयुक्तः (त्रि०), युक्तः। यथा–'भाग्ये भगे भास्करिणा प्रयुक्ते' इ०ग्रं०का०।

प्रसक्तः (त्रि०), संवद्धः, मिलितः। यथा–'शुभस्यास्य प्रसक्तस्य' इत्युडुदायप्रदीपे।

मिलितः (त्रि०), युक्तः, सङ्गतः।

यथा–'श-कु-बु-जीमिलिताश्च दिवाम्बुगे भृगुसुते करनाश उतांगुलेः।' इति गिरिधरः।

मिश्रितः (त्रि०), मिलितः। युक्तः। यथा–'मदालये मिश्रित आरविद्भ्याम्' इ०ग्रं०।

युक् (ज्) (त्रि०), युक्तः। यथा–'सचरणभूयुग्ग्रसनमभीष्टम्।' इ०ग्र०।

युक्तः (त्रि०), युतः, मिलितः।

यथा–'अथ निर्मलैः, युक्तेऽमलांशे सहजे च कारके' इति ग्रं०का०।

युतः (त्रि०), युक्तः, सहितः। यथा–'चरराशियुते लग्ने धरासुतयुते मदे।' इति प्रश्नमार्गे।

लगतिः लग्नः—लीनः (त्रि०), संयुक्तः, मिलितः।

यथा–'शनिना लगिते लग्ने, हेलौ लग्ने सुधांशुना, मङ्गले ग्लौभुवा लीने' इ०ग्रं०का०।

आलिङ्गिताङ्गः (त्रि०), मिलितदेहः। यथा–'आलिङ्गिताङ्गो धनुषाऽङ्गगो मृदुः' इ०ग्रं०।

संयुक् (ज्) (त्रि०), संयुक्तः, संयुतः, युक्तः।

यथा–'पापसंयुजि मारनिकेते' इ०ग्रं०का०।

धनेशे लाभसंयुक्ते' इति। 'कारके बलहीने वा क्रूरशष्ट्यंशसंयुते।। इति च त्रि०मा०।

संलग्नः (त्रि०), संयुक्तः। यथा–'संयुक्ते रविणा तुषारकिरणे' इ०ग्रं०का०।

संश्लिष्टः (त्रि०), मिलितः, आलिष्टः। यथा–'संश्लिष्टः शशिना सरोरुहसुहृत्' इ०ग्रं०का।

संसक्तः (त्रि०), संलग्नः।

यथा–'संसक्त इन्दौ खररश्मिमालिना इ. ग्रं. का।

संहितः (त्रि०), १ सहितः, २ मिलितः।

यथा–'संहितो यदि विदा निशाकरः' इ. ग्रं. का.।

सक्तः (त्रि०), लग्नः, लगितः। यथा–आत्मकारकलवे शशिसक्ते इ. जै. प. मृ.।

अथवा—यथा—'निधनभवननाथः कामिनीभावसक्तः इ. ग्र.।

सखा (त्रि०), सहायः, सहचारी, अनुचरः, अभिसरः।

यथा—अखिलकेन्द्रसखैः खलखेचरैः इ. ज्यो. भ.।

अथवा—अशुभशुक्रसखः इति विवाहवृन्दावने।

सङ्गतः (त्रि०), युक्तः। यथा–द्वितनौ भार्गवभार्यभूभवाः।

यदि ते तुरगाङ्गसङ्गताः सुतदाः। इति ग्रं०का.।

सनाथः (त्रि०), नाथवत्, रक्षकः युक्त इत्यर्थः।

यथा–विग्रहे कमलिनीशसनाथे इति ग्रं०का०।

अथवा—सपत्नभवविक्रमैः शनिकुजरविभिः सनाथैः, इति ज्यो०भ०।

समन्वितः (त्रि०), युक्तः। यथा–सतां गृहे सौम्यखगैः समन्विते इ. ग्रं. का।

समाढ्यः (त्रि०), युक्तः। यथा—सौम्यैः समाढ्ये सुतसद्मनीन्दौ इ. ग्रं. का.।

समेतः (त्रि०), मिलितः, संयुक्तः।

यथा–पञ्चमे नवमे द्यूनेसमेतौ सितभास्करौ। इति गार्गिः।

अथवा—मदे मतङ्गे मृदुना समेते इ०ग्रं०का०।

सम्पद्यमानः (त्रि०), मिलितः। सम्पद्यमानस्तरर्णिर्धराभुवा इ. ग्रं. का.।

सम्पृक्तः (त्रि०), सयुक्तः। यथा–सम्पृक्तततोऽसृक् सौरिणा भास्वता वा इ. ग्र. का.।

सम्मिश्रः (त्रि०), संयुक्तः। 'सम्मिश्रश्चेद् भास्करो बोधनेन इति ग्र० का०।

सहितः (त्रि०), संयुक्तः। यथा–भास्करहिमकरसाहितः शनैश्चरो मृत्युदः प्रसवकाले॥ इति सारावल्याम्। अथवा—यमोऽर्कमाभ्यां सहितोऽन्तदः सवे इ. ग्रं.।

अथाधुना व्याप्तवाचकशब्दोदाहरणानि—

आचितः (त्रि०), व्याप्तः। यथा–ऽथो चिति, नेत्रपाण्यवस्थाचिते सोमसुते, इ. ग्रं. का.।

आश्रितः (त्रि०), अधिष्ठितः। यथा—यदाश्रिते कालगृहे कलानिधौ समीक्षिते कालखगेन जन्मनि। इ. ग्रं. का.।

उपविष्टः (त्रि०), अधिष्ठितः।

यथा—उपविष्ट इने निधने सयमे द्रविणे विधुना सहिते सकुजे। इ. ग्रं. का.।

निचितः (त्रि०) व्याप्तः, पूरितः।

यथा—शीर्षोदयभाजि कण्टके स-न्निचिते दीक्षणधीस्थले विदीज्ये।' इ. ज्यो. भ.।

अथवा—कण्टके यदि कोदयभाजि शोभनद्युगतिना निचितेऽत्र । इति ग्रं० का०।

समाक्रान्तः (त्रि०), १ व्याप्तः, २ अधिष्ठितः।

यथा–समाक्रान्तः सौम्यो यदि जनुषि देवार्चितपदा।' इ. ग्रं. का.।

अथवा—समाक्रान्तः सौम्यैः सुतसदनगे भास्करसुते। इ. ग्र. का.।

अथ सम्प्रति प्राप्तवाचकशब्दोदाहरणानि—

अधिगतः (त्रि०), प्राप्तः।

यथा–अधिगते धनभे धरणीभुव' इ. ग्रं. का.।

आगतः (त्रि०), १ आयातः, उपस्थितः, प्राप्तः।

यथा–गणे सतां गात्रगृहोपगेऽथवा तनौ शुभव्योमगयोगमागते।' इ. ग्रं. का.।

आपन्नः (त्रि०), १ प्राप्तः, २ आगतः।

यथा— सद्योगमापन्न इहोद्गमालये इति० ग्रं०का०।

आप्तः (त्रि०), १ प्राप्तः, २ लब्धः।

यथा–'खगे खरांशौ खलदृष्टिमाप्ते' इति।

अथवा–सोदरपेऽङ्गमाप्ते इति च ग्रं०का०।

आयातः (त्रि०), आगतः।

यथा–शुभवर्गे लग्नगते लग्ने वा शुभवर्गमायाते।। इ०जै०प०।

आस्थितः (त्रि०), १ प्राप्तः, २ आरूढः।

यथा–यदोद्गमे सद्दृशमास्थिते जनौ इ०ग्र०का०।

अथवा—केन्द्रारूढे शोभनवेमवासे। इ०ग्रं०का०।

इतः (त्रि०), गतः। यथा–कायोपगेऽर्के शुभवीक्षणेते। इ०ग्रं०का०।

गः (त्रि०), पदान्ते गच्छत्यस्मिन्, घञर्थेकः।

यथा–'विधुररौ च मृतौ शनिरायगः इत्युदय भास्करे।

अथवा—तनुजलास्तसहोदरशत्रुगा गुरुसितेन्दुजमन्ददिवाकराः। इ०वि०मा०।

गतः (त्रि०), १ यातः, २ आप्तः।

यथा— 'निशाकरे भाग्यगते सभार्गवे' इ०ग्रं०का०।

प्रगतः (त्रि०), गतः।

यथा–कवौ कलत्रं प्रगते सगीष्पतौ इ०ग्र०का०।

उपगः (त्रि०), प्राप्तः।

यथा—यानेशकर्मोपगतौ बलिष्ठौ इ०जा०पा०।

अथवा—उपगते शुभयोगमिने मदे इ०गं०का०।

उपयातः (त्रि०), प्राप्तः।

यथा—वली विलग्नान्नवमोपयातः इ०जा०पा०।

उपेयिवान् (क्वस्वन्तः) (त्रि०), उपगतः।

उपेयिवाननाश्वाननूचानश्चेति क्वसुप्रत्ययान्तो निपातः।

यथा—पापमन्दिरमुपेयुषि मन्दे, इ०जै०प०।

अथवा—अथ कलावति कर्कमुपेयुषि इ०ग्रं०का०।

प्रयातः (त्रि०), गतः (गया), यथा—कृशतां प्रयातः इ०जै०प०।

बिभावरीशे कृशतां प्रयाते इ०ग्रं०का०।

प्राप्तः (त्रि०), समुपस्थितः। यथा—वित्तेशाद्धनरिःपफरन्ध्रभवनप्राप्ताश्च सौम्यग्रहाः' इ०ग्रं०का।

यातः (त्रि०), गतः। यथा–'याते कलत्रं यदि कृष्णवाससि' इ०ग्रं०का०।

समधिगतः (त्रि०), प्राप्तः, अधिगतः।

यथा–सौम्याः खेटास्त्रिकोणोदयसमधिगताः केन्द्रगा नो असौम्याः इ०ग्रं०का०।

समागतः (त्रि०), सम्प्राप्तः।

यथा—'धर्मेशदृष्टौ यदि तद्युतौ वा परस्परक्षेत्रसमागतौ वा'। इ०जा पा०।

समासादितः (त्रि०), १ प्राप्तः २ आहतः।

यथा—'जायासमासादित उष्णरोचिषि' इ०ग्रं०का०।

समुपस्थितः (त्रि०), प्राप्तः। यथा—भार्यानिकेते समुपस्थिते भृगौ' इ०ग्रं०का०।

समुपेतः (त्रि०), सम्प्राप्तः। यथा—अनन्तगेहे समुपेत आर्ये इ०ग्रं०का०।

सम्प्राप्तः (त्रि०), समागतः। यथा–'सम्प्राप्त उर्वीतनये मनोजे' इ०ग्रं०का०।

अथेदानीं स्थितवाचकशब्दोदाहरणानि—

अधिष्ठितः (त्रि०), १ आश्रितः, २ आहितः।

यथा—अधिष्ठिते भास्वति भाग्यवेश्मनि इ०ग्रं०का०।

अवस्थितः (त्रि०), स्थितः, आसीनः, कृतावस्थानम्।

यथा–निधानभावे सितगाववस्थिते इ०ग्रं०का०।

आश्रितः (त्रि०), उपविष्टः।

यथा–बृहस्पतावाश्रित उद्गमालये इ०ग्रं०का०।

आसानावस्थितः (त्रि०), आसीनः, समासीनः, उपविष्टः, (बैठा)।

यथा–आसनावस्थिते वाक्पतौ वाग्गृहे' इ०ग्र०का०।

आसीनः (त्रि०), उपविष्टः।

यथा—आसीने धवलच्छवौ धनगृहे धिष्ण्येन संवीक्षिते इ०ग्रं०का०।

उपविष्टः (त्रि०), समासीनः।

यथा—उपविष्ट इलातनये ततनये इ०ग्रं०का०।

उपस्थितः, (त्रि०), १ उपसन्नः, निकटस्थितः, प्राप्तः, आगतः।

यथा–उपस्थिते वेश्मनि वेश्मनायके इ०ग्रं०का०।

कृतावस्थानम् (त्रि०), स्थितः, आसीनः।

यथा–'कृतावस्थानेऽर्के मदनभवने मन्दसहिंते' इ०ग्रं०का०।

प्रतिष्ठितः (त्रि०), संस्थितः।

यथा–प्रभाकरे पङ्गुगृहे प्रतिष्ठिते इ०ग्रं०का०।

व्यवस्थितः (त्रि०), प्रतिष्ठितः।

यथा–'एवं देशाधिनाथा ये ग्रहवेधे·व्यवस्थिताः।' इति नरपतिजयचर्यायाम्।

संस्थः (त्रि०), अवस्थितः।

यथा–'ग्रहो यदि च कर्मणि संस्थः' इ०जा०पा०।

स्थः (त्रि०), पदान्ते तिष्ठत्यस्मिन् 'घञर्थे कः'।

यथा–राहुश्चतुष्टयस्थो मरणाय निरीक्षितः॥ इति सारावल्याम्।

स्थितः (त्रि०), १ वर्तमानः, २ समुपस्थितः, ३ निश्चलः, स्थिरः।

यथा—'वपुषि स्थिते स्वगृहतुङ्गे विधौ' इति।

'लग्नपुत्ररिपुविक्रमस्थिताः शुक्रजीवशनिभास्करा यदा।' इति च वि०मा०।

संस्थितः (त्रि०), व्यवस्थितः।

यथा–शोभने संस्थिते सोदरेशान्विते कण्टके' इ०ग्रं०का०।

समासीनः (त्रि०), उपविष्टः।

यथा–समासीने सोमे ससखिसदनेशे सखिगृहे' इ०ग्रं०का०।

श्रितः (त्रि०), १ आश्रितः २ संलग्नः, संयुक्तः।

यथा–श्रित उषारमणे रमणालये इ०ग्रं०का०।

संश्रितः (त्रि०), आश्रितः, अनुजीवी।

यथा–संश्रिते कण्टके कोणपे सायपे।' इ०ग्रं०का०।

अथवा—'श्रितकण्टके च सुरराजमंत्रिणि' इत्यु०भा०।

अथवा—'धान्यानां नवसंग्रहे शशिशनी लग्ने श्रितैकांशकौ' इ०वि०मा०।

समुपाश्रितः (त्रि०), आश्रितः, उपविष्टः (बैठा)।

यथा–'माहेयमन्दामृतरश्मिरोधनाः स्वनीचराशिं समुपाश्रिता इमे।' इ०ग्रं०का०।

सेवितः (त्रि०), आश्रितः।

यथा–'चेत्सेविता युवतिरत्रिजनुः, सुतेन' इ०ग्रं०का०।

अथाधुना स्थानवाचकशब्दोदाहरणानि—

कृतायतनः (त्रि०), कृताश्रयः, कृत आयतन, आश्रयो येन।

यथा–'कृतायतनः स्वकीयतुङ्गोदये नलिनीवनाधिनाथः।' इ०ग्रं०का०।

कृताश्रयः (त्रि०), कृतपदः।

'कृताश्रयः स्वीयसुहृद्विलग्ने सरस्वतीशः सितसोमयुक्तः।' इ०ग्रं०का०

कृतास्पदः (त्रि०), कृतपदः।

यथा–कृतास्पदो दैत्यगुरुर्निजोच्चोदये दयानाथनिरीक्ष्यमाणः।' इ०ग्रं०का०।

यथा—कृतपदः (त्रि०), कृतास्पदः।

यथा—कृतं पदं स्थानं येन एवं विधः कुमुदस्य बन्धुश्चन्द्रः।

अथवा–स्वोच्चोदये कृतंपदः कुमुदस्य बन्धुः' इ०ज्यो०भ०।

कृतस्थितिः (त्रि०), कृतसंस्था। कृता स्थितिः संस्था येन एवं विधो राहुः।
यथा–'घटसिंहवृश्चिकोदयकृतस्थितिर्जीवितं हरति राहुः।।' इ०सा०व०।
संश्रयः (पु०), आश्रितः।
यथा—'ग्रहैस्ततः पञ्चभिरुच्चसंश्रयैः' इतिं रघौ ३/१३
स्थलम् (न०), १ स्थानम् २ स्थलिः।
यथा–'लाभस्थौ सुखभाग्येशौ पश्यन्तो वा सुखस्थलम्।' इ०जा०पा०।

अपि च—

'शीर्षोदयभाजि कण्टके सन्निचिते दीक्षणधीस्थले विदीज्ये।' इति ज्यो०भ०।
स्थानम् (न०), गृहम्।
यथा–'क्षेत्रस्थाने शुभक्षेत्रे तदीशे शुभसंयुते। इति।
'तरणीन्दुकुजाः पुत्रस्थाने युक्ता न सौम्यगाः।' इति च सर्वार्थचिंतामणौ।

अथेदानीं मिलित्वाऽव्ययवाचकशब्दोदाहरणानि—

उपेत्य (अ०), समुपेत्य।
यथा–'दनुजगुरुमुपेत्यादित्यसूनुर्मदस्थः' इ०ग्रं०का०।
मिलित्वा (अ०), समेत्य
यथा–'मदे मिलित्वा मृदुमङ्गलेनाः कुर्वन्ति भार्यामरणं नरस्य। इ०ग्रं०का०।
सम्मिल्य (अ०), मिलित्वा।
यथा–'सम्मिल्य सौम्यास्फुजिदिन्दुजीवाः स्मरे विवाहं झटिति प्रकुर्युः।' इ०ग्रं०का०।
समुपेत्य (अ०), समेत्य।
यथा–'कलेवरेशं समुपेत्य वित्तपः' इ०ग्रं०का०।
समेत्य (अ०), मिलित्वा
यथा–'मित्रे कपं मङ्गलहेलिमन्दाः समेत्य जन्तोर्जननीं हरन्ति।' इ०ग्रं०का०।
अथवा—'मित्रोदयं राजमदं स्वराज्यं राज्यं रिपोर्यच्छति यो जनेशः।।
नेतुं समेत्योदयमेवमीयात्तमादराद्वेरिजनेरितार्थः।
अस्यार्थः—मित्रोदयं लग्नस्थसूर्यं, राजमदं सप्तमस्थचन्द्रं, स्वराज्यं धनस्थबुधं एवं विधं उदयं लग्नं समेत्य प्राप्येति। इति ज्योतिर्विदाभरणे।

अथ साम्प्रतं प्राप्यवाचकाव्ययशब्दोदाहरणानि—

अधिगम्य (अ०), सम्प्राप्य।
यथा–'सूर्यात्मजांशमधिगम्य हिमांशुरङ्गे' इ०जै०प०।
प्राप्य (अ०), अधिगम्य।
यथा—'प्राप्येन्द्रमन्त्रीन्दुगृहं यदोदये' (इ.ग्रं.का.)।
सम्प्राप्य (अ०), अधिगम्य।
यथा–'सम्प्राप्य पंगुः कलशं कलेवरे' इ०ग्रं०का०।

अथ साम्प्रतं सम्बन्धपर्यायाणामुदाहरणानि—

पृक्तिः (स्त्री०), सम्पर्कः, स्पृष्टिः, स्पर्शः।

यथा—'कलेवरेशे निजभेऽथवान्त्ये पृक्तौ जनौ चेत्कलुषग्रहाणाम्। इति ग्रं०का०।

संयोगः (पुं०), सम्पर्कः।

यथा—'संयोगो भवभे दिवाकरभुवः' इ०ग्रं०का०।

संसर्गः (पुं०), सङ्गः, सङ्गमः।

यथा—'संसर्गस्तनुभवने दिनेशचान्द्रयोः।' इ०ग्रं०का०।

संस्पर्श (पु०), १ स्पर्शः। २ सम्बन्धः।

यथा—' संस्पर्शे मृतिमन्दिरे तनुविभोः सौम्यैर्यदा नेक्षिते' इ०ग्रं०का०।

समागमः (पुं०), संयोगः।

यथा—'समागमे शीतरुचेः कलेवरे।' इ०ग्र०का०।

सम्पर्कः (पु०), १. सम्बन्धः, २. संयोगः, ३. मेलकः।

यथा—'सम्पर्कः सहजगृहे शुभग्रहाणाम्' इ० ग्रं० का०।

सम्बन्धः (पुं०), संयोगपूर्वः।

यथा—'सत्सम्बन्धे भाग्यगेहे विधीशे सद्भिर्दृष्टे जायते भाग्यवान्ना।' इ०ग्रं०का०।

स्पर्शः (पु०), १. सम्पकः, २. स्पर्शनम्।

यथा—स्पर्शे वित्ते बोधनस्याथवेन्दोः' इ०ग्रं०का०।

स्पृष्टिः (स्त्री०), पृक्तिः, सम्पर्कः।

यथा—'स्पृष्टौ कलेवरगृहे यदि लोहितांशोः' इ०ग्रं०का०।

अथाऽधुनासम्बन्धिपर्यायोदाहरणानि—

संयोगी (इन्) (त्रि०), संयोगविशिष्टः।

यथा—संयोगिनीहास्तगृहे भृगोर्जनेः' इ०ग्रं०का०।

संसर्गी (इन्) (त्रि०), १. संसर्गविशिष्टः, २. सङ्गी, मत्वर्थीय इति।

यथा—'खलसंसर्गिणि भावे' इति जै०प०।

सम्पर्की (इन्) (त्रि०), सम्पर्कविशिष्टः।

यथा—'सम्पर्किणि द्यूनगृहे दिवाविभो।' इ. ग्र.।

सम्बन्धी (इन्) (त्रि०), सम्बन्धविशिष्टः, गुणवान्, संयुक्।

यथा—'चन्द्रोविलग्नसम्बन्धी वाहनेशसमन्वितः।' इति जा०पा०।

अथ सम्प्रतीहोपयोगिनामण्प्रत्ययान्तादीनां युक्तस्थितादिवाचकप्रकीर्णशब्दोदाहरणानि प्रदर्श्य

यथा—अण्प्रत्ययान्ताः—

कौलः (त्रि०), कुलं, वंशः, तत्र भवः, इत्यनेनाण् प्रत्ययः, दशमभावस्थ इत्यर्थः।

स्मारः (त्रि०), स्मरः, कामः, 'तत्र भवः' इत्यनेनाण् प्रत्ययः। सप्तमभावस्थ इत्यर्थः।

कौशः (त्रि०), कुशं, जलं, 'तत्र भवः' इत्यनेनाण् प्रत्ययः। चतुर्थभावस्थ इत्यर्थः।

यथा—'स्मारोऽसुरेन्द्रमहितः सहसा समेतः कौलः कलाधरसुतो यदि जन्मदिष्टे।
कौशोऽत्रिजोऽखिलतनुः पदमन्दिरं सत्' इति ग्रं०का०। अथवा—
'कौशो भवेत्कमलिनीपरिणायकश्चेत्स्मारः सवित्कविरिहाहवयानकाले।' इति ज्यो०भ०।

अधिकलः (पुं०), पूर्णः।

यथा—'पुरप्रवेशेऽधिकले विधौ हितः' इ०ज्यो. भ.।

अधिकृत् (त्) (त्रि०), अधिकारवान्।

यथा–'लग्नाधिकृति' 'लग्नाधिकारवतीत्यर्थः जै०प०।

अधियोगसञ्ज्ञः (पुं०), योगविशेषः।

यथा–'एकोऽपि जीवो बलवान् विलग्ने केन्द्रत्रिकोणे शशिजः कविर्वा।
द्वाभ्यां च ताभ्यामधियोगसञ्ज्ञः' इ०वि०मा०।

अधिश्रितः (त्रि०), स्थितः।

यथा–'सौम्योऽधिश्रितकण्टकोऽतिबलवान्' इ०वि०मा०।

अध्यासितः (त्रि०), १ अधिष्ठितः, २ निषेवितः।

यथा–'अध्यासितेऽस्तेऽवनिजेऽङ्गना क्षतिः' इ०ग्रं०का।

अध्यासीनः (त्रि०), उपविष्टः।

यथा–'अध्यासीनेऽङ्गे गुरावङ्गपुष्टिः' इ०ग्रं०का०।

अध्युषितः (त्रि०), उषितः, स्थितः, 'वसा' इति भाषा।

यथा–'पदतो धनभे कलाधिभूगुरुशुक्राध्युषिते' जै०प०।

अन्वितः (त्रि०), युक्तः, मिलितः।

यथा–'पापान्विते यदि विदेशगतोऽतिमूर्खः इ०जा०पा०।

अभिगतः (त्रि०), सेवितः, आश्रितः।

यथा–'कायाख्येऽभिगत इनात्मजे सचापे' इ०ग्रं०का०।

अभ्युपेतः (त्रि०), उपगतः, प्राप्तः।

यथा–'तुषाररश्मौ तनयेऽभ्युपेते इ०ग्रं०का०।

अयातः (त्रि०), अगतः, अप्राप्तः।

यथा–'शुभदृष्टिमयाते'।

'अवलम्बितः (त्रि०), संश्रितः, आश्रितः। 'अवलम्बित नुद्गमगेह इने' इ०ग्रं०का०।

अष्टमः (त्रि०), नवमः (त्रि०), षष्ठः (त्रि०)।

यथा–'अष्टमो मङ्गलः सौरिर्नवमः षष्ठ आस्फुजित्। इ०ग्रं०का०।

आकीर्णः (त्रि०), १ व्याप्तः, २ समाक्रान्तः।

यथा–'आकीर्णेऽङ्गे पद्मिनीपालसूनौ इ०ग्रं०का०।

आक्रान्तः (त्रि०), १ कृताक्रमणः, व्याप्तः, २ अभिभूतः, पराभूतः, व्याकुल इत्यर्थः।

यथा–श्यामौ वा व्यपगतरश्मिमण्डलो वा रूक्षो वा व्यपगतरश्मिवान् कृशो वा।
आक्रान्तः इति भृगुसिद्धान्ते-' इति सूर्यसिद्धान्ते रङ्गनाथविवृतौ।

अथवा—नेत्रद्वयं पापयुतं च पापाक्रान्तौ तदीशौ' इ०ग्रं०का०।

आरूढः (त्रि०), कृतारोहणम्।

यथा—'तमोग्रहौ शुभारूढौ' इति उडुदाय प्रदीपे।

आवासः (पुं०), गृहम्, वासस्थानम्।

यथा—'आवासे सुरमंत्रिणो हरिपदे' इ०ग्रं०का०।

आश्रित्य (अ०), संश्रित्य।

यथा–'यस्मिन्भावे स्थितः खेटस्तदाश्रित्य स्वकं फलम्। ददादि' इति श्लोकशतके।

कलितः (त्रि०), आप्तः, युक्तः।

यथा–' भार्गवेण कलिते व्ययलाभे इ०ग्रं०का०।

अथवा—'पापयुग्मकलिते सुतपुण्ये' इ०जै०पा०।

कृताधिकारः (त्रि०), कृतः अधिकारः स्वामित्वं येनं

यथा—'निशाकरागारकृताधिकारः' इति। कर्कराशिं गत इत्यर्थः। इति जै० प०।

क्षीणकलः (पुं०), अपूर्णकलः।

यथा–'क्षीणकलाकलाव' क्षीणचन्द्र इत्यर्थः' इ०जै०प०।

चन्द्राधियोगः (पुं०), योगविशेषः।

यथा–'सौम्यैः स्मरादिनिधनेष्वधियोग इन्दोः' इ०बृ०जा०।

दृष्टियुतः (त्रि०), दृगाढ्यः।

यथा–'बुधदृष्टियुते सौख्ये' बुधस्य दृशायुक्त' इत्यर्थः। जै०प०।

निरतः (त्रि०), १ लीनः, तत्परः, २ नियुक्तः, अधिकृतः।

यथा–'वैरिरन्ध्रनिरतैरतिपापैरीक्षिते शशिनि मृत्युमुपैति। इ०वि०मा०।

निष्ठः (त्रि०), स्थितः।

यथा–'मानसे मलिनखेचरनिष्ठे' इति।

अथवा—'सैहिंकेयनलिनीपतिनिष्ठे' इति च जै०प०।

पतितः (त्रि०), प्रस्कन्नम्, गलितः।

यथा–'त्र्यायारिषूग्राः पतिता हरन्ति कष्टं शिशूनां जनने तदानीम्।' इति ग्रं०का०।

प्रकल्प्य (अ), कल्पयित्वा।

यथा—'इत्थं तातादिभावानां लग्नं तत्तत्प्रकल्प्य वै। सर्वं फलं वदेत्' इ०श्लो०श०।

प्रपूर्णः (त्रि०), प्रपूरितः (त्रि०) पूरितः।

यथा–' प्रपूर्णेऽब्जे षड्बलैः किं कलाभिः' इ०ग्रं०का०।

अथवा–प्रपूरिते षोडशभिः कलाभिः सुधाकरे' इ०ग्रं०का०।

मिश्रः (त्रि०), मिलितः, मिश्रितः, सम्पृक्तः, संयुक्तः।

यथा–अत्यन्ताशुभदः पापः पापमध्ये यदा भवेत् सम्बंधी तु शुभो मिश्रोऽसम्बन्धी त्वशुभप्रदः।' इति श्लोक श०।

यथातथा (अ०), क्रमनिवृत्यर्थवाचकोऽयम्।

यथा–निधनारिधनव्ययस्थिता रविचन्द्रारयमा यथा तथा।' इति बृ०जा।

याप्यः (त्रि०),, यापनीयः, निरसनम्, परित्यागः।

यथा–'न शुभगदिता योगाः सद्दृष्टा याप्याः स्युः।'

पूर्णं यथोक्तं फलं न प्रयच्छन्तीत्यर्थः। इ०बृ०जा०।

योगाधियोगः (पुं०), योगविशेषः।

यथा–'योगाधियोगः सहितस्त्रिभिः (ज्ञेज्याच्छैः) स्यात्' इ०वि०मा०।

वहः (त्रि०), वाहकः, वहनकर्ता।

यथा–झषविशेषभुजा सयमासृजा धिषणधिष्ण्यमृगाङ्कवहं धनुः।' इति ज्यो०भ०।

अथवा—यथा–'धिषणधिष्ण्यपधिष्ण्यवहं धनुः' इति।

अथवा—यथा–'उदयगा वनिता विधुभूवहा' इति च ग्रं०का०।

विराजमानः (त्रि०), दीप्तिविशिष्टः, शोभमानः, सुशोभितः (बैठा)।

यथा–विराजमाने द्विजराजखेचरे कृशे त्रिके भूतनयान्विते तथा।' इ०ग्रं०का०।

समनुपतितः (त्रि०), सम्यक् प्रकारेणानुपतितोऽनुगलितः (गिरा हुआ)।

यथा–'समनुपतिताः सबुधास्त्रयो ग्रहाः' इ०बृ०जा०।

अथेदानीं मतुब् प्रत्ययान्ताः शब्दाः प्रदर्श्यन्ते—

तपोवान् (त्रि०), गुरुसहितः।

तमोवान् (त्रि०), राहुसहितः। भानुमान् (त्रि०), रविसहितः।

यथा–'व्योम्निभानुमति किं तपावति' इ०ग्रं०का०।

अथवा—'अचलाजशनीक्षितवत्युदये' इति गिरधरः।

अङ्गपवान् (त्रि०), लग्नेशसहितः।

अस्तपवान् (त्रि०), सप्तमेशसहितः।

यथा–'मन्मथेऽङ्गपवतीह नुर्मृतिर्मन्मथेऽस्तपवति स्त्रियास्तथाः' इति ज्यो. भ.।

पण्डितवान् (त्रि०), बुधसहितः।

यथा–'पण्डायां पण्डितवंति' पञ्चमे बुधसहितः'।

साधुमान् (त्रि०), शुभसहितः।

यथा–'सुधाकरे साधुमति' शुभग्रहसहिते चन्द्र'।

मन्दवान् (त्रि०), शनिसहितः।

यथा–'चन्द्रे मन्दवति' (शनिसहिते चन्द्र इत्यर्थः)' इति च ज्यो०भ०।

अथेदानीं मत्वर्थीयशब्दोदाहरणानि—

अधिकारी (इन्) (त्रि०), अधिकारोऽस्ति अस्य अत इनिठनावितीनिः।

यथा—'प्रथमभवनचारी मृत्युभावाधिकारी' इ०ग्रं०अं०।

अधिशाली (इन्) (त्रि०), युक्तः, पदान्तेषु क्तवाचकोऽयम्।

यथा–'निधनभवनपाली सहोत्थाधिशाली' इ०ग्रं०अं०।

अवलम्बी (इन्) (त्रि०), आश्रितः। प्रालेयभानाववलम्बिनि द्युने' इ०ग्र०का०।

केन्द्री (इन्) (त्रि०), केन्द्रेऽऽस्त्यस्मिन् अत इनिठनावित्यनेन मत्वर्थीय इनिः।

यथा–'यस्याङ्गिनः केन्द्रिणि मंत्रिणीह' इ०ग्रं०।

जुः (ष्) (त्रि०), सेवनम्। 'जुषी' प्रीतिसेवनयोः।

'क्विप् च' इत्यनेन क्विप्। मत्वर्थीयः।

यथा–'तस्य त्रिकोणजुषि कष्टतमे तदानीम्' इति प्रश्नमार्गे।

पाली (इन्) (त्रि०), स्वामी। 'पाल' रक्षणे। अत इनिठनावित्यनेन मत्वर्थीय इनिः।

यथा–'सुतस्थानपाली रिपुस्थानशाली' इति।

'निधनभवनपाली सहोत्थाधिशली इति च ग्रं०अं०।

भाक् (ज्) (त्रि०), पृथक्करणम्। 'भाज्' पृथक्करणे। 'मत्वर्थीयः क्विप्, पदान्ते युक्तवाचकोऽयम्।

यथा–'शीर्षोदयभाजि कण्टके सन्निचिते दीक्षणधीस्थले विदीज्ये।' इति। 'विदि विशोदयभाजि' इति। 'मकरमङ्गलं रविजभाजम्' इति च ज्यो०भ०।

अथवा—'तुर्य्येतिग्मरश्मिसुतभाजि' इति। 'तुर्य्ये चान्द्रिभाजि, इति जै० पा०।

अथवा—'भानुजन्मनि मृगोदयभाजि इ०ग्रं०का०।

यायी (इन्) (त्रि०), १ यातः, २ संग्रामे अग्रगामी आक्रमणकारी।

यथा–काव्यः पातालयायी' इ०जा०लं०।

अथवा—'मदनपतिर्द्यूनयायी' इ०जै०प०।

'राहुवक्त्रे स्थिते सूर्ये चन्द्रे हृदयसंस्थिते। यायिनो विजयस्तत्र' इ०न०ज०।

युक् (ज्) (त्रि०), योगः। 'युजिर्' योगे। 'ऋत्विग्दधृक्स्रगित्यादिना क्विन्' 'मत्वर्थीयः।'

यथा–'आरयुजि व्यये इति। 'वागधीशयुजिव्यये इ०जै०प०।

अथवा—'अन्त्ये गिरीशयुजि विद्युजिभाग्ये' इ०ग्रं०का०।

योगी (इन्) (त्रि०), योगयुक्तः। योगोऽस्यास्ति। 'अत इनठनावितीनिः।

यथा–'तुर्य्ये रुधिरयोगिनि' इ०जै०प०।

अथवा—'मेदिनीतनययोगिनि युग्मे' इ०ग्रं०का०।

विहारी (इन्) (त्रि०), विहारकर्त्ता। मत्त्वर्थीय इनिः।

यथा–स्वांशकात्सलिलभे गुरुभृग्वोर्दृष्टियोगयुजि सौधविहारी। इ०जै०प०।

संयोगी (इन्) (त्रि०), संयोगविशिष्टः।

यथा—'संयोगिनीहास्तगृहे भृगोर्जनेः' इ०ग्रं०।

संसर्गी (इन्) (त्रि०), संसर्गविशिष्टः, २ सङ्गी 'मत्वर्थीय इनिः।

यथा–'खलसंसर्गिणि भावे' इ०जै०प०।

सङ्गी (इन्) (त्रि०), सक्तः, सङ्गविशिष्टः।

यथा—'पद्मिनीरमणसङ्गिनि तुर्ये' इति। 'द्वादशेऽर्कशिखिसङ्गिनि।

अथवा—'तुर्ये केतुसङ्गिनि' इति च जै०प०।

अथवा—'रोहिणीरमणसङ्गिनि शौर्य्ये' इति ग्रं०।

सम्पर्की (इन्) (त्रि०), सम्पर्कविशिष्टः।

यथा–'सम्पर्किणिर्द्यूनगृहे दिवाविभोः' इ०ग्रं०।

सम्बन्धी (इन्) (त्रि०), सम्बन्धविशिष्टः, गुणवान्, संयुक्।

यथा–'चन्द्रोविलग्नसम्बन्धी वाहनेशसमन्वितः।' इ०जा०पा०।

स्थायी (इन्) (त्रि०), पश्चात्क्षेत्रगामी, पश्चाद्वादकारी, स्थायी पौरसंज्ञो वा राजा।

यथा–'राहुवक्त्रे स्थितेसूर्ये चन्द्रे हृदयसंस्थिते।
यायिनो विजयस्तत्र स्थायिनो भङ्ग आहवे।' इ०न०ज०।

स्पृक् (श्) (त्रि०), संस्पर्शनम्। 'स्पृश' संस्पर्शने।
'स्पर्शोऽनुदके क्विन्' 'मत्वर्थीयः।

यथा–'मदनस्पृशि चावनेये' इ०ज्यो०भ०।

अथवा—यदा द्वितीयस्पृशि भूकुमारे' इ०ग्रं०का०।

अथ सम्प्रति 'णिनि' प्रत्ययान्तशब्दोदाहरणानि—

आलम्बी (इन्) (त्रि०), आश्रयी। आलम्बितुं शीलमस्यास्ति इति णिनिः।

यथा– 'धनधाम्नि निजोच्चराशिगद्युचरालम्बिनि' इ०जै०प०।

गामी (इन्) (त्रि०), गमनशीलः। 'गम्लृ' गतौ।

'सुप्यजातौ णिनिस्ताच्छील्ये' इत्यनेन णिनिः।

यथा–'कलशगामिनि पङ्कजिनीपितौ' इ०जा०भ०।

अथवा—'युवतिगामिनि शीतलरोचिषि' इ०ग्र०का०।

चारी (इन्) (त्रि०), चरणशीलः। 'चर' गतिभक्षणयोः 'सुप्यजातौणिनिस्ताच्छील्ये' इत्यनेन णिनिः।

यथा–'प्रथमभवनचारी मृत्युभावाधिकारी' इ०ग्रं०अं०।

अथवा—'चण्डांशुमाली मृतिभावचारी' इ०ग्रं०का०।

निवासी (इन्) (त्रि०), निवसनशीलः। निवसति तच्छीलः। वस०णिनिः।

यथा–'मेदिनीतनयभागनिवासी' इ०ग्रं०अं०।

अथवा—'अथ निवासिनि सोमगृहांशके' इ०ग्रं०का०।

वर्त्ती (इन्) (त्रि०), वर्तिष्णुः। वर्तनशीलः। 'अलङ्कञिति 'इष्णुच्'।

यथा–'सराजमंत्री कुलमानवर्ती सहंसभूमंङ्गललाभभावः।' इति।

अथवा—'कलशवर्तिनि योंऽशुभुवि व्रजेत्। इति च ज्यो०भ०।

अथवा—'काये सकाव्ये वृषवर्तिनीन्दौ' इ०ग्रं०का०।

वासी (इन्) (त्रि०), वसनशीलः। 'क्स' निवासे। 'सुप्यजातौ णिनिस्ताज्छील्ये' इत्यनेन णिनिः।

यथा—'वधूभवासिनि क्षपाधिनायके' इ०ग्रं०का०।

शाली (इन्) (त्रि०), शोभायमानः शालते। 'शाल' कत्थने। ताच्छील्ये णिनिः पदान्ते युक्तवाचकोऽयम्।

यथा–'सुतस्थानपाली रिपुस्थानशाली' इ०ग्रं०अं०।

अथवा—'कलत्रशाली सकुजः कलापः' इ०ग्रं०का०।

अथेदानीं सहसमासशब्दोदाहरणानि—

साधिकारः (त्रि०), अधिकारसहितः। 'अधिकारेण स्वोच्चादिस्वामित्वेन सहितः।

'सहस्य सः संज्ञायाम्' इत्यनेन 'स' इत्यस्य पूर्वनिपातः।

यथा–सहोदरे भास्वति साधिकारे इति।

'तुङ्गादिवर्गे किमु साधिकारे वित्तेऽर्च्चिते' इति च ग्रं०का०।

सघनः (पुं०), घनेन लग्नेन सहितः।

समदः (पुं०), मदेन सप्तमेन सहितः।

ससुखः (पुं०) सुखेन चतुर्थेन सहितः।

यथा—'सघनः कविसूनुरुद्गमे समदो राजसुतो यदातदा।

ससुखो गुरुरालयाश्रयात्' इति०ज्यो०भ०।

तत्रैव—ससौम्यराज्यश्च सभास्वदायः सपूज्यकेन्द्रः ससितोदयश्चेत्' इति०ज्यो०भ०। 'सराजमंत्री कुलमानवर्ती सहंसभूमङ्गललाभभावः' इति. ज्यो०भः०। 'झषविशेषभुजा सयमासृजा' इति. ज्यो. भ०। 'करिकरेऽसृजि पूष्णि सलेयभे' इति०ज्यो०भ०। 'सवित्कविरिहाहवयानकाले इति ज्यो० भ०। 'सविदि भीरुघने कविमानगे' इति च ज्यो०भ०।

अथवा—'सरस्वतीशे ससरस्वतीशे' इ०ग्रं०का०।

अथाधुना दृष्टिपर्यायोदाहरणानि—

आलोकः (पुं०) दर्शनम्। यथा–'निशाकरालोकगतेऽस्तगे रवौ' इति।

आलोकनम् (नं०) ईक्षणम्। यथा–'ज्ञालोकनाप्ते विधिगे क्षपाकरे' इति।

आलोचनम् (न०) दर्शनम्। यथा–'भालोचनेतेऽस्तगते महीसुते।' इति।

ईक्षणम् (न०) दृष्टिः। यथा–'मन्देक्षणेन सहिते मदनमन्दिरे नुः' इति।

ईक्षा (स्त्री०) दृक्।

यथा–'ईक्षागुरोर्बलवती कथिताऽतिशस्ता नो सा शुभा भवति भास्करनन्दनस्य।' इ०ग्र०।

दर्शनम् (न०) दृष्टिः। यथा–'सहोदरे भास्करिदर्शनान्विते' इति।

दृक् (श्) (स्त्री०) ईक्षा।

यथा–'पञ्चत्वगेहे पविपाणिपूज्ये दृशासमेते बलिवन्दितस्य।' इति।

दृशिः (स्त्री)) दृष्टिः।

यथा–'शशाङ्कदृश्या सहिते स्वगे शनौ' इति।

दृष्टिः (स्त्री०) दर्शनम्।

यथा–'भार्यानिकेतं भृगुदृष्टियुक्तं नरस्य पाणिग्रहणंत्ववश्यम् इति।

द्योतनम् (न०) वीक्षणम्।

यथा–दिवाकरद्योतनगेऽर्थभेगुरौ' इति।

निध्यानम् (न०) दर्शनम्।

यथा–महीजनिध्यानमितेऽस्तभावे' इति।

निभालनम् (न०) वीक्षणम्।

यथा—स्मरे कुजे काव्यनिभालनंगते' इति।

निर्वर्णनम् (न०) दृष्टिः।

यथा–'निर्वर्णनेते धिषणस्य भार्गवे' इति।

निशमनम् (न०) दृक्। यथा–'कल्याणे सकवौ गुरोर्निशमनं याते महीनन्दने' इति।

निशामनम् (न०) दृष्टिः। यथा–'सूरेर्निशामनमिते तनये तमीशे' इति च ग्रं०का०।

अथेदानीं दृष्टपर्यायोदाहरणनि—

अवलोकितः (त्रि०) ईक्षितः। यथा—'खस्थे हिमांशाववलोकितेऽहिना' इं ग्रं०।

आलोकितः (त्रि०) दृष्टः।

यथा–'आलोकितेऽखिलखगैर्जननोदये नुः' इ०ग्रं०।

ईक्षितः (त्रि०) विलोकितः। यथा–'यदि हरी हरिगौ शुभदेक्षितौ' इ०ग्रं०का०।

निरीक्षितः (त्रि०) दृष्टः। यथा–'षष्ठीशने निरीक्षिते सुतवती जारेण संजायते' इ०जा०पा०।

परिलोकितः (त्रि०) दृष्टः। यथा–'विधौ विधिस्थे परिलोकिते विदा' इ०ग्र०।

परीक्षितः (त्रि०) दृष्टः। यथा–'कलेवरेशे कलुषैः परीक्षिते' इ०ग्रं०का०।

प्रदृष्टः (त्रि०) प्रेक्षितः। यथा–'खलैः प्रदृष्टे खलराशियाते' इ०ग्रं०का०।

प्रेक्षितः (त्रि०) दृष्टः। यथा–'विवस्वता प्रेक्षित ऋक्षनाथे' इ०ग्रं०का०।

प्रोद्वीक्षितः (त्रि०) दृष्टः। यथा–'प्रोद्वीक्षिते पङ्कजिनीप्रियेण' इ०ग्र०का०।

लोकितः (त्रि०) ईक्षितः। यथा–'चित्तोत्थस्थे बुधगुरुविधुभिर्लोकिते लोकबन्धौ' इ०ग्रं०का०।

विलोकितः (त्रि०) अवलोकितः। यथा–'कल्याणकायभवनेशविलोकितौ वा' इ०ग्रं०।

संवीक्षितः (त्रि०) समीक्षितः।

यथा–'संवीक्षितेऽखिलदृशा यदि लोकबन्धौ लोकम्पृणेन वृषगेण सभार्गवेण। इ०ग्र०।

सन्दृष्टः (त्रि०) अवलोकितः। यथा–'सन्दृष्टौ हरपतिना हरी हरिस्थौ' इ०ग्रं०।

समालोकितः (त्रि०) दृष्टः। यथा–'समालोकिते सौरिणा सौख्यभावे' इ०ग्रं०।

समीक्षितः (त्रि०) समालोकितः। यथा–'सतां गृहे शुभग्रहैः समन्विते समीक्षिते' इति।

अथाधुना दृष्टिदृष्टवाचकप्रकीर्णशब्दोदाहरणानि—

दत्तनेत्रः (त्रि०) दत्तदृष्टिः। यथा–'सुतालयदत्तनेत्रः' इ. जै. प.।

दृष्टदेहः (त्रि०) दृष्टमूर्तिः। यथा–'रविदृष्टदेहः' इ०जै०प०।

दृष्टमूर्तिः (त्रि०) दृष्टशरीरः।

यथा–'बृहस्पतिर्भौमगृहेऽष्टमस्थः सूर्येन्दुभौमार्कजदृष्टमूर्तिः। इ०स०चिं०।

दृष्टशरीरः (त्रि०) दृष्टदेहः।

यथा–'प्रश्नतनोर्यदि पापनभोगः पञ्चमगो रिपुदृष्टशरीरः।' इ०मु०चिं०।

दृष्टिघटितः (त्रि०) ईक्षणघटितः। यथा–'शुक्रदृष्टिघटिते रसवादी' इ०जै०प०।

दृष्टिशुद्धः (त्रि०) दृक्शुद्धः। यथा–'हतदृष्टिशुद्धः।' पापदृष्टिरहित इत्यर्थः। इ०जै०प०।

प्रेक्षणता (स्त्री०) वीक्षणता। यथा—'कलानिधिप्रेक्षणतां प्रयाते' इ०जै०प०।

प्रेक्षणत्वम् (न०) वीक्षणत्वम्। यथा–'छायापुत्रप्रेक्षणत्वं प्रयातः' इ०जै०प०।

अथ साम्प्रतं युतीक्षणवाचकशब्दोदाहरणनि—

ईक्षान्वयवान् (मतुबन्तः) (त्रि०) दृग्योगवान्।

यथा–'मान्दौ वेश्मस्थे तत्पतीक्षान्वयवति' इ०प्र०।

दर्शनयोगः (पुं०) दृष्टियोगः।

यथा–'मन्दराहुकृतदर्शनयोगे' इति।

युतिदृक् (श्) (स्त्री०) योगदर्शनम्।

यथा–'विमलयुतिदृशा' सद्योगदृष्ट्या इत्यर्थः। इति।

युतिवीक्षणम् (न०) योगदृक्।

यथा–'अर्कजीवयुतिवीक्षणसत्त्वे' इति च जै०प०।

युतीक्षणम् (न०) योगवीक्षणम्।

यथा–'सौख्यालये सौम्ययुतीक्षणे यदि इ०ग्रं०।

वीक्षणसमागमः (पुं०) ईक्षान्वयः। यथा–'सौम्यवीक्षणसमागमसत्वे' इ०जै०प०।

अथ सम्प्रति दृष्ट्वा वाचकाव्ययशब्दोदाहरणानि—

अवेक्ष्य (अ०) आलोक्य।

यथा–'विधोर्बलमवेक्ष्य वा दलनकण्डकं गृहाङ्गणम्' इ०मु०चिं०।

आलोक्य (अ०) दृष्ट्वा।

यथा–'आलोक्य वक्रो नृविलग्नगं शनिं शिशोः श्मशाने जननं करोति हि।' इ०ग्रं०का०।

दृष्ट्वा (अ०) विलोक्य।

यथा–'दृष्ट्वोदयस्थं दनुजार्च्चितं मरुन्मंत्री विधत्ते विगदं विशं यदि।' इ०ग्रं०का०।

प्रेक्ष्य (अ०) दृष्ट्वा।

यथा–'नृलग्नगं प्रेक्ष्य कुजः श्मशाने' मन्दमित्यनुवर्त्तते। इ०बृ०जा०।

विलोक्य (अ०) आलोक्य।

यथा–'तत्रारिष्टं तथा चेष्टं विलोक्य प्रबलं वदेत्' इ०श्लो०श०।

सन्दृश्य (अ०) दृष्ट्वा।

यथा–'सन्दृश्य काव्यं स्मरगं सुरेज्यः करोति लब्धिं द्रुतमङ्गनायाः।' इ०ग्रं०का०।

समीक्ष्य (अ०) आलोक्य।

यथा–'निधानगो विधीश्वरः स्वकीयमन्दिरं यदा। समीक्ष्य मानवेश्वरं करोति' इ०ग्र०का०।

अथाधुना मध्यपर्यायोदाहरणानि—

अन्तः (र्) (अ०) मध्यः। यथा–अन्तः शशिन्यशुभयोर्मृगगे पतङ्गे' इति बृ०जा०।

अन्तरम् (न०) मध्यः। यथा–'सदन्तरे व्योम्नि सुधाकरान्विते' इ०ग्रं०।

अन्तरा (अ०) मध्यः। यथा–'अन्तराऽसृजि सौम्यखेटयोः' इ०ग्रं०का०।

अन्तरालम् (न०) अभ्यन्तरम्। यथा–'किंवार्कचन्द्रावसदन्तराले' इ०ग्रं०का०।

अन्तरालकम् (न०) अभ्यन्तरम्। यथा—'सदन्तरालके तुषाररोचिषि' इ०ग्रं०का०।

अभ्यन्तरम् (न०) अन्तरालम्। यथा—अभ्यन्तरे कल्मषखेटयोः कलेट् इति ग्रं. का०।

मध्यः (पुं० न०) अन्तरम्। यथा–'मध्येऽसतां पुष्करवासिनां शशी' इ०ग्रं०का।

अथाधुना मध्यगतपर्यायोदाहरणानि—

अन्तरगतः (त्रि०) मध्यगतः।

यथा–'शुक्रः खलान्तरगतः सखलः सिताद्वा' इति।

अथवा—'अंशे शुभान्तरगते भवपे' इ०ग्रं०का०।

अन्तर्गतः (त्रि०) मध्यगतः। यथा–'अन्तर्गते शोभनयो शशांके' इ. ग्रं. का.।

मध्यगः (त्रि०) अन्तर्गतः। यथा–'चतुष्टयेऽथो शुभमध्यगेऽब्जे' इ०ग्रं०का०।

मध्यगतः (त्रि०) गध्ययातः। यथा–'सौम्यमध्यगतेऽथवा' 'शुभयोरन्तर्गत' इत्यर्थः जा०पा०।

मध्ययातः (त्रि०) मध्यगतः। यथा–'लाभालये तदधिपेऽमलमध्ययाते' इ०ग्रं०।

अथेदानीं विनार्थवाचकाव्ययशब्दोदाहरणानि—

अन्तरेण (अ०) विना। यथा–'शुभदृष्टिमन्तरेण' 'शुभदृष्टिं विनेत्यर्थः। जै०प०।

ऋते (अ०) विना। यथा–'पापाभ्रसद्योगमृतेऽमृताशौ' इ. ग्र०का०।

विना (अ०) हिरुक्। यथा—द्व्याप्ता अस्तमिते विना शनिसितौ' इ०जा०पा०।

हिरुक् (अ०) विना। यथा–'हेलिं हिरुग् हिमकराद् द्रविणे व्यये च'।

अथ साम्प्रतं वर्जितवाचकशब्दोदाहरणानि—

उज्झितः (त्रि०) वर्जितः।

यथा–'अथो, बलोज्झिते लोचनपे त्रिके वा'।

ऊनः (त्रि०) हीनः। यथा–'कोलेक्षिते तद्गृहहेतुनाऽर्थोनो दुःख तप्तः'।

ऊनित (त्रि०) वर्जितः। यथा–'वीर्योनिते भवधवे' इ०ग्र०कां०।

च्युतः (त्रि०) रहितः। यथा–नीचोनो भगणच्चयुतः षडधिकश्चेत्षड्हृदौच्चं बलम्' इ०जा०प०।

अथवा—'स्वोच्चोनितो दिविचरो रसभात्प्रपुष्टश्चक्राच्च्युतः कृतलवः खपुराणभक्तः।' इति मुकुन्दपद्धतौ।

मुक्तम् (त्रि०) रहितम्। यथा–'नीचारिपापगगनटनदृष्टिमुक्ते' इ०जा०पा०।

वर्जितः (त्रि०) रहितः, परित्यक्तः। यथा–दष्ट्रा वर्जितदृश्यकस्य गुरुणा' इ०जा०प०।

वर्ज्यः (त्रि०) वर्जनीयः। यथा–'योधाप्तिवर्ज्यमितरान् क्षपयन्ति भावान् पापाः' इ०वि०मा०।

वि (अ०) विगतः।

यथा—'सहजपापनिरीक्षितचन्द्रमा विशुभदृग् जननी-मरणप्रदः।' इत्यु०भा०।

विमुक्तः (त्रि०) रहितः। यथा–'दक्षाक्षिकाणोऽमलदृग्विमुक्ते' इ०ग्रं०का०।

वियुक्तः (त्रि०) वियुतः। यथा–'भङ्गेन्दुवागीशदृशा वियुक्ते' इ०ग्रं०का०।

वियुतः (त्रि०) वियुक्तः। यथा–'अथो सोग्रे सोमे व्यय उदयपे वीर्यवियुते'।

विवर्जितः (त्रि०) विरहितः।

यथा–'सद्धीनमभ्रस्थलं माहेयेन विवर्जितं यदि तदा' इ. ग्रं०का।

विशेष्यम् (त्रि०) विश्लेष्यम्। यथा–'दोस्त्रिभोनं, त्रिभोर्ध्वविशेष्यं रसैः' इ०ग्र०ला०२/१

विश्लेष्यम् (त्रि०) विशेष्यम्।

यथा–'रात्रेः शेषमितं युतं दिनदलेनाऽह्नोगतं शेषकं।
विश्लेष्यं खलु पूर्वपश्चिमनतम्' इति जा०प०१/२

वीतः (त्रि०) विरहितः।

यथा–'खाङ्गार्थहितपाः। त्रिकेऽस्ते वीतोर्ज्जाः' 'वीतोर्ज्जा बलविरहिता इत्यर्थः। इ०ग्रं०।

अथेदानीमन्तरवाचकशब्दोदाहरणानि—

अन्तरम् (न०) शोध्यशोधकयोरवशिष्टम्, वैशेष्यम्।

यथा–'वृत्तस्य मध्यं किल केन्द्रमुक्तं केन्द्रं ग्रहोच्चान्तरमुच्यतेऽतः।
यतोऽन्तरे तावति तुङ्गदेशान्नीचोच्चवृत्तस्य सदैव केन्द्रम्।।' इ०सि०शि०।

विवरम् (न०) अन्तरम्। यथा–'ज्यां प्रोज्झ्य शेषं तत्त्वाश्विहतं तद्विवरोद्धृतम्' इ०सू०सि०।

अथवा—'दिग्घ्नोद्विधा दिनगणोऽङ्ककुभिस्त्रिशैलै-
र्भक्तः फलांशककलाविवरं कुजः स्यात्।' इ०ग्र०ला०।१

अथाधुना त्यक्त्वावयववाचकशब्दोदाहरणानि—

अप (अ०) वर्जनम्, विना।

यथा–'अपजूकचरोदये' इति। तुलारहिते चरलग्न इत्यर्थः इति ज्यो०भ०।

अथवा—अपमनोभवकण्टकचित्तपः पतय एकगृह इति।
अपकुसुमशरकेन्द्रे कोणभे केशितद्वत्।' इति च ग्रं०का०।

अपहाय (अ०) विहाय।

यथा–'अपहाय तनुं विषमर्क्षगतो रविजोऽपिं नृजन्मकरः कथितः।' इ०ग्रं०का०।

अपास्य (अ०) वर्जयित्वा।

यथा—अपास्य पश्यन्निजदृश्यखेटात्' इति नीलकण्ठ्याम्।

त्यक्त्वा (अ०), अपास्य।

त्यक्त्वाऽन्त्याद्विषमात्कृतिं द्विगुणयेन्मूलम्' इति ली०व०।

प्रोज्झ्य, वर्जयित्वा।

यथा—ज्यां प्रोज्झ्य शेषं तत्त्वाश्विहतम्' इ०सू०सि०।

अथवा—'सूर्योच्छिन्नद्युतिषु च दलं प्रोजझ्य शुक्रार्कपुत्रौः' इ०बृ०जा०।

वर्जयित्वा (अ०) हित्वा। यथा—'अङ्गारकं वर्जयित्वा शत्रुक्षेत्रगतेग्रहे।' इति बृहत्पाराशर्याम्।

अथवा—'क्षोणीपुत्रं वर्जयित्वा रिपुस्था' इ०जा०पा०।

विना (अ०) हित्वा।

यथा–'विना सितार्की यदि हानियुग्मे' इति पद्धतिकल्पवल्यमा्।

अथवा—विना वक्रगम्' इ०जा०प०।

विहाय (अ०) अपहाय। यथा–विहाय लग्नं विषमर्क्षसंस्थः सौरोऽपि, इ०बृ०जा०।

सन्त्यज्य (अ०) परित्यज्य। यथा–'संत्यज्य मैत्रं रविवासरे विधौ' इ०ग्रं०का०।

हित्वा (अ०) विहाय। यथा–'हित्वाऽर्क सुनफाऽनफादुरुधरा' इ०बृ०जा०।

अथवा—हित्वा मृगेन्द्रं नरराशिवश्या' इ०मु०चिं०।

'अथ साम्प्रतं 'क्तवतु' प्रत्यायान्तशब्दोदाहरणानि—

आश्रितवान् (त्रि०) स्थितवान्।

यथा–'मृदुमङ्गलशीतगुवित्सु चाश्रितवत्सु तनूजनिकेते' इ०ग्रं०का०।

इतवान् (त्रि०) प्राप्तवान्। यथा–'इतवति क्रियभे कलशाधिपे' इ०ग्रं०का०।

गतवान् (त्रि०) यातवान्। यथा–गतवत्सु निकेतने क्वचित्क्षितिभूदानवपूज्यकेतुषु।
मिथ ईक्षणकर्तृषु क्षमापतिलक्ष्मा' इ०ज्यो०भ०।

अथवा—'सोर्जे भौमे गतवति निजं तुङ्गमर्केन्दुगौरैः'।

प्राप्तवान् (त्रि०) इतवान्।

यथा 'प्राप्त्यालयं प्राप्तवति प्रभाकरे' इ०च०ग्रं०।

यातवान् (त्रि०) गतवान्। यथा– 'यमानुजे यातवति क्षयालयम्' इ०ग्रं०का०।

स्थितवान् (त्रि०) गतवान्। यथा–'स्थितवति द्रविणे दनुजार्चिते' इ०ग्रं०का०।

अथ सम्प्रति शानचकानचप्रत्ययान्तशब्दोदाहरणानि—

ईक्ष्यमाणः (त्रि०) वीक्ष्यमाणः।

यथा–'बली य एषांतनुमीक्ष्यमाणः' इ०नी०कं०।

अथवा—'भव्यान्विते वाऽङ्गिर ईक्ष्यमाणे' इ०ग्रं०।

वर्त्तमानः (त्रि०) विद्यमानः, स्थितः, उपस्थितः, तत्कालवृत्तम्। वर्त्तते।

यथा–'गीर्वाणेश्वरवन्दिते कुलिरभेऽङ्गे वर्त्तमाने समे' समे सचन्द्रे इत्यर्थः। इ०ग्र०का०।

विद्यमानः (त्रि०) वर्त्तमानः, विद्यते। यथा—'विद्यमान उदये विदि सेन्दौ' इ०ग्र०का०।

विराजमानः (त्रि०) शोभमानः विराजते। यथा–'विराजमाने गवि राजनन्दने सराज्यनाथे यदि राजलोकिते।' इ०ग्रं०का०।

विलोक्यमानः (त्रि०) आलोक्यमानः। यथा–'विलोक्यमानेऽसृजि विग्रहे विदा'।

वीक्ष्यमाणः (त्रि०) ईक्ष्यमाणः ईक्षते। यथा–'अर्काराभ्यां वीक्ष्यमाणेऽनुजेज्ञे'।

शोभमानः (त्रि०) विराजमानः, शोभते। यथा–'स्वे सामरेज्ये विदि शोभमाने' इ०ग्रं०का०।

समीक्ष्यमाणः (त्रि०) वीक्ष्यमाणः समीक्षते।

यथा–'समीक्ष्यमाणे विधिपे विवस्वता'।

अथेदानीं शतृप्रत्ययान्तशब्दोदाहरणानि—

अधितिष्ठन् (त्रि०) अधितिष्ठतिस्म। यथा–'शीतगावधितिष्ठति तीर्थगृहे' इ०ग्रं०का०।

गच्छन् (त्रि०) गच्छतिस्म। यथा–'कण्ठीरवे गच्छति कर्मसाक्षिणि'।

चरन् (त्रि०) चरतिस्म। यथा–'हस्तादीनि चरन् षड्वृक्षाणि' बुध इति शेषः' इति बृहत्संहितायाम्।

चलन् (त्रि०) चलतिस्म।

यथा–'चलन् बुधो हस्तहयेन्दुभानि' इ०ग्रं०का०।

पश्यन् (त्रि०) पश्यतिस्म। यथा–'पश्यन्तौ जननीगृहं जनकगौ कल्याणमित्राधिपौ' इ०ग्रं०का०।

प्रवसन् (त्रि०) प्रवसतिस्म।

यथा–'छिद्रे सौम्ये प्रवसति यदा त्वष्टमे ग्लौर्यदि स्यात्।' इ०बृ०जा०।

अथवा—'पाताले पुत्रभे वा प्रवसति तपने सोडुपे सौरिदृष्टे' इ०ग्रं०का०।

भवन् (त्रि०) भवतिस्म।

यथा–'राज्यागारे भवति भवपे भानवेन प्रदृष्टे' इति।

विलोकयन् (त्रि०) विलोकयतिस्म।

यथा–'विलोकयन् वाक्पतिमङ्गगेहगं गौरांशुना कं कुरुतेऽङ्गिनां तदा।' इ०ग्रं०का०।

व्रजन् (त्रि०) व्रजतिस्म।

यथा–'मिहिरजन्मनि ना मकरोदये व्रजति राजगुरुश्चरसाभवैः।' इ०ज्यो०भ०।

सन् (त्रि०) अस्ति स्म। यथा–'मनसिजे सति सौम्ययुते कुजे' इ०ग्रं०का०।

अथेदानीं प्रकीर्णशब्दोदाहरणानि—

अनुरुगः (त्रि०) निम्नादिभादिगतः।

अनुरुगोः गुरुरङ्गजसौख्यहा' इ०ग्रं०का०।

गुरुगः (त्रि०) उच्चादिभादिगतः।

यथा–'सुखं जनन्यागुरुगः कलापो युक्तेक्षितः सत्खचरैः करोति। इ०ग्रं०का०।

समभगः (त्रि०) समराशिगतः। यथा–'समभगौ सबुधौ गुरुभास्करौ' इ०ग्रं०का०।

॥ इति बिहारप्रान्तसहरसामण्डलान्तर्गतदोरमाग्रामवास्तव्येन दैवज्ञचूड़ामणिश्रीसूर्यनारायणसून डॉ० सुरकान्तझाख्येन ज्योतिर्विज्ञानशब्दकोषे दृष्ट्यादिवर्गः द्वादशोः ॥१२॥

*अथ धातुवर्गः–१३

'सम् + ख्या' -गणने (गिनना)। (चुरादौ) आत्मनेपदे- (स०)।

लटि—संख्यांयते, संख्यायेते, संख्यायन्ते। विधिलिङि—संख्यायेत, संख्यायेयाताम्, संख्ययेरन्। यथा—भास्वच्छुक्रज्ञेन्दुसौर्य्यौर्यभौमाः संख्यायेरन् वारतस्ते तदंशाः।' इति विवाहवृन्दावने।

(अदादौ) परस्मैपदे-(स०) लोटि—(प्र०) संख्यातु, संख्यातात्, संख्याताम्, संख्यान्तु। (प) संख्याहि संख्यातात्। संख्यातम्। संख्यात। (उ०) संख्यानि, संख्याव, संख्याम। यथा—'क्रमोत्क्रमादुत्क्रमतः शराङ्कान् संख्याहि' इति ग्रं०ला०।

'गण' संख्याने (गिनना)। (चुरादौ) आत्मनेपदे-(स०)।

** इह धातुवर्गे प्राक् चिन्तनीयविषयाः—तत्रादौ दश लकाराः प्रदर्श्यन्ते—(१) लट्, (२) लिट्, (३) लुट्, (४) लृट्, (५) लेट्, (६) लोट्, (७) लङ्, (८) लिङ् (९) लुङ्, (१०) लृङ् इति एषु पञ्चमो लकारः (लेट्) छन्दोमात्रगोचरः। लिङो द्वौ भेदौ स्तः। (१) विधिलिङ् (२) आशीर्लिङ्, इति। अथ तिबादि प्रत्ययाः—(१) तिप्, (२) तस्, (३) झि, (४) सिप्, (५) थस्, (६) थ, (७) मिप्, (८) वस्, (९) मस्, (१०) त, (११) आताम्, (१२) झ, (१३) थास्, (१४) आथाम्, (१५) ध्वम्, (१६) इड्, (१७) वहि, (१८) महिङ्। एतेऽष्टादश लादेशाः प्रत्ययाः स्युः। तेषु तिबादयो नवप्रत्ययाः परस्मैपदे, एवं तादयो नवप्रत्यया आत्मनेपदे स्युः। अत्र पदभेदाः—(१) परस्मैपदम्, (२) आत्मनेपदम्, (३) उभयपदं, चेति त्रीणिपदानि स्युः। तिङां त्रयाणामेकपुरुषः। एवं एकपुरुषस्य त्रीणि वचनानि। पुरुषभेदाः—(१) प्रथमपुरुषः, (२) मध्यमपुरुषः, (३) उत्तमपुरुष श्चेति त्रयःपुरुषाः। वचनभेदाः—*

(शेष पृष्ठ १६९ पर)

लटि-गणयते, गणयेते, गणयन्ते। वि०लि०—गणयेत, गणयेयाताम्, गणयेरन्।

परस्मैपदे—

लटि—गणयति, गणयतः, गणयन्ति। वि०लि०—गणयेत्, गणयेताम्, गणयेयुः।

यथा—खेटं दृगौच्च्यं गणयेच्च लम्बम्। इति ग्रहलाघवे।

'युजिर्' योगे (योग करना, मिलाना)। (रुधादौ) आत्मनेपदे—(स०)।

लटि—युङ्क्ते, युञ्जाते, युञ्जते।

वि०लि०—युञ्जीत, युञ्जीयाताम्, युञ्जीरन्।

परस्मैपदे—

लटि—युनक्ति, युङ्क्तः, युञ्जन्ति। वि०लि०—युञ्ज्यात्, युञ्ज्याताम्, युञ्ज्युः।

यथा—ऐश्वर्य्यरेखा शिखरेण मूलाद्युनक्ति याऽसौ पितृवंशरेखा। इ०वि०वृ०।

'युजिर्' 'णिजिं' परस्मैपदे—

लटि—योजयति, योजयतः, योजयन्ति। वि०लि०—योजयेत्, योजयेताम्, योजयेयुः।

आत्मनेपदे—

लटि—योजयते, योजयेते, योजयन्ते। वि०लि०—योजयेत, योजयेयाताम्, योजयेरन्।

'कल' गतिसंख्यानयोः (गति, गिनना)। (चुरादौ) परस्मैपदे (स०)।

लटि—कलयति, कलयतः, कलयन्ति। वि०लि०—कलयेत्, कलयेताम्, कलयेयुः।

(१६८ पृष्ठ का शेष)

(१) एकवचनम्, (२) द्विवचनम्, (३) बहुवचनं, चेति त्रीणि वचनानि स्युः। 'भूवादयो धातवः'। क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः। ते दशगणेषु विभाजिताः। ते च यथा—(१) भ्वादिगणः, (२) अदादिगणः, (३) जुहोत्यादिगणः, (४) दिवादिगणः, (५) स्वादिगणः, (६) तुदादिगणः, (७) रुधादिगणः, (८) तनादिगणः, (९) क्र्यादिगणः, (१०) चुरादिगणश्चेति गणानां दश भेदाः स्युः। कर्मवशतो धातूनां त्रयोभेदाः। ते यथा—(१) सकर्मकः, (२) अकर्मकः, (३) द्विकर्मकश्चेति कर्मणस्त्रयो भेदाः। एवमिड्वशतोऽपि धातूनां त्रयोभेदाः, ते तु यथा—सेड्धातुः, (२) अनिड्धातुः (३) वेड्धातुश्चेति धातूनां त्रयो भेदाः स्युः। सकर्मकर्मकज्ञानं यथा—'फलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वम्। फलसमानाधिकरणव्यापार-वाचकत्वमकर्मकत्वम्।

द्विकर्मकधातवो यथा—'दुह्, याच्, पच्, दण्ड, रुधि, प्रच्छि, चि, ब्रूञ्, जि, मन्थ, मुष्, चेति द्वादश धातवो द्विकर्मकाः। तथा नी, हृ, कृष्, वह् चेति चत्वारोऽपि द्विकर्मकाः।

दुहादीनां द्वादशानां, तथा नीप्रभृतीनां चतुर्णां कर्मणा यद्युज्यंते तदेवाकथितं कर्मेति परिगणनं कर्तव्यमित्यर्थः। 'गां दोग्धि पयः'। 'वलिं याचते वसुधाम्। ग्राममजां—नयति, हरति, कर्षति, वहित वा। 'अर्थनिबन्धनेयं संज्ञा'। वलिं भिक्षते वसुधाम्। माणवकं धर्म-भाषते, अभिधत्ते, वक्तीत्यादि।

'सम + कल' योगे (जोड़ना)। (चुरादौ) परस्मैपदे-(स०)

लटि—सङ्कलयति, सङ्कलयतः, सङ्कलयन्ति। वि०लि०—सङ्कलयेत्, सङ्कलये सङ्कलयेयुः।

'पिडि' सङ्घाते। संघातः = ऐक्यम्, संयोगः। (जोड़ना)। (भ्वादौ) आत्मनेपदे (स०

लटि-पिण्डते, पिण्डेते, पिण्डन्ते। वि०लि०—पिण्डेत, पिण्डेयाताम्, पिण्डेरन्।

परस्मैपदे—

लटि—पिण्डात्, पिण्डतः, पिडन्ति वि०लि०—पिण्डेत्, पिण्डेताम्, पिण्डेयुः। चुरादौ

'मिल' सङ्गमे, संश्लेषणे, श्लेषणे वा (मिलाना)

परस्मैपदे— (तुदादौ) (अ०)।

परस्मैपदे—लटि—मिलति, मिलतः, मिलन्ति। वि०लि०—मिलेत्, मिलेताम्, मिले

आत्मनेपदे—

मिलते मिलेते, मिलन्ते। वि०लि०—मिलेत, मिलेयाताम्, मिलेरन्।

'सम् + डुधाञ्' मेलने (सङ्ग, सङ्गम, साथ)

(जुहोत्यादौ) परस्मैपदे-(स०)

लटि—सन्दधाति, सन्धत्तः, सन्दधति। वि०लि०—सन्दध्यात्, सन्दध्याताम्, सन्दध्यु

यथा—'सन्धत्त आये मिलनं रवीन्दू' इ०ग्रं०का०।

आत्मनेपदे—

लटि—सन्धत्ते, सन्दधाते, सन्दधते। वि०लि०—सन्दधीत, सन्दधीयाताम्, सन्दधीर

'वि + अव +कल' वियोगे, हीने, अङ्कान्तरकरणे (घटाना)।

परस्मैपदे—

लटि—व्यवकलयति, व्यवकलयतः, व्यवकलयन्ति।

वि०लि०—व्यवकलयेत्, व्यवकलयेताम्, व्यवकलयेयुः।

'वि + युजिर्' वियोगे (घटाना)

आत्मनेपदे—

लटि—वियुङ्क्ते, वियुञ्जाते, वियुञ्जते। वि०लि०—वियुञ्जीत, वियुञ्जीयाताम्, वियुञ्जीर

परस्मैपदे—

लटि—वियुनक्ति, वियुङ्क्तः, वियुञ्जन्ति। वि०लि०वियुञ्ज्यात्, वियुञ्ज्याताम्, वियुञ्ज्यु

णिजि परस्मैपदे—

लटि—वियोजयति, वियोजयतः, वियोजयन्ति। वि०लि०—वियोजयेत्, वियोजयेताम्, वियोजयेयुः।

आत्मनेपदे—

लटि—वियोजयते, वियोजयेते, वियोजयन्ते। वि०लि०—वियोजयेत, वियोजयेयाताम्, वियोजयेरन्।

'शुध' अङ्कहरणे शौचे च (घटाना अङ्कशोधना, मलापनयन, शुद्ध होना, पवित्र होना)।

णिजि परस्मैपदे—

लटि—शोधयति, शोधयतः, शोधयन्ति। वि. लि. शोधयेत्, शोधयेताम्, शोधयेयुः।

यथा—'ततो दलानि शोधयेत्' इति ग्रहलाघवे ४।

दिवादौ तु—(अ०)।

लटि—शुद्ध्यति, शुद्ध्यतः, शुद्ध्यन्ति। वि०लि०—शुद्धयेत्, शुद्धयेताम्, शुद्ध्येयुः।

यथा—'भक्तो गुणः शुद्ध्यति येन तेन' इति ली०व०।

'ओहाक्' त्यागे (छोड़ देना, त्याग देना)। 'जुहोत्यादौ) (स०)—

लटि—जहाति, जहितः जहीतः। जहति।

लोटि—(प्र०पु०) जहातु जहितात् जहीतात्। जहिताम् जहीताम्। जहतु। (म०पु०) जहाहि जहिहि जहीहि जहितात् जहीतात्। जहितम् जहीतम्। जहित जहीत। (उ०पु०) जहानि, जहाव, जहाम।

वि०लि०—जह्यात्, जह्याताम्, जह्युः।

यथा—'तदनु जहीहि गृहोयांश्च शेषम्' इति ग्रह०४।

भावकर्मणोः आत्मनेपदे—

लटि—हीयते, हीयेते, हीयन्ते। वि०लि०—हीयेत, हीयेयाताम्, हीयेरन्।

यथा— रिपुगृहगतैर्हियते स्वत्रिभागः इति बृहज्जातके।

'ऊन' परिहाणे (घटाना), लीन होना, नष्ट करना)। (चुरादौ) परस्मैपदे—(स०अ०)।

लटि—ऊनयति, ऊनयतः, ऊनयन्ति। वि०लि०—ऊनयेत्, ऊनयेताम्, ऊनयेयुः।

आत्मनेपदे—

लटि—ऊनयते, ऊनयेते, ऊनयन्ते। वि०लि०—ऊनयेत, ऊनयेयाताम्, ऊनयेरन्।

'ह्रस' ह्रस्वत्वे, शब्दे च (छोटा हो जाना, शब्द करना)। (भ्वादौ) परस्मैपदे—(अ०)।

लटि—ह्रसति, ह्रसतः, ह्रसन्ति। वि०लि०—ह्रसेत्, ह्रसेताम्, ह्रसेयुः।

यथा—'नीचेऽतोऽर्द्धं ह्रसति हि ततश्चान्तरस्थेऽनुपातः' इति।

'सत्स्वर्द्धं ह्रसति तथैकराशिकानाम्' इति च बृहज्जातके। 'हिसि' हिंसायाम् (मारना, नष्ट करना)। परस्मैपदे—(रुधादौ), (स०)।

लटि—हिनस्ति, हिंस्तः, हिंसति। वि०लि०—हिंस्यात्, हिंस्याताम्, हिंस्युः।

यथा—'वामं हिनस्त्य' परं रविः' इति।

अथवा—'नान्यो ग्रहः सदृशमन्यफलं हिनस्ति' इति च बृ०जा०।

'त्यज' हानौ (छोड़ना)। (भ्वादौ) परस्मैपदे—(स०)।

लटि—त्यजति, त्यजतः त्यजन्ति। वि०लि०—त्ययेत्, त्यजेताम्, त्यजेयुः।

यथा—वेदाङ्गाष्टन वार्केन्द्रपक्षरन्ध्रतिथौ त्यजेत्।' इति मुहूर्तचिन्तामणौ।

अथवा—'त्यजेत्तिथीन्द्वङ्कवसुक्षमातिथीरसौम्यवारान्' इति विद्यामाधवीये।

लोटि—(प्र०पु०) त्यजतु त्यजतात्। त्यजताम्। त्यजन्तु। (म०पु०) त्यज त्यजतात्। त्यजतम्। त्यजत। (उ. पु.) त्यजानि, त्यजाव, त्यजाम।

यथा—'षण्मासं ग्रहभिन्नभं 'त्यज' शुभे इति मु०।

कर्मकर्त्तके—त्यजते, त्यजेते, त्यजन्ते। णिजित्याजयति-ते।

'सृज्' विसर्गे (छोड़ना, खुलना, बनना)। (विवादौ)—आत्मनेपदे—(अ०)।

लटि—सृज्यते, सुज्येते, सुज्यन्ते। वि. लि.—सृज्येत, सृजेयाताम्, सृजेरन्।

'उद् + सृज' = विसर्गे (छोड़ना)।

अथवा वि + सज्

लटि—उत्सृजति, उत्सृजतः, उत्सृजन्ति। वि०लि०—उत्सृजेत्, उत्सृजेताम्, उत्सृ
यथा—'आगताद् द्विगुणमुत्सृजेत्सुधी' इ०वि०वृ०।

लटि—विसृजति, विसृजतः, विसृजन्ति। वि०लि०—विसृजेताम्, विसृजेयुः।
यथा—सायकं तोयं वाऽग्निभयं विचिन्त्य विसृजेत्' इति वि०मा०।

'वृजी' वर्जने (वर्जन करना, मना करना, रोकना)। (भ्वादौ) परस्मैपदे—(स०)।
लटि—वर्जति, वर्जतः, वर्जन्ति। वि०लि०—वर्जेत्, वर्जेताम्, वर्जेयुः।
(चुरादौ) परसमैपदे—(स०)।

लटि—वर्जयति, वर्जयतः, वर्जयन्ति। वि०लि०—वर्जयेत्, वर्जयेताम्, वर्जयेयुः।
यथा—'वर्जयेत्सर्वकार्येषु हस्तार्कम्' इति मु०चिं०।

परि + वृजी अथवा—वि + वृजी अर्थात् (वर्जन करना) चुरादौ—परस्मैपदे—
लटि—परिवर्जयति, परिवर्जयतः, परिवर्जयन्ति। वि०लि०—परिवर्जयेत्, परिवर्जयेता
परिवर्जयेयुः।

लटि—विवर्जयति, विवर्जयतः, विवर्जयन्ति। वि०लि० विवर्जयेत्, विवर्जयेताम्, विवर्जये
यथा—'गुरौ पुष्यं विवर्जयेत्' इति मु०चि०।

'गुण' आमंत्रणे केतने च (आमंत्रण करना, बुलाना, गणित में गुणन करना)। (चुरा
परस्मैपदे—(स०)—

लटि—गुणयति, गुणयतः, गुण्यन्ति। वि०लि०—गुणयेत्, गुणयेताम्, गुणयेयुः। भा
'गुण्यते।' 'सम + गुण' अङ्कपूरणे (गुणना) परस्मैपदे—

लटि—संगुणयति, संगुणयतः संगुणयन्ति। वि०लि०—संगुणयेत्, संगुणयेताम्, संगुणये
'तड' आघाते = हनने (अङ्क गुणना)। चुरादौ—'णिजि' परस्मैपदे—(स०)।
लटि–ताडयति, ताडयतः, ताडयन्ति। वि०लि०–ताडयेत्, ताडयेताम्, ताडयेयुः।
परि + तड अथवा—सम + तड अर्थात् हनने, अङ्कपूरणे (गुणना)। परस्मैपदे–
लटि–परिताडयति; परिताडयतः, परिताडयन्ति। वि०लि०–परिताडयेत् परिताडयेताम्
परिताडयेयुः।

परस्मैपदे—

लटि—सन्ताडयति, सन्ताडयतः, सन्ताडयन्ति। वि०लि०—सन्ताडयेत्, सन्ताडयेताम्
सन्ताडयेयुः।

'वर्ध' छेदनपूरणयोः। छेदनं, पूरणं = अङ्कगुणनम् (गुणना)। (चुरादौ) परस्मैपदे–
(स०अ०)

लटि—वर्धयति, वर्धयतः, वर्धयन्ति। वि०लि०–वर्धयेत्, वर्धयेताम्, वर्धयेयुः।
आत्मनेपदे—(स०अ०)।
लटि—वर्धयते, वर्धयेते, वर्धयन्ते। वि०लि०–वर्धयेत, वर्धयेयाताम्, वर्धयेरन्।

परि + वर्ध अर्थात् सम् + यथा अर्थात् गुणना। परस्मैपदे—

लटि–परिवर्धयति, परिवर्धयतः, परिवर्धयन्ति। वि०लि०–परिवर्धयेत्, परिवर्धयेताम्, परिवर्धयेयुः।
लटि–संवर्धयति, संवर्धयतः, संवर्धयन्ति। वि०लि०–संवर्धयेत्, संवर्धयेताम्, संवर्धयेयुः।

'हन्' हिंसागत्योः। हिंसा, हननं, पूरणं, अङ्कगुणनम्। (गुणना, जाना)।

(अदादौ)—परस्मैपदे-(स०)।

लटि—हन्ति, हतः, घ्नन्ति, यथा—'सौम्यव्यधो 'हन्ति' सुखानि शश्वत्' इति वि०वृ०।

वा—'दशदिनकृतपापं 'हन्ति' सिद्धान्तवेत्ता'। इ०मु०पी०धा०विवृतौ। यथा—'घ्नन्ति' चाशुभमविघ्नमातरः इ०वि०वृ०। वि०लि०–हन्यात्, हन्याताम्, हन्युः। यथा—'गुण्यान्त्यमङ्कं गुणकेन हन्यात्' इति लीलावत्याम्। भावे 'हन्यते'।

'भज' सेवायां भागे च (भक्ति, भाग देना)। (भ्वादौ) परस्मैपदे-(स०)।

लटि—भजति, भजतः, भजन्ति। वि०लि०भजेत्, भजेताम्; भजेयुः।

यथा—'भजति' युवतिरेभिर्भूपसीमन्तिनीत्वम्' इ०वि०वृ०।

आत्मनेपदे—

लटि—भजते, भजेते, भजन्ते। वि०लि०–भजेत, भजेयाताम्, भजेरन्।

यथा—'भजेत भुक्त्यन्तरभुक्तियोगैः' इ०वि०वृ०।

परि + भज अथवा वि + भज अर्थात् भागे (भाग देना)।

लटि—परिभजति, परिभजतः, परिभजन्ति। वि०लि०–परिभजेत्, परिभजेताम्, परिभजेयुः।
लटि—विभजति, विभजतः, विभजन्ति। वि०लि०–विभजेत्, विभजेताम्, विभजेयुः।

'भाज' पृथक्कर्मणि (अलग करना, पृथक् करना, भाग देना)। (चुरादौ) परस्मैपदे (स०)।
लटि—भाजयति, भाजयतः, भाजयन्ति। वि०लि०–भाजयेत्, भाजयेताम्, भाजयेयुः।

आत्मनेपदे—

लटि—भाजयते, भाजयेते, भाजयन्ते। वि०लि०—भाजयेत, भाजयेयाताम्, भाजयेरन्।

परि + भाज अथवा वि + भाज अर्थात् भागे, भजने (भाग देनां) परस्मैपदे—

लटि—परिभाजयति, परिभाजयतः, परिभाजयन्ति। वि०लि०–परिभाजयेत्, परिभाजयेताम्, परिभाजयेयुः। लटि—विभाजयति, विभाजयतः, विभाजयन्ति। वि०लि०–विभाजयेत्, विभाजयेताम्, विभाजयेयुः।

'हृञ्' हरणे। हरणं = विभाजनं (बांटना, भाग देना) प्रापणं स्वीकारः, स्तेयं, नाशनं, च। (हरण करना, चुराना)। (भ्वादौ) परस्मैपदे (स०)।

लटि—हरति, हरतः, हरन्ति। यथा—एकोंऽशं 'हरति' बली तथाऽऽहसत्यः' इ०बृ०जा०। लटि—हरति, हरतः, हरन्ति। यथा—'भागं हरेदवर्गान्नित्यं द्विगुणेन वर्गमूलेन।' इत्यार्यभट्टीये। वि०लि०—हरेत्, हरेताम्, हरेयुः।

प्राणान् प्रयाणे 'हरेत्'। इति विद्यामाधवीये। लोटि—हरतु, हरतात्, हरताम्, ह यथा—विघ्नं मुहर्तांकलितद्वितीयदन्तप्रोहो 'हरतु' द्विपास्य:।' इति मु०चिं०।

आत्मनेपदे—

लटि—हरते, हरेते, हरन्ते। वि०लि०–हरेत, हरेयाताम्, हरेरन्।

'अप + हृञ्' अपहरणे (नाश करना) लटि—अपहरति, अपहरत:, अपहरन्ति। वि०लि० अपहरेत्, अपहरेताम्। अपहरेयु:। यथा—'भानुस्ताम्बूलदानादपहरति नृणां वैकृतं वासरो इति गन्थान्तरे। लटि—परिहरति, परिहरत:, परिहरन्ति। (परिहरणे) (त्याग)। यथा—'परिहर परागपरागतम्' इति वि०वृ०। लटि—व्यवहरति, व्यवहरत: व्यवहरन्ति, (आचरण), तथा- तदपि चारु न चारुषितैर्मुखै र्व्यवहरन्ति' तथा वितथाशया:। इति वि०वृ०।

'ग्रसु' अदने (खाना) भ्वादौ आत्मनेपदे। (स०)।

लटि—ग्रसते, ग्रसेते, ग्रसन्ते। वि०लि०—ग्रसेत, ग्रसेयाताम्, ग्रसेरन्।

ल्युटि—ग्रसनम्। 'ग्रस' ग्रहणे (ग्रहण करना, पकड़ना, ग्रसना) (चुरादौ—'णिजि'। (स०)

लटि—ग्रासयति, ग्रासयत:, ग्रासयन्ति। वि०लि०—ग्रासयेत्, ग्रासयेताम्, ग्रासयेयु:।

'छद' अपवारणे (ढकना)। (चुरादौ) 'णिजि'। (स०)।

लटि—छादयति, छादयत:, छादयन्ति। वि०लि०—छादयेत्, छादयेताम्, छादयेयु:। यथा—'छादयत्य' र्कमिन्दुविंधुं भूभा' इति ग्र०ला ५/३।

अथवा—'राहु: कुभामण्डलग: शशाङ्कं शशाङ्कगश्छादयतीनबिम्बम्। इति सिद्धान्तशिरोमणौ।

'भू' सत्तायाम् (होना)। भ्वादौ—परस्मैपदे—(अ०)।

लटि—भवति, भवत:, भवन्ति। यथा—'भवति' विलग्नमदोऽयनांशहीनम् इति ग्रहलाघवे ४/३। 'चतुर्थे भवने सूर्याज्ज्ञसितौ 'भवत:' कथम्।' इति बृ०जा०। धनान्त्यलग्नेषु 'भवन्ति' खेटा:, इति ग्रं०का०। वि०लि०—भवेत्, भवेताम्, भवेयु:। यथा—'समेन केनाप्यपवर्त्य हारभाज्यौ 'भवे' द्वा सति सम्भवे तु।' इति ली०व०। 'तयो: सम्बन्धमात्रेण 'भवेतां' योगकारकौ इत्युडुदायप्रदीपे। केनापि ते स्पष्टतरा 'भवेयु:' इति ग्रन्थान्तरे। 'णिजि'—लटि—भावयति, भावयत:, भावयन्ति। वि०लि०—भावयेत्, भावयेताम्, भावयेयु:। भावे—'भूयते'।

'विद्' सत्तायाम् (होना, है)। (दिवादौ) आत्मनेपदे—(अ०)।

लटि—विद्यते, विद्येते, विद्यन्ते। यथा—पञ्चमे विद्यते भौम:' इति विद्येतेऽर्थे शशाङ्कार्यौ' इति। 'विद्यन्तेऽस्ते शुभा: खेटा: इति च ग्रं०का०। वि०लि०—विद्येत, विद्येयाताम्, विद्येरन्। यथा—'विद्येत' बन्धौ वनभावनाथ:' इति। 'विद्येयातां 'व्योम्नि सौम्यौ नभोगौ।' इति। 'विद्येरन्' स्वे वक्रवैरोचनीना:।' इति च ग्रं०का०।

'अस्' भुवि (सत्ता, होना, है)। अदादौ परस्मैपदे–(अ०)।

लटि—(प्र०पु०) अस्ति, स्तः, सन्ति। (म०पु०) असि, स्थः, स्थ। (उ०पु०) अस्मि, स्वः, स्मः। यथा—'अस्ति चेदद्यपराङ्मुखा मतिः' इति वि०वृ०। व्यस्तैर्दलैर्व्यस्तधनुर्ज्यके 'स्तः'। इति करणकुतूहले २। सन्ति स्त्रियो भवनवर्गखगस्वभावाः इति ग्रन्थान्तरे। 'दक्षोऽसि भिन्ने गुणनाविधौ चेत् इति ली०व०। 'कर्त्तुं ग्रहप्रकरणं स्फुटमुद्यतोऽस्मि' इ०ग्र०ला०१/३। वि०लि०—स्यात्, स्याताम्, स्युः। यथा—'स्यात्सायनोष्णांशुभुजर्क्षसंख्यै' ति ग्र०ला०२। 'ताराग्रहाणामन्योन्यं 'स्यातां युद्धसमागमौ'। इति सूर्यसिद्धान्ते। स्युः खण्डानि खवार्द्धयोऽम्बरकृताः' इति ग्रं०ला०।

वृतु वर्तने (वर्तना, वर्तमान, उपस्थित)। भ्वादौ—आत्मनेपदे—(अ०)।

लटि—वर्तते, वर्तेते, वर्तन्ते। यथा—पञ्चमे ज्ञो रविः षष्ठे 'वर्तते, नवमे गुरुः। 'भाग्ययोगाभिधेयोगे निहन्ता वैरिणां सदा।' इति कश्यपः।

वा—'तस्य नृपतिः शश्वाशे वर्तते।' इति वि०वृ०। 'उच्चमूलत्रिकोणेषु वर्तेते गुरुभार्गवौ। अभयाभिधयोगोऽयं भङ्करविनाशनः। इत्यत्रिः। यथा—वर्तन्ते खे चारुचण्डांशुचन्द्राः कुर्युर्मर्त्यं भूपमान्यं सदैव। इति ग्रं०का०। वि०लि०—वर्तेत, वर्तेयाताम्, वर्तेरन्। यथा—स्वे वर्तेरन् वीर्यभाजः शुभाश्चेत् इति ग्रं०का०।

'अप + वृतु' अपवर्तने (पलटाव, उलटफेर)

लटि—अपवर्तते, अपवर्तेते, अपवर्तन्ते। वि०लि०—अपवर्तेत, अपवर्तेयाताम्, अपवर्तेरन्।

नि + डुधाञ्—स्थापने (रखना)। जुहोत्यादौ। परस्मैपदे। (स०)।

लटि—निदधाति, निधत्तः, निदधति। यथा—हृदि निदधति कृष्णांघ्रिद्वयं पुण्यभाजः, इ०ग्रं०वि०लि०—निदध्यात्, निदध्याताम्, निदध्युः। आत्मनेपदे—

लटि—निधत्ते, निदधाते, निदधते। वि०लि०—निदधीत, निदधीयाताम्, निदधीरन्।

'ष्ठा' गतिनिवृत्तौ (बैठना)। (भ्वादौ) परस्मैपदे-(अ०)

लटि—तिष्ठति, तिष्ठतः, तिष्ठन्ति। यथा—'तिष्ठति व्योम्नि तिग्मगेः।' इति। 'तिष्ठतोऽङ्गे सुधाङ्गेज्यौ' इति च ग्रं०का०। दशमैकादशे रिःफलग्नवित्तसोत्थभे। ग्रहास्तिष्ठन्ति चेत्सौम्या नृपतुल्यो भवेन्नरः। इति सर्वार्थचिन्तामणौ। वि०लि—तिष्ठेत्, तिष्ठेताम्, तिष्ठेयुः। यथा—तिष्ठेत्तपोभावपतिस्तनौ चेत् इति। तिष्ठेतां भविधू भाग्ये' इति। 'तिष्ठेयुः पामराः षष्ठे' इति च ग्रं०का०।

सम् + ष्ठा (बैठना) आत्मनेपदे—

लटि—संतिष्ठते, संतिष्ठेते, संतिष्ठन्ते। वि०लि०—संतिष्ठेत, संतिष्ठेयाताम्, संतिष्ठेरन्। यथा—यः पश्येदुपगम्य च वशे 'सन्तिष्ठते' दासवत्' इति विद्यामाधवीये।

'आस' उपवेशने—(बैठना)। (अदादौ) आत्मनेपदे-(अ०)।

लटि—आस्ते, आसाते, आसते। वि०लि०—आसीत, आसीयाताम्, आसीरन्। यथा—आसते शशिजजीवभाः स्मरे' इति।

'आसीत कामभवने धनभावनाथः' इति च ग्रं०का०।

'उप + विश' उपवेशने (बैठना)। (तुदादौ) परस्मैपदे-(स०)।

लटि—उपविशति, उपविशतः उपविशन्ति। वि०लि०—उपविशेत्, उपविशेताम्, उपविशेयुः।

'विश' प्रवेशने (घुसना, प्रवेश करना, बैठना)। (तुदादौ) परस्मैपदे—(स०)।

लटि—विशति, विशतः, विशन्ति। वि०लि०—विशेत्, विशेताम्, विशेयुः, यथा—सोऽन्धकारचरतां वहन्महीच्छायया विशति सोममण्डलम्। इ०वि०बृ०। भावे—विश्यते। 'णिजि वेशयति-ते।

'प्र+विश' प्रवेशते (प्रवेश करना)। (तुदादौ) (स०)।

लटि—प्रविशति, प्रविशतः, प्रविशन्ति। वि०लि०—प्रविशेत्, प्रतिशेताम्, प्रविशेयुः।

'वस' निवासे (रहना, निवास करना)। (भ्वादौ) परस्मैपदे—(अ०)।

लटि—वसति, वसतः, वसन्ति। यथा—'वसति विबुधबन्धो वित्तभावेऽर्थदाता' इति। वसतो वनभे विरोचनेन्दू इति। यथा—वने वसन्तीनकुजार्कनन्दनाः' इति च ग्रं०का०। लोटि—वसतु, वसतात्, वसताम्, वसन्तु। यथा—'नैकत्र वसतु दिवसान् इति वि०मा०। वि०लि०—वसेत्, वसेताम्, वसेयुः। यथा—'वसेद्वधूभावपतिर्वपुर्गृहे' इति। 'वधूगृहे बौधनभौ वसेताम् इति। 'वसेयुरर्थे विधुबोधनेनाः' इति च ग्रं०का०। भावे—उष्यते। 'णिजि' वासयति-ते।

'नि + वस' निवासे (रहना)। (भ्वादौ) परस्मैपदे- (अ०)

लटि—निवसति, निवसतः, निवसन्ति। वि०लि०—निवसेत् निवसेताम्, निवसेयुः। यथा—निवसेद्धरिजे हरभावपे' इ०ग्रं०का०। निवसेतां व्यत्ययेत तावुभौ धर्मकर्मणोः' इत्युडुप्र०।

अप + इण् निःसरणे (निकलना) (अदादौ) परस्मैपदे-(अ०स०)

लटि—अपैति, अपेतः, अपयन्ति। बि०लि०—अपेयात्, अपेयाताम्, अपेयुंः। यथा—वृत्ते समभूगते तु केन्द्रस्थितशङ्कोः क्रमशो विशत्यपैति। छायाग्रमिहापरा च पूर्वा' इ०ग्रं०ला०४।

जद् + इण् दर्शने (उदय होना)। (अदादौ) परस्मैपदे (अ०स०)

लटि—उदेति, उदितः, उद्यन्ति। वि०लि०—उदेयात्, उदेयाताम्, उदेयुः। यथा—'उदेति चायं प्रतिपत्समाप्तौ, कृशोऽपि वर्द्धिष्णुतया प्रशस्तः।' इ०वि०वृ०। 'उद्यन्ति पृष्ठत इनारयमोरगा श्लौकाव्यैन्दवाः' इति ज्योतिस्तत्त्वे ५/३७।

धृञ् धारणे (धारण करना)। (भ्वादौ) परस्मैपदे-(स०)

लटि—धरति, धरतः, धरन्ति। वि०लि०-धरेत्, धरेताम्, धरेयुः। आत्मनेपदे—

लटि—धरते, धरेते, धरन्ते। वि ०लि०—धरेत, धरेयाताम्, धरेरन्। भावे—धार्य्यते। क. धार्य्यते। णिजि—धारयति-ते।

डुभृञ् धारणपोषणयोः (धारण करना, पोषण करना)। (जुहोत्यादौ) परस्मैपदे-(स०)

लटि—बिभर्ति, बिभृतः, बिभ्रति। वि०लि०—बिभृयात्, बिभृयाताम्, बिभृयुः। यथा—'स्वस्वभङ्गिभृतवोऽपि बिभ्रति' इ०वि०वृ०।

आत्मनेपदे—

लटि—बिभृते, बिभ्राते, बिभ्रते। वि०लि०-बिभ्रीत बिभ्रीयाताम्, बिभ्रीरन्।

'डु धाञ्' धारणपोषणयोः (धारण करना, पालन करना।) (जुहोत्यादौ)—परस्मैपदे—(स०)।

लटि—दधाति, धत्तः, दधति। वि०लि०—दध्यात्, दध्याताम्, दध्युः। यथा—'नरा नार्य्योराज्यंदधतिपदपाणिप्रणयिभिः'इति वि०वृ०। 'वस्त्राणिदध्युर्मृगदास्रपुष्ये' इति ग्रं०का०।

आत्मनेपदे—

लटि—धत्ते, दधाते, दधते। वि०लि०-दधीत, दधीयाताम्, दधीरन्।

अत्र विशेषः—*'विपूर्वो धा' करोत्यर्थे ह्यभिपूर्वस्तु भाषणे। मेलने चापि सम्पूर्वो निपूर्वः स्थापने मतः।। इति। तेन— 'वि + धाञ्' (करना)। (जुहोत्यादौ) परस्मैपदे—(स०)।

लटि—विदधाति, विधत्तः, विदधति। वि०लि०—विदध्यात्, विदध्याताम्, विदध्युः। यथा—'स नियतं विदधाति वधूवरम्' इति वि०वृ०। 'विधत्तोऽर्थगौ वित्तहानिं महीजपतङ्गौ यदा' इति। 'काव्येन्द्विज्या विदधति वित्तं वित्तस्थाः' इति च ग्रं०का०। 'प्राङ्मध्यमे चलफलस्य दलं विदध्यात्' इति ग्रहलाघवे ३। 'विदध्यातां खस्थौ सुरगुरुकवी स्वं नृपतितः' इति। 'विदध्युःर्भविच्चन्द्रजीवा नृपालं ख्याताः इति च ग्रं०का०। लृटि—विधास्यति, विधास्यतः, विधास्यन्ति। लोटि—विदधातु, विधत्तात् विधत्ताम्, विदधतु।

** उपसर्गः (पुं०) क्रियायोगे प्र-परादयः। ते यथा—प्र, परा, अप, सम्, अनु, अव, निर्, निस्, दुर्, दुस्, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप। एते द्वाविंशतिः प्रादयः।*

अत्र विशेष उक्तः शब्दार्थचिन्तामणौ—१-३९४७ यथा—निपाताश्चादयो ज्ञेया उपसर्गास्तु प्रादयः। द्योतकत्वात् क्रियायोगे लोकादवगता इमे।। ते त्रिधा—धात्वर्थं वाधते कश्चित् यथा—आदत्ते। 'कश्चित्तमनुवर्त्तते'— यथा—प्रसूते। तमेव विशिनष्ट्यन्यः' यथा—प्रणमति। 'उपसर्गगतिस्त्रिधा।। अपि च— 'उपसर्गेण धात्वर्थो बलादन्यत्र नीयते। प्रहाराहारसंहारविहारपरिहारवत्।। इति।

अन्यत्रापि— 'एकः क्वचिद्व्रजेद् धातुरुपसर्गवशात्तथा। यथा कुम्भात्क्षरत्यम्भो, मदं क्षरति कुञ्जरः।। जयतीश्वर उत्कर्षे' जयत्यभिभवे रिपुम्। 'निखिलं वेत्ति गोविन्दः' संवित्ते माधवो यथा।।

'वृन्दावने वसत्यस्मिन् हरिरावसति व्रजम्। धात्वर्थं धावते कश्चित्कश्चित्तमनुवर्तते।।

तमेव विशिनष्ट्यन्योऽनर्थकोऽन्यः प्रयुज्यते। इत्याख्यातचन्द्रिका। कां० ३ श्लो० ७७/७८/७९/८०। 'धातूपसर्गयाः कार्यमन्तरङ्गम्' अन्यदवहिरङ्गम्।

यथा—हस्ते प्रयाय पवने विदधातु यात्राम्' इति वि०मा०।

आत्मनेपदे—

लटि—विधत्ते, विदधाते, विदधते। वि०लि०—विदधीत, विदधीयाताम्, विदधीरन्। यथा—'दृष्ट्वा विधत्ते वशवर्तिनं तम्' इति। 'विदधीत गुरौ लग्ने स्वांशस्थे' इति च वि०मा०। कर्मकर्तृके लटि—विधीयते, विधीयेते, विधीयन्ते। यथा—'विधीयतेऽन्यैर्नियमात्तदन्वयम्' इति वि०मा०।

'सम् + पद्' सम्पादने (करना)। (दिवादौ)—'णिजि' (स०अ०)। परस्मैपदे—

लटि—सम्पादयति, सम्पादयतः, सम्पादयन्ति।

वि०लि०—सम्पादयेत्, सम्पादयेताम्, सम्पादयेयुः।

आत्मनेपदे—

लटि—सम्पादयते, सम्पादयेते, सम्पादयन्ते। वि०लि०—सम्पादयेत, सम्पादयेयाताम्, सम्पादयेरन्।

'डु कृञ्' करणे (करना)। (तनादौ)—परस्मैपदे—(स०)।

लटि—(प्र०पु०) करोति, कुरुतः, कुर्वन्ति। (म०पु०) करोषि, कुरुथः, कुरुथ। (उ०पु०) करोमि, कुर्वः, कुर्मः। यथा—वक्रां करोत्यनिमिषः पदवीं यियासोः' इति वि०मा०। 'खगौ सितेज्यौ कुरुतो नृपालम्। इति ग्रं०का०। 'लग्ने दिवाकरविधुन्तुदमन्दभौमाः कुर्वन्ति राज्ययजमानविनाशनं च।' इति वि०मा०। लोटि—(प्र०पु०) करोतु कुरुतात्। कुरुताम्। कुर्वन्तु। (म०पु०) कुरु कुरुतात्। कुरुतम्। कुरुत। (उ०पु०) करवाणि, करवाव, करवाम। वि०लि०—कुर्यात्, कुर्याताम्, कुर्युः। यथा—अत्याज्यनामनि सशूर्पघटे विचापे 'कुर्यात्' इति वि०मा०। 'कुर्यातां' गुरुशशिनौ स्वगौ ससौम्यौ' इति ग्रं०का०। 'कुर्युः स ते मिथुनं गृहोदयगतान्' इति बृ०जा०।

आत्मनेपदे—

लटि—कुरुते, कुर्वाते, कुर्वते। वि०लि०—कुर्वीत, कुर्वीयाताम्, कुर्वीरन्।

यथा—'शुभेक्षिते चेत्कुरुते गिरं चिरात्' इ०बृ०जा०। 'दुरधारा विधुरां कुरुते वधूम्' इ०वि०वृ०।

'प्र + डु कृञ्' करणे (करना)। परस्मैपदे—

लटि—प्रकरोति, प्रकुरुतः, प्रकुर्वन्ति। वि०लि०—प्रकुर्यात्, प्रकुर्याताम्, प्रकुर्युः। यथा—'सिद्धं च सिद्धा प्रकरोति पुंसाम्'। इजि ज्यो०सा०।

आत्मनेपदे—

लटि—प्रकुरुते, प्रकुर्वाते, प्रकुर्वते। वि०लि०—प्रकुर्वीत, प्रकुर्वीताम्, प्रकुर्वीरन्। यथा—पित्तं प्रकुर्वीत रविर्विलग्नग' इ०ग्रं०का०। कर्मर्कृके-लटि—क्रियते, क्रियेते, क्रियन्ते। यथा—क्रियते काशिनाथेन शीध्रबोधाय संग्रहः। इति शीघ्रबोधे १।१।

'णिजि'—परस्मैपदे

लटि—कारयति, कारयतः, कारयन्ति। वि०लि०-कारयेत्, कारयेताम्, कारयेयुः।

आत्मनेपदे

लटि—कारयते, कारयेते, कारयन्ते। वि०लि०-कारयेत, कारयेयाताम्, कारयेरन्।

'रच्' प्रतियत्ने (रचना करना, बनाना करना)। (चुरादौ) परस्मैपदे-(स०)

लटि—रचयति, रचयतः, रचयन्ति। यथा—रचयति रविरुग्रां कोविदः कार्मज्ञताम् इ०वि०वृ०'विषमभांशगतौ शशिभार्गवौ तनुगृहं बलिनौ यदि पश्यतः रचयतो वरलाभमिमौ' इ०मु०चि०६। वि०लि०—रचयेत्, रचयेताम्, रचयेयुः। यथा—पञ्च, द्वे द्वे च रेखे रचयेद्विदिक्षु' इ०वि०वृ०।

'वि + रच्' प्रतियत्ने (बनाना, करना, रचना करना)। (चुरादौ) परस्मैपदे-(स०)

लटि—(प्र०पु०) विरचयति, विरचयतः, विरचयन्ति। (म०पु०) विरचयसि, विरचयथः, विरचयथ। (उ०पु०) विचचयामि, विरचयावः, विरचयामः। यथा—'वृन्दावनं विरचयामि विचाररम्यम्' इ०वि०वृ०। वि०लि०-विरचयेत्, विरचयेताम्, विरचयेयुः। यथा—वेदिकां विरचयेद्यथातथा' इ०वि०वृ०।

'कृपि' चिन्तने (रचना करना)। (चुरादौ) परस्मैपदे (स०)

लटि—कल्पयति, कल्पयतः, कल्पयन्ति। वि०लि०-कल्पयेत्, कल्पयेताम्, कल्पयेयुः। यथा—'तानधिसुहन्मित्रादिभिः कल्पयेत्' इ०बृ०जा०।

'आ + चर' अथवा सम् + आ + चर अर्थात् व्यवहरणे (व्यवहार करना) (भ्वादौ) परस्मैपदे—(अ०स०)

लटि—आचरति, आचरतः, आचरन्ति। यथा—'यद्यदाचरति श्रेष्ठ' इ०भ०गी०। वि०लि०—आचरेत् आचरेताम्, आचरेयुः। यथा—'यदाऽऽचरेयुः स्वकुलोक्तभार्याः' इ०वि०वृ०। लटि—समाचरति, समाचरतः समाचरन्ति। वि०लि०—समाचरेत्, समाचरेताम्, समाचरेयुः। यथा—'पुलोमजापूजनं सयुवतिः समाचरेत् इ०वि०वृ०।

'सृज्' विसर्गे (उत्पादन करना, करना, रचना करना, छोड़ना)। (तुदादौ) परस्मैपदे (स०)

लटि—सृजति, सृजतः, सृजन्ति। वि०लि०-सृजेत्, सृजेताम्, सृजेयुः। यथा—'गोधूलिकं सृजति (उत्पादयति) गोपपृथग्जनानाम्' इति।

अथवा-'गुरुरनन्त्यमदेषु मुदं श्रियं सृजति' इति च वि०वृ०।

'उद् + पद्' उत्पादने (उत्पन्न करना, करना)। (चुरादौ) 'णिजि' परस्मैपदे (अ०स०)

लटि—उत्पादयति, उत्पादयतः, उत्पादयन्ति। वि०लि०-उत्पादयेत्, उत्पादयेताम्, उत्पादयेयुः।

'जनी' प्रादुर्भावे (उत्पन्न होना, पैदा होना)। (दिवादौ) आत्मनेपदे (अ०)

लटि—जायते, जायेते, जायन्ते। वि०लि०—जायेत, जायेतायाम्, जायेरन्। यथा—'जायते नालवेष्टितः।' इ०बृ०जा०। 'जायेयातामस्तमध्याह्नलग्ने' इ०वि०वृ०।

'प्र+जनी' प्रादुर्भावे (उत्पन्न होना)। (दिवादौ) आत्मनेपदे (अ०)

लटि—प्रजायते, प्रजायेते, प्रजायन्ते। वि०लि०-प्रजायत, प्रजायेयाताम्, प्रजायेरन्।

जनी 'णिजि'—परस्मैपदे—

लटि—जनयति, जनयतः, जनयन्ति। वि०लि०-जनयेत्, जनयेताम्, जनयेयुः।

यथा—बलवद्ग्रहदोषकारणैर्मनुजानां जनयत्यनेत्रताम्।। इ०बृ०जा०।

षूङ् प्राणिप्रसवे (प्रसव करना, जन्म देना)। (दिवादौ) आत्मनेपदे (अ०)।

लटि—सूयते, सूयेते, सूयन्ते। वि०लि०–सूयेत, सूयेयाताम्, सूयेरन्।

'प्र+षूङ्' प्राणिप्रसवे (प्रसव करना, जन्म देना)। (दिवादौ) आत्मनेपदे (अ०)

लटि—प्रसूयते, प्रसूयेते, प्रसूयन्ते। वि०लि०—प्रसूयेत, प्रसूयेयाताम्, प्रसूयेरन्।

यथा—सोषरभूमिषु च प्रसूयते' इति बृ०जा०।

'अय्' गतौ (गमनं, ज्ञानं, प्राप्तिः) (जाना, जानना, लाभ)। (भ्वादौ) आत्मनेपदे (अ०स०)

लटि—अयते, अयेते, अयन्ते। वि०लि०–अयेत, अयेयाताम्, अयेरन्।

'पद्' गतौ (चलना)। दिवादौ—आत्मनेपदे—(अ०)।

लटि—पद्यते, पद्येते, पद्यन्ते। वि०लि०—पद्येत, पद्येयाताम्, पद्येरन्।

'व्रज' गतौ (जाना)। (भ्वादौ—परस्पैपदे—(स०)।

लटि—व्रजति, व्रजतः, व्रजन्ति। वि०लि०—व्रजेत्, व्रजेताम्, व्रजेयुः।

यथा—'निर्विशङ्कमरिणा जयं व्रजेत् इति वि०मा०।

'इण्' गतौ (जाना)। (अदादौ—परस्मैपदे—(स०अ०)।

लटि—एति, इतः, यन्ति। वि०लि०—इयात्, इयाताम्, इयुः।

यथा—'नो पूर्वराशिं गुरुरेति वक्रितः' इति मु०चिं०१।

अथवा—'मित्रत्वमेति रिपुरस्य तथैकराशौ' इति वि०मा०।

उप + इण् अथवा सम + इण् अथवा सम् + उप + इण् प्राप्तौ (प्राप्त करना)। (अदादौ) परस्मैपदे (स०अ०)।

लटि—उपेति, उपेतः, उपयन्ति। वि०लि०—उपेयात्, उपेयाताम्, उपेयुः।

यथा—'नरेण संयोगमुपैति कामिनी'। इति बृ०जा०। लटि—समेति, समितः, संयन्ति। वि०लि०—समियात्, समियाताम्, समियुः। यथा—'लग्नं समेत्यु' भयतः पृथुरोमयुग्मम्' इति बृ०जा०। लटि—समुपैति, समुपेतः, समुपयन्ति। वि०लि०—समुपेयात्, समुपेयाताम्, समुपेयुः। यथा—'क्षिप्रं विनाशं 'समुपैति' जातः' इति बृ०जा०।

'चर्' गतिभक्षणयोः (गमन, चलना, भक्षण करना) (भ्वादौ) परस्मैपदे—(अ०स०)।

लटि—चरति, चरतः, चरन्ति। वि०लि०—चरेत्, चरेताम्, चरेयुः।

यथा—'उदयमेति यदा दिवि तत्परं 'चरति' केतुरपि प्रतिवासरम्।' इति वि०वृ०।

'सम् + चर्'. सञ्चरणे (चलना)। (भ्वादौ) परस्मैपदे—(अ०स०)।

लटि—सञ्चरति, सञ्चरतः, सञ्चरन्ति। वि०लि०—सञ्चरेत्, सञ्चरेताम्, सञ्चरेयुः।

'वि + चर्' विचरणे। (विचरना)। (भ्वादौ) परस्मैपदे—(अ०स०)।

लटि—विचरति, विचरतः, विचरन्ति। वि०लि०—विचरेत्, विचरेताम्, विचरेयुः।

यथा—'विचरति' भद्रा त्रिभुवनमध्ये' इति ग्रन्थान्तरे। 'चल्' कम्पने (चलना, फिरना)। (भ्वादौ) परस्मैपदे—(अ०)।

लटि—चलति, चलतः, चलन्ति। वि०लि०—चलेत्, चलेताम्, चलेयुः। यथा—'ग्रहण ऋक्षग एव स चेन्न किं चलति किञ्चिदुपप्लव एव तत्।' इति वि०वृ०।

'भ्रमु' चलने (भ्रमण करना, चलना, घूमना)। (भ्वादौ दिवादौ च) परस्मैपदे—(अ०)।

लटि—भ्रमति, भ्रमतः, भ्रमन्ति। भ्रम्यति, भ्रम्यतः, भ्रम्यन्ति। भ्राम्यति, भ्राम्यतः, भ्राम्यन्ति। वि०लि०—भ्रमेत्, भ्रमेताम्, भ्रमेयुः। भ्रम्येत्, भ्रम्येताम्, भ्रम्येयुः। भ्राम्येत्, भ्राम्येताम्, भ्राम्येयुः।

यथा—इह विहितकरग्रहा गृहाणि 'भ्रमति' भुजष्यतया परः शतानि।' इति वि०वृ०।

'गम्लृ' गतौ (गमनं, ज्ञानं, प्राप्तिः) (जाना)। (भ्वादौ) परस्मैपदे—(अ०स०)।

लटि—गच्छति, गच्छतः, गच्छन्ति। यथा—'घटजोस्तं ह्युदयं च गच्छति। इति ग्र०ला०। 'क्रिये गच्छन्ति पामराः' इति ग्रं०का०। लोटि—गच्छन्तु गच्छतात्। गच्छताम्। गच्छन्तु। यथा—'अध्युष्य गच्छतु परेषु मुहूर्तमात्रम्' इति वि०मा०। 'गच्छन्तु चापे तिमिभे शुभग्रहाः' इति ग्रं०का०। वि०लि०—गच्छेत्, गच्छेताम्, गच्छेयुः। यथा—'नगच्छेयुर्नव स्त्रियः।' इति ग्रं०का०।

'आ + गम्लृ' आगतौ (आना)। (भ्वादौ परस्मैपदे—(अ०स०)।

लटि—आगच्छति, आगच्छतः, आगच्छन्ति। वि०लि०—आगच्छेत्, आगच्छेताम्, आगच्छेयुः। 'आ + या' आगतौ (आना)। (अदादौ) परस्मैपदे—(अ०स०)।

लटि—आयाति, आयातः, आयान्ति। वि०लि०—आयायात्, आयायाताम्, आयायुः। यथा—'विश्लेषमायाति यथाऽसुभिः स्वैः।' इति वि०वृ०।

'प्र + या' प्रापणे (जाना)। (अदादौ) परस्मैपदे (अ०स०)

लटि—प्रयाति, प्रयातः, प्रयन्ति। यथा अस्तं प्राच्यां भूरिलवो लघुः प्रयाति' इति। 'चलकेन्द्रलवैः 'प्रयान्ति' वक्रम् इति च ग्र०ला०। लोटि—प्रयातु प्रयातात्। प्रयाताम्। प्रयान्तु। यथा—'तत्तद्दिङनिहितैः प्रयातु ककुभं तां तां शुभैस्तारकैः इ०वि०मा०। वि०लि०–प्रयायात् प्रयायाताम्, प्रयायुः।

'या' प्रापणे। प्रापणमिह गतिः (जाना)। (अदादौ) परस्मैपदे (अ०स०)

लटि—याति, यातः यान्ति। यथा—'एका तिर्यक् तर्जनी 'याति' रेखा इ०वि०वृ०। 'इतीमे यान्ति दृक्तुल्यतां सिद्धैस्तैरिह पर्वधर्मनयसत्कार्यादिकं त्वादिशेत्। इ०ग्र०ला०१। वि०लि०—'यायात् यायाताम्, यायुः। यथा—न तां प्रतिदिशं यायात् पृष्ठगास्ते शुभप्रदाः' इ०वि०मा०।

'णीञ्' प्रापणे (पहुँचाना, ले जाना)। (भ्वादौ) परस्मैपदे (स०)

लटि—नयति, नयतः, नयन्ति। यथा—पश्यन् वशं नयति तं पुरुषं स्पृशन् वा इ०वि०मा०।

अथवा 'नयति देवरि देवरिपूपनीः' इ०वि०वृ०। किं नयन्ति यदि तत्पृथग्भवेत् इ०वि०वृ०।

वि०लि०नयेत्, नयेताम्, नयेयुः।

आत्मनेपदे—

लटि—नयते, नयेते, नयन्ते। वि०लि०—नयेत, नयेयाताम्, नयेरन्।

'वह' प्रापणे (पहुँचाना, ढोना)। (भ्वादौ) परस्मैपदे (स०)

लटि—वहति, वहतः, वहन्ति। यथा—'वहति शेषगृहेषु महोत्सवम्' इ०वि०वृ०। वि०लि०—वहेत्, वहेताम्, वहेयुः।

'उद् + वह' उद्वहने (विवाह करना)। (भ्वाद्रौ) परस्मैपदे (स०)

लटि—उद्वहति, उद्वहतः, उद्वहन्ति। वि०लि०—उद्वहेत्, उद्वहेताम्, उद्वहेयुः। यथा—'नोत्तमामुद्वहेत्कन्याम्' इ०ग्रं०।

'डु + लभष्' प्राप्तौ (प्राप्ति करना, पाना)। (भ्वादौ आत्मनेपदे (स०)

लटि—लभते, लभेते, लभन्ते। यथा—समर्च्यमानो लभते धनं जयम् इ०वि०मा०।

अथवा—'इन्दोः प्राप्य दशां फलानि लभते मंत्रद्विजात्युद्भवान् इ०बृ०जा०। वि०लि०—लभेत, लभेयाताम्, लभेरन्।

'विद्लृ' लाभे (प्राप्त करना)। (तुदादौ) आत्मनेपदे (स०)

लटि—विन्दते, विन्देते, विन्दन्ते। यथा—तदा यदि नृपो युद्धे जयं विंन्दते' इ०वि०मा०। वि०लि०-विन्देत, विन्देयाताम्, विन्देरन्।

लटि—विन्दति, विन्दतः, विन्दन्ति। यथा—तीव्रान् विदन्ति रोगान् इ०वि०मा०। वि०लि०—विन्देत्, विन्देताम्, विन्देयुः।

'आप्लृ' व्याप्तौ (पाना, व्याप्त होना)। (स्वादौ) आत्मनेपदे (अ०स०)

लटि—आप्नुते, आप्न्वाते, आप्न्वते। वि०लि०—आप्न्वीत्, आप्न्वीयाताम्, आप्न्वीरन्।

परस्मैपदे—

लटि—आप्नोति, आप्नुंतः, आप्नुवन्ति। वि०लि०-आप्नुयात्, आप्नुयाताम्, आप्नुयुः।

'प्र+आप्लृ' व्याप्तौ (पाना, व्याप्त होना)।

(स्वादौ) आत्मनेपदे (अ०स०)

लटि—प्राप्नुते, प्राप्न्वाते, प्राप्न्वते। वि०लि०—प्राप्न्वीत, प्राप्न्वीयाताम्, प्राप्न्वीरन्।

परस्मैपदे—

लटि—प्राप्नोति, प्राप्नुतः, प्राप्नुवन्ति। यथा—'भृत्यापत्यकलत्रभर्त्सनमपि प्राप्नोति च व्यङ्गताम्' इति बृ०जा०।

अथवा 'विद्राव्याऽरिवरूथिनीं जयमथ प्राप्नोति पृथिवीपतिः' इति वि०मा०।

'अभि + डुधाञ्' भाषणे (बोलना) (जुहोत्यादौ) आत्मनेपदे (स०)

लटि—(प्र०पु०) अभिधत्ते, अभिदधाते, अभिदधते। (म०पु०) अभिधत्से, अभिदधाथे, अभिधद्ध्वे। (उ०पु) अभिदधे, अभिदध्वहे, अभिदध्महे। यथा—अथ मासगणात्सुलघुक्रियया

ग्रहणद्वयसिद्धिकृतेऽभिदधे' इ०ग्र०ला०७/१ वि०लि०—अभिदधीत, अभिदधीयाताम्, अभिदधीरन्। परस्मैपदे—

लटि—अभिदधाति, अभिधत्तः, अभिदधति। वि०लि०-अभिदध्यात्, अभिदध्याताम् अभिदध्युः।

'गद्' व्यक्तायां वाचि (स्पष्ट बोलना, कहना)। (भ्वादौ) परस्मैपदे—(स०)।

लटि—गदति, गदतः, गदन्ति। यथा—'गगनतोयतपस्सु शुभैर्भृगुर्गदति शंखम् इति वि०वृ०। वि०लि०—गदेत्, गदेताम्, गदेयुः।

'नि + गद्' अथवा 'प्र + नि + = वक्तायां वाचि (स्पष्ट बोलना, कहना)। (भ्वादौ) परस्मैपदे—(स०)।

लटि—निगदति, निगदतः, निगदन्ति। लिटि—निजगाद, निजगदतुः, निजगदुः। यथा—'वक्रां करोत्यनिमिषः पदवीं यियासोर्याने नृयुग्ममशुभं निजगाद गार्ग्यः। इति वि०मा०।

वि०लि०—निगदेत्, निगदेताम्, निगदेयुः।

लटि—प्रणिगदति, प्रणिगदतः, प्रणिगदन्ति। वि०लि०—प्रणिगदेत्, प्रणिगदेताम्, प्रणिगदेयुः।

'वद्' व्यक्तयां वाचि (स्पष्टबोलना, कहना)। (भ्वादौ) परस्मैपदे—(स०)।

लटि—वदति, वदतः, वदन्ति। यथा—श्रीमान्वराहो 'वदती' हक्त्या।' इति ग्रन्थान्तरे। 'होरात्वंशप्रमतिमपरे राशितुल्यं वदन्ति' इ०वृ०जा०। लोटि—(प्र०पु०) वदतु वदतात्, वदताम्। वदन्तु। (म०पु०,) वद वदतात्। वदतम्। वदत। (उ०पु०) वदानि, वदाव, वदाम। यथा—'खपञ्चयुग्भवति किं 'वद' खस्य वर्गम्। इति ली०व०। वि०लि०—वदेत्, वदेताम्, वदेयुः। यथा—'नाशं वदेद्यदधिकं परिपच्यते तत्' इ०बृ०जा०।

'प्र+वद्' व्यक्तायां वाचि (बोलना)। (भ्वादौ) परस्मैपदे—(स०)।

लटि—प्रवदति, प्रवदतः, प्रवदन्ति। यथा—तावद्गते दिननिशोः प्रवदन्ति जन्म। इ०बृ०जा०। वि०लि०—प्रवदेत्, प्रवदेताम्, प्रवदेयुः। यथा—'क्षिप्रं निधनं 'प्रवदेत्' इति बृ०जा०।

'ब्रूञ्' व्यक्तायां वाचि (स्पष्ट बोलना, कहना)। (अदादौ) उभयपदे—(स०)।

लटि—(प्र०पु०) आह, आहतुः, आहुः। (म०पु०) आत्थ, आहथुः।

(पक्षे पञ्चसु वचनेषु)

यथा—'एकोंऽशं हरति बली तथा 'ऽऽह' सत्यः' इ०बृ०जा०।

अथवा—भास्वद्भार्गवयोर्दिशं प्रविशतादित्याह वाचस्पतिः। इति वि०मा०। वीर्यान्वितेषु नृपजन्म दशाविलग्नवर्णाधिपेषु नृपतेरभिषेकमाहुः। इति वि०मा०। लटि—(पक्षे) (प्र०पु०) ब्रवीति, ब्रूतः, ब्रुवन्ति, (म०पु०) ब्रवीषि, ब्रूथः, ब्रूथ। (उ०पु०) ब्रवीमि, ब्रूवः ब्रूमः। यथा—मुद्गान्नं च ब्रुवन्तिः भक्ष्याणि' इति वि०मा०। संज्ञा ब्रूमो विशेषतः। इति। लिटि—उवाच, ऊचतुः, ऊचुः। यथा—इति केचिदूचुः। इति ग्रन्थान्तरे।

'प्र+ब्रूञ्' लिटि—प्रोवाच, प्रोचतुः, प्रोचुः। यथा—'रिःफस्थानखिलान् ग्रहान् न शुभदान् 'प्रोवाच' वाचस्पतिः। इ०वि०मा०। 'प्रोचु' स्तद्धदन्तरत्नादिभूषाम्।' इति मु०चिं०।

लोटि—(प्र०पु०) ब्रवीतु ब्रूतात्। ब्रूताम्। ब्रवन्तु। (म०पु०) ब्रूहि ब्रूतात्। ब्रूतम्। ब्रू (उ०पु०)। ब्रवाणि, ब्रवाव, ब्रवाम। यथा—'सांघ्रिद्वयं त्रयं व्यंघ्रि कीदृग् 'ब्रूहि' सवर्णित इति ली०व०। वि०लि०—ब्रूयात्, ब्रूयाताम्। ब्रूयुः।

आत्मनेपदे—

लटि–ब्रते, ब्रुवाते, ब्रुवते। यथा—त्याज्यं मुनयो 'ब्रुवते' केचित्सर्वत्र शुभकार्ये इ०वि०मा लिटि—ऊचे, ऊचाते, ऊचिरे, यथा—भतिथिवारफलानि पदे पदे विरचितानि परैरिति नोदि इति वि०वृ०। वि०लि०—ब्रुवीत, ब्रुवीयाताम्, ब्रुवीरन्।

'निर् + ब्रूञ् लिटि—निरूचे, निरूचाते, निरूचिरे। यथा—इत्यतीन्द्रियदृशो निरुदि (निजगदुः) यद् गुणागुणमयम्। इति वि०वृ०।

(अदादौ) परस्मैपदे—(स०)। 'वच' परिभाषणे (बोलना, कहन)।

लटि—व्यक्ति, वक्तः। यथा—रवीन्दुमित्रमुरजिद्वस्वन्त्यमित्रान् शुभान्, जीवो वक्ति व वराहमिहिरः इति वि०मा०। वि०लि०—उच्यात् उच्याताम्, कर्मकर्त्तके—लटि—उच्यते, उच्येते, उच्यन्तो। चुरादौ 'णिजि'—लटि—वाचयति ते, वाचयतः–येते, वाचयन्ति–न्तो।

'चक्षिङ्' व्यक्तायां वाचि अयं दर्शनेऽपि (बोलना)। (अदादौ) आत्मनेपदे (स०)

लटि—चष्टे, चक्षाते, चक्षते। वि०लि०—चक्षीत, चक्षीयाताम्, चक्षीरन्।

'आ+चक्षिङ्' अथवा प्र + चक्षिङ् अथवा सम् + आ + चक्षिङ् = (कहना, बोलना)। (अदादौ) आत्मनेपदे (स०)

लटि—आचष्टे, आचक्षाते, आचक्षते। प्रचष्टे, प्रचक्षाते, प्रचक्षते। समाचष्टे, समाचक्षाते, समाचक्षते। लोटि—(प्र०पु०) चष्टाम्, चक्षाताम्, चक्षताम्। (म०पु०) चक्ष्व, चक्षाथाम्, चक्षध्वम्। (उ०पु०) चक्षै, चक्षावहै, चक्षामहै। यथा—'तत्राक्षभार्कौ गणक! 'प्रचक्ष्व' चेदक्षजक्षेत्रविचक्षणोऽसि इति। 'क्षेत्रक्षोदविधौ विचक्षण; 'समाचक्ष्वा'ऽविलक्षोऽसि चेत्' इति च सि.शि०।

'कथ' वाक्यप्रबन्धे (कथा कहना)। (चुरादौ) परस्मैपदे (स०)

लटि—कथयति, कथयतः, कथयन्ति। यथा—तत्रापि मूषिकभयं कथयन्ति सौम्ये इ० वि०मा०। लोटि—(प्र०पु०) कथयतु कथयतात्। कथयताम्। कथयन्तु। (म०पु०) कथय कथयतात्। कथयतम्। कथयत। (उ०पु०) कथयानि, कथयाव, कथयाम। यथा—किं स्यात् त्रयाणां 'कथयाऽऽशुशेषम्' इ०ली०व०। वि०लि०—कथयेत्, कथयेताम्, कथयेयुः।

आत्मनेपदे—

लटि—कथयते, कथयेते कथयन्ते। वि०लि०—कथयेत, कथयेतायाम्, कथयेरन्। भावे—कथ्यते।

'भाष्' व्यक्तायां वाचि (स्पष्ट बोलना)। (भ्वादौ) आत्मनेपदे (स०)

लटि—भाषते, भाषेते, भाषन्ते। वि०लि०—भाषेत, भाषेयाताम्, भाषेरन्। क०भाष्यते। णि०भाषयति-ते।

वि + आङ् + हञ् कथने (कहना)। (भ्वादौ) परस्मैपदे (स०)

लटि—व्याहरति, व्याहरतः, व्याहरन्ति। वि०लि०-व्याहरेत्, व्याहरेताम्, व्याहरेयुः।

आत्मनेपदे

लटि—व्याहरते, व्याहरेते, व्याहरन्ते। वि०लि०—व्याहरेत, व्याहरेयाताम्, व्याहरेरन्।

'पठ्' व्यक्तायां वाचि (स्पष्ट बोलना)। (भ्वादौ) परस्मैपदे (स०)

लटि—पठति, पठतः, पठन्ति। वि०लि०-पठेत्, पठेताम्, पठेयुः। क. पठ्यते। णिजि'—पाठयति—ते।

'अधि + अङ्' अध्ययने (पढ़ना)। (अदादौ) आत्मनेपदे (अ०)

लटि—अधीते, अधीयाते, अधीयते। वि०लि०—अधीयत, अधीयीयाताम्, अधीयीरन्। क०अधीयते। 'णिजि'-अध्यापयति।

'प्रथ्' प्रख्याने (कहंना, प्रख्यात करना)। (चुरादौ) परस्मैपदे (स०)

लटि—प्रथयति, प्रथयतः, प्रथयन्ति। प्राथयति, प्राथयतः, प्राथयन्ति। वि०लि०—प्रथयेत्, प्रथयेताम्, प्रथयेयुः। प्राथयेत्, प्राथयेताम्, प्राथयेयुः।

आत्मनेपदे

लटि—प्रथते, प्रथेते, प्रथन्ते। वि०लि०-प्रथेत, प्रथेयाताम, प्रथेरन्। यथा—'हित्वा सपत्नमितरान् प्रथयन्ति सौम्याः' इति वि०मा०।

'तर्क्' भाषार्थः (बोलना)। (चुरादौ) (परस्मैपदे स०)

लटि—तर्कयति, तर्कयतः, तर्कयन्ति। वि०लि०—तर्कयेत्, तर्कयेताम्, तर्कयेयुः। यथा—'कथितफलविपाकैस्तर्कयेद्वर्तमानाम्' इति बृ०जा०।

'आ + मन्' कथने (कहना)। (भ्वादौ) परस्मैपदे (स०)

लटि—आमनति, आमनतः, आमनन्ति। वि०लि०—आमनेत्, आमनेताम्, आमनेयुः। यथा—मासे तिथौ च पृथुमङ्गलमामनन्ति (कथयन्ति) इ०वि०वृ०।

'गा' गायने (गाना, कहना)। (जुहोत्यादौ) परस्मैपदे (स०)

लटि—जगाति जगितः। जगीतः जगति। लिटि—जगौ, जगतुः, जगुः। यथा—'दक्षिणादित्य एति तदिति श्रुतिर्जगौ' इति। सूर्यशुद्धिमपरे नृणां जगुः' इति च वि०वृ०।

'आ + दिश्', नि + दिश्, निर्, + दिश् अथवा सम् + आ + दिश् = कथने (कहना)। (तुदादौ) परस्मैपदे (स०)

लटि—आदिशति, आदिशतः, आदिशन्ति। वि०लि०—आदिशेत्, आदिशेताम्, आदिशेयुः। यथा—सिद्धैस्तैरिह पर्वधर्मनयसत्कार्यादिकं त्वादिशेत्।' इति ग्र०ला०१। लटि—निदिशंति, निदिशतः, निदिशन्ति। वि०लि०—निदिशेत्, निदिशेताम्, निदिशेयुः। लटि—निर्दिशति, निर्दिशतः, निर्दिशन्ति। वि०लि०—निर्दिशेत्, निर्दिशेताम्, निर्दिशेयुः। यथा—निर्दिशन्त्य--(कथयन्ति) सितशौनकादयः इ०वि०वृ०। लटि—समादिशति, समादिशतः, समादिशन्ति, वि०लि०-समादिशेताम्, समादिशेयुः। यथा—'तत्कालेस्रवणं समादिशेत्' इ०बृ०जा०।

'दिश्' अतिसर्जने = अतिसर्जनं दानम् (देना)। (तुदादौ) परस्मैपदे (स०)

लटि—दिशति, दिशतः, दिशन्ति। यथा—सहोत्थस्थो मन्दो दिशति चिरमायुः सुखगुणान् इ०वि०मा०। भ्रातृक्षयं च दिशतो भ्रातृगौ भौमभानवौ’ इ०ग्रं०का०। न दिशन्ति शुभं नृ सौम्याः केन्द्राधिपा यदि इ०उ०प्र०। वि०लि०—दिशेत् दिशेताम्, दिशेयुः। यथा—‘दिशेत्सु सुरिः सुतसदनयातो जनुषि नुः’ इ०ग्र०का०। शुक्रसौम्यौ सहजगौ दिशेतां सोदरं नृणाम् इ०ग्रं०का०। ‘न दिशेयुर्ग्रहाः सर्वे स्वदशासु स्वभुक्तिषु’ इत्यु०प्र०।

‘दद्’ दाने (देना)। (भ्वादौ) आत्मनेपदे (स०)

लटि—ददते, ददेते, ददन्ते। वि०लि०—ददेत, ददेयाताम्। ददेरन्।

‘डुदाञ्’ दाने (देना, प्रदान करना)। (जुहोत्यादौ (परस्मैपदे स०)

लटि—ददाति, दत्तः, ददति। वि०लि०—दद्यात्, दद्याताम्, दद्युः।

आत्मनेपदे

लटि—दत्ते, ददाते, ददते। वि०लि०—ददीत, ददीयाताम्, ददीरन्। यथा—‘किन्त्व भांशप्रतिमं ददाति’ इ०बृ०जा०। ‘दद्यात्तां चिरजीविने नहि भवेद्दोषो पुनर्भूभवः’। इति मु०चिं० ‘शुक्रेन्दू समभांशके हि विषमेऽन्ये दद्युरंघ्रिं बलम्’ इति जा०प०।

‘दाण्’ दाने (देना)। (भ्वादौ) परस्मैपदे—(स०)।

लटि—यच्छति, यच्छतः, यच्छन्ति। यथा—‘प्रतिदिनं खचरः, प्रचरन् फलं किमपि यच्छति चारफलो हि सः। इ०वि०वृ०। केन्द्राद्येषु च रूपकार्द्धचरणान् ‘यच्छन्ति’ खेटाः क्रमात्।’ इति जा०प०। वि०लि०—यच्छेत्, यच्छेताम्, यच्छेयुः।

‘वि + तृ’ वितरणे (देना)। (भ्वादौ) पमस्मैपदे—(अ०स०)

लटि—वितरति, वितरतः वितरन्ति। यथा—केचिदस्य वितरति कोविदाः इ०वि०वृ०। यथा—‘स्त्रीखेटौ चरमे नराः प्रथमके क्लीबौ च मध्ये तथा द्रेष्काणे वितरन्ति पादम् इ०जा०प०।

वि०लि०—वितरेत्, वितरेताम् वितरेयुः।

‘ग्रह्’ उपादाने (ग्रहण करना, लेना)। (भ्वादौ) परस्मैपदे—(स०)

लटि—गृह्णाति, गृह्णीतः, गृह्णन्ति। वि०लि०—गृह्णीयात्, गृह्णीयाताम्, गृह्णीयुः।

आत्मनेपदे

लटि—गृह्णीते, गृह्णाते, गृह्णते। वि०लि०—गृह्णीत, गृह्णीयाताम्, गृह्णीरन्। यथा—‘मृत्स्नं विवादभूमौ गृह्णीयात् सा भवेत्स्वीया’ इ०वि०मा०।

‘ला’ आदाने (लेना)। (अदादौ) परस्मैपदे—(स०)।

लटि—लाति, लातः, लान्ति। वि०लि०—लायात्, लायाताम्, लायुः।

‘गल्’ अदने (खाना)। (भ्वादौ) परस्मैपदे—(अ०)।

लटि—गलति, गलतः, गलन्ति। वि०लि०—गलेत्, गलेताम्, गलेयुः। यथा—‘मङ्गलं गलति सार्गले विधौ’ इति वि०वृ०।

‘अद्’ भक्षणे (खाना)। (अदादौ) परस्मैपदे–(अ०स०)

लटि—अत्ति, अत्तः, अदन्ति। वि०लि०—अद्यात्, अद्याताम, अद्युः। यथा—'अशुभलत्तितमत्ति तदूढयोः' इति वि०वृ०।

'अश्' भोजने (भोजन करना, खाना।) (भ्वादौ) परस्मैपदे—(स०)।

लटि—अश्नाति, अश्नीतः, अश्नन्ति। वि०लि०—अश्नीयात्, अश्नीयाताम्, अश्नीयुः।

'भुज्' पालनाभ्यवहारयोः (खाना, पालनकरना) (रुधादौ परस्मैपदे—(स०)

लटि—भुनक्ति, भुङ्क्तः, भुञ्जन्ति। यथा—'यदीन्दुराक्रम्य पुनर्भुनक्ति, इति वि०वृ०। वि०लि०—भुञ्ज्यात्, भुञ्ज्याताम्, भुञ्ज्युः।

आत्मनेपदे—

लटि—भुङ्क्ते, भुञ्जाते, भुञ्जते। वि०लि०—भुञ्जीत, भुञ्जीयाताम्, भुञ्जीरन्।

'पा' पाने (पीना)। (भ्वादौ) परस्मैपदे—(स०)

लटि—पिबति, पिबतः, पिबन्ति। यथा—षड्भागाश्चैव नद्यां पिबति च सलिलं सप्तमांशेन म्रिश्रः' इति ली०व०। यथा—'सुसलिलमिह मर्त्या निम्नगायाः पिबन्ति इ०ग्रं०का०। वि०लि०—पिबेत् पिबेताम्, पिबेयुः। यथा—पिबेयुरादित्यमुखाः सुधां ग्रहाः इति०ग्रं०का०।

'पीङ्' पाने (पीना)। (दिवादौ) आत्मनेपदे—(स०)

लटि—पीयते, पीयेते, पीयन्तो। वि०लि०—पीयेत, पीयेयाताम्, पीयेरन्। यथा—पीयन्ते मदिरा नराः सवनिता नित्यं विवाहोत्सवे इ०ग्रं०।

'पिष्लृ' संचूर्णने (पीसना)। (रुधादौ) परिसमैपदे—(स०)

लटि—पिनष्टि, पिष्टः, पिषन्ति। यथा—यस्यच्छाया पुष्पवन्तौ पिनष्टि' इति वि०वृ०। वि०लि०—पिंष्यात्, पिंष्याताम्, पिंष्युः।

'डु पचष्' पाके (पकाना)। (भ्वादौ) परस्मैपदे—(स०)

लटि–पचति, पचतः, पचन्ति वि०लि०–पचेत्, पचेताम्, पचेयुः।

लटि—पचते, पचेते, पचन्तो। वि०लि०—पचेत, पचेयाताम्, पचेरन्। क०पचते। णि०पाचयति-ते।

परि + पचष् णिजि (चुरादौ) परस्मैपदे—(स०)

लटि—परिपाचयति, परिपाचयतः, परिपाचयन्तिः। यथा—'एवं परस्परगताः परिपाचयन्ति' इ०वृ०जा०। वि०लि०—परिपाचयेत्, परिपाचयेताम परिपाचयेयुः।

'दृशिर्' प्रेक्षणे (देखना)। (भ्वादौ) परस्मैपदे—(स०)

लटि—पश्यति, पश्यतः, पश्यन्ति। यथा—'यदि न पश्यति नश्यति तत्कृतम्' इ०वि०वृ०। 'पश्यतोऽङ्गं पपीन्दुजौ' इति ग्रं०का०। अथवा—

'तनुगृहं बलिनौ यदि पश्यतः' इ०मु०चिं०। 'पश्यन्ति सप्तमं सर्वे' इत्यु०प्र० ३। वि०लि०—पश्येत्, पश्येताम्, पश्येयुः। यथा—'पश्येज्जलादौ प्रतिबिम्बितं वा' इ०ग्र०ला०। पश्येयुरुग्राः स्मरगौ कवीन्द्रू' इ०ग्रं०का०। क०दृश्यते।

'णिजि' परस्मैपदे

लटि—दर्शयति, दर्शयतः, दर्शयन्ति। वि०लि०—दर्शयेत्, दर्शयेताम्, दर्शयेयुः। यथा—'दर्शयेद्दिविचरं दिवि के वा' इति सि०शि०।

आत्मनेपदे

लटि—दर्शयते, दर्शयेते, दर्शयन्ते। वि०लि०—दर्शयेत, दर्शयेयाताम्, दर्शयेरन्।

'ईक्ष्' दर्शने (देखना)।

(भ्वादौ) आत्मनेपदे (अ०स०)

लटि—ईक्षते, ईक्षेते, ईक्षन्ते। यथा—न मेचकं चान्द्रकमीक्षते यः' इति वि०वृ० वि०लि०—ईक्षेत, ईक्षेयाताम्, ईक्षेरन्।

'निर् + ईक्ष', प्र + ईक्ष अथवा वि + ईक्ष' = दर्शनं (देखना)।

(भ्वादौ) आत्मनेपदे (अ०स०)

लटि—निरीक्षते, निरीक्षेते, निरीक्षन्ते। प्रेक्षते, प्रक्षेते, प्रेक्षन्ते। वीक्षते, वीक्षेते, वीक्षन्ते वि०लि०—निरीक्षेत, निरीक्षेयाताम्, निरीक्षेयेरन्। प्रेक्षेत, प्रेक्षेयाताम्, प्रेक्षेरन्। वीक्षेत, वीक्षेयाताम्, वीक्षेरन्।

'लोकृ' दर्शने—(देखना)।

(चुरादौ) परस्मैपदे (स०)

लटि—लोकयति, लोकयतः, लोकयन्ति। वि०लि०—लोकयेत्, लोकयेताम्, लोकयेयु

'अव + लोकृ', आ + लोक्, परि + लोकृ अथवा वि + लोकृ = दर्शने (देखना)।

(चुरादौ) परस्मैपदे (स०)

लटि—अवलोकयति, अवलोकयतः, अवलोकयन्ति। यथा—'त्रिदशत्रिकोणचतुरस्र सप्तमान्यवलोकयन्ति चरणाभिवृद्धितः। इ०बृ०जा०। वि०लि०—अवलोकयेत्, अवलोकयेताम् अवलोकयेयुः। लटि—आलोकयति, आलोकयतः, आलोकयन्ति। परिलोकयति, परिलोकयतः परिलोकयन्ति। विलोकयति, विलोकयतः, विलोकयन्ति। वि०लि०—आलोकयेत् आलोकयेताम् आलोकयेयुः। यथा—छायां बिधोर्न ध्रुवमृक्षमालामालोकयेत्' इ०वि०वृ०। वि०लि०—परिलोकयेत् परिलोकयेताम्, परिलोकयेयुः। विलोकयेत्, विलोकयेताम्, विलोकयेयुः। यथा—'विलोकये व्योमचरं किलैवं जले विलोमं तदपि प्रवक्ष्ये। इ०सि०शि०।

'श्रु' श्रवणे (सुनना)। (भ्वादौ) परस्मैपदे (स०)

लटि—शृणोति, शृणुतः, शृण्वन्ति। वि०लि०—शृणुयात्, शृणुयाताम्, शृणुयुः। यथा—'नाकीर्णकर्णः शृणुयाच्च घोषं तौ वा सुभुक्तोऽपि धृतिं न धत्ते।' इ०वि०वृ०। 'यां वा शृणुयुस्तदर्थसदृशीसिद्धिः किलोपश्रुतौ' इति च वि०वृ०।

'ज्ञा' अवबोधने (जानना)। (भ्वादौ) परस्मैपदे (स०)

लटि—(प्र०पु०) जानाति, जानीतः, जानन्ति। (म०पु०) जानासि, जानीथः, जानीथ (उ०पु०) जानामि, जानीवः, जानीमः। यथा—जानासि चेद्वर्गघनौ विभिन्नौ' इ०ली०व० वि०लि०—जानीयात्, जानीयाताम्, जानीयुः। क०ज्ञायते। 'णिजि'—ज्ञापयति-ते।

'मनु' अवबोधने (मानना, समझना)। (तनादौ) आत्मनेपदे (स०)।

लटि—मनुते, मन्वाते, मन्वते। वि.लि.–मन्वीत, मन्वीयाताम्, मन्वीरन्। लटि—मेने, मेनाते, मेनिरे। यथा—जन्मलग्नमिदमङ्गमङ्गिना मेनिरे मन इतीन्दुमन्दिरम्। इ०वि०वृ०।

'बुध्' अवगमने (जानना)। (दिवादौ) आत्मनेपदे (स०)।

लटि—बुध्यते, बुध्येते, बुध्यन्ते। वि०लि०—बुध्येत, बुध्येयाताम्, बुध्येरन्। क०बुध्यते। 'णिजि'—बोधयति-ते।

'मन्' ज्ञाते (मानना, समझना)। (दिवादौ) आत्मनेपदे (स०)

लटि—(प्र०पु०) श्मन्यते, मन्येते, मन्यन्ते। (म०पु०) मन्यसे, मन्येथे, मन्यध्वे। (उ०पु०) मन्ये, मन्यावहे, मन्यामहे। यथा—'स बहु मन्यत एव तथातथम् इ०वि०वृ०'शस्तं मृगस्यामियमेव मन्ये इति च वि०वृ०। वि०लि०–मन्येत, मन्येयाताम्, मन्येरन्।

(विद्' ज्ञाने (जानना)। (अदादौ) परस्मैपदे—(स०)।

लटि—(प्र०पु०) वेत्ति, वेत्तः, विदन्ति। (पक्षे), वेद, विदतुः, विदुः। यथा—'वेत्त्यक्षभां चापि तं, ज्योतिर्वित्कमलावबोधनविधौ वन्दे परं भास्करम्' इति च सि०शि०। लटि—(म०पु०) वेत्सि, वित्थः, वित्थ। (पक्षे) वेत्थ, विदथु विद। यथा—कीदृक् स्याद् 'ब्रूहि' 'वेत्सि' त्वमिह यदि' सि०शि०। लटि—(उ०पु०) वेद्मि, विद्वः, विद्मः। (पक्षे) वेद, विद्व, विद्म। लोटि—(प्र.पु.) वेत्तु वेत्तात्। वेत्ताम्। विदन्तु।

अत्र विशेषः—

'सत्तायां विद्यते, ज्ञाने वेत्ति, विन्ते विचारणे। विन्दते विन्दति प्राप्तौ, श्यन्लुश्नम्शेष्विदं क्रमात्।' इति (म०पु०) विद्धि वित्तात्। वित्तम्। वित्त। (उ०पु०) विदानि, विदाव, विदाम,। यथा—'अर्द्धं त्रिभागोनहतं च 'विद्धि' दक्षोऽसि भिन्ने गुणनाविधौ चेत्'। इति च सि०शि०। वि०लि०—विद्यात्, विद्याताम्, विद्युः। यथा—दशममत्र च कर्म विद्यात् इ०बृ०जा०। 'अव + इण्' अववोधने (जानना)। (अदादौ) परस्मैपदे—(अ०स०)।

लटि—अवैति, अवेतः, अवयन्ति। लोटि—(प्र०पु०) अवैतु अवेतात्, अवेताम् अवयन्तु। (म०पु०) अवेहि अवेतात्। अवेतम्। अवेत। (उ०पु०) अवायानि, अवायाव, अवायाम। यथा—'वीक्ष्य भास्करमवेहि मध्यममध्यमाहरणमस्ति चेच्छुतम्। इति सि०शि०।

अथवा—'अवेहि' मां किङ्करमष्टमूर्तेः' इति रघौ।

'टु मस्जो' शुद्धौ (शुद्ध करना, नहाना, मांजना)। (तुदादौ) परस्मैपदे—(अ०)।

लटि—मज्जति, मज्जतः, मज्जन्ति। यथा—'कफश्च्युतो मज्जति चाम्बुचुम्बी' इति वि०वृ०। वि०लि०—मज्जेत्, मज्जेताम्, मज्जेयुः।

'ष्णा' शौचे (नहाना)। (अदादौ) परस्मैपदे—(अ०)

लटि—स्नाति, स्नातः, स्नान्ति। वि०लि०—स्नायात्, स्नायाताम्, स्नायुः। यथा—'स्नायादथार्त्तववती मृगपौष्णवायुहस्ताश्विधातृभिररं लभते च गर्भम्। इति मु०चिं०।

'इष्' इच्छायाम् (इच्छा करना, चाहना)। (तुदादौ) परस्मैपदे—(स०)।

लटि—इच्छति, इच्छतः, इच्छन्ति। यथा—यवना नेच्छन्ति केचित्तथा इ०बृ०जा०। वि०लि०—इच्छेत्, इच्छेताम्, इच्छेयुः। भावे—इष्यते। यथा—जलराशौ विलग्नस्थे दृ नौयानमिष्यते' इ०वि०मा०। मासोत्तरं तत्र विवाह इष्यते' इ०मु०चिं०।

'वाछि' इच्छायाम् (इच्छा करना, चाहना)। (भ्वादौ) परस्मैपदे—(स०)।

लटि—वाञ्छति, वाञ्छतः, वाञ्छन्ति। यथा—होरेत्यहोरात्रविकल्परूपे वाञ्छन्ति पूर्वापरवर्णलोपात्। इ०बृ०जा०। वि०लि०—वाञ्छेत्, वाञ्छेताम्, वाञ्छेयुः।

'वश्' कान्तौ। 'कान्तिरिच्छा (चाहना, इच्छा करना)। (अदादौ) परस्मैपदे) —(स०)

लटि—वष्टि, उष्टः, उशन्ति। यथा—'ऐन्दवं बलमुशन्ति किं न ते इति वि०वृ०।

वा—'स्त्रीणां विधोर्बलमुशन्ति' विवाहगर्भसंस्कारयोः' इति मु०चिं०। वि०लि०—वश्यात्, उश्याताम्, उश्युः।

'लगे' सङ्गे (सङ्ग करना, लगना)। (भ्वादौ) परस्मैपदे (अ०)।

भावे=लग्यते, क्तप्रत्यये लग्नम्। लटि—लगति, लगतः, लगन्ति। वि०लि०—लगेत्, लगेताम्, लगेयुः।.

'लघि' भोजननिवृत्तावपि (भोजन न करना)। (भ्वादौ) आत्मनेपदे।

लटि—लंघते, लंघेते, लंघन्ते। वि०लि०—लंघेत, लंघेयाताम, लंघेरन्।

'वदि' अभिवादनस्तुत्योः (प्रणाम करना, प्रशंसा करना, स्तुति करना)।

(भ्वादौ) आत्मनेपदे—(स०)

लटि—(प्र०पु०) वन्दते, वन्देते, वन्दन्ते। (म०पु०) वन्दसे, वन्देथे, वन्दध्वे। (उ०पु०) वन्दे, वन्दावहे, वन्दामहे। यथा—'ज्योतिर्वित्कमलावबोधनविधौ वन्दे परं भास्करम्।' इति सि०शि०। वि०लि०—वन्देत, वन्देयाताम्, वन्देरन्।

'शंसु' स्तुतौ'प्रशंसा करना)। (भ्वादौ) परसमैपदे—(स०)।

लटि—शंसति, शंसतः, शंसन्ति। यथा—स्वर्णाद्यमन्नाशने, शंसन्त्येशु नवेषु' इति वि०मा०। वि०लि०-शंसेत्, शंसेताम्, शंसेयुः।

'कृष्' विलेखने। विलेखनमाकर्षणम् (खींचना)। (भ्वादौ) परस्मैपदे (स०)

लटि—कर्षति, कर्षतः, कर्षन्ति। वि०लि०—कर्षेत्, कर्षेताम्, कर्षेयुः। यथा—'रिष्टं कर्षति पूर्णेन्दुः' इति।

षेवृ' सेवने (सेवा करना, भजन करना)। (भ्वादौ) (आत्मनेपदे (स०)

लटि—सेवते, सेवेते, सेवन्ते। वि०लि०—सेवेत, सेवेयाताम्, सेवेरन्। यथा—षष्ठ्यष्टमीभूतविधुक्षयेषु नो 'सेवेत ना तैलपलेक्षुरं रतम्। इ०मु०चि०।

'प्रच्छ्' ज्ञीप्सायाम् (पूंछना, प्रश्न करना)। (तुदादौ) परस्मैपदे (स०)।

लटि—पृच्छति, पृच्छतः, पृच्छन्ति। वि०लि०—पृच्छेत्, पृच्छेताम्, पृच्छेयुः।

'शीङ्' स्वप्ने (सोना)। (अदादौ) परस्मैपदे (अ०)

लटि—शेते, शयाते, शेरते। वि०लि०—शयीत, शयीयाताम्, शयीरन्। भावे—शय्यते। 'णिजि'—शाययति-ते।

'पत्लृ' पतने गतौ वा गिरना, जाना)। (भ्वादौ) परस्मैपदे (अ०)

लटि—पतति, पततः, पतन्ति। वि०लि०—पतेत्, पतेताम् पतेयुः। यथा—अत्र पतेन्मङ्गलभङ्गलक्ष्म इ०वि०वृ०।

'स्मृ' स्मरणे (चिन्तायाम्) चिन्ता करना, ध्यान करना)।

(भ्वादौ) परस्मैपदे (स०)

लटि—स्मरति, स्मरतः, स्मरन्ति। यथा—नक्रङ्गते चापररात्रमेषामेतत्परं वासववत्स्मरन्ति इति वि०। लोटि—(प्र०पु०) स्मरतु स्मरतात्। स्मरताम्। स्मरन्तु। (म०पु०) स्मर, स्मरतात्, स्मरतम्, स्मरत। (उ०पु०) स्मराणि, स्मराव, स्मराम। यथा—'स्मर' रामं करणं च विष्णुरूपम्' इ०ग्र०ला०१/२। वि०लि०—स्मरेत्, स्मरेताम्, स्मरेयुः।

'षिधु' संराद्धौ। संराद्धिः = निष्पत्तिः (सिद्ध होना, पूर्ण हो जाना)।

(दिवादौ) परस्मैपदे (अ०)

लटि—सिद्ध्यति, सिद्ध्यतः, सिद्ध्यन्ति। यथा—'प्रारब्धं सिद्ध्यति' तदा इ०वि०मा०। वि०लि०—सिद्ध्येत्, सिद्ध्येताम्, सिद्ध्येयुः।

'फल' निष्पत्तौ (सफल होना, कामसिद्ध होना, परिणाम निकलना।

(भ्वादौ) परस्मैपदे (अ०)

लटि—फलति, फलतः, फलन्ति। वि०लि०—फलेत्, फलेताम्, फलेयुः। यथा—फलेद्यदि प्राक्तनमेव तत्किम् इ०वि०वृ०।

'वृङ्' सम्भक्तौ वरणे च (स्वीकार करना, वरण करना)।

(क्र्यादौ) आत्मनेपदे (स०)

लटि–वृणीते, वृणाते, वृणते। वि०लि०–वृणीत, वृणीयाताम्, वृणीरन्। वृञ्वरणे (वरण काना, चुनना, वरना) (स्वादौ) परस्मैपदे (स०)।

लटि—वृणोति, वृणुतः, वृण्वन्ति। वि०लि०—वृणुयात्, वृणुयाताम्, वृणुयुः। यथा—'उल्लिख्य सामुद्रिकलक्षणानि वरः कुमारी वृणुयान्निमित्तैः। इ०वि०वृ।

'क्षि' क्षये (अकर्मकः) (नाश करना) (अन्तर्भाविण्यर्थस्तु सकर्मकः)।

(चुरादौ) आत्मनेपदे (अ०स०)।

लटि—क्षीयते, क्षीयेते, क्षीयन्ते। यथा—'क्षीयन्ते' व्ययभवनादसत्सु वामम् इ०बृ०जा०। वि०लि०—क्षीयेत, क्षीयेयाताम्, क्षीयेरन्।

'णश' अदर्शने (नष्ट होना, न दिखलाई पड़ना)।

(दिवादौ) परस्मैपदे (अ०)

लटि—नश्यति, नश्यतः, नश्यन्ति। यथा—यदि न पश्यति नश्यति तत्कृतम् इ०वि०वृ०। वि०लि०—नश्येत्, नश्येताम्, नश्येयुः। यथा—'क्रूरस्य नश्येद्बलरूपसम्मद् इ०वि०वृ०।

'वि + णश' अदर्शने (नष्ट होना)। (दिवादौ) परस्मैपदे (अ०)।

लटि—विनश्यत, विनश्यतः, विनश्यन्ति। यथा—'त्यक्तो 'विनश्यति' कुजार्कजयोस्तथाये। इति बृ०जा०। वि०लि०—विनश्येत् विनश्येताम्, विनश्येयुः।

'वि + पद्' आपत्तौ (विपत्ति में फंसना)। (दिवादौ) आत्मनेपदे (स०अ०)

लटि—विपद्यते, विपद्येते, विपद्यन्ते। यथा—नारी गर्भयुता विपद्यते इ०बृ०जा०। वि०लि०—विपद्येत, विपद्येयाताम्, विपद्येरन्।

'पीड' अवगाहने (पीडा देना, दबाना)। (चुरादौ) परस्मैपदे (स०)

लटि—पीडयति, पीडयतः, पीडयन्ति। वि०ल्रि०—पीडयेत्, पीडयेताम्, पीडयेयुः।

आत्मनेपदे—

लटि—पीडयते, पीडर्यते, पीडयन्ते। वि०लि०—पीडयेत, पीडयेयाताम्, पीडयेरन्। भावे—पीड्यते।

'रुजो' भङ्गे (पीडित होना, रोगी होना)। (तुदादौ) परस्मैपदे—(अ०स०)।

लटि—रुजति, रुजतः, रुजन्ति। वि०लि०—रुजेत्, रुजेताम्, रुजेयुः।

'ज्वर' रोगे (ज्वर आना)। (भ्वादौ) परस्मैपदे—(अ०)।

लटि—ज्वरति, ज्वरतः, ज्वरन्ति। वि०लि०—ज्वरेत्, ज्वरेताम्, ज्वरेयुः।

'व्यथ्' भयसञ्चलनयोः (डरना, दुःखी होना)। (भ्वादौ) आत्मनेपदे—(अ०)।

लटि—व्यथते, व्यथेते, व्यथन्ते,। वि०लि०—व्यथेत, व्यथेयाताम्, व्यथेरन्।

'मीङ्' हिंसायाम् हिंसात्र प्राणवियोगः (हिंसा करना)। (दिवादौ) आत्मनेपदे—(स०)।

लटि—मीयते, मीयेते, मीयन्ते। यथा—'जीवेत्क्वापि विभङ्गरिष्टजशिशू रिष्टं विना मीयते' इति जा०प०४०। वि०लि०–मीयेत, मीयेयाताम्, मीयेरन्।

'मृङ्' प्राणत्यागे (मरना) (तुदादौ) आत्मनेपदे—(अ०)।

लटि—म्रियते म्रियेते, म्रियन्ते। वि०लि०—म्रियेत, म्रियेयाताम् म्रियेरन्।

'जीव' प्राणधारणे (जीना)। (भ्वादौ) परस्मैपदे (अ०)।

लटि—जीवति, जीवतः, जीवन्ति। यथा–ज्येष्ठासमीरोरगरौद्रपूर्वात्रयेषु नो जातरोगः। इ०वि०मा०। वि०लि०—जीवेत्, जीवेताम्, जीवेयुः। यथा—जीवेत्क्वापि विभङ्गरिष्टजशिशू रिष्टं इति जा०प०४०।

'क्षिप' प्रेरणे (फेंकना)। (तुदादौ) परस्मैपदे (स०)।

लटि—क्षिपति, क्षिपतः, क्षिपन्ति। यथा—'क्षिपति' सप्तदिनान्युदयास्तयोः सुरगुरुश्च भृगुश्च' इ०वि०वृ०। वि०लि०—क्षिपेत्, क्षिपेताम्, क्षिपेयुः।

आत्मनेपदे—

लटि—क्षिपते, क्षिपेते, क्षिपेन्ते, वि०लि०—क्षिपेत, क्षिपेयाताम्, क्षिपेरन्।

'क्षप' प्रेरणे (प्रेरणा करना)। (चुरादौ) परस्मैपदे (स०)।

लटि—क्षपयति, क्षपयतः क्षपयन्ति। यथा—योधाप्तिवर्ज्यमितरान् क्षपयन्ति भावान् इ०वि०मा०।

वि०लि०—क्षपयेत्, क्षपयेताम्, क्षपयेयुः।

'खनु' अवदारणे (खोदना)। (भ्वादौ) आत्मनेपदे (स०)

लटि—खनते, खनेते, खनन्ते। वि०लि०—खनेत, खनेयाताम्, खनेरन्।

परस्मैपदे—

लटि—खनति, खनतः, खनन्ति। यथा—अशुभ शुक्रसखः स खनत्यसूत् इ०वि०वृ,। वि०लि०—खनेत्, खनेताम्, खनेयुः।

'भिदिर्' विदारणे (भेदन करना)। (रुधादौ) आत्मपदे (स०)।

लटि—भिन्ते भिन्दाते भिन्दते। वि०लि०—भिन्दीत, भिन्दीयाताम्' भिन्दीरन्।

परस्मैपदे—

लटि—(प०पु.) भिनत्ति, भिन्तः, भिन्दन्ति। (म०पु०) भिनत्सि, भिन्त्थः, भिन्त्थ। (उ०पु०) भिनद्मि, भिन्द्वः, भिन्द्म्। यथा—'कभशकटमसौ भिनत्यसृक् शनिरुडुपश्चेज्जनक्षयः' इति। पुष्टाश्चेत्तत्संशयं तं च भिन्दम् :। इति च ग्र०ला०।

'जि' जये (उत्कर्षप्राप्ति), श्रेष्ठ बनना)। (भ्वादौ) परस्मैपदे (अ०)

लटि—जयति, जयतः, जयन्ति, यथा—जयति, शास्त्रमिदं यवनेष्वपि।' इ०वि०वृ०।

वा—व्यक्तीकृता 'जयति' केशवाक्छ्रुतिश्च। इ०ग्र०ला१/१

'वि+जि' विजये (उत्कर्ष प्राप्ति)। (भ्वादौ) आत्मनेपदे (अ०)।

लटि—विजयते, विजयेते, विजयन्ते। प्रायः शुक्रखगो, युतौ विजयते याम्योत्तराशांस्थितः इति वि०लि०-विजयेत, विजयेयाताम्, विजयेरन्।

'लस' श्लेषणक्रीडनयोः, (आलिङ्गन करना, चिपटना, खेलना)।

(भ्वादौ) परस्मैपदे—(अ०स०)

लटि—लसति, लसतः, लसन्ति। वि०लि०—लसेत्, लसेताम्, लसेयुः।

'वि + लस' (आलिङ्गन करना, खेलना, आदि)

(भ्वादौ) परस्मैपदे—(अ०स०)।

लटि—विलसति, विलसतः, विलसन्ति। लोटि—विलसतु, विलसतात्। विलसताम्। विलसन्तु। यथा—'किमपरै रुधिरबिन्दुवपुर्विलसन्तु ये' इ०वि०वृ०। वि०लि०—विलसेत्, विलसेताम्, विलसेयुः।

'क्रीडृ' क्रीडने (खेलना)। (भ्वादौ) आत्मनेपदे—(अकर्मकः)।

लटि—क्रीडते, क्रीडेते, क्रीडन्ते। यथा—पद्मिन्यां चाष्टमांशः स्वनवमसहितः क्रीडते सानुरागः, इ०ली०व०। वि०लि०-क्रीडेत, क्रीडेयाताम्, क्रीडेरन्।

परस्पैपदे—

लटि—क्रीडति, क्रीडतः, क्रीडन्ति। वि०लि०-क्रीडेत्, क्रीडेताम्, क्रीयेयुः।

'सह' मर्षणे (सहना)। (भ्वादौ) आत्मनेपदे—(स०)।

लटि—सहते, सहेते, सहन्ते, यथा—प्रायोविवाहपटलं तटलम्बमानः सावस्तृणो न 'सहते' इति वि०वृ०। वि०लि०-सहेत, सहेयाताम्, सहेरन्।

'अञ्जू' व्यक्तिम्रक्षणकान्तिगतिषु (व्यक्त करना, चिकना, इच्छा करना, जाना)।

(रुधादौ) परस्मैपदे—(स०अ०)।

लटि—अनक्ति, अङ्क्तः, अञ्जन्ति। वि०लि०-अञ्ज्यात्, अञ्ज्याताम्, अञ्ज्युः।

'वि + अञ्जू' व्यक्तिम्रक्षणकान्तिगतिषु (व्यक्त करना)।

लटि—व्यनक्ति, व्यङ्क्तः, व्यञ्जन्ति। यथा—'सन्धौ खेटो निःफलोभावभागैस्तुल्यः सम्यग्भावपक्तिं व्यनक्ति। भावपंक्तिः भावफलं व्यनक्ति प्रथय्यति स्वपाकं स्वफलं इति वि०वृ०। वि०लिं०-व्यञ्ज्यात्, व्यञ्ज्याताम्, व्यञ्ज्युः।

'अभि + वि + अजि' (चुरादौ) परस्मैपदे—(अकर्मकः)।

लटि—अभिव्यञ्जयति, अभिव्यञ्जयतः, अभिव्यञ्जयन्ति। यथा—'सर्वेऽभिव्यञ्जयन्ति' स्वदशमवाप्य इ०बृ०जा०। वि०लि०-अभिव्यञ्जयेत्, अभिव्यञ्जयेताम्, अभिव्यञ्जयेयुः।

आत्मनेपदे—

लटि—अभिव्यञ्जयते, अभिव्यञ्जयेते, अभिव्यञ्जयन्ते। वि०लि०-अभिव्यञ्जयेत, अभिव्यञ्जयेयाताम्, अभिव्यञ्जयेरन्।

'प्र + आ + रभ' राभस्ये (आरम्भ करना)।

(म्वादौ) आत्मनेपदे-(स०)।

लटि—(प्र०पु०) प्रारभते, प्रारभेते, प्रारभन्ते। यथा—'शशाङ्ककुजयोर्लग्ने स्ववर्गस्थयोर्युद्धं प्रारभते इति वि०मा०। लटि—(म०पु०) प्रारभसे, प्रारभेथे, प्रारभध्वे। (उ०पु०) प्रारभे, प्रारभावहे, प्रारभामहे। यथा—स्वल्पं वृत्तविचित्रमर्थबहुलं शास्त्रप्लवं 'प्रारभे' इति बृ. जा १/१। वि०लि०—प्रारभेत, प्रारभेयाताम्, प्रारभेरन्।

'लघि' आप्यायने क्रमणे च (सन्तुष्ट करना, लंघना)।

(चुरादौ) परस्मैपदे—(स०)।

लटि—लंघयति, लंघयतः, लंघयन्ति। वि०लि०-लंघयेत्, लंघयेताम्, लंघयेयुः। यथा—'वायव्यानलकोणगोऽस्ति परिघो याता न तं 'लंघयेत्', इ०वि०मा०।

'मुच' प्रमोदने, मोचने च (हर्षित होना, छोड़ना)।

(चुरादौ) परस्मैपदे—(स०)।

लटि—मोचयति, मोचयतः, मोचयन्ति। यथा—'विधुमष्टमषष्ठमूर्तिं यन्मोचयन्ति तदयम् इति वि०वृ०। वि०लि०-मोचयेत्, मोचयेताम्, मोचयेयुः।

आत्मनेपदे—

लटि—मोचयते, मोचयेते, मोचयन्ते। वि०लि०-मोचयेत, मोचयेयाताम्, मोचयेरन्।

'मुच्लृ' मोक्षणे (छोड़ना)।

(तुदादौ) परस्मैपदे—(स०)।

लटि—मुञ्चति, मुञ्चतः, मुञ्चन्ति। वि०लि०-मुञ्चेत् मुञ्चेताम्, मुञ्चेयुः।

आत्मनेपदे—

लटि—मुञ्चते, मुञ्चेते, मुञ्चन्ते। वि०लि०-मुञ्चेत, मुञ्चेयाताम्, मुञ्चेरन्।

'वि+स्तृञ्' आच्छादने (ढाँकना, घेरना, अच्छादन करना)।

(क्रयादौ) परस्मैपदे—(स०)।

लटि—'विस्तृणाति, विस्तृणीतः, विस्तृणन्ति। यथा—तेनानन्दं वंशयोर्विस्तृणाति' इति वि०वृ०। विस्तृणाति= विस्तरयति णिजन्तर्भावः। वि०लि–विस्तृणीयात् विस्तृणायाताम्, विस्तृणीयुः।

आत्मनेपदे—

लटि—विस्तृणीते, विस्तृणाते, विस्तृणते। वि०लि०–विस्तृणीत, विस्तृणीयाताम्, विस्तृणीरन्।

णम—प्रह्वत्वे = शिरसा नतौ, शब्दे च (शिर से प्रणाम करना, शब्द करना)।

भ्वादौ, परस्मैपदे, (स०)।

लटि—नमति, नमतः, नमन्ति। वि०लि०–नमेत्, नमेताम्, नमेयुः।

'उप+णम' उपनमने, प्रणाम करना।

(भ्वादौ) परस्मैपदे—(स०)

लटि—उपनमति, उपनमतः, उपनमन्ति। यथा—एवं नरा नरदृकाणनवांशदृग्भिः पुंखेचरै 'रुपनमन्ति' नितम्बिनीनाम्।' इति वि०वृ०। वि०लि०–उपनमेत्, उपनमेताम्, उपनमेयुः।

'परि + णम' परिणमने (परिपाक को प्राप्त)।

(भ्वादौ) परस्मैपदे—(स०)

लटि—परिणमति, परिणमतः, परिणमन्ति। यथा—परिणमति = परिपाकं प्रात्नोति। वि०लि०—परिणमेत्, परिणमेताम्, परिणमेयुः।

'प्र+णम' प्रह्वत्वे शब्दे च (प्रणाम करना, शब्द करना)।

(भ्वादौ) परस्मैपदे—(स०)

लटि—प्रणमति, प्रणमतः, प्रणमन्ति। वि०लि०—प्रणमेत्, प्रणमेताम् प्रणमेयुः।

शुष् शोषणे (सूखना)।

(दिवादौ) परस्मैपदे—(अ०)।

लटि—'शुष्यति, शुष्यतः, शुष्यन्ति। यथा—'उरः पुरः शुष्यति यस्य चार्द्रम् इ०वि०वृ०। वि०लि०—शुष्येत् शुष्येताम्, शुष्येयुः।

'जागृ' निद्राक्षये (जागना)। (अदादौ) परस्मैपदे—(अ०)।

लटि—जागर्ति, जागृतः, जाग्रति। यथा—'आक्षिप्यमाणो दिशि दक्षिणस्यां जागर्ति इति वि०वृ०। जागर्ति=प्रबुध्यति यानेऽधिकृतः। वि०लि०–जागृयात्, जागृयाताम्, जागृयुः।

'ध्वन' शब्दे (शब्द करना)।

(भ्वादौ) परस्मैपदे—(स०)।

लटि—ध्वनति, ध्वनतः, ध्वनन्ति। यथा—'खचरयोः सविता यदि कारणं ध्वनति सा नितरां यवनाध्वनिः। इति वि०वृ०। लटि—ध्वनयति, ध्वनयतः, ध्वनयन्ति, अथवा—ध्वानयति, ध्वानयतः, ध्वानयन्ति। वि०लि०ध्वनेत्, ध्वनेताम्, ध्वनेयुः। ध्वनयेत्, ध्वनयेताम्, ध्वनयेयुः, अथवा ध्वा, नयेत्, ध्वानयेताम्, ध्वानयेयुः।

'तनु' विस्तारे (फैलाना, तनना)।

(तनादौ) आत्मनेपदे—(स०)।

लटि—तनुते, तन्वाते, तन्वते। यथा—'तनुगता। यदि तत्तनुते वधूः' इति वि०वृ०। वि०लि०-तन्वीत, तन्वीयाताम् तन्वीरन्।

परस्मैपदे—

लटि—तनोति, तनुतः, तन्वन्ति,। यथा—अयोगं निहत्यैष सिद्धिंतनोति' इति मु०चिं०। वि०लि०-तनुयात् तनुयाताम्, तनयुः।

'आ+तनु' (तनादौ) परस्मैपदे (स०)।

लटि—आतनोति, आतनुतः, आतन्वन्ति,। यथा—'मुहूर्तचिन्तामणिमातनोति'। इति मु०चि०१/२। वि०लि०-आतनुयात्, आतनुयाताम्, आतनुयुः।

'हु' दानादनयोः, (देना, खाना)। (जुहोत्यादौ) परस्मैपदे-(स०)।

लटि—जुहोति, जुहुतः, जुह्वति,। वि०लि०-जुहुयात्, जुहुयाताम्, जुहुयुः।

'मुष' स्तेये (चोरी करना)। (क्रयादौ) परस्मैपदे (स०)।

लटि—मुष्णाति, मुष्णीतः, मुष्णन्ति। वि०लि०-मुष्णीयात्, मुष्णीयाताम्, मुष्णीयुः।

'चुर' स्तेये (चोरी करना)। (चुरादौ) परस्मैपदे (स०)

लटि—चोरयति, चोरयतः,चोरयन्ति, वि०लि०-चोरयेत् चोरयेताम् चोरयेयुः।

आत्मनेपदे—

लटि—चोरयते, चोरयेते, चोरयन्ते। वि०लि०-चोरयेत्, चोरयेयाताम्, चोरयेरन्।

'अव' रक्षणगतिकांत्त्यादिषु (रक्षण, गमन, इच्छा प्रभ्रति)।

(भ्वादौ) परस्मैपदे (स०अ०)।

लटि—अवति, अवतः, अवन्ति। वि०लि०-अवेत्, अवेताम्, अवेयुः।

'पा' रक्षणे (रक्षा करना)।

(अदादौ) परस्मैपदे (स०)।

लटि—पाति, पातः, पान्ति। वि०लि०-पायात्, पायाताम्, पायुः।

'भा' दीप्तौ (शोभित होना)।

(अदादौ) परस्मैपदे (अ०)

लटि—भाति, भातः, भान्ति। वि०लि०-भायात्, भायाताम्, भायुः।

'वा' गतिगन्धनयोः (जाना और बताना)

(अदादौ) परस्मैपदे (अ०)

लटि—वाति, वातः, वान्ति,। वि०लि०-वायात् वायाताम्, वायुः।

'णह' बन्धने (बांधना)।

(दिवादौ) परस्मैपदे (स०अ०)।

लटि—नह्यति, नह्यतः, नह्यन्ति। वि०लि०-नह्येत्, नह्येताम्, नह्येयुः।

आत्मनेपदे—

लटि—नह्यते, नह्येते नह्यन्ते। वि०लि०-नह्य, नह्ययाताम्, नह्येरन्।

'शुच' शोके (शोक करना, सोचना)।

(भ्वादौ) परस्मैपदे (अ०स०)।

लटि—शोचति, शोचतः, शोचन्ति, वि०लि०-शोचेत्, शोचेताम्। शोचेयुः।

'मुदं हर्षे (अर्षित होना)।

(भ्वादौ) आत्मनेपदे—(अ०)

लटि—मोदते, मोदेते, मोदन्ते। वि०लि०-मोदेत, मोदेयाताम्, मोदेरन्।

'वर्ष' स्नेहने (पानी बरसना)। (भ्वादौ) परस्मैपदे—(अ०)।

लटि—वर्षति, वर्षतः, वर्षन्ति। वि०लि०-वर्षेत्, वर्षेताम्, वर्षेयुः।

आत्मनेपदे—

लटि—वर्षते, वर्षेते वर्षन्ते। वि०लि०-वर्षेत्, वर्षेयेयाताम्, वर्षेयेरन्।

'गर्ज' शब्दे (गरजना)। (भ्वादौ) परस्मैपदे—(अ०)

लटि—गर्जति, गर्जतः, गर्जन्ति। वि०लि०—गर्जेत्, गर्जेताम्, गर्जेयुः।

(चुरादौ) परस्मैपदे—(अ०)

लटि—गर्जयति, गर्जयतः, गर्जयन्ति। वि०लि०-गर्जयेत्, गर्जयेताम्, गर्जयेयुः।

'पूज' पूजायाम् (पूजा करना)। (चुरादौ) परस्मैपदे—(स०)

लटि—पूजयति, पूजयतः, पूजयन्ति। वि०लि०-पूजयेत्, पूजयेताम्, पूजयेयुः।

आत्मनेपदे—

लटि—पूजयते, पूजयेते, पूजयन्ते। वि०लि०—पूजयेत, पूजयेयाताम्, पूजयेरन्।

'अर्च' पूजायाम् (पूजा करना)। (भ्वादौ)—परस्मैपदे—

लटि—अर्चति, अर्चतः, अर्चन्ति। वि०लि०-अर्चेत्, अर्चेताम्, अर्चेयुः।

॥ इति बिहारप्रान्तसहरसामण्डलान्तर्गतदोरमाग्रामवास्तव्येन दैवज्ञचूडामणिश्रीसूर्यनारायणसूनुना डॉ० सुरकान्तझाख्येन ज्योतिर्विज्ञानशब्दकोषे धातुसर्गः त्रयोदशः ॥१३॥

अथ देवसर्गः-१४

देवपर्यायाः—अजरः अदितिजः, अदितिनन्दनः, अदितिपुत्रः, अनिमिषः, अनिमेषः, अमरः, अमर्त्यः, अमृतान्धाः (अस्), अमृताशनः, अमृत्युः, अविस्रसः, अव्ययालयः, अव्याधिः, असुरारिः, अस्वप्नः, आजानः, आदितेयः, आदित्यः, ऋभुः, कर्मजः, कामरूपः, कामरूपी (इन्), कालेयवैरी (इन्), क्रतुभुक् (ज्), गीर्बाणः, गीर्वाणः, चिरायुः (उष्), त्रिदशः, त्रिदिवाधीशः, त्रिदिवेशः, त्रिदिवेशानः, त्रिविष्टपसत् (द्), दनुजद्विट् (ष्), दानववैरी (इन्), दानवारिः, दिविषत् (द्), दिवोकाः (अस्), दिवौकाः (अस्), दृग्विषः, देवः, देवता (स्त्री०), देवयुः, दैत्यवैरी (इन्), दैवतः, दैवतम् (न०), द्युषत् (द्), द्युसद्मा (अन्), द्योषत् (द्), नभः सत् (द्), नाकी (इन्), निर्जरः, निलिम्पः, पूजितः, बर्हिर्मुखः, बर्हिरास्यः, बर्हिर्वदनः, मरुत् (द्), मर्त्यमहितः, मुचिरायः, यज्ञाशनः, लेखः, वयुतः, वसुलः, वायुभः, विट्पतिः, विबुधः, विमानयानः, विमानिकः, विवस्वान् (मतु०), वृन्दारकः, वैमानिकः, शान्तः, शोभः, शौभः, साध्यः, सुधाभुक् (ज्), सुधाशनः, सुपर्वा (अन्), सुमनाः (अस्), सुरः, सुबलः, सुबालः, स्वर्गसत् (द्), स्वर्गी (इन्), स्वर्गौकाः (अस्), स्वाहाभुक् (ज्), स्वाहाशनः, स्वाहाशी (इन्), स्थिरः, हव्ययोनिः, देवतां दैवतं च विहायान्ये नृलिङ्गाः स्युः।

देवपितृप०—कश्यपः, मारीचः, शेषस्तु रवौ।

देवमातृपर्यायाः—अदितिः, ऋतनामा, शेषस्तु रवौ।

स्वर्गपर्यायाः—अमर्त्यभवनम्, अवरोहः, ऊर्ध्वलोकः, खम्, गौः (गो), तविषः, ताविषः, त्रिदशालयः, त्रिदशावासः, त्रिदिवः, त्रिपिष्टपम् (न०), त्रिविष्टपम् (न०) दिदिविः, दिवम्, द्यौः (दिव्), दीदिविः, देवलोकः, देवसद्मा (अन्), द्युः (अ०), द्यौः (द्यो), नभः (अस्), नाकः, फलोदयः, भुविः (इस्) (अ०), भोगभूमिः, मन्दरः, मेरुपृष्ठम्, मेरुशृङ्गः, वासवावासः, शक्रवासः, शक्रभवनम्, सुरसद्मा (अन्), सुरालयः, सुरावासः, सुराश्रयः, सैरिकः, सैरिभः, सौरिकः, स्वः (र्) (अ०), स्वर्गः, स्वर्लोकः, इति।

मेरुपर्यायाः—कनकाचलः, कर्णिकाचलः, कर्णिकाद्रिः, काञ्चनगिरिः, गोधुक् (ह), देवगिरिः, मणिसानुः, महामेरुः, मेरुः, रत्नसानुः, सुमेरु, सुरालयः, स्वर्गिगिरिः, स्वर्गिरिः, स्वर्णाद्रिः, हेमाद्रिः॥

देवविमानपर्यायाः—देवयानम्, विमानः (पुं०न०), व्योमयानम्, सुरयानम्।

सभापर्यायाः—आस्था, आस्थानम्, आस्थानी, गोष्ठी, घटा, परिषद्, पर्षद्, सदः (स्), (स्त्री०न०), संसद्, सभा, समाजः, समितिः।

देवसभापर्यायाः—देवसभा, सुधर्मा, सुरसभा।

देवनदीपर्यायाः—मन्दाकिनी, वियद्गङ्गा, सुरदीर्घिका, स्वर्णदी।

देवतरुभेदाः—(१) कल्पवृक्षः, (२) पारिजातकः, (३) मन्दारः, (४) सन्तानः, (५) हरिचन्दनः (पुं०न०), चैते पञ्च देवतरवः सन्तिः।

देवो (दिव्यो) द्यानपर्यायाः—चैत्ररथम्, देवोद्यानम्, मिश्रकम्, वैभ्राजम्, सिध्रकावणम्।

देववैद्यपर्यायाः—अब्धिजौ, अर्कजौ, अश्विनीकुमारी, अश्विनीपुत्रौ, अश्विनीसुतौ, अश्विनौ, आश्विनेयौ, आश्विनौ, गदागदौ, गदान्तकौ, दस्रौ, देवचिकित्सकौ, देवभिषजौ, देववैद्यौ, नासत्यौ, नासिक्यौ, पुष्करस्रजौ, प्रवरवाहनौ, यज्ञवहौ, यमलौ, यमौ, युजौ, रासभवाहनौ, वडवासुतौ, वरवाहनौ, वरानाकौ, वाडवेयौ, सुरचिकित्सकौ, स्ववैद्यौ।

वैद्यपर्यायाः—अगदङ्कारः, आयुर्वेदकः, आयुर्वेदिकः, आयुर्वेदी (इन्), चिकित्सकः, दोषज्ञः, भिषक् (ज्), रोगहारी (इन्), वैद्यः।

देववर्द्धकिपर्यायाः—अमरशिल्पी (इन्), त्वष्टा (ष्टृ), देववर्द्धकिः, द्युवर्द्धकिः, भौमनः, विश्वकर्मा (अन्), विश्वकृत् (त्), सुरशिल्पी (इन्)।

वर्द्धकिपर्यायाः—काष्ठतट् (क्ष), तक्षा (अन्), त्वष्टा (ष्टृ), रथकारः, रथकृत् (त्), वर्द्धकिः, स्थपतिः।

ऋषिपर्यायाः—ऋषिः, मंत्रद्रष्टा (ष्टृ), मुनिः, मौनव्रती (इन्), मौनी (इन्), रिषिः (हलादिश्च), (विद्याविदग्धमतयो रिषयः प्रसिद्धाः इति प्रयोगात्), वार्चयमः, व्रती (इन्), शंसितव्रतः, शापास्त्रः, सत्यवचाः (अस्)।

ऋषिभेदाः—(१) ब्रह्मर्षिः (वसिष्ठाद्याः), (२) देवर्षिः (कचादयः), (३) महर्षिः (व्यासादयः), (४) परमर्षिः (भेलाद्याः), (५) काण्डर्षिः (जैमिन्याद्याः), (६) श्रुतर्षिः (सुश्रु-

तार्द्याः, (७) राजर्षिः (ऋतुपुर्णादयः) चैते ऋषीणां सप्तभेदाः सन्ति।

सुरर्षिभेदाः—(१) नारदः, (२) पर्वतः, (३) भरतः, (४) देवतः, (५) कचः, (६) तुम्बुरुः, इत्यादयः।

नारदपर्यायः—कपिवक्त्रः, कलहप्रियः, कलिकारकः, देवब्रह्मा (अन्), देवलः, नारदः, पिशुनः, विधातृभूः।

सप्तर्षिभेदाः—(१) मरीचिः, (२) अत्रिः, (३) पुलहः, (४) पुलस्त्यः, (५) ऋतुः, (६) अङ्गिराः (अस्), (७) वशिष्ठश्चैते सप्तर्षीणां भेदाः सन्ति।

सप्तर्षिपत्नीभेदाः—(१) सम्भूतिः, (२) अनसूया, (३) क्षमा, (४) प्रीतिः, (५) सन्नतिः, (६) लज्जा, (७) अरुन्धती, चैता मरीचेः क्रमात्सप्तर्षीणां पत्न्याः सन्ति।

ब्रह्मर्षिभेदाः—(१) मरीचिः, (२) अत्रिः, (३) अङ्गिराः (अस्), (४) पुलस्त्यः, (५) पुलहः, (६) ऋतुः, (७) भृगुः, (८) दक्षः, (९) वसिष्ठश्चेत्यादयः।

वशिष्ठपर्यायाः—अक्षमालापतिः, अरुन्धतीजानिः, वशिष्ठः, वसिष्ठः।

वशिष्ठपत्नी०—अक्षमाला, अरुन्धती।

ज्योतिष्कदेवनाम—ज्योतिष्काः।

ज्योतिष्कदेवभेदाः—(१) चन्द्रः, (२) अर्कः, (३) ग्रहाः, (४) नक्षत्राणि, (५) तारकाश्चेत्येते ज्योतिष्कदेवानां पञ्चभेदाः सन्ति।

देवपथपर्यायाः—छायापथः, छायामार्गः, देवपथः, देवमार्गः, नभः सरित् (द्), सुराध्वा (अन्), सोमधारा।

'छायापथो नाम ज्योतिश्चक्रमध्यवर्ती कश्चित्तिरश्चीनोऽवकाशः इति मल्लिनाथः। 'देवैरर्चितादिभिर्गमयितृत्वेनाधिकृतैरुपलक्षितः पन्था देवपथ उच्यते। देवानांपन्था।

वनपर्यायाः—अटवी (स्त्री०), अरण्यम्, कक्षः, काननम्, कान्तारम्, गहनम्, झषः, दवः, दावः, वनम्, वार्क्षम्, विपिनम्, षण्डम्, सत्रम्।

उपवनपर्यायाः—अपवनम्, आरामः, उपवनम्, वेलम्।

उद्यानपर्यायाः—आक्रीडः, उद्यानम्।

ब्राह्यारामपर्यायाः—पौरकः, बाह्यारामः।

गृहारामपर्यायाः—गृहारामः, निष्कुटः।

राज्ञीक्रीडोद्यानपर्यायाः—प्रमदवनम्।

पुष्पवाटीपर्यायाः—पुष्पवाटिका, पुष्पवाटी, वृक्षवाटिका, वृक्षवाटी।

क्षुद्रारामपर्यायाः—क्षुद्रारामः, प्रसीदिका।

वृक्षपर्यायाः—तरुः, द्रुमः, वृक्षः शाखी शेषस्तु वास्तुविचारे।

सरोवरपर्यायाः—कासारः, तटाकः, तडाकः, तडागः। पद्माकरः, सरः (अस्) (नि०), सरसम्, सरसी (स्त्री०), सरोवरः।

अल्पसरोवरपर्यायाः—तल्लः, पल्वलः, वेशन्तः।

अगस्त्यपर्यायाः—अगस्तिः, अगस्त्यः, आग्निमारुतः, आग्नेयः, इल्वलारिः, उदयनः, और्वशेयः, कलशीसुतः, कुम्भभवः, कुम्भयोनिः, कुम्भसम्भवः, क्वाथिः, घटजः, घटोद्भवः,

घटोद्भवमुनिः, तपनः, दक्षिणर्षिः, दक्षिणारतिः, दण्डयामः, दीक्षाग्निः, पीताब्धिः, मानसू मान्यः, मुनिः, मैत्रावरुणः-णिः, वातापिद्विट् (ष्), वारुणिः, विन्ध्यकूटकः, सत्याग्निः, सुराहि (न्तृ)।

अगस्त्यपत्नीपर्यायाः—कौषातकी, लोपामुद्रा, वरदा, वरप्रदा, वैदर्भी।

अगस्त्यपुत्रभेदौ—(१) इध्ममवाहः, (२) दृढच्युत्।

अगस्त्यदिक्—अपाची, दक्षिणा।

अगस्त्योदयास्तपर्यायाः—अगस्त्यदर्शनः, अगस्तदृश्यः, अगस्त्योदयः। अगस्त्यलो अगस्त्यास्तः। तदुक्तं गणेशेन—

पलभाष्टवधोनसंयुता गजशैला वसुखेचरा लवाः।
इह तावति भास्करे क्रमाद् घटजोऽस्तं ह्युदयं च गच्छति।। इति ग्रहलाघवे।

ध्रुवपर्यायाः—उतानपादजः, औत्तानपदः—दिः, ग्रहाधारः, ग्रहाश्रयः, ज्योतीरथः, ध्रुवः, नक्षत्रनेमिः, सुनीतितनयः।

ध्रुवमातृपर्यायाः—सुनीतिः।

ध्रुवपितापर्यायाः—उत्तानपादः।

ध्रुवदिक्पर्यायाः—उत्तरा।

उत्पत्तिवाचकशब्दाः—उत्थः, उत्पत्तिः, उत्पन्नः, उद्भवः, उद्भूतः, जः, जननम्, जनिः नी, जनितः, जनुः, जनुः (उष्), जनूः, जन्मम्, जन्म (अन्), जन्यम्, जन्युः, जातः, जातकः, जातिः, परिसूतिः, प्रजननम्, प्रजातः-कः, प्रभवः, प्रसवः, प्रसूतः-तिः, भवः, भावः, भूः, भूतः, सञ्ज्ञा—तः-कः, समुत्पन्नः, समुद्भवः, समुद्भूतः, सम्भवः, सम्भूतः, सूः, सूतः-तिः।

प्राणिवाचकपर्यायाः—कलेवरी (इन्), चेतनः, जनः, जनिमान् (मतु०), जनुष्मान् (मतु०), जन्तुः, जन्मवान् (मतु०), जन्मी (इन्), जन्युः, जातजन्मा (अनृ), जायमानः, तनुभृत् (द्), देहभृत् (द्), देही (इन्), प्राणभृत् (द्), प्राणी (इन्), भवी (इन्), शरीरी (इन)।

मनुष्यपर्यायाः—कान्तः, चेतनः, दीर्घप्रेक्षी (इन्), द्विपादः, ना (नृ), पिशितेक्षणः, भूमिजः, भूस्थः, भूस्पृक् (श्), मनुजः, मनुजनिः, मनुभवः, मनुष्यः, मनूद्भवः, मर्त्यः, मानवः, मानुषः, वक्ता (क्तृ), विट् (श्), शतायुः (उष्), षः।

पुरुषपर्यायाः—नरः, ना (नृ), पञ्चजनः, पुमान् (पुं स्), पुरुषः, पूरुषः।

देवधेनुपर्यायाः—कामधेनुः, कामधुक् (ह्), देवधेनुः, स्वर्गौः।

नन्दिनीपर्यायाः—कामधेनुपुत्री, नन्दिनी, वशिष्ठधेनुः।

गौपर्यायाः—अघ्न्या, अनडुही, अनुड्वाही, अर्जुनी, उषा, उस्रा, गौ (गो), तम्या, तम्बा, तंवा, निलिम्पिका, माता (तृ), माहा, माहेयी, रोहिणी, शृङ्गिणी, सुरभिः, सौरभेयी।

देवाहारपर्यायाः—अमृतम्, देवभोज्यम्, देबान्धः (अस्) (न०), देवान्नम्, देवाहारः, पीयूषम्, पेयूषम्, समुद्रनवनीतम्, सुधा।

आहारपर्यायाः—अदनम्, अभ्यवहारः, अवष्वाणः, अशनम्, आहारः, खादनम्, घासिः (पुं०), जग्धिः (स्त्री०), जक्षणम्, जमनम्, जवनम्, निघसः, न्यादः, प्रत्यवसानम्, प्सातम्, भक्षणम्, भोजनम्, लेहः, वल्भनम्, विष्वाणः, स्वदनम्।

खाद्यद्रव्यभेदा—(१) चोष्यः (त्रि०) (२) भक्ष्यः (त्रि०), (३) भोज्यम् (४) लेह्यम्, चैते खाद्यद्रव्यस्य चत्वारो भेदाः सन्ति।

दैत्यपर्यायाः—असुरः, दैतेयः, दैत्यः, शेषस्तु शुक्रे द्रष्टव्यः।

दानवप०—दनुजः, दानवः, शेषस्तु शेषे।

शत्रुप०—अप्रियः, अभिघाती, (इन), अभिजिघांसुः, अभिभवः, अभिमतिः, शभिमातिः, अभियातिः, अभियाती (इन्), अभित्रः, अमित्रकः, अरातिः, अरिः, असहनः असुहृत् (द्), अहितः, घातकः, जिघांशुः, जिगांसुः, दस्युः, दुर्हृत् (द्), द्विषन् (त्), द्विट् (ष्), द्वेषणः, द्वेषी (इन्), द्वेष्यः, परः, परिपन्थकः, परिपन्थी (इन्), पर्य्यवस्थाता (तृ), प्रतिपक्षः, प्रत्यनीकः, प्रत्यर्थी, प्रत्यवस्थाता (तृ), भ्रातृव्यः, रिपुः, विद्विषः, विद्विट् (ष्), विद्वेषी (इन्), विपक्षः—कः, विरोधी (इन्), वैरी (इन्), शत्रुः, शात्रवः, सापत्नः, हिंसकः, हिंसनः।

कामादिशत्रुभेदा—(१) कामः, (२) क्रोधः, ९३) लोभः, (४) मदः (५) मोहः, (६) मत्सरश्चैते कामादयः षट् शत्रवः सन्ति। ते षड्विकारा अपि कथ्यन्ते।

वैरपर्यायाः—द्वेषणः विरोधः, विद्वेषः, वैरम्, शत्रुता, सपत्नता।

यज्ञपर्यायाः—अध्वरः, अभिषवः, आहवः, इज्या, इष्टम्, इष्टिः, क्रतुः, धर्म्मः, धृतिः, प्रयागः, बर्हिः (ष्), मखः, मन्युः, महः, मेधः, मेनः, यजः, यज्ञः, यागः, वसुनः, वितानम्, विश्वहर्य्यतः, विष्णुः, संस्तरः, संस्था, सत्रम्, सप्ततन्तुः, सवः, सवनम्, सहसानुः, सानुः, स्तोमः, हवः, हवनम्, होमः।

यज्ञभेदाः—(१) अग्निष्टुद्यज्ञः, (२) अग्निष्टोम०, (३) अग्निहोत्र०, (४) अतिरात्र०, (५) अश्वमेध०, (६) अष्टकपालेष्टि, (७) आग्रायण०, (८) इष्टाकृत०, (९) इष्टापूर्त०, (१०) इष्टिकर्म०, (११) गौमेध०, (१२) चातुर्मास्य०, (१३) द्वादशाह०, (१४) पौर्णमास०, (१५) दर्श०, (१६) नरमेध०, (१७) पुण्डरीक०, (१८) राजसूय०, (१९) वाजपेय०, (२०) विश्वजित् ०, (२१) सर्वमेध०, (२२) साद्यस्क०, (२३) सारस्वत०, (२४) सोमयागः, (२५) सौत्रामणियज्ञः, (२६) शिवयागः, (२७) विष्णुयाग,-श्चेत्यादयो यज्ञभेदाःस्युः।

अग्निपर्यायाः—अग्निः, अनलः, कृशानुः, पावकः, शेषस्त्वग्नौ।

मुखप०—आननम्, आस्यम्, घनम्, घनोत्तमम्, चरम्, तुण्डम्, तेरम, दन्तालयः, दशनगृहम्, द्विजालयः, मुखम्, लपनम्, वक्त्रम्, वदनम्, स्नेहरसनम्।

पूजितप०—अञ्चितम्, अपचायितम्, अपचितम्, अर्चितम्, अर्हितम्, नमसितम्, नमस्यितम्, पूजितम्, महितम्।

योनिप०—कारणम्, योनिः, योनी।

हव्यप०—दैवान्नम्, सान्नाय्यम्, हवनीयम्, हविः (इष्), हव्यम्, होतव्यद्रव्यम्, होमीयद्रव्यम्।

धान्यप०—अद्यम्, अन्नम्, भोगार्हम्, भोग्यम्, भोज्यम्, धान्यम्, व्रीहिः, सस्यम्, सीत्यम्, स्तम्बकरिः,।

यदुक्तं स्मृतौ—

शस्यं क्षेत्रगतं प्राहु;, सतुषं धान्यमुच्यते। आमं वितुषमित्युक्तं स्विन्नमन्नःमुदाहृतम्।। इति श०चि०। २१५३१

धान्यभेदाः—(१) ब्रीहिः, (२) यवः, (३) मसूरः, (४) गोधूमः, (५) मुद्गः, (माषः (७) तिलः, (८) चणकः, (९) अणुः (चीनाकः), (१०) प्रियङ्गुः, (११) को (१२) मकुष्ठकः, (१३) कलायः (१४) कुलत्थः, (१५) षष्टिकः, (१६) सर्षपः, (अतसी, (१८) श्यामाकश्चैते धान्यानामष्टादश भेदाः सन्ति।

ब्रीहिपर्यायाः—अन्नम्, धान्यम्, भोंगार्हः, ब्रीहिः, धान 'साठी' इति च भाषा।

तण्डुलपर्यायाः—तण्डुलः (पुं०), धान्यसारः (पुं०), 'चाउर' इति, 'चावल' इति भाषा।

तिलपर्यायाः—तिलः, पापघ्नः, पितृतर्पणम्, होमधान्यम्, 'तिल' इति भाषा।

यवपर्यायाः—तीक्ष्णशूकः, यवः, हयप्रियः, 'जौ' इति भाषा।

गोधूमपर्यायाः—गोधूमः, सुमनः,। 'गेहूँ' इति भाषा।

चणकपर्यायाः—चणकः हरिमन्थकः, 'चना' 'छोला' इति च भाषा।

अतसीपर्यायाः—अतसी, उमा, क्षुमा,। 'अलसी' इति भाषा।

माषपर्यायाः—नन्दी (इन्), बली (इन्) मदनः, माषः, वीजवरः, वृष्यः, 'उड़द' इ भाषा।

तुवरीपर्यायाः—आढकी, तुवरी, वर्णा। 'अरहर' 'तूअर' इति च भाषा।

मुद्गपर्यायाः—प्रथनः, बलाटः, मुद्गः, लोम्यः, हरिः, हरितः, 'मूंग' इति भाषा।

मसूरपर्यायाः—मङ्गल्यकः, मसूरः। 'मसूर' इति भाषा।

कलायपर्यायाः—कलायः, खण्डिकः, त्रिपुटः, सतीनकः, सातीनः, हरेणुः, 'मटर इति भाषा।

सर्षपपर्यायाः—कदम्बकः, तन्तुभः, सर्षपः। 'सरसों' इति भाषा।

श्वेतसर्षपपर्यायाः—श्वेतसर्षपः, सिद्धार्थः। सफेद सरसों इति भाषा।

कङ्गुनीपर्यायाः—कंगुः, कंगुनी, क्वङ्गुः, पीततण्डुला, प्रियङ्गुः। कांकुणी इति भाषा।

कोद्रवपर्यायाः—उद्दलः, काद्रवः, कोद्रवः, कोरदूषकः। 'कोंदों' इति भाषा।

यवनालपर्यायाः—जूर्णह्वयः, जोन्नाला, देवधान्यम्, बीजपुष्पिका, यवनालः, योनलः 'जुवार' इति भाषा।

कुलत्थपर्यायाः—कालवृन्तः, कुलत्थः, 'कुलथ' इति भाषा।

कर्पासीपर्यायाः—कर्पासी, कार्पासी, तूला, बदरा, बदरी, समुद्रान्ता,। 'कपास का पेड़' इति भाषा।

कर्पासफलपर्यायाः—कर्पासफलम्, कार्पासम्, कार्पासास्थि, बदरः, विनौला, कपासिआ, वाडवा इति च भाषा।

कर्पासपर्यायाः—कर्पासः, कार्पासः—कः, कर्पासी, कर्पासिकाः, कार्पसी, तुण्डिकेरी, पिचव्यः, बदरा, बादरः वस्त्रयोनिः। 'कपास' इति भाषा।

कार्पासतूलपर्यायाः—कार्पासतूलः, तुलः, तूलः, तूलकम्, तूलपिचुः, निर्बीजकार्पासः, पिचुः, पिचुतूलः। 'रुई' इति भाषा।

गुडपर्यायाः—इक्षुपाकः, इक्षुरसक्वाथः, गुडः। 'गुड़' इति भाषा।

शर्करापर्यायाः—शर्करा, सिता, सितोपला, 'मिश्री' इति भाषा।

खण्डपर्यायाः—खण्डः, मधुधूलिः, 'खाण्ड' इति भाषा।

मत्स्यण्डीपर्यायाः—फाणितम्, मत्स्यण्डिका, मत्स्यण्डी, मत्स्याण्डिका, मत्स्याण्डी। 'राव' इति भाषा।

रसालापर्यायाः—मर्जिता, मार्जित, रसाला, शिखरिणी 'चाटने योग्य पदार्थ 'शिखरन' इति भाषा।

गृहपर्यायाः—अगारम्, अधिवासः, अधिवासनम्, अवसथः, आगारम्, आलयः, आवसथः, आवसथ्यः, आवासः, आश्रयः, उटजम्, उदवसितम्, ओकम्, ओकः (अस्) (न०), कुटः, कुटिः-टी, कुटीरः, कुलम्, केतनम्, केतरम्, क्षयः, गृहम्, गृहाः (पुं०ब०), गेहम्, धामम्, धाम (अन्) (न०), धिष्ण्यम्, निकाय्यः, निकार्यम्, निकेतः, निकेतनम्, निलयः, निवसतिः, निवसनम्, निवासः, निवेशनम्, निशान्तम्, पस्त्यम्, बुंदिरम्, भवनम्, मन्दिरम्, मन्दिरा, महाकीर्त्तनम्, वसतिः = ती, वस्तम्, वस्त्यम्, वासः, वास्तु, विटम्, विशयम्, विश्रामः, वेशः, वेश्म (अन्), शय्यम्, शरणम्, शाला, शिविरम्, संवासः, संस्त्यायः, सदनम्, सद्म (अन्), सभा, सादनम्, साला, स्थानम्, हर्म्यम्।

गृहभेदाः—(१) नन्दावर्त्तः (नन्द्यावर्तः), (२) रुचकः, (३) वर्द्धमानः, (४) विच्छन्दकः शेषस्तु वास्तुविचारे।

सुवर्णपर्यायाः—अग्निः, अग्निबीजम्, अग्निभम्, अग्निवीजम्, अग्निवीर्य्यम्, अग्निशखम्, अजरम्, अनलम्, अपिञ्जरम्, अर्जुनम्, अष्टापदम्, आग्नेयम्, उज्ज्वलम्, औजसम्, कनकम्, कर्चूरम्, कर्णिकारच्छायम्, कर्णिकाराभम्, कर्बुरम्, कर्बूरम्, कर्वुरम्, कलधौतम्, कल्याणम्, काञ्चनम्, कार्तस्वरम्, गाङ्गेयम्, गारुडम्, गैरिकम्, चन्द्रम्, चामीकरम्, चाम्पेयम्, चाम्पेयकम्, चारुरत्नम्, चारूरुपम्, जातरूपम्, जाम्बवम्, जाम्बुनदम्, चारुरूपम्, तपनीयम् तारजीवनम्, तेजः (अस्) (न०), दाक्षायणम्, दीप्तकम्, दीप्तम्, निष्कम्, पिञ्जानम्, पीतकम्, भर्मम्, भर्म (अन्), भास्करम्, भूत्तमम्, भूरि, भूषार्हम्, मङ्गल्यम्, मनोहरम्, महारजतम्, रक्तवर्णम्, रजतम्, रत्नवरम्, रुक्मम्, राः (रै), लोभनम्, लोहवरम्, लोहोत्तमम्, वसु, वह्निबीजम्, बह्निबीजम्, वेणुतटजकाञ्चनम्, वेणुतटीभवम्, वैणवम्, शातकुम्भम्, शातकौम्भम्, शिलोद्भवम्, शुक्रम्, शृङ्गारम्, श्रीकेतनम्, श्रीमकुटम्, श्रीमत्कुम्भम्, सुवर्णम्, सौमेरवम्, स्वर्णम्, हाटकम्, हिमम्, हिरण्यम्, हेमम्, हेम (अन्)।

पर्वतपर्यायाः—अगः, अचलः, अद्रिः, अवनिधरः, अवनीधरः, अहार्य्यः, इलाधरः, उर्वङ्गः, उवर्धिरः, ऐरावतः, कटकी (इन्), कन्दराकरः, कुकीलः, कुटः, कुट्टारः, कुट्टीरः, कुधरः, कुध्रः, कुलपर्वतः, कुलशैलः, कुलाचलः, कुलाद्रिः क्षितिभृत्, क्ष्माभृत् गिरिः, गोत्रः, ग्रावा (अन्), जीमूतः, दन्ती (इन्), दर्दुरः, दुर्गमः, धरः, धरणीकीलकः, धरणीध्रः, धराधरः, धातुभृत्, नगः, पर्वतः, पृथुशेखरः, प्रपाती (इन्), प्रस्थवान् (मतु०), फलिकः, बन्धाकिः,

भाकूटः, भूधरः, भूध्रः, भूभृत् (द्), महीधरः, महीध्रः, वृक्षवान् (मतु०), व्यंशः, शि (इन्), शिलोच्चयः, शृङ्गवान् (मतु०), शृङ्गी (इन्), शैलः, सानुमान् (मतु०), स्था स्थिरः, एते सर्वे नृलिङ्गाः।

हारावल्यां वर्षपर्वतभेदाः—(१) हिमवान् (मतु०), (२) हेमकूटः, (३) निषधः, (मेरुः, (५) चैत्रः, (६) कर्णी (इन्), (७) शृङ्गी (इन्), चैते सप्त वर्षविकृतयः, भाजकि स्युः।

ग्रन्थान्तरे तु कुलाचलभेदाः—(१) हिमालयः, (२) हेमकूटः, (३) निषधः, (नीलः, (५) श्वेतः, (६) शृङ्गवान्, (मतु०), (७) माल्यवान् (मतु०), (८) गन्धमाद चैतेऽष्टौ कुलाचलभेदाः सन्ति।

विष्णुपुराणे तु कुलपर्वतभेदाः—(१) महेन्द्रः (माहेन्द्रः), (२) शुक्तिः (शुक्तिमा (३) मलयः, (४) ऋक्षकः (ऋक्षपर्वतः), (५) विन्ध्यः, (६) सह्यः, (७) पारिया (पा) त्रं सप्तकुलपर्वतभेदाः सन्ति।

पूर्वपर्वतपर्यायाः—उदयः, उदयगिरिः, उदयपर्वतः, उदयाचलः, उदयाद्रिः, पूर्वपर्व पूर्वाद्रिः, प्राक्पर्वतः।

पश्चिमपर्वतप०—अस्तः, अस्तमयाचलः, अस्ताचलः, अस्ताद्रिः, चरमाद्रिः, पश्चिमपर्व पश्चिमाचलः।

देवयोनिभेदाः—(१) विद्याधरः, (२) अप्सराः (अस्) (स्त्री०), (३) यक्षः, (४) र (अस्) (न०), (५) गन्धर्वः (६) किन्नरः, (७) पिशाचः, (८) गुह्यकः, (९) सिद्धः, (१ भूतश्चैते देवयोनीनां दशभेदाः सन्ति।

विद्याधरपर्यायाः—कामरूपी (इन्), खेचरः, द्युचरः, विद्याधरः, सत्ययौवनः, स्थिरयौव

अप्सरःप०—अप्सराः (अस्) (स्त्री०), अप्सरसः (स्त्री०ब०), देवगणिका, रतिमद रतेमदा, सुदमात्मजा, सुमदात्मजा, सुमदा, सुरस्त्री, स्वर्गस्त्री, स्वर्वधूः, स्वर्वेश्या।

हलायुधेऽप्सरसां भेदाः—(१) घृताची, (२) मेनका, (३) रम्भा, (४) उर्वशी, (तिलोत्तमा, (६) सुकेशी, (७) मञ्जुघोषा, चैते सप्ताप्सरसां भेदाः।

अन्यत्र तासां भेदा यथा—

(१) उर्वशी, (२) मेनका, (३) रम्भा, (४) घृताची, (५) पुञ्जिकस्थली, (६) सुके (७) मञ्जुघोषा, (८) महारङ्गवती, चैते (ऽष्टौ) भेदाः सन्ति।

वह्निपुराणे गणभेदनामाध्याये तु यथा—

(१) ऊर्वशी, (२) मेनका, (३) रम्भा, (४) मिश्रकेशी, (५) अलम्बुषा, (६) विश्वाची (७) घृताची, (८) पञ्चचूडा, (९) तिलोत्तमा, (१०) भानुमती, (११) अबला, (१२) वर्चा, चैते द्वादशभेदाः सन्ति।

स्त्रीपर्यायाः—अनुदरा, अबला, जोषा, जोषित् (द्), जोषिता, नारी, पयोरुह चक्षुः, प्रतीपदर्शिनी, मण्डयन्ती, महला, महिला, महिली, महेला, महेलिका, महेली, मेहला,

मेहली, मेहिला, योषित्, योषा, योषिता, रामा, वधूः वधूजनः, वनिता, वर्णिनी, वशा, वासिता, सीमन्तिनी, स्त्री०।

स्त्रीणां विशेषभेदाः—अङ्गना, अञ्चितभ्रुः, अलसेक्षणा, एकवासाः (अस्), एणनयना, कान्ता, कामिनी, कामुका, कुरङ्गनयना, चारुनेत्रा, जनिः, जनी, तनुः, तन्वङ्गी, तन्वी, तरललोचना, त्रिनता, दर्शिनी, नताङ्गी, नतोदरा, नितम्बिनी, प्रमदा, भाविनी, भीरुः, भरूः, भीलुः, भीलूः, मत्तेभगमना, मनोज्ञा, मनोविलासवती, मनोहरा, मानिनी, मृगाक्षी, रत्नभूता, रमणा, रमणी, रममाणा, रामा, ललना, ललिता, लीलावती, वामदृक् (श्), वामलोचना, वामाक्षी, विलासिनी, शर्वरी, सिन्दूरतिलका, सुतनुः, सुनयना, सुनेत्रा, सुन्दरा, सुन्दराङ्गी, सुन्दरी, सुभ्रूः, सुलोचना, सुस्मितास्या, स्मरवती, हरिणेक्षणा।

गुणोत्कृष्टस्त्रीपर्यायाः—उत्तमा, चारुवर्द्धना, मत्तकाशि (सि) नी, वरवर्णिनी, वरा, वरारोहा, श्यामा।

कोपशीलस्त्रीपर्यायाः—कोपना, कोपनी, कोपिनी, क्रोधना, चण्डी, भामिनी।

प्रमवतीस्त्रीपर्यायाः—कान्ता, दयिता, प्रणयिनी, प्राणसमा, प्राणेशा, प्राणेश्वरी, प्रिया, प्रेमवती, प्रेयसी, प्रेष्ठा, वल्लभा, हृदयेशा, हृदयेश्वरी।

चतुरोन्मत्तस्त्रीपर्यायाः—वाणिनी।

कुटुम्बिनीपर्यायाः—कुटुम्बिनी, गृहिणी, पुरन्ध्री, मातृका।

तरुणीस्त्रीपर्यायाः—चरी, चिरण्टी, तरुणी, तलुनी, दिक्करी, दृष्ट (ढ) रजाः (अस्), धनिका, प्रौढा, मध्यमा, युवतिः—ती, वयस्था, श्यामा, सुवयाः (अस्), सुस्तनी।

वेश्यापर्यायाः—कामलेखा, क्षुद्रा, खगालिका, गणिका, झर्झरा, पणाङ्गना, पण्याङ्गना, भुजिष्या, भोग्या, रूपाजीवा, लञ्जिका, वारमुख्या, वारवधूः, वारवाणिः-णी, वेश्या, शूला, साधारणस्त्री, स्मरदीपिका।

रजपर्यायाः—आर्त्तवम्, कुसुमम्, पुष्पम्, रजः (अस्), स्त्रीकुसुमम्, स्त्रीधर्मः, स्त्रीपुष्पम्, स्त्रीप्रसूनम्, स्त्रीसुमम्।

गर्भधारणयोग्यकालपर्यायाः—ऋतुः (पुं०), षोडशनिशान्तर्गतः कालः।

ऋतुमतीपर्यायाः—अधिः, अविः—वी, आत्रेयी, आर्तववती, उदक्या, ऋतुमती, पांसुला, पुष्पवती, पुष्पिता, मलिना—नी, म्लाना, रजस्वला, रजोवती, स्त्रीधर्मिणी।

यक्षपर्यायाः—यक्षः, शेषस्तु कुबेरे।

रक्षःपर्यायाः—रक्षः, शेषस्तु निर्ऋतौ।

गन्धर्वपर्यायाः—गन्धर्वः, शेषस्तु कुबेरे।

किन्नरपर्यायाः—किन्नरः, शेषस्तु कुबेरे।

पिशाचपर्यायाः—पिशाचः, शेषस्तु निर्ऋतौ।

गुह्यकपर्यायाः—गुह्यकः, शेषस्तु कुबेरे।

सिद्धपर्यायाः—सिद्धः, देवयोनिविशेषः।

सिद्धभेदाः—(१) सनकः, (२) सनन्दनः, (३) सनातनः, (४) सनत्कुमार, श्चैते चत्वारस्सिद्धाः सन्ति।

सनत्कुमारपर्यायाः—आयुर्वेदसंहिताकारः, वैधात्रः, सनत्कुमारः, सनात्कुमारः।

सिद्धानां चतुर्विंशतिभेदा अपि सन्ति ते तु ग्रन्थान्तरे द्रष्टव्याः।

जिनप०—अधीश्वरः, अनेकान्तवादी (इन्), अभयदः, अर्हन् (त्), आप्तः, केवली (इन्), क्षीणाष्टकर्मा (अन्), जगत्प्रभुः, जिनः, जिनेश्वरः, तीर्थकरः, तीर्थङ्करः, त्रिकालवि (द्), देवाधिदेवः, परमेष्ठी (इन्), पारगतः, पुरुषोत्तमः, बोधिदः, भगवान् (मतु०), वीतरागः शम्भुः, सर्वज्ञः, सर्वदर्शी (इन्), सर्वीयः, सार्वः, स्याद्वादी (इन्), स्वयम्भूः।

जिनभेदाः—(१) ऋषभः, (२) अजितः, (३) शम्भवः, (४) अभिनन्दनः, (५ सुमतिः, (६) पद्मप्रभः, (७) सुपार्श्वः, (८) चन्द्रप्रभः, (९) सुविधिः, (१०) शीतलः, (११) श्रेयांसः, (१२) वासुपूज्यः, (१३) विमलः, (१४) अनन्तः, (१५) धर्म्म, (१६ शान्तिः, (१७) कुन्थुः, (१८) अरः, (१९) मल्लिः, (२०) मुनिसुव्रतः, (२१) नमिः, (२२) नेमिः, (२३) पार्श्वः, (२४) वीर, श्चेत्येते जिनानां चतुर्विंशतिभेदाः सन्ति।

भूतपर्यायाः—बालग्रहः, भूतः (पुं०न०), भूतापुत्रः, रुद्रानुचरः, शिवपार्श्वगः।

गणदेवताभेदाः—(१) रुद्राः (११), (२) वसवः, (८), (३) आदित्याः (१२), (४) विश्वेदेवाः (१०,१३), (५) साध्याः (१२), (६) मरुद्गणाः (४९), (७) तुषिताः (३६), (८) आभास्वराः (६५), (९), म (मा) हाराजिकाः (२२०, २३६), (१०) वैकुण्ठाः (१४), (१२) सुशर्म्माणः (१०)।

तदुक्तं शेषनाममालानां (परिशिष्टे) (५,६,७, ३५३-४) 'द्वादशार्का, वसवौऽष्टौ, विश्वेदेवास्त्रयोदश।

षट्त्रिंशत्तुषिताश्चैव, षष्टिराभस्वरा अपि।।
षट्त्रिंशदधिके माहाराजिकाश्च शते उभे।
रुद्रा एकादशैकोनपञ्चाशद्वायवोऽपरे।।
चतुर्दश तु वैकुण्ठाः सुशर्म्माणः पुनर्दश।
साध्याश्च द्वादशेत्याद्या, विज्ञेया गणदेवताः।। इति।

रुद्रभेदाः—(मात्स्ये)—(१) अजैकपादहिब्रध्नः, (२) विरुपाक्षः, (३) रैवतः, (४) हरः, (५) बहुरूपः, (६) त्र्यम्बकः, (७) सुरेश्वरः, (८) सावित्रः, (९) जयन्तः, (१०) पिनाकी (इन्), (११) अपराजित-श्चैते रुद्रस्यैकादश भेदाः सन्ति।

तद्भेदाः—(केशवे तु)—(१) अजैकपात् (द्), (२) अहिर्बुध्न्यः, (३) पिनाकी (इन्), (४) अपराजितः, (५) कपर्दी (इन्), (६) भुवनाधीशः, (७) भगः (वः), (८) स्थाणुः, (९) वृषाकपिः, (१०) गिरिशः, (११) वीरभद्र-श्चेत्येते रुद्रस्यैकादशभेदाः सन्ति।

वसुभेदाः—(भरतमते) (१) धरः, (२) ध्रुवः, (३) सोमः, (४) विष्णुः, (५) अनिलः, (६) अनलः, (७) प्रत्यूषः, (८) प्रभासश्चैतेऽष्टौ वसवः सन्ति।

तद्भेदाः—(महाभारते तु) (१) आपः, (२) ध्रुवः, (३) सोमः, (४) धरः, (५) अनिलः, (६) अनलः, (७) प्रत्यूषः, (८) प्रभासश्चैतेऽष्टौ वसवः सन्ति।

आदित्यभेदाः—विष्णुः, यमः, शेषस्तु रवौ।

विश्वेदेवभेदाः—(१) क्रतुः, (२) दक्षः, (३) वसुः, (४) सत्यः, (५) कामः, (६) कालः, (७) ध्वनिः (धृतिः), (८) रोचकः (कुरुः), (९) माद्रवाः (अस्), (१०) पुरुरवाः (अस्), इत्येते विश्वेदेवानां दशभेदाः सन्ति।

मतान्तरे तु—

'दृष्टिश्राद्धे क्रतू दक्षौ सत्यौ नान्दीमुखे वसू।
सापिण्ड्यके कामकालौ तीर्थे च धूरिलोचनौ।
पुरुरवार्द्रवौ चैतौ पार्वणे समुदाहृतौ।
हेमश्राद्धे धनरुची कथ्येते विश्वदेक्कौ।
एकोदिष्टे रुद्रसंज्ञो विश्वेदेवास्त्रयोदश।' इति हेमाद्रौ शंखबृहस्पत्युक्तेः।

आदिदेवपर्यायाः—आदिदेवाः, आद्यदेवाः, पूर्वदेवाः, प्रथमदेवाः।

आदिदेवभेदाः—(१) ब्रह्मा (अन्) (२) विष्णुः (३) शिवः इत्येते आदिदेवानां त्रयो भेदाः सन्ति।

सर्वदेवभेदाः—आदित्याः (द्वादश), रुद्राः (एकादश), वसवः (अष्टौ), प्रजापतिः (ब्रह्मा) (एकः), इन्द्रः (एकः), अथवा-द्वौ दस्रौ एवं देवानां त्रयस्त्रिंशद्भेदाः स्युः।

ब्रह्मपर्यायाः—अजः, अण्डजः, अब्जजः, अब्जयोनिः, अष्टकर्णः, अष्टश्रवाः-(अस्), आः, आत्मभूः, आपचः, उः, कः, कञ्जः, कञ्जजः, कञ्जारः, कमनः, कमलासनः, कमलोद्भवः, कविः, कुशकेतुः, कृपाद्वैतः, खसपर्णः, गुणसागरः, चतुराननः, चतुर्मुखः, चिन्तामणिः, चिरञ्जीवी (इन्), चिरन्तनः, जटाधरः, जन्युः, देवदेवः, द्रुघ (ष) णः, द्रुहिणः, धरुजः, धाता (तृ), नाभिः, नाभिजः, नाभिजन्मा (अन्), निधनः, पद्मगर्भः, पद्मजन्मा (अन्), पद्मपाणिः, पद्मभूः, पद्मयोनिः, पद्मलाञ्छनः, पद्मासनः, परमेष्ठी (इन्), पितामहः, पुराणगः, पुराणगीः, पुराणगीतः, पुरुषः, पूर्वः, प्रजापतिः, प्रपितामहः, प्रपूज्यः, प्रभुः, प्राणः, प्रणदः, बहुरूपः, बहुरेताः (अस्), ब्रह्मा (अन्), भवान्तकृत् (त्), भाववृत्तः, भूतात्मा (अन्), मः, मञ्जुप्राणः, महावीर्यः, मृगयुः, रजोमूर्तिः, लोकनाथः, लोकेशः, वसुश्रवाः (अस्), विधाता (तृ), विधिः, विरञ्चः, विरञ्चनः विरञ्च्यः, विरिञ्चः, विरिञ्चिः, विरिञ्चिः, विश्वरेताः (अस्), विश्वस्टट् (ज्), विश्वात्मा (अन्), विश्वेश्वरः, वेदगर्भः, वेदी (दे) शः, वेधाः (अस्), शतधृतिः, शतपत्रनिवासः, शतानन्दः, शम्भुः, शाश्वतः, सञ्ज्ञः, सत्यकः, सदानन्दः, सनत् (द्) (अ०), सनातनः, सनात् (द्) (अ०), सन्ध्यारागः, सरोजजन्मा (अन्), सरोजी (इन्), सर्वकर्ता (तृ), सर्वतोमुखः, सामयोनिः, सारसूः, सुधावर्षी (इन्), सुरज्येष्ठः, सुरासुरगुरुः, स्थविरः, स्रष्टा (ष्टृ), स्वभूः, स्वयम्भु-म्भूः, स्वायम्वनुपिता (तृ), हंसरथः, हंसवाहः, हंसवाहनः, हिरण्यगर्भः।

ब्रह्मपुरीपर्यायाः—मनोवती।

ब्रह्मपत्नीनामनी—(१) स्वरा (एषाज्येष्ठापत्नी), (२) सावित्री (एषा कनिष्ठा पत्नी)।

सावित्रीपर्यायाः—गायत्री, त्रिपदाः, त्रिपदादेवी, पृश्निसुता, ब्रह्मपत्नी, ब्रह्माणी, वेदमात (तृ), वैश्वामित्री, श्रुतिजननी, सावित्री, सूर्यतनया, सूर्यसुता।

पत्नीपर्यायाः—ऊढा, करात्ती, कलत्रम् (न०), क्षेत्रम् (न०), गृहिणी, गृहाः (पुं०ब०), गेहिनी, जनी, जाया, दारः (पुं०), दारा (स्त्री०), दाराः (पुं०ब०), द्वितीया, पत्नी, परिग्रहः (पुं०), पाणिगृहीता-ती, पालुषी. प्रिया, भार्या, वधूः, सधर्मचारिणी, सधर्मिणी, सहचरी, सहधर्मिणी। इति।

ब्रह्माणो बालयोगिमानसपुत्रनामानि—(१) सनकः, (२) सनन्दनः, (३) सनातनः, (४) सनत्कुमारः (५) नारद इत्यादय एते बालयोगिनः सन्ति।

तस्य सस्त्रीकमानसपुत्रनामानि—(१) मरीचिः, (२) अत्रिः, (३) अङ्गिराः (अस्), (४) पुलस्त्यः, (५) पुलहः, (६) क्रतुः, (७) भृगुः, (८) दक्षः, (९) प्रचेतसः (पुं०ब०), (१०) वसिष्ठः, इत्यादयस्तस्य सस्त्रीकमानसपुत्राः सन्ति।

यदुक्तं श्रीमद्भागवते—

'उत्सङ्गान्नारदो जज्ञे, दक्षोऽङ्गुष्ठात्स्वयम्भुवः'। इति।

तत्पुत्री (सरस्वती) पर्यायाः—अन्त्यसन्ध्येश्वरी, इरा, ईश्वरी, गीः (र्), गिरा, गिरादेवी, गिर्देवी, गौः, (गो), ब्रह्मकन्यका, ब्रह्मपुत्री, ब्रह्मसुता, ब्राह्मी, भारती, भाषा, महाश्वेता, रसा, वचसामधीशा, वर्णमातृका, वाक् (च्), वाक्प्रदा, वाक्येश्वरी, वाग्देवता, वाग्देवी, वागीशा, वागीश्वरी, वाचा, वाणी, विद्यादेवी, वेदाग्रजा, वेदाग्रणी, वेदी, शारदा, शुक्ला, श्रीः, सन्ध्या, सरस्वती, सायं सन्ध्यादेवता।

कन्यापर्यायाः—अनागतार्त्तवा, अरजाः (अस्), अलकनन्दा, कनी, कन्यका, कन्या, कुमारिका, कुमारी, गौरी, नग्ना, नग्निका।

पुत्रीपर्यायाः—अङ्गजा, आत्मजा, उद्वहा, तनया, तनुजा, तनूजा, दारिका, दुहिता (तृ), देहसञ्चारिणी, धीदा, नन्दना, नन्दिनी, पुत्रका, पुत्रिका, पुत्री, समदुः, समर्धुका, सुता, सूनुः—नूः, स्वजा।

भाषणपर्यायाः—अभिधानम् (न०), उक्तिः (स्त्री०), उदितम्, गदितम्, जल्पितम्, भणितम्, भाषणम्, भाषितम्,लपितम्, वचनम्, वचः (अस्), वाक्यम् (एते क्लीवलिङ्गाः) व्याहारः (पु०)।

वीणापर्यायाः—अनुवादिनी, कण्ठकूणिका, घोषवती, ध्वनिमाला, वङ्गमल्ली, वल्लकी, विपञ्चिका, विपञ्ची, वीणा।

वीणागुणपर्यायाः—तंत्री।

सप्ततंत्रीयुक्तवीणापर्यायाः—चित्रा, परिवादिनी।

शिवादीनां वीणानामानि—शिवस्य 'अनालम्बी', सरस्वत्याः 'कच्छपी', नारदस्य 'महती', गणा नाम् 'प्रभावती', विश्ववसोः (गन्धर्वविशेषस्य) बृहती'। तुम्बुरोः (गन्धर्वविशेषस्य) कलावती।

चण्डालानां वीणानामानि—कटोलवीणा, काण्डवीणा, किन्नरी, कुवीणा, खुंखणी, चाण्डालिका, डक्करी, वल्लकी, सारिका।

कण्ठगतमाधुर्य्यपर्यायाः—स्वरः, अथवा-स्वराः—निषादादयः।

स्वरभेदाः—(१) निषादः, (२) ऋषभः, (३) गान्धारः, (४) षड्जः, (५) मध्यमः, (६) धैवतः, (७) पञ्चमः इत्येते स्वराणां सप्तभेदाः स्युः।

तद्भेदप०—(मतान्तरे) (१) षडजः, (२) ऋषभः, (३) गान्धारः, (४) मध्यमः, (५) पञ्चमः, (६) धैवतः, (७) निषादः, इत्येते मतान्तरे तद्भेदाः स्युः।

तेषां साङ्केतिकभेदाः—'स०' 'रि०' 'ग०' 'म०' 'प०' 'ध०' नि०' इत्यपरे स्मृताः।

इह नारदोक्तिर्यथा—

'षड्जं रौति मयूरस्तु गावो नर्दन्ति चार्षभम्।
अजाविकौ च गान्धारं क्रौञ्चो नर्दति मध्यमम्॥
पष्पसाधारणे काले कोकिलो रौति पञ्चमम्।
अश्वस्तुधैवतं रौति, निषादं रौति कुञ्जरः'॥ इति। अम०सु०व्या०१/७/१

स्वरसन्दोहपर्यायौ—ग्रामः, स्वरसन्दोहः।

ग्रामभेदाः—(१) नन्द्यावर्तः (षड्जग्रामः), (२) जीमूतः (मध्यमग्रामः), (३) सुभद्रः (गान्धारग्रामः), इत्येते ग्रामस्य त्रयो भेदाः स्युः।

मूर्छनापर्यायः—मूर्छना (ग्रामसप्तमांशो नाम मूर्छना गीताङ्गं वा)।

मूर्छनाभेदाः—(१) ललिता, (२) मध्यमा, (३) चित्रा, (४) रोहिणी, (५) मतङ्गजा, (६) सौवीरी, (७) षण्डमध्या, (८) पञ्चमा, (९) मत्सरी, (१०) मृदुमध्या, (११) शुद्धा, (१२) अन्ता, (१३) कलावती, (१४) तीव्रा, (१५). रौद्री, (१६) ब्राह्मी, (१७) वैष्णवी, (१८) खेदरी, (१९) सुरा, (२०) नादावती, (२१) विशाला, इत्येते मूर्च्छनाया एकविंशतिभेदाः स्युः।

तानपर्यायः—तानः (पुं०) गानाङ्गविशेषः। यथा—

'विस्तीर्य्यन्ते प्रयोगा यैर्मूर्छनाशेषसंश्रयाः।
तानास्तेऽप्युनपञ्चाशत् सप्तस्वरसमुद्भवाः॥
तेभ्य एव भवन्त्यन्ये कूटतानाः पृथक् पृथक्।
ते स्युः पञ्चसहस्राणि त्रयस्त्रिंशच्छतानि च। इति। श०चिं ९/१०६७

तानभेदाः—(१) अग्निष्टोमः, (२) अत्यग्निष्टोमः, (३) वाजपेयः, (४) षोडशी (स्त्री०), (५) पुण्डरीकः, (६) अश्वमेधः, (७) राजसूयः, (८) स्विष्टकृत्, (९) बहुसौवर्णः, (१०) गोसवः, (११) महाव्रतः, (१२) विश्वजित् (तृ), (१३) ब्रह्मयज्ञः, (१४) प्राजापत्यः, (१५) अश्वक्रान्तः, (१६) रथक्रान्तः, (१७) विष्णुक्रान्तः, (१८) सूर्यक्रान्तः, (१९) गजक्रान्तः, (२०) बलभिद् (त्), (२१) नागपक्षकः, (२२) चातुर्मास्यः, (२३)संस्थाख्यः, (२४) शस्त्रः, (२५) उक्थः, (२६) सौत्रामणी (स्त्री०), (२७) चित्रा (स्त्री०), (२८) उद्भिहाह्वयः, (२९) सावित्री (स्त्री०), (३०) अर्द्धसावित्री (स्त्री०), (३१) सर्वतोभद्रः, (३२) आदित्यनामयनः,

(३३) गवामयननामकः, (३४) सर्पाणामयनः, (३५) कोणपायनः, (३६) अग्निचित् (द्), (३७) द्वादशाहः, (३८) उपांशुः, (३९) सोमाभिधः, (४०) अश्वप्रतिग्रहः, (४१) वर्हिरथः, (४२) अभ्युदयः, (४३) सर्वस्वदक्षिणः, (४४) दीक्षा (स्त्री०), (४५) सामाख्यः, (४६) समिधाह्वयः, (४७) स्वाहाकारः, (४८) तनूनपात् (द्), (४९) गोदोहनश्चैते तानानामूपपञ्चाशद्भेदाः स्युः।

गानपर्यायाः—गानम्, गान्धर्वम्, गीतम्, गीतिः, गेयम्। इति।

अंगुलिप०—अंगुरिः—री, अंगुलिः-ली, अंगुलीया, करशाखा।

अंगुष्ठप०—अंगुलः, अंगुष्ठः, करवीरः, वृद्धा अंगुलिः।

तर्जनीप०—अंगुष्ठनिकटांगुलिः, तर्जनी, प्रदेशनी, प्रदेशिनी।

मध्यांगुलिप०—ज्येष्ठा, मध्यमा, मध्या।

अनामिकाप०—अनामा, अनामिका, उपकनिष्ठांगुलिः, सावित्री।

कनिष्ठांगुलिप०—कनिष्ठा, कनीनिका, दुर्बलांगुलिः।

नखप०—अंगुलिजः, अंगुलीकण्टकः, अंगुलीसम्भृतः, करकण्टः—कः, करचन्द्रः, करजः, कररुहः, करशूकः, कराग्रजः, करोद्भवः, कामांकुशः, खरूलः, नखः, नखरः, (पुं०न०), पाणिजः, पाणिरुहः, पुनर्नवः, पुनर्भवः, भुजाकण्टः, महाराजः, रतिरथः, स्मरांकुशः।

रागप०—रागः (पुं०) भैरवादिः, गायनशास्त्रीयरागः।

रागभेदाः—(भरतहनुमन्मते) (१) भैरवः, (२) कौशिकः, (३) हिन्दोलः, (४) दीपकः, (५) श्रीरागः, (६) मेघः, इत्येते षड्रागाः स्युः।

तद्भेदाः—(कलानाथसोमेश्वरमते) (१) मालवः, (२) मल्लारः, (३) श्रीरागः, (४) वसन्तः (५) हिल्लोलः, (६) कर्णाटश्चैते मतान्तरे रागाणां षड्भेदाः स्युः।

रागिणीपर्यायाः—रागिणी, रागपत्नी, रागभार्या।

रागिणीभेदाः—(१) धानसी, (२) मामसी, (३) रामकीरी (१४) सिन्धुडा, (५) आशावरी, (६) भैरवी, चेमाः, षण्मालवप्रियाः।

(१) वेलावली, (२) पूरवी, (३) कानडा, (४) माधवी, (५) कोडा, (६) केदारिका, चेमाःषण्मल्लारप्रियाः।

(१) गान्धारी, (२) शुभगा, (३) गौरी, (४) कौमारी, (५) वेलोयारी, (६) वैरागी चेमाः षट् च्छ्रीरागप्रियाः।

(१) तुडी, (२) पञ्चमी, (३) ललिता, (४) पठमञ्जरी, (५) गुर्जरी, (६) विभाषा, चेमाः षड्वसन्तरागप्रियाः।

(१) मायूरी, (२) दीपिका, (३) देशकारी, (४) पाहिडा, (५) कराडी, (६) मोरहाटी, चेमाः षड् हिल्लोलरागप्रियाः।

(१) नाटिका, (२) भूपाली, (३) रामकेली, (४) गडा, (५) कामोदा, (६) कल्याणी, चेमाः षट् कर्णाटराम प्रियाः, एवं रागिणीनां षट्त्रिंशद्भेदाः स्युः।

वेदपर्यायाः—आगमः, आम्नायः, ऋषि, छन्दः (अस्) (न०), त्रयी (स्त्री०), निगमः, ब्रह्म (अन्) (न०), वेदः, श्रुति (स्त्री०), स्वाध्यायः।

प्रणवप०—ओङ्कारः, प्रणवः।

वेदभेदाः—(१) ऋक् (च्), (२) यजुः, (ष्), (३) साम (अन्), (४) अथर्व (अन्), चैते वेदस्य चत्वारो भेदाः स्युः।

उपवेदभेदाः—(१)आयुर्वेदः (ऋगुपवेदः), (२) धनुर्वेदः (यजुरुपवेदः), (३) गान्धर्ववेदः (साम्न उपवेदः), (४) अर्थशास्त्रम् (अथर्वोपवेदः) चैते उपवेदानां चत्वार उपभेदाः स्युः।

अंगपर्यायाः—अङ्गम्, अपधनः, अवयवः, गात्रम्, प्रतीकः।

षडंगभेदाः—(१) पादौ, (२) हस्तौ, (३) नयने, (४) श्रवणे, (५) नासिके, (६) मुखम्, चैतानि षडङ्गानि स्युः।

षट्शास्त्रभेदाः—(१) छन्दः (अस्), (वेदस्य पादौ), (२) कल्पः (वेदस्य हस्तौ), (३) ज्योतिषम् (वेदस्य चक्षुषी), (४) निरुक्तम् (वेदस्य श्रोत्रे), (५) शिक्षा (वेदस्य नासिके), (६) व्याकरणम् (वेदस्य मुखम्), चैते शास्त्राणां षड्भेदाः स्युः।

छन्दःपर्यायाः—छन्द (अस्), पद्यम्, वृत्तम्।

छन्दोजातिभेदाः—(१) उक्ता, (२) मध्या, (३) प्रतिष्ठा, (४) अन्या, (५) सुप्रतिष्ठा, (६) गायत्री, (७) उष्णिक् (ह्), (८) अनुष्टुप (भ्), (९) बृहती, (१०) पंक्तिः (११) त्रिष्टुप् (भ्), (१२) जगती, (१३) अतिजगती, (१४) शक्वरी, (१५) अतिशक्वरी, (१६) अष्टिः, (१७) अत्यष्टिः, (१८) धृतिः, (१९) अतिधृतिः, (२०) कृतिः, (२१) प्रकृतिः, (२२) आकृतिः, (२३) विकृतिः (२४) संकृतिः (२५) अभिकृतिः (२६) उत्कृतिश्चैते छन्दसां षड्विंशतिजातिभेदाः स्युः।

श्रुतिजातिभेदाः—(१) तीव्रा, (२) कुमुद्वती, (३) मन्दा, (४) छन्दोवती, (५) दयावती, (६) रञ्जनी, (७) रतिका, (८) रौद्री, (९) क्रोधा, (१०) वज्रिका, (११) प्रसारिणी, (१२) प्रीतिः, (१३) मार्जनी, (१४) क्षितिः, (१५) रक्ता, (१६) सन्दीपनी, (१७) आलापिनी, (१८) मदन्ती, (१९) रोहिणी, (२०) रम्या, (२१) उग्रा, (२२) क्षोभिणी, चैते श्रुतेर्द्वाविंशतिजातिभेदाः स्युः।

कल्पपर्यायाः—कल्पः, क्रमः, यज्ञविद्या, विधिः, बोधायनापस्तम्बाश्वलायनादिमहर्षिप्रणीतग्रन्थः।

ज्यौतिषप०—ग्रहणादिगणनशास्त्रम्, ज्योतिश्शास्त्रम्, ज्योतिषम्, ज्यौतिषम्, वेदचक्षुः।

ज्योतिश्शास्त्रभेदाः—(१) सिद्धान्तः, (२) संहिता, (३) होरा चैते ज्योतिषशास्त्रस्य त्रयौ मुख्यभेदाः स्युः।

यदुक्तम्—

'सिद्धान्त-संहिता-होरारूपस्कन्धत्रयात्मकम्' इति।

कैश्चित्तु—

(१) केरलीयम् (कृष्णीयप्रश्नशास्त्रम्), (२) शकुनम् (वसन्तराजादिप्रणीतशास्त्रम्), चेत्याभ्यां सहितं पञ्चस्कन्धात्मकमेतच्छास्त्रमुच्यते। ये होराविदो 'मुहूर्तशास्त्रं' श्रीपतिकृतरत्नमालादि विद्यामाधवीयं

च होराशास्त्रत: पृथङ् मन्यन्ते तन्मते ज्योतिश्शास्त्रं षट्स्कन्धात्मकं बोध्यम्।

निरुक्तपर्याया:—निरुक्तम्, निरुक्ति:, निर्वचनम्, पदभञ्जनम्, व्याकरणपरिशिष्टम्। यास्कप्रणीतग्रन्थ:।

शिक्षापर्याया:—वेदशिक्षणप्रकारवान्, महर्षिनारदपाणिनि प्रणीतग्रन्थ:, शिक्षा।

व्याकरणपर्याया:—आम्नायाननम्, पदम्, वेदवदनम्, व्याकरणम्, शब्दशास्त्रम्, श्रुतिमुखम्।

व्याकरणभेदा:—(१) ऐन्द्रम्,(२) चान्द्रम्, (३) काशकृत्स्नम्, (४) कोमारम्, (५) सारस्वतम्, (६) शाकटायनम्, (७) आपिशलेयम्, (८) शाकलम्, (९) पाणिनीयम्, (१०) हैमम्, चैते व्याकरणशास्त्रस्य दशभेदा: स्यु:।

शाब्दिकनामानि—(१) इन्द्र:, (२) चन्द्र:, (३) काशकृत्स्न:, (४) आपिशलि: (५) शाकटायन:, (६) पाणिनि:, (७) अमर: (अमरसिंह:), अधुनास्य व्याकरणं नोपलभ्यते। (८) जैनेन्द्र: (हेमचन्द्राचार्य्य:) चेत्यस्य शब्दानुशासनं व्याकरणशास्त्रमिदानीमुपलभ्यते।

वेदान्तपर्याया:—उपनिषत् (द्), ब्रह्मविद्या, वेदान्त:।

सांख्यपर्याया:—कापिलम्, शांख्यम्, सांख्यम्।

मीमांसापर्याया:—मीमांसा, विचारणा, वेदविचारणा, पूर्वमीमांसा, उत्तरमीमांसा च मीमांसापूर्वोत्तरभेदेन प्रसिद्धं शास्त्रं तज्जैमिनिव्यासप्रणीतम्। तदेव वाक्यम्।

षड्दर्शनभेदा:—(१) वैशेषिकम् (कणादस्य), (२) न्याय: (गोतमस्य), (३) मीमांसा (जैमिने:), (४) सांख्यम् (कपिलस्य), (५) पातञ्जलम्, (पतञ्जले:), (६) वेदान्त: (व्यासस्य), चैतानि षड्दर्शनानि स्यु:।

धर्म्मशास्त्रपर्याया:—अनुशासनम्, धर्मशास्त्रम्, धर्मसंहिता, स्मृति:, मन्वादिप्रणीतशास्त्राणि।

धर्म्मशास्त्रप्रयोजकनामानि—(१) मनु:, (२) अत्रि:, (३) विष्णु:, (४) हारीत:, (५) याज्ञवल्क्य:, (६) उशना, (७) अङ्गिरा: (अस्), (८) यम:, (९) आपस्तम्ब:, (१०) संवर्त:, (११) कात्यायन:, (१२) बृहस्पति:, (१३) पराशर:, (१४) व्यास:, (१५) खड्ग, (१६) लिखित:, (१७) दक्ष:, (१८) गौतम:, (१९) शतातप:, (२०) वशिष्ठ श्चैते विंशतिधर्मशास्त्रकारा:, तेष्वष्टादशैव प्रसिद्धधर्मशास्त्र (स्मृति) कारा: सन्ति, तेनाष्टादशस्मृतय एव ज्ञेया:।

पुराणपर्याया:—चिरन्तनम्, पञ्चलक्षणम्, पुराणम्, पुरातनम्, प्रतनम्, प्रत्नम्।

तल्लक्षणभेदा:—(१) सर्ग:, (२) प्रतिसर्ग:, (३) वंश:, (४) मन्वन्तराणि, (५) वंशानुचरितं, चैतत्पञ्चलक्षणात्मकं पुराणम्।

तदुक्तम्—

'सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।
वंशानुचरितं चेति पुराणं पञ्चलक्षण्', इति। श.चिं. १-१८४

पुराणनामनि—(१) मात्स्यम्, (२) मार्कण्डेयम्, (३) भाविष्यम्, (४) भागवतम्,

(५) ब्राह्मम्, (६) ब्राह्माण्डम्, (७) ब्राह्मवैवर्त्तम्, (८) वायव्यम्, (९) वामनीयम्, (१०) वैष्णवम्, (११) वाराहीयम्, (१२) आग्नेयम्, (१३) नारदीयम्, (१४) पाद्मम्, (१५) लैङ्गम्, (१६) गारुडम्, (१८) कौर्म्मम्, (१९) स्कान्दम्, चैतान्यष्टादश पुराणानि स्युः।

तदुक्तम्—

'मद्वयं' भद्वयं, चैव, ब्रत्रयं, वचतुष्टयम्।
अनापलिङ्गकूस्कानि पुराणानि पृथक् पृथक्। इति। श०चिं०१/१८४

विद्यापर्यायौ—विद्या, शास्त्रम्।

विद्याभेदाः—(१) आन्वीक्षिकी (अस्यामात्मविज्ञानम्), (२) त्रयी (अस्यां धर्माधर्मौ), (३) वार्ता (अस्यामर्थानर्थौ), (४) दण्डनीतिः (अस्यां नयानयौ चिन्त्यौ), चैते विद्यायाश्चत्वारो भेदाः स्युः।

तच्चतुर्दशभेदाः—(१) शिक्षा, (२) कल्पः, (३) व्याकरणम्, (४) छन्दः (अस्), (५) ज्योतिः (ष्), (६) निरुक्तिः, (७) ऋक् (च्), (८) यजुः, (ष्), (९) साम (अन्), (१०) अथर्व (अन्), (११) मीमांसा, (१२) आन्वीक्षिकी (तर्कविद्या, न्याय), (१३) धर्मशास्त्रम् (स्मृतिः), (१४) पुराणम्, चैताश्चतुर्दशविद्याः स्युः, (१५) आयुर्वेदः, (१६) धनुर्वेदः, (१७) गान्धर्वः, (१८) अर्थशास्त्रं, चैता अष्टादश विद्याः स्युः।

ग्रन्थपर्यायौ—ग्रन्थः, द्वात्रिंशदक्षरी।

महाकाव्यप०—महाकाव्यम्, सर्गबन्धः।

नाटकप०—नाटकम्, महारूपकम्, गद्यपद्यप्राकृतभाषामयो ग्रन्थः।

इतिहासप०—इतिहासः, पुरावृत्तम्, पूर्वचरितम्। पूर्ववृत्तप्रतिपादकव्यासादिप्रणीतो भारतादिग्रन्थः।

आख्यायिकाप०—आख्यायिका, उपलब्धार्था, उपलब्धार्थकथा, कादम्बरीवासवदत्तादयः।

आन्वीक्षिकीप०—आन्वीक्षिकी, तर्कविद्या, तर्कशास्त्रम्, न्यायः।

कामन्दकीयप०—कामन्दकीयम्, कौटिल्या (चाणक्या) र्थशास्त्रम्।

चम्पूप०—चम्पूः (स्त्री०), गद्यपद्यमयवाक्।

खण्डकथाप०—खण्डकथा, वाङ्मयप्रभेदः।

सन्दर्भप०—गुम्फः, ग्रन्थनम्, परिस्यन्दः, प्रतियत्नः, प्रबन्धः, रचना, श्रन्थनम्, सन्दर्भः।

पादप०—अंह्रिः, अंघ्रिः, क्रमः, क्रमणः, चरणः, चलनः, पत् (द्), पदः, पात् (द्) पादः।

हस्तप०—करः, करिः, किष्कुः, कुलिः, तलः, पञ्चशाखः, पाणिः, भुजदलः, भुजादलः, शमः, शयः, शलः, सलः, हस्तः।

बाहुप०—कुलिः (पुं०), दोः (स्) (पुं०न०), दोषा (स्त्री), प्रवेष्टः, बाहः, बाहा (स्त्री), बाहुः, बाहूः, (स्त्री०), भुजः, भुजा (स्त्री)।

नेत्रपर्यायाः—अक्षि (न्), अम्बकम्, ईक्षणम्, गौः (गो), चक्षुः, (ष्), ज्योतिः (इष्), तपनः, दर्शनम्, दर्शनेन्द्रियम्, देवदीपः, दैवदीपः, दृक् (श्), दृशा, दृशिः, दृशी, दृष्टिः, नयनम्, नेत्रम्, प्रेक्षणम्, रूपग्रहः, लोचनम्, विलोचनम्, वीक्षणम्।

कर्णपर्याया:—कर्ण:, ध्वनिग्रह:, पैञ्जूष:, महानाद:, शब्दग्रह:, शब्दाधिष्ठान:, श्रवणम्, श्रव: (स्), श्रवसम्, श्रुति: (स्त्री०), श्रोत: (स्), श्रोत्रम्।

नासिकापर्याया:—गन्धज्ञा, गन्धनाडी, गन्धनालिका, गन्धनाली, गन्धबन्धा, गन्धवहा, गन्धहत् (द्), घोणा, घ्राणम्, नकुटकम्, नक्रम्, नक्रा, नर्कुटकम्, नसा, नस्या, नासा, नासिका, नासिक्यम्, वक्र:, विकूणिका, विघूणिका, शिंघाणी, शिंघिणी, शिघिनी, सिंघिणी, सिंघिनी।

मुखपर्याया:—आननम्, मुखम्, वदनम्, शेषस्तु देवे।

ओष्ठपर्याया:—अधर:, अधरोष्ठ:, ओष्ठ:, ओष्ठा, छद:, दन्तच्छद:, दन्तच्छदन:, दन्तवस्त्रम्, दन्तवास: (अस्), दशनवास: (अस्), दशनोच्छिष्ट:, रदच्छद:, रदनच्छद:, रसालेपी (इन्), वाग्दल:।

दन्तपर्याया:—खरु:, खादन:, चर्वणसाधनास्थि, जम्भ:, दंश:, दंशक:, दत् (द्), दन्त:, दशन:, दालु:, द्विज:, भक्षमल्ल: मल्ल:-क:, मुखखुर:, रथ:, रद:, रदन:, रुचक:, वक्त्रखुर:।

जिह्वापर्याया:—अमृतवर्षिणी, काकु:, जिह्व:, जिह्वा, रशना, रसज्ञा, रसज्ञानेन्द्रियम्, रसन:, रसना, रसमाता (तृ), रसमातृका, रसला, रसा, रसाङ्का, रसाल:, रसाला, रसिका, रस्ना, ललना, लाला, सुधास्रवा।

रसपर्याया:—रस:, रसनाग्राह्यगुण:, मधुरादि:।

रसभेदा:—(१) मधुर:, (२) अम्ल:, (३) लवण:, (४) कटुक:, (५) तिक्त:, (६) कषाय—श्चेत्येते षड्रसा सन्ति।

कमलपर्याया:—अब्जम्, कमलम्, जलजम्, शेषस्तु रवौ।

आसनपर्याया:—आसनम्, उपवेशनाधार:, उपासनम्, पीठम्, पीठी, विष्टर:।

आसनभेदा:—(१) पद्मासनम्, (२) स्वस्तिकासनम्, (३) भद्रासनम्, (४) वज्रासनम्, (५) वीरासनं, चेत्यादयोऽन्यान्यप्यासनानि स्यु:।

नाभिपर्याया:—उदरावर्त्त:, तुन्दकूपिका, तुन्दकूपी, नाभि:—भी, पुतारिका, प्राण्यङ्गम्, सिरामूलम्।

गुणपर्यायौ—गुण:, सत्त्वादि:।

गुणभेदा:—(१) सत्त्वम्, (२) रज: (अस्) (न०), तम: (अस्) (न०), इत्येते सत्त्वादयस्त्रयो गुणा: सन्ति।

रजोगुणपर्यायौ—रज: (अस्) (न०), द्वितीयगुण:।

शरीरपर्याया:—तनु:, देह:, मूर्ति:, शरीरम्, शेषस्तु कुबेरे।

विश्वपर्याया:—अखिल:, कृत्स्न:, निखिल:, विश्व:, सकल:, समग्र:, समस्त:, सर्व:, शेषस्तु सर्वशब्दे।

रेत:पर्याया:—कारणम्, कार्यम्, रेत: (अस्) (न०)।

निवासपर्याया:—आगारम्, गृहम्, गेहम्, निवास:, शेषस्तु देवे।

हंसपर्याया:— कलकण्ठ:, क्षीराश:, चक्रपक्ष:, चक्राङ्क:, चक्राङ्ग:, जालपात् (द्),

जालपादकः, ज्येष्ठः, धवलपक्षः, धवलपक्षी (इन्), धोरणः, नीलाक्षः, परिप्लावी (इन्), पुरुदंशकः, प्रास्थितः, मरालः, मानसालयः, मानसौकाः (अस्), मौक्तिकाशनः, वक्राङ्गः, वरटः, शङ्कुः, श्वेतगरुत् (द्), श्वेतपक्षः, सङ्कुचितः, सरःकाकः, सितच्छदः, सितपक्षः, सूतिः।

हंसीप०—वरटा, वरला, वारटा, वारला, हंसी।

रथप०—रथः, शताङ्गः, स्यन्दनः।

वाहनप०—धोरणम्, पत्रम्, यानम्, युग्यम्, योग्यम्, वाहनम्, वाह्यम्, सांयात्रिकम्।

विष्णुपर्यायाः—अः, अच्युतः, अजः, अजितः, अद्रिधृत् (द्) अधोक्षजः, अनन्तः, अनन्तशायी (इन्), अपराजितः, अरिष्टनेमिः, अव्ययः असम्पुषः, अहिवैरिवाहः, आत्मयोनिः, आदिदेवः, आदिवराहः, इन्द्रावरजः, उच्चदेवः, उपेन्द्रः, ऋतधाम (अन्), एकशृङ्गः।

कपिलः, कविः, कामः, कालकुन्थः, कालनेम्यरिः, कुन्दः, कृष्णः, केशटः, केशवः, केंशी (इन्), कैटभजित् (द्), कैटभारिः, कोकः, कौस्तुभलक्ष्मकः, कौस्तुभवक्षाः (अस्), कौस्तुभोराः (अस्), गदाधरः, गदापाणिः, गदी (इन्), गरुडध्वजः, गोविन्दः।

चक्रपाणिः, चक्री (इन्), चतुर्भुजः, चतुष्पाणिः, जगन्नाथः, जनार्दनः, जलशायी (इन्), जह्नुः।

तमोहा (अन्), त्रिककुत् (द्), त्रिविक्रमः, दानवशत्रुः, दामोदरः, दाशार्हः, दैत्यशत्रुः दैत्यारिः, धरणीधरः, धराधरः, नरकान्तकः, नरकारातिः, नरकारिः, नरायणः, नलिनेशयः, नारायणः।

पद्मनाभः, पद्मनाभिः, पाञ्चजन्यधरः, पीताम्बरः, पुण्डरीकाक्षः, पुनर्वसुः, पुराणपुरुषः, पुरुषोत्तमः, पृश्निगर्भः, प्रपितामहः, बभ्रुः, बलिध्वंसी (इन्), बलिवैरी (इन्), ब्रह्मनाभः, मञ्जुकेशी (इन्), मधुरिपुः, मलः, माधवः, मासः, मुकुन्दः, मुरमर्दनः, मुररिपुः, मुरारिः।

यज्ञः, यज्ञपुरुषः, यज्ञपूरुषः, युगावर्तः, रन्तिदेवः, राहुभेदी (इन्), राहुमूर्धभित् (द्), राहुवैरी (इन्), लक्ष्मीनाथः, वनमाली (इन्), वामनः, वारिशयः, वारीशशायी (इन्), वासुः, वासुदेवः, वासुभद्रः, विधुः, विरञ्चनः, विरञ्चिः, विश्वक्सेनः, विश्वम्भरः, विश्वरूपः, विश्वेश्वरः, विषयी (इन्), विष्टरश्रवाः (अस्), विष्णुः, वृन्दाङ्कः, वृषशत्रुः, वृषाकपिः, वृष्णिः, वेधाः (अस्), वैकुण्ठः, वैजयन्तीधरः।

शतधामा (अन्), शतानन्दः, शतावर्तः, शम्भुः, शशबिन्दुः, शार्ङ्गधन्वा (अन्), शार्ङ्गपाणि, शार्ङ्गी (इन्), शिवकीर्त्तनः, श्रक्थः, श्रन्थः, श्रीकरः, श्रीदत्तः, श्रीधरः, श्रीनिवासः, श्रीपतिः, श्रीवत्सः, श्रीवत्सलाञ्छनः, श्रीवत्साङ्कः, श्रीवासः, श्रीशः, षड्बिन्दुः, सनातनः, सहस्रपादः, सुयामुनः, सुरारिहा (अन्), सुरोत्तमः, सुषेणः, सोमगर्भः, सौरिः, स्वभूः, स्वर्णबिन्दुः, हंसः, हरिः, हुणः, हृषीकेशः हेमशंखः, इति।

तदन्यानि यौगिकनामानि—अक्षजः, अधोमुखः, असंयुतः, अहिः, आसन्दः, उदारथिः, उरुक्रमः, उरुगायः, ऊर्ध्वकर्मा (अन्), एकदृक् (श्), एकपात् (द्), एकाङ्गः, कपिः, कालकुण्ठः, क्रतुपुरुषः, खण्डास्यः, गरुडगामी (इन्), चतुर्दंष्ट्रः, चतुर्व्यूहः, जन्मकीलः, जलेशयः, जितमन्युः, तमोघ्नः, तीर्थवादः, त्रिधामा (अन्), त्रिपात् (द्), दशावतारः,

द्वादशमूलः, द्विपदः, धन्वी (इन्), धर्मनाभः, धर्मनेमिः, धारः, नरकजित्, (द्), नव नवशक्तिः, नृसिंहः, नृसिंहवपुः (ष्), पद्मगर्भः, पद्महासः, परपुरुषः, पराक्रमः, पर पांशुजालिकः, पाण्डवाभीलः, पुण्यश्लोकः, पुष्पहासः, प्रपर्दनः, बलिन्दमः, बहुरूपः, बहु भद्रकपिलः, महाक्रमः, महातपाः (अस्), महामायः, महाहंसः, मानञ्जरः, यज्ञधरः, यज्ञ यमकीलः, यवनारिः, योगनिद्रालुः, रत्नबाहुः, लतापर्णः, लोकनाभः, लोहिताक्षः, व वर्द्धमानः, वरारोहः, वायुवाहनः, विधाता (तृ), विश्वभुक् (ज्), वृकोदरः, वृषोत्साहः, वैनतेयव शंखपाणिः, शतकः, शतवीरः, शद्रुः, शरुः, शलिकः, श्रवणः श्रीगर्भः, श्रीवराहः, षड (द्) सदायोगी (इन्), समितिञ्जयः, सरीसृपः, सहस्रजित् (द्), सात्वतः, सिन्धुवृषः, सु (अन्), सुभद्रः, सुवृषः, सूक्ष्मनाभः, सोमसिन्धुः, स्थिरः, हिरण्यकेशः, हिरण्यनाभः।

पुनस्तदन्यानि यौगिकनामानि—अरिष्टसूदनः, अरिष्टहा (अन्), कंसजित् (द्), कालने कालियदमनः, केशिसूदनः, केशिहा (अन्), चाणूरसूदनः, द्विविदारिः, धेनुकध्वंसी (इ धेनुकसूदनः, पूतनादूषणः, पुतनासूदनः, बलिबन्धनः, बाणजित् (द्), मधुमथनः, मैन्दम यमलाज्जुः, नभञ्जनः, राहुमूर्धहरः, शकटारिः, शिशुपालनिषूदनः, साल्वारिः हयग्रीवा हिरण्यकशिपुविदारणः।

विष्णुशत्रुनामानि—अरिष्टः, कंसः, कालनेमिः, कालियः, केशी (इन्), कैटभः, चा द्विविदः, धेनुकः, नरकः, पूतना, बलिः, बाणः, मधुः, मुरः, मैन्दः, यमलार्जुनौ, रा शकटः, शिशुपालः, साल्वः, हयग्रीवः, हिरण्यकशिपुः, रावणः, जरासन्धः, निशु मेरकः, तारकः, प्रह्लादः।

विष्णोरवतारभेदाः—(१) मत्यस्यः, (२) कूर्म्मः, (३) वराहः, (४) नृसिंहः, (वामनः, (६) परशुरामः, (७) रामः, (८) बलरामः, (९) बौद्धः, (१०) कल्किश्चैते वि (कृष्णस्य) दशावताराः सन्ति। 'कृष्णास्तु स्वयं भगवान्विष्णुअवतारः। तदुक्तं—

'वनजौ वनजौ खर्व-स्त्रिरामी सकृपोऽकृपः।
अवतारा दशैवैते 'कृष्णस्तु भगवान्' स्वयम्। राधाविनोदकाव्यटीकायाम् १/१२५
कृष्णस्तु भगवान् स्वयम् इति श्रीमद्भगवते च।

रामभेदाः—(१) परशुरामः, (जामदग्नेयः), (२) रामः (दाशरथिः), (३) बल (रौहिणेयः) चैते त्रयो रामाः स्युः।

विष्णोः शंखपर्यायः—पाञ्चजन्यः (अयं दक्षिणावर्तः)।

तच्चक्रपर्यायाः—सुदर्शनः।

तद्गदापर्यायाः—कौपोदकी, कौमोदकी, कौमोदी।

तद्धनुःपर्यायाः—शार्ङ्गम्।

तत्खड्गपर्यायाः—नन्दकः।

तत्करस्थमणिपर्यायाः—स्यमन्तकः।

तद्भुजमध्यस्थमणिपर्यायाः—कौस्तुभः।

तदङ्कपर्यायाः—श्रीवत्सः।

तद्ध्वजपर्यायाः—गरुडः, भुजङ्गहा (अन्)।

तन्मालाप०—वैजयन्ती।

तन्निवासप०—क्षीरसागरः।

तच्छय्या (शेष) प०—अनन्तः, आलुकः, गौरः, नागराजः, भूधरः, विष्णुशय्या, शेषः, सहस्रफणः, सहस्रवदनः, सितपङ्कजचिह्नः।

तत्पत्नी (लक्ष्मी) प०—अब्धिज, अम्बुजा, अश्वमाता (तृ), आ, इन्दिरा, ईः, कन्दर्पमाता (तृ), कमला, करीषिणी, कल्याणी, क्षीरसागरकन्यका, क्षीरसागरसुता, क्षीराब्धितनया, क्षीराब्धिपुत्री, क्षीराब्धिमानुषी, क्षीरोदतनया, क्षीरोदसुता, चञ्चला, चला, जलधिजा-ता, दुग्धाब्धितनया, नारायणी, नीरजा, नीरजनिकेतना, पद्मगृहा, पद्ममालिनी, पद्मलाञ्छना, पद्मवासाः (अस्), पद्मा, पद्मालया, पिङ्गला, पिल्पिला, भर्भरीः, भार्गवी, भृगुपुत्री, मङ्गला, मा, रमा, लक्ष्मीः, लोकजननी, लोकमाता (तृ), विल्वद्रुमगृहा, विष्णुपत्नी, विष्णुशक्तिः वृषाकपायी, शक्तिः, श्रीः, सा, हरिप्रिया, हरिवल्लभा।

इन्द्रप०—इन्द्रः, पुरन्दरः, शक्रः, शेषस्त्विन्द्रे।

अवरजप०—अनुजः, अवरजः, कनिष्ठः कनीयान् (ईयस्), कन्यसः, जघन्यजः, यविष्ठः, यवीयान् (ईयस्), लघुः।

वक्षःप०—उरः (अस्), क्रोडम्, क्रोडा, भुजान्तरम्, वक्षः (अस्), वत्सः, हृदयस्थानम्।

लक्ष्मकप०—कलङ्कम्, चिह्नम्, लक्ष्मकम्, शेषस्तु चन्द्रे।

गदाप०—गदा (स्त्री०) स्वनाम्ना प्रसिद्ध लोहमयं शस्त्रम्।

हस्तप०—पाणिः, हस्तः, शेषस्तु ब्रह्मणि।

ध्वजप०—केतनम्, केतुः, ध्वजः पताका, वैजयन्ती।

जलपर्यायाः—अङ्कुरम्, अन्धम्, आपः (प्) (स्त्री०ब०), अभ्रपुष्पम्, अमृतम्, अम्बु, अम्भः (अस्), अर्णः (अस्), आपः (अस्), इरा, उड्डुः, उड्डूः, उदम्, उदकम्, ऊर्जम्, ऋतम्, कतम्, कबन्धम्, कम् (अ०), कमन्धम्, कमलम्, कम्बलम्, कबुरम्, काण्डम्, कीलालम्, कुलीनसम्, कुशम्, कृपीटम्, कोमलम्, क्षणदम्, क्षरम्, क्षीरम्, गौः (गो), घनपदम्, घनपुष्पम्, घनरसः, घृतम्, चन्द्रोरसम्, चलम्, जडम्, जलम्, जलपीथम, जीवनम्, जीवनीयम्, तामरसम् तोयम्, दकम्, दहनारातिः, दहनारिः, दिव्यम्, दैव्यम्, धरुणम्, नराः (स्त्री०ब०) नलिनम्, नारम्, नाराः (स्त्री०ब०), निम्नगम्, नीरम्, पयः (अस्), पवित्रम्, पातालम्, पाथः (अस्), पानीयम्, पावनम्, पिप्पलम्, पीथम्, पुष्करम्, प्राणदम्, बन्धकम्, भुवनम्, मधु, मरुलम्, मलिनम्, मेघजम्, मेधपुष्पम्, मेघप्रसवम्, यादः (अस्), यादोगृहम्, यादोनिवासः, रसः, वनम्, वाजम्, वाः (र्), वारम्, वारि, वारुणम्, विषम्, व्योम (अन्), शंवम्, शंवरम्, शम्बरम्, शरम्, शिवम्, षड्रसम्, संवरम्, सदनम्, सम्बः, सम्बलम्, सरः (अस्), सरम्, सरिलम् सर्वतः (अस्) (अ०), सर्वतोमुखम्, सलम्, सलिलम्, सारम्, सुखम्, सेव्यम्, सोमम्, स्पन्दनम्।

शय्यापर्यायाः—तलिमम्, तल्पम्, शयनम्, शयनीयम्, शय्या, शायिका।

पीतपर्यायाः—पीतः, हरिद्राभः, शेषस्तु गुरौ।

वस्त्रपर्यायाः—अम्बरम्, वसनम्, वस्त्रम्, शेषस्तु रवौ।

श्वेतकमलपर्यायाः—पुण्डरीकम्, सिताम्भोजम्, शेषस्तु चन्द्रे।

अक्षिपर्यायाः—अक्षि (न्), नेत्रम्, शेषस्तु ब्रह्मणि।

वारीश (समुद्र) पर्यायाः—अकूपारः, अकूवारः, अपान्नाथः, अपांपः, अपां अपारः, अप्पतिः, अब्धिः, अम्बुधिः, अम्भोधिः, अम्भोनिधिः, अम्भोराशिः, अर्णवः, अवा इन्दुजनकः, उदधिः, उदन्वान् (मतु०), उर्वङ्गः, ऊर्मिकोशः, ऊर्मिमाली (इन्)।

कचङ्गलः, कधिः, कन्धिः, कीलालधिः, कूलङ्कषः, क्षीराब्धिः, क्षौणीप्राचीरम्।

चन्द्रजनकः, जलदः, जलधिः, जलनिधिः, जलपः, जलराशिः, जलेन्द्रः।

तरणिः, तरन्तः, तरिषः, तरीयः, तरीषः, तारिषः, तिमिः, तिमिकोषः—षः, तिमि (इन्), तोयनिधिः, दानवगृहः, दारदः, दैत्यगृहः, द्वीपवान् (मतु०), धरणिप्लवः, धरणि धुनिनाथः, धेनः, नदीकान्तः, नदीनः, नदीपतिः, नदीशः, नभसः, नित्यः, नीरधिः, नीर

पयोधिः, पयोनिधिः, पयोराशिः, पराकुवः, पलङ्कषः, पाथोधिः, पाथोनिधिः, पाथ पृथिवीप्लवः, पेरुः, प्राणभास्वान् (मतु०), मकराकरः, मकरालयः, मन्थिरः, महाक महाशयः, महीप्राचीरम्, महीप्रावरणम्, महीप्रावारः, महोदधिः, मितद्रुः।

यादईशः, यादः पतिः, यादसांपतिः, यादोनाथः, रत्नकोशः, रत्नराशिः, रत्ना लौहित्यः, वनमवाहः, वरुणावासः, वाङ्कः, वारान्निधिः, वारिधिः वारिनिधिः, वारिरा वारीशः, वार्धिः, वाहिनीपतिः, विततः, वीचिमाली (इन्)।

शैलगृहः, शैलशिविरम्, संवरः, समुद्रः, सरस्वान् (मतु०), सरितांपतिः, सरित्प सरिन्नाथः, सागरः, सिन्धुः, स्तम्भिः, स्तम्भी (इन्), स्त्रोत ईशः।

समुद्रभेदाः—(१) लवणसमुद्रः, (२) इक्षुस०, (३) सुरास०, (४) घृतस., (दधिस०, (६) दुग्धस०(७) जलस०चैते सप्तसमुद्राः सन्ति। तदन्यभेदास्तु ग्रन्थान्तरे द्रष्टव्

धनुःपर्यायाः—अस्त्रम्, आयुधाग्र्यम्, आसः, इष्वासः, काण्डम्, कार्मुकम्, कोदण्ड गुणी (इन्), चापः, तृणता, त्रिणता, द्रुणम्, धनु (न०), धनुः (पुं०स्त्री०), धनुः ((अस्त्री), धनूः (स्त्री०), धन्वम्, धन्व (अन्), शरारोपः, शरावापः, शरासनम्, शार्ङ्ग शेषः, सरासनम्, स्थावरम्।

इन्द्रियपर्यायाः—अक्षम्, इन्द्रियम्, करणंम्, खम्, ग्रहणम्, विषयस्त्रोतः (अस्), (न० विषयायी (इन्), विषययि (इन्) (न०), स्त्रोतः (अस्) (न०), हृषीकम्।

इन्द्रियभेदौ—(१) कर्मेन्द्रियम्, (२) ज्ञानेन्द्रियम्, चैताविन्द्रियस्य द्वौ भेदौ स्तः।

कर्म्मेन्द्रियपर्यायाः—कर्मेन्दियम्, कृत्येन्द्रियम्, क्रियेन्द्रियम्।

ज्ञानेन्द्रियपर्यायाः—ज्ञानेन्द्रियम्, धीन्द्रियम्, बुद्धिन्द्रियम्।

कर्मेन्द्रियभेदाः—(१) पायुः (गुदम्), (२) उपस्थम् (भगंलिंगं च), (३) करौ (हस्तौ), (४) पादौ (चरणौ), वाक् (च्) (वाणी), चेत्येते कर्मेन्द्रियस्य पञ्च प्रभेदाः स्युः।

कर्मेन्द्रियविषयभेदाः[१]—उत्सर्गः (विसर्गः, विण्मूत्रत्यागः), (२) आनन्दः (कामजसुखम्), (३) दानम् (वितरणम्), आदानं च (ग्रहणम्), (४) गतिः (गमनम्), (५) आलापः (वाक्यार्थकम्)।

ज्ञानेन्द्रियप्रभेदाः—(१) श्रोत्रे (कर्णौ), (२) त्वक् (च्) (त्वचा), (३) चक्षुषी (नेत्रे), (४) रसना (जिह्वा), (५) नासे (नासिके), चेत्येते ज्ञानेन्द्रियस्य पञ्चप्रभेदाः स्युः। [२]मनश्चेतिषड्धीन्द्रियाणि।

ज्ञानेन्द्रियविषयभेदाः—(१) शब्दः (शब्दग्रहणम्), (२) स्पर्शः (स्पर्शग्रहणम्), (३) रूपम् (रूपदर्शनम्), (४) रसः (रसग्रहणम्), (५) गन्धः (गन्धग्रहणम्), चेत्येते ज्ञानेन्द्रियस्य पञ्च विषयभेदाः स्युः।

इन्द्रियाधिष्ठातृदेवनामानि—(१) श्रोत्रयोः (दिशः), (२) त्वचः (वायुः), (३) चक्षुषोः (अर्कः), (४) जिह्वायाः (वरुणः), (५) नासिकयोः (अश्विनौ), एतानि पञ्च बुद्धीन्द्रियाधिष्ठातृदेवनामानि। (६) वाचः (अग्निः), (७) बाह्वोः (इन्द्रः), (८) पादयोः (विष्णुः), (९) गुदस्य (मित्रः), (१०) मेढ्रस्य (प्रजापतिः), एतानि पञ्च कर्मेन्द्रियाधिष्ठातृदेवनामानि। (११) मनसः (चन्द्रः) (उभयात्मकं मनः)।

विषयपर्यायाः—अर्थः, इन्द्रियार्थः, गोचरः, विषयः, शब्दस्पर्शरूपरसगन्धारव्यः।

विषयभेदाः—(१०) शब्दः, (२) स्पर्शः, (३) रूपम् (४) रसः, (५) गन्धः—श्चेत्येते विषयस्य गोचरस्येन्द्रियार्थस्य च पञ्च भेदाः स्युः। यथा—कर्णगोचरः। त्वग्गोचरः। दृग्गोचरः। वाग्गोचरः। घ्राणगोचर इत्यादयः।

भूतपर्यायाः—पृथिव्यादिः, भूतः, महाभूतः।

भूतभेदाः—(१) खम् (आकाशः), (२) कः (वायुः), (३) शिखी (अग्निः तेजो वा), (४) जलानि (आपः), (५) उर्वी (भूमिः)। 'ख-क-शिखि-जलो-व्यः' इति पञ्च महाभूतभेदाः।

भूतगुणभेदाः—(१) शब्दः, (२) स्पर्शः, (३) रूपम्, (४) रसः, (५) गन्धः। शब्दस्पर्श-रूप-रस-गन्धा-काशीदीनां मुख्यगुणाः स्युः।

क्षीर (दुग्ध) पर्यायाः—अमृतम्, ऊधस्यम्, कंतृणम्, क्षीरम्, गव्यम्, गोरसः, जीवनम्, जीवनीयम्, ज्येष्ठम्, दुग्धम्, ध्यामकम्, पयः (अस्), पीथम्, पीयूषम्, पुंसवनम्, प्रस्रवणम्, बालसात्म्यम्, मधु, मधुज्येष्ठम्, योग्यम्, रसायनसमाश्रयम्, रसोत्तमम्, वारिसात्म्यम्, सरम्, सोमजम्, सोमरसोद्भवम्, सौम्यम्, स्तन्यम्, स्वादु।

---

(१) पायूयस्थं पाणिपादौ वाक्चेतीन्द्रियसंग्रहः।
उत्सर्ग आनन्दादानगत्यालापाश्च तत् क्रिया इति।
(२) मनः कर्मस्तथानेत्रं रसना च त्वचा सह।
नासिका चेति षट् तानिधीन्द्रियाणि प्रचक्षते।। इति।।

धारोष्णपर्यायाः—अमृतम्।

सागरपर्यायाः—अब्धिः, समुद्रः, सागरः, शेषस्त्वत्रैव।

कन्यापर्यायाः—कन्यका, कन्या, तनया, सुता, शेषस्तु सरस्वत्याम्।

विष्णुपर्यायाः—विष्णुः, हरिः, शेस्त्वत्रैव।

पत्नीव०—पत्नी, भार्या, वधूः, शेषस्तु ब्रह्मणि।

कामदेवपर्यायाः—अङ्गजः, अङ्गजनुः (उष्), अनङ्गः, अनन्यजः, आत्मभूः, आत्मयो इः, इरजः, इराजः, कञ्जनः, कञ्जसूः, कन्तुः, कन्दर्पः, कमनः, कलाकेलिः, कामः, कामदे कुसुमधन्वा (अन्), कुसुमबाणः, कुसुमायुधः, कुसुमेषुः, चन्द्रसचिवः, चित्तोत्थः, चेतोभ चैत्रसखः, जराभीतः, जराभीरुः, दर्पकः, पञ्चबाणः, पञ्चशरः, पञ्चेषुः, पुष्पकेतनः, पुष्पचा पुष्पधनुः, पुष्पधन्वा (अन्), पुष्पध्वजः, पुष्पबाणः, पुष्पास्त्रः, पुष्पेषुः, प्रकर्षकः, प्रसूनाश प्रसूनासमः, बन्धुः, मथनः, मदनः, मधुदीपः, मधुपुष्पः, मधुसखः, मधुसारथिः, मधुसु (द्), मनःशयः, मनसिजः, मनसिशयः, मनोजः, मनोजनुः (उष्), मनोजन्मा (अन्), मनोर (इन्), मनोभवः, मनोयोनिः, मन्मथः, महोत्सवः, मापत्यम्, मारः, मुर्मुरः यौवनोद्भ रणरणकः, रतिपतिः, रतिप्रियः, रतिरमणः, रतिवरः, रमः, रवीषुः, रागरज्जुः, रूपास लक्ष्मीजः, लक्ष्मीजनुः (उष्), लक्ष्मीसुतः, वसन्तसखः, वामः, विधाता (तृ), विषमे विष्णुजनिः, शमान्तकः, शिखिमृत्युः, शृङ्गारजनुः (उष्), शृङ्गारजन्मा (अन्), शृङ्गारयो श्रीनन्दनः, संसारगुरुः, सङ्कल्पजन्मा (अन्), सङ्कल्पभवः, सङ्कल्पयोनिः, सर्वधन्वी (इ सुरतप्रियः, स्मरः, स्मृतिभूः स्वरोचिः (इष्), हृच्छयः।

कामपत्नीपर्यायाः—कामकला, कामपत्नी, केलिकला, केलिकलावती, कैलती, र रागलता, सेः।

कामपुत्रीभेदौ—(१) तृट् (ष्) (तृष्णा), (२) प्रीतिश्चैते कामस्य द्वे पुत्र्यौ स्याताम्।

कामपरिचारकभेदाः—(१) क्रोधः, (२) दम्भः, (३) मदः, (४) मोहः, (५) लोभ पञ्चकामस्य परिचारकभेदाः स्युः।

कामसायकभेदाः—(१) अरविन्दम् (२) अशोकम्, (३) चूतम्, (४) नवमल्लि (५) नीलोत्पलम्, चैते पञ्च कामसायकस्य भेदाः स्युः।

कामस्य पञ्चबाणनामानि—(१) मोहनः (सम्मोहनः), (२) उन्मादनः, (३) सन्ताप (तापनः), (४) शोषणः, (५) स्तम्भनः (मारणः, निश्चेष्टाकरणः, निश्चेष्टीकरणश्च), इत्थ कामस्य पञ्च बाणाः स्युः।

बाणपर्यायाः—अक्षः, अजिह्मगः, अस्त्रकण्टकः, आशुगः, इषुः, कङ्कपत्रः, कदम्ब कलम्बः, काण्डः, कादम्बः, खगः, खरुः, गार्ध्रपक्षः, चित्रपुंखः, तीरम्, तूणक्ष्वेडः, नाराच पत्रवाहः, पत्री (इन्), पृषत्कः, प्रक्ष्वेडनः, प्रदरः, बाणः, मर्मभेदनः, मर्मभेदी (इन्), मार्गण रोधः, रोपः, रापेणः, लक्षहा (अन्), लोहनालः, लोहमयबाणः, वाजः, वाजी (इन्), वार

विकर्षः—कः, विक्षेपः, विज्जालः, विपाट, विशिखः, वीरतरः, वीरशंकुः, शरः, शरुः, शायकः, शिलीमुखः, सरः, सायकः, स्थूलक्ष्वेडः, स्थूलदण्डः।

लोहबाणप०—अस्त्रसायकः, एषणः, काण्डगोचरः, नाराचः, प्रक्ष्वेडनः, प्रक्ष्वेदनः, प्रक्ष्वेलनः, प्रसनः, लोहनालः, सर्वलौहः।

कुसुम (पुष्प)प०—कुसुमम्, पुष्पम्, प्रसवः, प्रसूनम्, प्रसूनकम्, फुल्लम्, मणीचकम्, मणीवकम् सुमम्, सुमनः (अस्) (न०), सुमनसः, सूनम्।

धन्वप०—कार्मुकम्, चापः, धनुः, धन्व (अन्), शेषस्त्वत्रैव।

चित्तप०—अतिन्द्रियम्, अंतःकरणम्, उच्चलम्, उच्चलितम्, गूढपथम्, गूढपदम्, चित्तम्, चेतः (अस्) (न०), मनः (अस्) (न०), मानसम्, स्वान्तम्, हृत् (द्), हृदयम्।

चैत्रप०—चैत्रः, मधुः, शेषस्तु चैत्रमासे।

सखि (मित्र) प०—आक्रन्दः, आत्मीयः, आप्तः, इष्टः, निजः, पांशुलकः, प्रियः, मित्रम्, वयस्यः, सखा (खि), सरव्यम्, सद्रुचिः, सवयाः (अस्) (पुं०), सहचरः, सहायः, साप्तपदीनः—कः, सुहृत् (द्), स्निग्धः, स्नेह्यः, हितः।

उक्तं चास्य लक्षणम्

'अहिते प्रतिषेधश्च हिते चैव प्रवर्त्तनम्।
व्यसने प्रतिषेधश्च हिते चैव प्रवर्त्तनम्।
व्यसने चापरित्यागस्त्रिविधं सखि लक्षणम्।।
अपिच—सन्त्यागासहनो बन्धुः सदैवानुगतः सुहृत्।
एकक्रिया भवेन्मित्रं समप्राणः सखा भवेत्। इति। श०चिं १/६७९

शिखि (अग्नि) पर्यायाः—अग्नि, शिखी, शेषस्त्वग्नौ।

मृत्युप०—अन्तः, अत्ययः, अन्धकः, अमतः, अवसानम्, अस्तम्, कठमोषः, कालः, कालधर्मः, गमिः, दिष्टान्तः, दीर्घनिद्रा, नाशः, निधनम् (पुं०न०), निपातः, निमीलनम्, पञ्चता, पञ्चत्वम्, परलोकगमः, परलोकगमनम्, प्रलयः, प्राणवियोगः, भूमि-लाभः, मरणम्, मृतिः (स्त्री०), मृत्युः (पुं०स्त्री०), विलयः, संस्था।

रूपप०—मनोहराकृतिः, रूपम्, लावण्यम्, सुन्दरता, सौन्दर्य्यम्।

अस्त्रप०—अस्त्रम्, आयुधम्, प्रहरणम्, शस्त्रम्, हेतिः (स्त्री०)।

विष्णुवाहन (गरुड) प०—अमृताहरणः, अरुणावरजः, अहिभुक् (ज्), उन्नतीशः, उरगाशनः, उलूतीशः, कश्यपनन्दनः, कश्यपापत्यम्, कामायुः (उष्), काश्यपसुतः, काश्यपिः, खगेन्द्रः, खगेश्वरः, गरुडः, गरुत्मान् (मतु०), गरुडः, चिरात् (द्), तरस्वी (इन्), तार्क्ष्यः, तार्क्ष्यनायकः, नागशत्रुः, नागान्तकः, नागाशनः, पक्षिराट् (ज्), पक्षिसिंहः, पक्षिस्वामी (इन्), पन्नगारिः, पन्नगाशनः, पवनाशनाशः, पुष्करः, भुजगान्तकः, भुजगाशनः, महापक्षः, महावीरः, महावेगः, महेन्द्रजित् (द्), मायुः, रसायनः, वज्रतुण्डः, वज्रिजित् (द्), विनतातनयः विशालकः, विषापहः, विष्णुकेतुः, विष्णुरथः, विष्णुवाहनः, विष्णुविमानः, विहङ्गराजः, विहगाधिपः, वैनतेयः, शाल्मलिस्थः, शाल्मली (इन्), शिलाऽनीहः, शिलावासः, शिलौकाः

(अस्), सर्पारातिः, सुधाहरः, सुधाहारकः, सुधाहृत् (द्),सुवर्णः—कः, सुपर्णीतनयः, सुमुख: सुरेन्द्रजित् (द्), सौपर्णेयः, स्वर्णकायः, स्वर्णपक्षः, हरिवाहनः।

गरुडपत्नीप०—उन्नतिः, उलूती।

गरुडपुत्रप०—सुमुखः।

गरुडपितृप०—कश्यपः, मारीचः।

गरुडमातृप०—विनता, सुपर्णा, सुपर्णी।

पक्षिप०—अङ्गुः, अगौकाः (अस्), अण्डजः, अनेकजः, उत्पतः, ऊकः, कण्ठाग्नि कीकसमुखः, खगः, गरुत्मान् (मतु०), चञ्चुभृत् (द्), चञ्चुमान् (मतु०), छुरण्डः, तुं (इन्), द्युगः, द्विजः, नगौकाः (अस्), नभसङ्गपः, नभोगमः, नाडीचरणः, नीडजः, नीं (इन्), नीडोद्भवः, पक्षी (इन्), पतगः, पतङ्गः, पतत् (द्), पतत्रिः, पतत्री (इन्), पत्ररथ पत्रवाहः, पत्रवाहनः, पत्राङ्गी (इन्), पत्री (इन्), पिच्छन् (त्), पिपत्सन् (त्), पिपतिषन् (त्), पिपतिषुः, पीतुः, पुगः, प्लावी (इन्), भसन् (त्), मदनः, मदुरः, मलूकः, मशाकः रसनादः, रसनारदः, लोमकी (इन्), वशाकुः, वयाः, (अस्), वाजी (इन्), वातगामी (इन्) वारङ्कः, वारङ्गः, विः, विकिरः, विप्रुषः, विविष्किरः, विष्करः, विहगः, विहङ्गः, विहङ्गमः, विहायाः (अस्), वृक्षसद्मा (अन्), व्योमचारी (इन्), शकुनः, शकुनिः, शकुन्तः, शकुन्तिः, शरडः, शुकः, सरण्डः।

शाकुनिकपक्षिनामानि—(१) कपोतः, (२) काकः, (३) कुकुरः, (४) कुलालः, (५) खञ्जनः, (६) खरः, (७) गृध्रः, (८) चक्रवाकः (९) चटकः (१०) चाषः (११) भाण्डरीकः, (१२) भारद्वाजः, (१३) मयूरः, (१४) वगुलः, (१५) शशघ्नः, (१६) शुकः, (१७) श्यामा, (१८) श्येनकः, (१९) श्रीकर्णः, (२०) हारीतश्चैतानि शाकुनिकपक्षिणां नामानि।

पक्षपर्यायाः—गरुन् (त्), छदः, छदनम्, तनूरुहम्, पक्षः, पतत्रम्, पत्रम्, पिच्छम्, वाजः।

पक्षिकुलायप०—कुलायः, नीडम्, पञ्जरम्।

स्वामिप०—राट् (ज), राजा (अन्), स्वामी (इन्), शेषस्तु रवौ।

नागप०—काद्रवेयः, नागः, बहुफणसर्पः, मनुष्याकारकणालाङ्गूलयुक्तसर्पः।

नागराजप०—अनन्तः, नागराजः, शेषः, शेषस्त्विहैव।

नागपुरीप०—भोगवती।

नागभेदाः—(१) वासुकिः, (२) तक्षकः, (३) महापद्मः, (४) कालीयः, (५) कुलिकः, (६) कम्बलः, (७) बलाहकः, (८) अश्वतरश्चैते नागानामष्टौ भेदाः स्युः।

तन्नामान्तरभेदाः—(१) अनन्तः, (२) वासुकिः (सर्पराजः), (३) पद्मः, (४) महापद्मः, (५) तक्षकः, (६) कुलीरः, (७) कर्कटः, (८) शंख इत्येते नामान्तरेण नागानामष्टौ भेदाः स्युः।

तदन्ये भेदाः—(१) सुबुद्धः, (२) नन्दसारी (इन्), (३) कर्कोटकः, (४) पृथुश्रवाः (अस्), (५) वासुकिः, (६) तक्षकः, (७) कम्बल;, (८) अश्वतरः, (९) हेममाली (इन्), (१०) नरेन्द्रः, (११) वज्रदंष्ट्रः, (१२) विष, इत्येते नागानां द्वादशभेदाः स्युः।

नागलोकपर्यायाः—अधोभुवनम्, तलम्, नागलोकः, पातालम्, बलिवेश्म (अन्), बलिसद्म (अन्), रसा, रसातलम्, वडवामुखम्।

पातालभेदाः—(१) अतलम्, (२) वितलम्, (३) सुतलम् (नितलम्) (४) तलातलम् (गभस्तिमत्) (मतु०), (५) महातलम्,(६) रसातलम् (सुतलम्), (७) पातालम्, इत्येते पातालम्, इत्येते पातालस्य सप्त भेदाः स्युः।

नागमातृपर्यायाः—कद्रुः, कद्रूः, नागमाता (तृ)।

लोकप०—जगत्, जगती, पिष्टपम्, भुवनम्, लोकः, विश्वम्, विष्टपम्।

लोकभेदाः—(१) स्वर्लोकः, (२) मर्त्यलोकः, (३) पाताललोक, इत्येते लोकस्य त्रयो भेदाः स्युः।

तदन्यभेदाः—(१) भूर्लोकः (विषुवद्रेखा, (२) भुवर्लोकः, (३) स्वर्लोकः (आकाशः), (४) महर्लोकः, (५) जनलोकः, (६) तपोलोकः, (७) सत्यलोकः इत्येते लोकस्य सप्तभेदाः स्युः।

भुवनभेदाः—(१) अतलम्, (२) वितलम् (नितलम्), (३) सुतलम् (वितलम्), (४) तलातलम् (गभस्तिमत्), (५) महातलम् - (तलम्) (६) रसातलम् (सुतलम्) (७) पातालम् (८) भूः, (९) भुवः, (१०) स्वः, (११) महः (स्), (१२) जनः, (१३) तपः (स्) (१४) सत्यश्चेत्येते भुवनस्य चतुर्दशभेदाः स्युः।

तदुक्तमग्निपुराणे—

पातालानां च सप्तानां लोकानां च यदन्तरम्।
शुषिरं तानि कथ्यन्ते भुवनानि चतुर्दश।। इति।।

छिद्रवाचकशब्दाः—छिद्रम्, द्वारम्, रन्ध्रम्।

छिद्रभेदाः—(१) द्वे नेत्रे, (२) द्वे श्रवणे, (२) द्वे नासे, (१) मुखम्, (१) मेहनम्, (१) पायुश्चैतानि नवच्छिद्राणि स्युः।

पन्नग (सर्प) पर्यायाः—अनिलाशनः, अहिः, आशीर्विषः, आशीविषः, उरगः, उरङ्गः, उरङ्गमः, कञ्चुकी (इन्), कद्रुजः, कद्रूसुतः, काकोदरः, काद्रवेयः, कुण्डली (इन्), कुम्भीनसः, गूढपात् (द्), गूढपादः, गोकर्णः, चक्री (इन्), चक्षुःकर्णः, चक्षुःबश्रवाः (अस्), चिकुरः, जलरुण्डः, जिह्माः, जिह्मगः, दंष्ट्री (इन्), दन्दशूकः, दर्वीकरः, दर्वीधृत् (द्), दर्वीभृत् (द्), दीर्घजिह्वः, दीर्घपृष्ठः, दीघरसनः, दृक्कर्णः, दृक्श्रवाः (अस्), दृक्श्रुतिः, द्विजिह्वः, द्विरसनः, नाकुपद्मा (अन्), पन्नगः, पवनाशनः, पुष्करः, पृदाकुः, प्रचलाकी (इन्), फटी (इन्), फणकरः, फणधरः, पुणभृत् (द्), फणवान् (मतु०), फणाकरः, फणाधरः फणाभरः, फणाभृत् (द्), फणावान्, (मतु०), फणी (इन्), फुल्लरीकः, बिलवासी (इन्), बिलशयः, बिलशयनः, बिलेवासी (इन्), बिलेशयः, बिलौकाः (अस्), भुजगः, भुजङ्गः, भुजङ्गमः, भेकभुक् (ज्), भोगधरः, भोगभृत्(द्), भोगी (इन्), लतारसनः, लेलिहानः, वायुभक्षः, विषधरः, विषध्रः, विषायुधः, विषास्यः, व्याडः, व्यालः, व्याह्वः, श्वसनाशनः, श्वसनोत्सुकः, समकोलः, सरीसृपः, सर्पः, हरिः, हीरः।

अरि (शत्रु) पर्यायाः—अरिः, रिपुः, शत्रुः सपत्नः, शेषस्तु देवे।

स्वपर्णपर्यायाः—कनकम्, काञ्चनम्, सुवर्णम्, स्वर्णम्, हाटकम्, शेषस्तु देवे।

काय (शरीर) पर्यायाः—अङ्गम्, अवयवस्थानम्, अवष्टाङ्गम्, आङ्गम्, आत्मा (अन्), इन्द्रियायतनम्, करणम्, कलेवरम्, कायः, कुलम्, क्षेत्रम्, गात्रम्, घनः, चतुःशाखम्, जस्तम्, तनुः, तनुः (उष्), तनूः, दशरथः, देहः, पञ्जरः, पिण्डः, पुद्गलः, पुः (र्); पुरम्, पुरी (इन्), पौरम्, प्रजनुकः, प्रजानुकः, बन्धः, बलम्, बेरम्, भूः, भूघनः, भूतात्मा (अन्), मूर्तिः, मूर्तिमत् (मतु०), वपुः (उष्), वर्ष्म (अन्), विग्रहः, व्याधिमन्दिरम्, व्याधिस्थानम्, शकटम्, शरीरम्, शस्तम्, शितम्, षडङ्गम्—कम्, संहननम्, सञ्चरः, सिनम्, सूत्रशाखम्, स्कन्धः, स्थानकम्, स्वर्गलोकेशः।

विष्णुशक्तिभेदाः—(१) आचारा, (२) वैष्णवी, (३) सूक्ष्मा, (४) लक्ष्मीः, (५) पुष्टिः, (६) निरञ्जना, (७) जीवनी, (८) मोहनी, (९) माया, चैता विष्णोर्नवशक्तयः।

विष्णुपार्षदभेदाः—(१) कुमुदः, (२) कुमुदाक्षः, (३) गरुडः, (४) जयः, (५) जयन्तः, (६) नन्दः, (७) पुष्पदन्तः, (८) प्रबलः, (९) बलः, (१०) विजयः, (११) विष्वक्सेनः, (१२) श्रुतदेवः, (१३) सात्त्वतः, (१४) सुनन्दः, इत्यादयो विष्णोः पार्षदाः स्युः।

श्रीकृष्णपर्यायाः—अरिष्टहा (अन्), अर्जुनसखा, अर्जुनसारथिः, कंसजित् (द्), कंसरिपुः, कंसारातिः, कालियदमनः, कृष्णः, केशिहा (अन्), गदाग्रजः, गोकुलेशः, गोपालः—कः गोपीवल्लभः, गोपेन्द्रः, गोवर्द्धनधरः, चाणूरसूदनः, जयन्ताग्रजः, दामोदरः, दार्शार्हः, देवकीनन्दनः, दैवकेयः, द्वारकेश;, द्विविदारिः, धेनुकध्वंसी (इन्), नन्दनन्दनः, नन्दात्मजः, परमाण्वङ्गकः, पाण्डवायनः, पाण्डवाभीलः, पूतनादूषणः, पूतनासूदनः, पृश्निभद्रः, पृश्निशृङ्गः, बभ्रुः, बलानुजः, बाणजित् (द्), मथुरेशः, मार्जः, मुरलीधरः, मुरारिः, मैन्दमर्दनः, यमलार्जुनभञ्जनः, यादवः, यादवेन्द्रः, राधाकान्तः, राधारमणः, राधावल्लभः, रुक्मिणीप्रियः, लोहिताक्षः, वंशीधरः, वनमाली (इन्), वसुदेवभूः, वासुदेवः, वासुभद्रः, वृदावनेश्वरकः, व्रजकिशोरः, व्रजनाथः, व्रजमोहनः, व्रजवरः, व्रजवल्लभः, शकटारिः, शिशुपालनिषूदनः, शैलधरः, शौरिः, श्रीकृष्णः, श्रीकृष्णचन्द्रः, षडङ्गजित् (द्), षड्बिन्दुः, सव्यः, साल्वारिः, सुभद्रः, सौरिः, स्मरदेहकृत् (द्)।

श्रीकृष्णपितृपर्यायाः—आनकदुन्दभिः, कृष्णपिता (तृ), दिन्दुः, देवकीपतिः, भूकश्यपः, वसुदेवः, शौरिः, श्रीकृष्णजनकः।

श्रीकृष्णमातृपर्यायाः—क्षित्यदितिः, देवकसुता, देवकात्मजा, देवकी, दैवकी, वसुदेववधूः, श्रीकृष्णजननी।

पितृपर्यायाः—उत्पादकः, गुरुः, जनकः, जनयिता (तृ), जनिता (तृ), जनित्रः, जन्मकारकः, जन्मदः, जन्यः, तातः, देहकर्ता (तृ), पिता (तृ), प्रसविता (तृ), बप्पः, बीजी (इन्), रेतोधाः (अस्), वप्ता (प्तृ), वप्पः, वप्रः, सविता (तृ)।

मातृप०—अक्का, अम्बा, अम्बालिका, अम्बिका, जननिः—नी, जनयित्री, जनिः, जनित्री, जनी, जानी, प्रसूः, मधुमती, माता (आबन्तः), माता (तृ), शिफा, सावित्री।

राधाप०—राधा, राधिका, रासक्रीडेश्वरी, वृन्दावनेश्वरी, वृषभानुनन्दिनी, वृषभानुसुता, सुरभानुपौत्री।

रुक्मिणीप०—कुण्डिनपुरपतिकन्याः, प्रद्युम्नजननी, भीष्मकपुत्री, रुक्म्यनुजा, रुक्मिणी, विदर्भजा, विदर्भराजतनया, वैदर्भी।

श्रीकृष्णपत्नीभेदाः—(१) रुक्मिणी, (२) सत्यभामा, (३) जाम्बवती, (४) भद्रा, (५) लक्ष्मणा, (६) कालिन्दी, (७) मित्रविन्दा, (८) नग्नजितिश्चैताः श्रीकृष्णचन्द्रस्याष्टौ पत्न्यः स्युः

श्रीकृष्णभ्रातृ (बलदेव) पर्यायाः—अच्युताग्रजः, अनन्तः, एककुण्डलः, एकचरः, कामपालः, कालिन्दीकर्षणः,, कालिन्दीभेदनः, गुप्तचरः, गुप्तवरः, तालध्वजः, तालभृत् (द्), तालाङ्कः, द्विविदहन्ता (न्तृ), नीलवस्त्रः, नीलाम्बरः, पौरः, प्रलम्बघ्नः, प्रलम्बभित् (द्), प्रलापी (इन्), प्रियमधुः, फालः, बलः, बलदेवः, वलभद्रः, बलरामः, बली (इन्), भद्रचलनः, भद्राङ्गः, मधुप्रियः, मुष्टिकध्नः, मुशली (इन्), मुसली (इन्), यमुनाभित् (द्), यमुनाकर्षणः, रामः, रुक्मिदर्पः, रुक्मिदारणः, रुक्मिदारी (इन्), रुक्मिभित् (द्), रेवतीरमणंः, रेवतीशः रौहिणेयः, शेषाहिनामभृत् (द्), संवर्तकः, संवर्त्तकी (इन्), सङ्कर्षणः; सात्वतः सितासितः, सीरपाणिः, सीरी (इन्), सुरावल्लभः, सौनन्दी (इन्), हलधरः, हलभृत् (द्), हलायुधः, हली (इन्), हालः।

बलदेवमुशलपर्यायः—सौनन्दम्।

मुशलप०—अयोऽग्रम्, अयोनिः, मुशलः, मुषलः, मुसलः।

बलहलप०—संवर्तकः, संवर्तकाह्वयम्।

हलप०—गोदारणम्, लाङ्गलम्, सीरः, हलम्।

बलदेवमातृप०—बलदेवमाता (तृ), रामजननी, रोहिणी, वसुदेववधूः।

बलदेवपुत्रप०—शठः।

बलदेवपत्नीपः—रेवतात्मजा, रेवती, रोहिणीस्नुषा।

बलदेवभगिनीप०—नन्दनन्दिनी, नन्दपुत्री, नन्दा, नन्दात्मजा, नन्दिनी, नन्दी, बलदेवाग्रजा, यशोदात्मजा, विन्ध्यवासिनी, विन्ध्याचलनिवासिनी, शेषस्तूमायाम्।

भगिनीप०—जामिः, धामिः—मी, भगिनी, भग्निनी, सहोदरा-री, सोदरा, स्वसा (सृ)।

ज्येष्ठभगिनीप०—अग्रजा, अवन्ती, अम्बा, जामिः, ज्येष्ठा।

कनिभगिनीपर्यायाः—अनुजा, अम्बिका, अवरजा, कनियसी, कनिष्ठा, कन्यसा।

कालिन्दीप०—अर्कसुता, अर्कात्मजा, कलिन्दकन्या, कलिन्दतनया, कलिन्दपुत्री, कलिन्दशैलजा, कालिन्दी, तपनतनूजा, तपनी, तापी, दिवाकरात्मजा, यमनी, यमभगिनी, यमस्वसा (सृ), यमानुजा, यमी, यमुना, शमनस्वसा (सृ), श्यामा, सूर्यजा, सूर्यतनया, सूर्यसुता।

यमप०—कालः, यमः, शेषस्तु यमे।

मदिराप०—मदिरा, मद्यम्, सुरा, शेषस्तु वरुणे।

प्रियप०—प्रियः, वल्लभः।

नन्दप०—कृष्णतातः, गोपमुख्यः, नन्दः, यशोदाजानिः, वसुदवसखा, व्रजेश्वरः।

यशोदाप०—कृष्णजननी, नन्दपत्नी, यशोदा, विन्ध्यवासिनीमाता (तृ), व्रजेश्वरी।

गोपप०—आभीरः, गोधुक् (ह्), गोपः, गोपालः, गोसंख्यः, वल्लवः।

गोपीप०—गोपवध, गोपसुता, गोपाङ्गना, गोपालिका, गोपिका, गोपी, राधासखी, व्रजाङ्ना।

गोकुलप०—गोकुलम्, नन्दावासः, श्रीकृष्णनिवासग्रामः।

व्रजभूमिप०—व्रजभूः, व्रजमण्डलम्।

वृन्दावनपर्यायौ—वृन्दावनम्, श्रीकृष्णवासः।

श्रीकृष्णजन्मपुरी (मथुरा) प०—मथुरा, मथूरा, मधुपुरी, मधुरा, मधुवनम्, मधूपघ्नम्।

नृपपर्यायाः—अर्थपतिः, अवनीपतिः, इनः, इलेशः, क्षितिपः, क्ष्माभुक् (ज्), क्ष्माभृत् (द्); दण्डधरः, नरदेवः, नरपः, नरपतिः, नरपालः, नरेन्द्रः, नाभिः, नायकाधिपः, नृपः, नृपतिः, नृपालः, पार्थः, पार्थिवः, पृथिवीशक्रः, प्रजापः, प्रजापतिः, प्रजेश्वरः, भूपः, भूपतिः, भूपालः, भूभुक् (ज्), भूभृत् (त्), भूमिपः, भूमीन्द्रः, मध्यलोकेशः, महीक्षित् (द्), महीपः, महीपतिः, महीपालः, मूर्धाभिषिक्तः, मूर्धावसिक्तः, राट् (ज्), राजा (अन्), लोकपालः, स्कन्दः, स्कन्धः। उक्तं च हलायुधे—४२१

राजा राजन्यो राट् प्रजापतिः इति। श्लो० ४२१ अस्य टीकायां पृ० ५६४।

मथुरानृपप०—आहुकः, उग्रसेनः, कंसजनकः, कंसवतीतातः, देवकाग्रजः, देवकीपितृव्यः, श्रीकृष्णमातामहः।

नृपभेदाः—(१) मरुत्तः (आविक्षितः), (२) सुहो (हा) त्रः (आतिथिनः), (३) अङ्गः, (बृहद्रथः), (४) शिबिः (औशीनरः), (५) भरतः (दौष्यन्तिः), (६) रामः (दाशरथिः), (७) भगीरथः (गङ्गाजनकः), (८) दिलीपः (रघुजनकः), (९) मान्धाता (तृ) (यौवनाश्वः), (१०) ययातिः (नाहुषः), (११) अम्बरीषः (नाभागः), (१२) शशबिन्दुः (चैत्ररथः), (१३) गयः (आमूर्त्तरयसः), (१४) रन्तिदेवः (साङ्कृत्यः), (१५) सगरः (इक्ष्वाकुवंशजः), (१६) पृथुः (वैन्यः), इत्येते भारते षोडश महान्तो नृपतयः स्युः।

कंसपर्यायां—आहुकात्मजः, उग्रसेनसुतः, कंसः, कंसासोदरः, कृष्णमातुलः, जरासन्धजामाता (तृ)।

कंसाप०—आहुकतनुजा, उग्रसेनसुता, कंसभगिनी, कंसवती, कंसा, वसुदेवानुजपत्नी।

श्रीकृष्णनिवासपुरीप०—अब्धिनगरी, द्वारकः, द्वारका, द्वारकापुरी, द्वारवती, द्वारावती, द्वारिका, वनमालिनी।

श्रीकृष्णमालाभेदौ—(१) नन्दनमाला (२) वनमाला, चैते द्वे माले स्याताम्।

श्रीकृष्णमंत्रिपर्यायौ—उद्धवः, पवनव्याधिः।

श्रीकृष्णस्यन्दनप०—शतानन्दः।

श्रीकृष्णसखिप०—अर्जुनः, धनञ्जयः, पार्थः।

श्रीकृष्णसारथिभेदौ—(१) दारुकः, (२) सात्यकिः, चैतौ द्वौ सारथी स्याताम्।

सात्यकिपर्यायाः—पार्थशिष्यः, युयुधानः, शिनेर्नप्ता (प्तृ), सात्यकिः।

श्रीकृष्णहयभेदाः—(१) मेघपुष्पः, (२) वलाहकः, (३) शैव्यः (४) सुग्रीवश्चैते श्रीकृष्णरथस्य चत्वारोऽश्वाः स्युः।

प्रद्युम्नपर्यायाः—कार्ष्णिः, कृष्णजतुः (उष्), कृष्णजन्मा, झषकेतनः, झषध्वजः, प्रद्युम्नः, मकरकेतनः, मकरध्वजः, मकराङ्क-कः, मीनकेतनः, मीनकेतुः, मीनाङ्कः, रुक्मिणीनन्दनः, शंवरारिः, शम्बरसूदनः, शम्बरारिः, शूर्पकारातिः, शूर्पकारिः, श्रीकृष्णपुत्रः।

तत्पत्नीभेदौ—(१) रतिः, (२) रुक्मिपुत्री चैते द्वे भार्ये स्तः।

अनिरुद्धपर्यायाः—प्रनिरुद्धः, उषापतिः, उषारमणः, उषेशः, ऋश्यकेतुः, ऋष्यकेतनः, ऋष्यकेतुः, ऋष्याङ्कः, झषकेतुः, बाणारिः, ब्रह्मसूः, विश्वकेतुः।

तत्पत्नीप०—अनिरुद्धभार्या, उषा, ऊषा, चित्रलेखासखी, प्रद्युम्नस्नुषा, वाणासुरसुता, विन्ध्यावतीपौत्री।

शिवपर्यायाः—अकुतश्चनः, अक्षतः, अग्निलोचनः, अजः, अञ्जनः, अट्टहासः, अण्डैकलोचनः, अद्रिधन्वा (अन्), अन्धकरिपुः, अन्धकसूदनः, अपराजितः, अब्दवाहनः, अम्बरीषः, अर्द्धकालः, अर्द्धमकुटः, अव्ययः, अष्टमूर्तिः, असुरारिः, अस्थिधन्वा (अन्), अहिपर्य्यङ्कः, अहिबुध्नः, अहिंब्रध्नः, अहिर्बुध्न्यः, आशावासाः (अस्), ईशः, ईशानः, ईश्वरः, उः, उग्रः, उड्डीशः, उन्मत्तवेशः, उमापतिः, उलन्दकः, ऊर्ध्वरेताः (अस्), एकदृक् (श्), एकलिङ्गः।

कङ्कटीकः, कटप्रूः, कटमर्दः, कटाटङ्कः, कण्ठेकालः, कपर्दी (इन्), कपालभृत् (द्), कपाली (इन्), कपिशः, कामारिः, कालकण्ठः, कालञ्जरः, कूटकृत् (द्), कृतकरः, कृत्तिवासाः (अस्), कृशानुरेताः, केदारः, कोपवादी (इन्), कोलः, क्रतुध्वंसी (इन्), खट्वाङ्गी (इन्), खण्डपरशुः, खण्डपर्शुः, खरुः, गङ्गाधरः, गजदैत्यभित् (द्), गजारिः, गिरिशः, गिरीशः, गुडाकेशः, गुरुः, गुह्यः, गुह्यगुरुः, गोपतिः, गोपालः, घस्रः।

चन्दिलः, चन्द्रमौलिः, चन्द्रशेखरः, जगद्योनिः, जटाझाटः, जटाटीनः, जटाटीरः, जटावान् (मतु०), जयन्तः, जोटिङ्गः, झाण्डः, झिण्टिकान्तः, झोटिङ्गः, डिण्डीशः।

तमोहा (अन्), तरुणेन्दुशेखरः, त्रिपुरान्तकः, त्रिपुरारिः, त्रिलोचनः, त्र्यम्बकः, दक्षाध्वरारातिः, दशबाहुः, दशाव्ययः, दशोत्तमः, दिगम्बरः, दिग्वासाः (अस्), दिशांप्रियः, दिशांप्रियतमः, दृगायुद्धः, देवमणिः, धूमः, धूर्जटिः, धूर्त्तकूटः, ध्रुवः, नटराट् (ज्), नन्दिवर्द्धनः, नराधारः, नरास्थिमाली (इन्), नवशक्तिः, नाट्यप्रियः, नीलकण्ठः, नीलग्रीवः।

नीललोहितः, पञ्चमुखः, परमेश्वरः, पशुपतिः, पांशुचन्दनः, पिङ्गदृक् (श्), पिनाकी

(इन्), पुरद्विट् (ष्), प्रमथाधिपः, प्रहसः, बकः, बभ्रुः, बहुरूपः, बुद्धः, भगनेत्रान्तकः, भगाली (इन्), भद्राकः, भद्रेश्वरः, भरुः, भर्गः, भर्ग्यः, भवः, भालदृक् (श्), भाललाञ्छनः, भीमः, भीष्मः, भूतेशः, भूमिकायः, भैरवः, भोगः, भौतिकः, मः, मखरिपुः, मन्दरमणिः, महाकालः, महाङ्गीनः, महादेवः, महानटः, महानादः, महाम्बुकः, महाव्रतः, महाव्रती (इन्), महेशः, महेश्वरः, मिहिराणः, मृडः, मृत्युञ्जय;, योगी (इन्), रुद्रः, रुलन्दः, रेरिहाणः, रेवतः, लुलायवाहारिः, वरः, वरदः, वराकः, वर्वटः, वह्निरेताः (अस्), वामः, वामदेवः, वार्वाहवाहः, विरूपाक्षः, विशलाक्षः, विषान्तकः, विहायः, शिरोरुहः, वृद्धः, वृषकेतुः, वृषध्वजः, वृषपर्वा (अन्), वृषवाहनः, वृषाकपिः, व्योमकेशः, शङ्कुः, शम्भुः, शर्वः, शवरः, शशिभूषणः, शशिशेखरः, शायी (इन्), शितिकण्ठः, शिपिविष्टः, शिवः, शिवेशः, शिशिरः, शूली (इन्), शैलवासी (इन्), श्मशानसद्मा (अन्), श्रीकण्ठः, षाण्डः, सज्ञः, सन्ध्यानाटी (इन्), समुद्रवाहनः, सम्बरारिः, सर्वगः, सर्वज्ञः, सर्वतोमुखः, सिताङ्गः, सुप्रसादः, सुभगः, सुमहान् (त्), स्त्रीदेहार्द्धः, स्थाणुः, स्थालः, स्मरशासनः, स्मरहरः, स्वभूः, हः, हरः, हरिः, हिरण्यरेताः (अस्), हीरः, नटराजराजः।

तदन्ये पर्यायाः—अधीशः, अर्द्धनारीशः, कङ्कालमाली (इन्), काशीनाथः, कुलेश्वरः, कैलासनिकेतनः, खेचरः, तीव्रः, देवदेवः, धरणीश्वरः, नन्दीश्वरः, प्रियतमः, फणधरधरः, भीरुः, भीषणः, भूरिः, भृङ्गीशः, यमान्तकः, रसनायकः, शिविविष्टः, सिद्धदेवः, हररूपः, हिण्डी (इन्), हिमाद्रितनयापतिः।

शिवस्याष्टमूर्तिभेदाः—(१) सर्वः (क्षितिमूर्तिः), (२) भवः (जलमूर्तिः), (३) रुद्रः (अग्निमूर्तिः), (४) उग्रः (वायुमूर्तिः), (५) भीमः (आकाशमूर्ति), (६) पशुपतिः (यजमानमूर्तिः), (७) महादेवः (चन्द्रमूर्तिः), (८) ईशानः (सूर्यमूर्तिः), इत्येते शरभमूर्तेः शिवस्याष्टपादाः स्युः।

आशापर्यायाः—आशा, दिक्, दिशा शेषस्तु दिशि।

वासःप०—वस्त्रम्, वास (अस्), शेषस्तु रवौ।

कालप०—कालः, नीलः, श्यामः, शेषस्तु शनौ।

कण्ठप०—कण्ठः, गलः, निगरणः।

कृत्ति (चर्म) प०—अजिनम्, असृग्धरा, कृत्तिः, चर्म (अन्), छविः, छादनी, त्वक् (च्)।

गिरिप०—अद्रिः, गिरिः, पर्वतः, शेषस्तु देवे।

शिवगिरि (कैलास) प०—अष्टापदः, कैलासः, धनदावासः, रजताद्रिः, स्फुटिकाचलः, हराद्रिः, हिमवद्ध (द्व) सः।

ईशप०—ईशः, स्वामी, शेषस्तु रवौ।

रजतप०—इन्दुलोहम्-कम्, कलधौतम्, कुप्यम्, कुमदाह्वयम्, खर्जुरम्, खर्जूरम्, चन्द्रभीरुः, चन्द्रभूतिः, चन्द्रलोहम्—कम्, चन्द्रवपुः (उष्), चन्द्रहासम्, चन्द्राह्वयम्, जवीयसम्, तप्तरूपकम्, तारम्, त्रापुषम्, दुर्वर्णम्, कम्, धौतम्, भीरुकम्, महावसुः, महावसू, महाशुभ्रम्, यवीयसम्, रङ्गबीजम्, रजतम्, रश्मिजालम्, राजरङ्गम्, रुचिरम्, रूप्यम्, रौप्यम्, लोहराजकम्, वङ्गजी-

वनम्, वसु, वसुश्रष्ठम्, वाक्यलम्, शुभ्रम्, शोध्यम्, श्रष्ठम्, श्वेतम्-कंम्, सितम्, सुभीरु, सृप्रभीरु, सौधम्, सौम्यम्।

गुडाका (निद्रा) पर्यायाः—गुडाका, तन्द्रा, तन्द्रिःन्द्री, तामसी, नन्दीमुखी, निद्रा, प्रमीला, शयनम्, श्वासहेतिः (स्त्री), संलयः, संवेशः, स्वप्नम्, स्वापः।

अधिकनिद्राप०—सुखसुप्तिका, सुप्तम्, सुस्वापः,

जटाप०—जटा, सटा।

चन्द्रप०—इन्दुः, चन्द्रः, विधुः, शशी (इन्) शेषस्तु चन्द्रे।

शेखरप०—अवतंसः, आपीडः, उत्तंसः, वतंसः, शेखरः।

गङ्गाप०—अर्ध्यतीर्थः, अलकनन्दा, उग्रशेखरा, ऋषिकुल्या, कुमारसूः, खापगा, गङ्गका, गङ्गा, गङ्गाका, गङ्गिका, गान्दिनी, गान्धिनी, जह्नुकन्या, जह्नुतनया, जह्नुप्रजा, जह्नुसुता, जाह्नवी, ज्येष्ठा, तीर्थराजः, त्रिदशदीर्घिका, त्रिपथगा, त्रिमार्गगा, त्रिमार्गाः त्रिस्रोताः (अस्), त्र्यध्वगा, देवनदी, देवसिन्धुः, देवापगा, धर्म्मद्रवी, नन्दिनी, निर्जरनिम्नगा, पुण्या, भगीरथप्रजा, भवायना, भागीरथी, भीष्मजननी, भीष्मसूः, मन्दाकिनी, रुद्रशेखरा, विष्णुपदी, शिवशेखराः, शुभ्रा, शैलेन्द्रजा, समुद्रसुभगा, सरिद्वरा, सितसिन्धुः, सिद्धसिन्धुः, सिद्धापगा, सुधा, सुरदीर्घिका, सुरनदी, सुरनिम्नगा, सुरवृन्दवन्दितपदा, सुरसरित् (द्), सुरसरिद्वरा, सुरापगा, सुरालयगमा, स्वरपगा, स्वर्गवापी, स्वर्गसरिद्वरा, स्वर्ग्यपगा, स्वर्णदी, स्वर्धुनी, स्वर्वापी, स्वरपगा, हरशेखरा, हिमाद्रिसुता, हैमवती।

शिखाप०—केशपाशी, केशी, चूडा, शिखण्डिका, शिखा।

मौलि (मुकुट) प०—उष्णीषम्, किरीटम्, कोटीरम्, मकुटः, मुकुटम्, मौलिः।

जगत्प०—जगत्, भुवनम्, लोकः, शेषस्त्वत्रैव।

योनिप०—कारणम्, शेषस्त्वत्रैव।

शिवस्य दशाऽव्ययभेदाः—(१) ज्ञानम्, (२) वैराग्यम्, (३) ऐश्वर्यम्, (४) तपः (अस्), (५) सत्यम्, (६) क्षमा, (७) धृतिः, (८) स्रष्टृत्वम्, (९) आत्मसम्बन्धः, (१०) अधिष्ठातृत्वम् इत्येते शिवस्य दशाऽव्ययाः स्युः।

नरपर्यायाः—नरः, मनुजः, मानवः, शेषास्तु देवे।

अस्थिप०—अस्थि (न०), कर्करः, कीकसम्, कुल्यम्, देहधारकम्, भारद्वाजम्, मज्जकृत् (द्), मांसपित्तम्, मेदस्तेजः (अस्) (न०), मेदोजम्, श्वदयितम् सारः, हड्डम्।

मालिप०—मालावान् (मतु०), माली (इन्)।

नाट्यप०—तांडवम्, नटनम्, नर्तनम्, नाट्यम्, नृत्तम्, नृत्यम्, लास्यम्।

प्रिय०—प्रियः, वल्लभः, शेषस्त्वन्यत्र।

कालपर्यायाः—कालः, कृष्णः, नीलः, शेषस्तु शनौ

ग्रीवाप०—कन्धरा, ग्रीवा, धमनिः, शिरोधरा, शिरोधिः।

भालप०—अलिकम्, अलीकम्, गोधिः (स्त्री०)। भालम्, ललाटम्।

दृक्प०—अक्षि (न्), दृक् (श्), नयनम्, नेत्रम् शेषस्त्वन्यत्र।

लुलाय (महिष) प०—कासरः, महिषः, लुलायः शेषस्तु यमे।

वाहप०—यानम्, वाहः, वाहनम्, शेषस्तु ब्रह्मणि।

अरिप०—अरिः, रिपुः, शत्रुः, सपत्नः, शेषस्तु देवे।

शिवशत्रुभेदाः—(१) कामः, (२) अन्धकः, (३) यमः, (४) गजः, (५) पुरः (त्रिपुरः), (६) पूषा (अन्), (७) मखः इत्यादयः शिवस्य शत्रुभेदाः स्युः।

शिवजटापर्यायाः—कपर्दः, जटाजूटः, जटावन्धः।

शिवासनप०—खट्वाङ्गः, सुखंधुणः, सुखंसुणः।

शिवधनुःप०—अजकावम्, अजगवम्, अजगावम् अजीगवम्, आजगवम्, पिनाकम्, युग्यम्।

शिवशक्तिभेदाः—(१) वामा, (२) जेष्ठा, (३) शिवा, (४) रौद्री, (५) चित्तोन्मादकरी, (६) सुखा, (७) काली, (८) कलेवरा, (९) भूतदमनी, इत्येताः शिवस्य नव शक्तयः स्युः।

ब्राह्म्यादिसप्तमातृभेदाः—(१) ब्रह्मी, (२) माहेश्वरी, (३) कौमारी, (४) वैष्णवी, (५) वाराही, (६) इन्द्राणी (ऐन्द्री), (७) चामुण्डा (नारसिंह्नी), इत्येता ब्राह्म्याद्याः सप्तमातरः स्युः।

ऐश्वर्यपर्यायाः—ऐश्वर्यम्, भूतिः, विभूतिः।

ऐश्वर्य्य (सिद्धि) भेदाः—(१) अणिमा (अन्), (२) महिमा (अन्), (३) गरिम (अन्), (४) लघिमा (अन्), (५) प्राप्तिः (स्त्री०), (६) प्राकाम्यम्, (७) ईशित्वम्, (८) वशित्वम्, इत्येता अष्टसिद्धयः स्युः॥

शिवपारिषदपर्यायाः—गणः, परिषदः, पार्षदः, पार्षद्यः, प्रमथः।

शिवगणविशेषप०—कृतालकः, भेलकः, हेलकः।

शिवप्रतीहारप०—तण्डुः, ताण्डवतालिकः, तुण्डी (इन्), द्वाःस्थः, नन्दिः—कः, नन्दिकेश्वरः, नन्दिशः, नन्दी (इन्), नन्दीश्वरः।

शिवगणदेवता—कुष्माण्डः—कः, कूष्माण्डः—कः, केलकिलः, गणपतिप्रियः।

शिवद्वारपालविशेषप०—अस्थिविग्रहः, चर्मी (इन्), नाडीदेहः, नाडीविग्रहः, भृङ्गरिटः—टिः, भृङ्गरीटिः, भृङ्गी (इन्), महाकायः, महाकालः, महाभीमः, श्टङ्गी (इन्), लूनदोः (ष्), लूनबाहुः, शलः।

शरभरूपिशिवपर्यायौ—भैरवः, महाभैरवः।

वीरभद्रप०—देवाजः, वीरभद्रः, हीराजः।

शिववाहनप०—दक्षः, वृषः।

गोप०—अनड्वान् (डुह्), उक्षा (अन्), ऋषभः, ककुद्मान् (मतु०), गौः (गो), बलीवर्दः, भद्रः, वाडवेयः, वृषः-भः, शक्वरः, शाक्वरः, शाङ्करः, सौरभेयः।

गोभेदाः—ग्रन्थान्तरे द्रष्टव्याः।

पार्वतीपर्यायाः—अद्रिजा, अनन्ता, अपरुजा, अपर्णा, अमोघा, अम्बिका, अष्टादशभुजा, आर्या, इन्द्रभगिनी, इन्द्रस्वसा (सृ), ईश्वरा-री, उग्रचारिणी, उमा, एकपर्णा, एकपाटला,

एकानंशा, करालिका, कर्बुरी, कलापिनी, कान्तारवासिनी, कात्यायनी, कालङ्गमा, कालञ्जरी, कालदमनी, कालरात्री, कालायनी, काली, किराती, कुण्डा, कुन्द्रा, कुमारी, कुलदेवता, कुला, कुलेश्वरी, कुहावती, कृष्णपिङ्गला, कृष्णभगिनी, कृष्णस्वसा (सृ), कृष्णा, केशी, कैटभी, कोटवी, कोटिश्रीः, कौशिकी, क्षेमङ्करी, क्षेमा, गणनायिका, गदिनी, गान्धर्वी, गार्गी, गिरिजा, गोकुलोद्भवा, गोला, गौतमी, गौरी, घनाञ्जनी, चण्डिका, चण्डी, चारणा, जयन्ती, जया, जांगुली, जारी, तामसी, त्र्यम्बका, दक्षकन्या, दक्षजा, दर्दुरा, दाक्षायणी, दुर्गा, दृषद्वती, नकुला, नन्दपुत्री, नन्दयन्ती, नन्दा, नन्दिनी, नारायणी, निरञ्जना, निशुम्भमथनी, नीलवस्त्रा, परमब्रह्मचारिणी, परमेष्ठिनी, पार्वती, पितृगणा, पुरजाः (अस्), प्रकीर्णकेशी, प्रकूष्माण्डी, प्रगल्भा, प्रभा, बदरीवासा, बर्हिध्वजा, बलदेवभगिनी, बलदेबस्वसा (सृ), बहुपुत्री, बहुभुजा, बाभ्रवी, ब्रह्मचारिणी, भगवती, भद्रकाली, भवानी, भीमा, भूतनायिका, भ्रामरी, मन्दरवासिनी, मन्दरावासा, मलयवासिनी, महाकाली, महाजया, महादेवी, महानिशा, महामाया, महारात्री, महारौद्री, महाविद्या, महिषमथनी, मातृमाता (तृ), मानस्तोका, मृडानी, मेनकात्मजा, मेनाजा, मेनात्मजा, मैनाकभगिनी, मैनाकस्वसा (सृ), यमभगिनी, यमस्वसा (सृ), यादवी, योगिनी, रक्तदन्ती, रामभगिनी, रामस्वसा (सृ), रुद्राणी, रेवती, रौद्री, लम्बा, वरदा, वरा, वारालिका, वारुणी, विकचा, विकराला, विजया, विन्ध्यनिलया, विन्ध्यवासिनी, विन्ध्याचलनिवासिनी, विरजाः (अस्), विलङ्का, विशालाक्षी, शक्तिः, शण्डिली, शतमुखी, शर्वाणी, शाकम्भरी, शिखरवासिनी, शिवदूती, शिवा, शिवी, शुम्भमथनी, शूलधरा, शूलधृत्, (द्), शैला, शैलेयी, षष्ठी, सती, सर्वमङ्गला, सावित्री, सिंहयाना, सिंहरथा, सिंहवाहना, सिनीवाली, सुनन्दा, सौः, स्कन्दमाता (तृ), हासा, हिण्डी, हिमा, हीरी, हैमवती।

पार्वतीसखीभेदौ—(१) जया, (२) विजया, चैते, पार्वत्या द्वे सख्यौ स्याताम्।

पार्वतीवाहनपर्यायः—मनस्तालः। एष पार्वतीसिंहस्य नाम।

यानप०—यानम्, वाहनम्, शेषस्तु ब्रह्मणि।

सिंहपर्यायाः—अगौकाः, (अस्), इभारिः, कण्ठीरवः, करिदारकः, करिमाचलः, केशरी (इन्), केशी (इन्), केसरी (इन्), क्रव्यात् (द्), क्रव्यादः, गजमोचनः, गणेश्वरः, गन्धोष्णीषः, गर्जितासहः, चित्रकायः, तुल्यविक्रमः, दशमीस्थः, दीप्तः, दीप्तपिङ्गलः, दृप्तः, द्विरदान्तकः, नखरायुधः, नरवी (इन्), नगौकाः (अस्), नभःक्रान्तः, पञ्चनखः, पञ्चमुखः, पञ्चशिखः, पञ्चाननः, पञ्चास्यः पलङ्कषः, पारिन्द्रः, पारीन्द्रः, पुण्डरीकः, बली (इन्), बहुबलः, भीमविक्रमः, भीमविक्रान्तः, मरुत्प्लवः, महानादः, महावीरः, मानी (इन्), मृगदृष्टिः, मृगद्विट् (ष्), मृगपतिः, मृगराट् (ज्), मृगराजः, मृगरिपुः, मृगाधिपः, मृगारिः, मृगाशनः, मृगेन्द्रः, रक्तजिह्वः, लग्नौकाः, (अस्), वनराजः, विक्रमी (इन्), विक्रान्तः, व्यादीर्णास्यः, शार्दूलः, शूरः, शृङ्गोष्णीषः,

शैलाटः, श्वेतपिङ्गः, श्वेतपिङ्गलः सकृत्प्रजः सटाङ्कः, सिंहः, सुगन्धिः—कः, हरिः, हरितः, हर्य्यक्षः, हस्तिशत्रुः।

चामुण्डाप०—कपालिनी, कर्णमोटी, चण्डमुण्डा, चर्चिका, चर्चा, चर्ममुण्डा, चामुण्डा, भैरवी, महागन्धा, महाचण्डी, मार्जारकर्णिका।

गणेशप०—आखुगः, आखुयान, आखुरथः, एकदंष्ट्रः, एकदन्तः, एकरदः, गजवदनः, गजाननः, गजास्यः, गणपतिः, गणाधिपः, गणेशः, चतुर्भुजः, तुन्दिलः, त्रिधातुकः, द्विशरीरः, द्वैमातुरः, नागाननः, परशुधरः, परशुभृत् (द्), पर्शुपाणिः, पृश्निगर्भः, पृश्निशृङ्गः, प्रथमाधिपः, मूषवाहनः, मूषिकरथः, मोदकवल्लभः, लम्बजठरः, लम्बोदरः, वक्रपादः, वक्रभुजः, वक्रशुण्डः, विघ्ननायकः, विघ्ननाशकः, विघ्ननाशनः विघ्नराजः, विघ्नविनायकः, विघ्नहारी (इन्), विघ्नेशः, विघ्नेशानः, विघ्नेश्वरः, विनायकः, विषाणान्तः, शिवपुत्रः, सदामदः, सिन्दूरवल्लभः, हस्तिमल्लः, हस्तिमुखः, हस्तिराजः, हेरम्ब।

गजप०—अनेकपः, अन्तःस्वेदः, अन्तः स्वेदी (इन्), अप्रस्वेदः, असुरः, इभः, कजः, कटी (इन्), कपिः, कम्बुः, करटी (इन्), करिः, करी (इन्), करेणुः, कुञ्जरः, कुम्भी (इन्), कुषी (इन्) गजः, गम्भीरवेदी (इन्), गर्जः, जटी (इन्), जलकांक्षः, जलकांक्षी (इन्), जलकान्तः, जलाकांक्षः, जलाकांक्षी (इन्), दन्तावलः, दन्ती (इन्), दीर्घपवनः, दीर्घमारुतः, द्विदन्तः, द्विपः, द्विपायी (इन्), द्विरदः, द्विविषाणकः, ध्वजः, नागः, निर्झरः, निर्लूनः, पद्मी (इन्), पिचिलः, पिण्डपादः, पीलुः, पुष्करी (इन्), पेचकी (इन्), पेचिलः, मतङ्गः, मतङ्गजः, मदवृन्दः, महामदः, महामृगः, महाशयः, मातङ्गः, मृगः, रदी (इन्), राजिलः, राजीवः, लतारतः, लतालकः, वारणः, वाराङ्गः, विलोमजिह्वः, विलोमरसनः, वेतण्डः, व्यालः, शुण्डालः, शुण्डाली (इन्), शूर्पकर्णः, षष्टिहायनः, सामजः, सामयोनिः, सामोद्भवः, सिन्धुरः, सूचिकाधरः, सूर्पकर्णः, सूर्पश्रुतिः, स्तम्बेरमः, हस्ती (इन्)।

गजभेदाः—(१) ऐरावतः, (२) पुण्डीक इत्यादयो गजस्याष्टौ भेदाः स्युः। शेषस्तु दिग्वर्गे।

द्वैमातुरभेदौ—(१) दुर्गा, (२) चामुण्डा। इति।

अथवा—(१) दुर्गा, (२) हस्तिनी, चैते गणेशस्य द्वे मांतरौ स्याताम्।

मूषकपर्यायाः—आखुः, उन्दरः, उन्दुरः, उन्दुरुः, खनकः, मुषकः, मूषः—कः, मूषिकः, वज्रदशनः, वृषः, वृषलोचनः, सूच्यास्यः।

वाहनप०—यानम्, वाहनम्, शेषस्तु ब्रह्मणि।

मोदकप०—मोदकः, लड्डुकः।

वल्लभप०—प्रियः, वल्लभः।

लम्बप०—दीर्घः, लम्बः।

उदरप०—उदरम्, कुक्षिः, गर्भः, जठरम्, तुन्दम्, तुन्दिः (स्त्री०), पिचण्डः, मलुकः, रोमलताधारः।

स्कन्दप०—अग्निजन्मा (अन्), अग्निभूः, अग्निसुतः, उमासुतः, करवीरकः, कान्तः, कामजित् (द्), कामदः, कार्तिकेयः, कुक्कुटध्वजः, कुमारः, कृत्तिकासुतः, क्रौञ्चदारणः,

क्रौञ्चवैरी (इन्), क्रौञ्चीरातिः, क्रौञ्चारिः, गङ्गासुतः, गाङ्गेयः, गुहः, गौरीपुत्रः, गौरीसुतः, गौरेयः, चण्डः, जयन्तः, तारकजित् (द्), तारकवैरी (इन्), तारकान्तकः, तारकारिः, दिगम्बर; देवसेनापतिः, द्वादशबाहुकः, द्वादशाक्षः, नीलदंष्ट्रः, पवित्रः, पार्वतीनन्दनः, बर्हिणवाहनः, बालचर्य्यः, बालुलेयः, ब्रह्मगर्भः, ब्रह्मचारी (इन्), भूतेशः, मयूरकेतुः, मयूरथः, महातेजाः, (अस्) महासेनः, महिषार्दनः, महौजाः (अस्), मातृवत्सलः, रेवतीजः, वासुदेवप्रियः, विशाखः, विश्वामित्रप्रियः, वैजयन्तः, शक्तिजन्मा (अन्), शक्तिधरः, शक्तिपाणिः, शक्तिभृत् (द्), शरजः, शरजन्मा (अन्), शरभूः, शरवणाद्भवः, शिखिवाहनः, शिशुः, शीघ्रः, शुचिः, षडाननः, षण्मुखः, षष्ठीस्वामी, षाण्मातुरः, सिद्धसेनः, सुब्रह्मण्यः, सेनानीः (पुं०), स्कन्दः, स्वामी (इन्), स्वाहेयः।

तत्पत्नीप०—जयन्ती, देवसेना। शेषस्त्विन्द्रपुत्र्याम्।

तदस्त्रप०—शक्तिः (स्त्री०)।

तत्पृष्ठजप०—नैगमेषः, विशाखः, शाखः।

तद्वाहनप०—केकी (इन्), खिलखिल्लः, गरव्रतः, चन्द्रकी (इन्), चित्रपिङ्गलः, नगावासः, नीलकण्ठः, नृत्यप्रियः, बर्हिणः, बर्ही (इन्), बहुलग्रीवः, मयुकः, मयूरः, मरूकः, मार्जारकण्ठः, मेघनादानुलासकः, मेघसुहृत् (द्), शिखावलः, शिखी (इन्), शुक्लापाङ्गः, सर्पभुक् (ज्), स्थिरमदः।

तद्गणःप०—बालग्रहाः, पूतनाद्याः।

क्रौञ्चपर्वतपर्यायाः—कौञ्चः, क्रुञ्चः, क्रौञ्चः।

दारणप०—दारणम्, विदारणम्।

॥ इति बिहारप्रान्तसहरसामण्डलान्तर्गतदोरमाग्रामवास्तव्येन दैवज्ञचूडामणिश्रीसूर्यनारायणसूनुना डॉ० सुरकान्तझाख्येन ज्योतिर्विज्ञानशब्दकोषे देवसर्गः चतुर्दशः ॥१४॥

अथ दिग्सर्गः–१५

दिक्पर्यायाः—आशा, ककुप् (भ्), ककुभा, काष्ठा, गौः (गो), दिक् (श्), दिशा, दीर्णी, देववधूः, सरिः, हरित्, हरिता।

विदिक्प०—अपदिशम् (अ०), अवान्तरदिशा, उपदिक् (श्), प्रदिक् (श्), विदिक् (श्)।

दिग्भेदाः—(१) पूर्वा, (२) आग्नेयी, (३) दक्षिणा, (४) नैर्ऋती, (५) पश्चिमा, (६) वायवी, (७) उत्तरा, (८) ऐशानी, (९) ऊर्ध्वा, (१०) अधरा, चैते दिशां दशभेदाः स्युः।

पूर्वापर्यायाः—अपरेतरा, अमरेड्दिक्, उदयाचलावच्छिन्नदिक्, ऐन्द्री, पुरः (स्) (अ०), पूर्वा, पौरन्दरी, प्राक् (अ०), प्राङ् (त्रि०), प्राग्भागः, प्राची, मघोनी, मङ्गला, माघवती, सूर्योदया, हरिदिक् (श्)।

आग्नेयीप०—आग्नेयी, चराशा, वह्निदिक्। (श्)।

दक्षिणप०—अगस्त्यपूता, अपाक् (त्रि०), अवाक् (अ०), अवाङ् (त्रि०), अपाची, अवाची, उत्तरेतरा, दक्षिणदिक् (श्), दक्षिणा, यामी, याम्या, वैवस्वती, शमनी।

निर्ऋतीप०—अन्धकी, निर्ऋती, निर्ऋतीदिक्, नैर्ऋती, रक्षोदिक् (श्)।

पश्चिमाप॰—अपरा, अस्तचलावच्छिन्नदिक् (श्), चरमाद्र्ययवच्छिन्नदिक् (श्), पश्चिमा, पूर्वेतरा, प्रतीची, प्रत्यक् (त्रि॰), प्रत्यक् (अ॰), वरुणदिक् (श्), वरुणदेशः, वारुणी, सूर्यास्ता।

वायवीप॰—अनन्ता, मारुती, वायवी, वायव्या, वायुदिक् (श्)।

उत्तराप॰—अपाचीतरा अबाचीतरा, उत्तरा, उदक् (अ॰), उदङ् (पुं॰), उदीची, कौबेरी, दैवी, सप्तर्षिपूता।

ऐशानीप॰—अपराजिता, ईशानः, ईशानदिक् (श्), ऐशानी, त्रिनेत्रदिक् (श्), शार्वी, शालाक्षा, शिवाशा।

ऊर्ध्वाप॰—ऊपरिष्टाद्दिक् (श्), ऊर्ध्वा, ब्राह्मी।

अधराप॰—अधरा, अधस्ताद्दिक (श्), अधोदिक् (श्), नागी, नारकी।

दिग्भववस्तुप॰—दिग्भवम् (त्रि॰), दिश्यम् (त्रि॰)।

प्राग्भवप॰—प्राक् (अ॰), प्राङ् (त्रि॰), प्राचीनम् (त्रि॰), प्राग्भवः (त्रि॰)।

अपाग्भवप॰—अपाग् (त्रि॰), अपाग्भवः (त्रि॰), अपाचीनम् (त्रि॰), अपाच्यम् (त्रि॰), अवाङ् (त्रि॰), अवाचीनम् (त्रि॰)।

प्रत्यग्भवप॰—प्रत्यक् (अ॰), प्रत्यक् (त्रि॰), प्रत्यग्भवः (त्रि॰), प्रतीचीनम् (त्रि॰)।

उदग्भवपर्यायाः—उदक् (ञ्च्) (त्रि॰), उदग्भवः (त्रि॰) उदीचीनः (त्रि॰)।

तिर्यग्भवप॰—तिरश्चीनः (त्रि॰), तिर्यक् (ञ्च्) (त्रि॰), तिर्यग्भवः (त्रि॰)।

दिग्गजभेदाः—(१) ऐरावतः, (२) पुण्डरीकः (३) वामनः, (४) कुमुदः, (५) अञ्जनः, (६) पुष्पदन्तः, (७) सार्वभौमः, (८) सुप्रतीकः, इत्येतेऽष्टौ पूर्वतः क्रमाद् दिग्गजाः स्युः।

दिग्गजपत्नीभेदाः—(१) अभ्रमुः, (२) कपिला, (३) पिङ्गला, (४) अनुपमा, (५) ताम्रकर्णी, (६) शुभ्रदन्ती (शुभदन्ती), (७) अङ्गना, (८) अञ्जना (अञ्जनावती) इत्येता अष्टौ ऐरावततः क्रमतो दिग्गजपन्त्यः स्युः।

दिगीशग्रहभेदाः—(१) रविः, (२) शुक्रः, (३) भौमः, (४) राहुः, (५) शनिः, (६) चन्द्रः, (७) बुधः, (८) बृहस्पतिः, इत्येते पूर्वदिशः क्रमाद्दिगीशा ग्रहाः स्युः।

तदुक्तममरसिंहेन—

'रविः शुक्रो महीसूनुः स्वर्भानुर्भानुजो विधुः।
बुधो बृहस्पतिश्चेति दिशामीशास्तथा ग्रहाः। इति।

चन्द्रदिक्चारपर्यायाः—चन्द्रदिक्चारः, चन्द्रदिङ् निवासः, चन्द्राशाचारः, चन्द्राशावासः।

चन्द्रदिक्चारभेदाः—(१) मेष-सिंह-धनुर्भगतचन्द्रस्य प्राच्यां वासः। (२) वृष-कन्या-मकर-भगतचन्द्रस्यावाच्यां वासः। (३) मिथुन-तुला-कुम्भ राशिगतचन्द्रस्य प्रतीच्यां वासः। (४) कर्कवृश्चिक मीनभगतचन्द्रस्योदीच्यां वासः। इति।

ग्रन्थान्तरे—

'पूर्वेऽजसिंहचापेषु याम्ये स्त्रीमकरोक्षसु।
प्रतीच्यां मिथुनेजूके कुम्भे चन्द्रो वसेत्सदा।।

कर्काल्यन्त्येषु कौबेर्य्यां धनाप्त्यै सम्मुखे विधौ॥
धनहानिः पृष्ठचन्द्रे सम्पत्सुखं च दक्षिणे।
मरणं वामचन्द्रे स्यादीरितं गणकोत्तमैः इति॥

ग्रन्थान्तरे तु विशेषः—‘अजमुखहरिचापर्क्षादिचारक्रमेण भ्रमति हरिदिशातश्चन्द्रमाश्चाष्टदिक्षु। घनतिथिशशिनेत्रं लेशमेघश्रुतीन्दुखभुजतिथिघटीभिर्दक्षिणाग्रे शुभं स्यात्।

पू०	आ०	द०	नै०	प०	वा०	उ०	ई०
१७	१५	२१	१६	१७	१४	२०	१५

सर्वघट्यः, आसां योगो वा (१३५) घट्यः दक्षिणे सम्मुखे चन्द्रे यात्रादिकं शुभ भवेत्। इति।

घातचन्द्रभेदाः—एकः, पञ्च, नव, द्वौ, षट्, दिशः, त्रयः, सप्त, वेदाः, अष्टौ, रुद्राः, अर्काः, मेषभात् क्रमतो घातचन्द्राः स्युः।

तदुक्तं ग्रन्थान्तरेच—‘पृथ्वी पञ्च खगा युग्मौ षट् पंक्तिर्वह्नयोऽद्रयः।
युगा गजेशमार्तण्डा घातचन्द्रा हि मेषभादिति॥
तत्फलं तत्रैव—यात्रायां बन्धनं रोगे मृत्युर्भङ्गस्तु संगरे।
विधवा कन्यकोद्वाहे ज्ञेयं घातविधोः फलम्। इति।
अस्य परिहारोऽपि उक्तो ग्रन्थान्तरे—
‘तीर्थयात्राविवाहान्नप्राशनोपनयादिषु’। माङ्गल्यसर्वकार्येषु घातचन्द्रं न चिन्तयेत्॥ इति।

योगिनीदिक्चारपर्यायाः—योगिनीदिक् चारः, योगिनीदिङ्निवासः, योगिन्याशाचारः, योगिन्याशावासः, इति।

योगिनीदिक्चारभेदाः—प्रतिपदि, नवम्यां, च योगिन्यावासः प्राच्याम्। तृतीयायामेकादश्यां, चाग्निकोणे तद्वासः। पञ्चम्यां त्रयोदश्यां चावाच्यां तद्वासः। चतुर्थ्यां द्वादश्यां च निर्ऋतिकोणे तद्वासः। षष्ठ्यां, चतुर्दश्यां च प्रतीच्यां तद्वासः। सप्तम्यां, पूर्णिमायां, च वायुकोणे तद्वासः। द्वितीयायां, दशम्यां, चोदिच्यां तद्वासः। अष्टम्याममायां, चेशकोणे तद्वासः। इति।

तदुक्तं ग्रंथान्तरे—‘ब्रह्माणी संस्थिता पूर्वे प्रतिपन्नवमीतिथौ।
माहेश्वरी चोत्तरे च द्वितीयादशमीतिथौ॥
स्थिताऽऽग्नेये च कौमारी तृतीयैकादशीतिथौ।
नारायणी च नैर्ऋत्ये चतुर्थीद्वादशीतिथौ॥
पञ्चम्यां च त्रयोदश्यां वाराही दक्षिणे तथा।
षष्ठ्यां चैव त्रयोदश्यामिन्द्राणी पश्चिमे स्थिता॥
सप्तम्यां पौर्णिमास्यां च चामुण्डा वायुगोचरे।
अष्टाम्यमावास्ययोश्च महालक्ष्मीशगोचरे॥ इति।
तत्रैव तत्फलम्—‘योगिनी सम्मुखे नैव गमनादि प्रकारयेत्। इति।
अपि च—‘वामे शुभप्रदा पृष्ठे वाञ्छितार्थप्रदायिनी’।
दक्षिणे धनहंत्री च सम्मुखे मृत्युदायिनी॥’ इति।

दिक्शूलपर्यायाः—दिक्शूलम्, दिशाशूलम्, आशाशूलम् क्लीबे (दिग्विशेषगमने निषिद्धवाराः)।

तदुक्तं ग्रन्थान्तरे—'शुक्रादित्यदिने न वारुणदिशं, न ज्ञे कुजे चोत्तरां।
मन्देन्द्वोश्च दिने न शक्रककुभं, याम्यां गुरौ न व्रजेत्।
शूलानीति विलंघ्न यान्ति मनुजा ये वित्तलाभाशया
भ्रष्टाशाः पुनरापतन्ति यदि ते शक्रेण तुल्या अपि।। इति।

दिक्छूलभेदाः—(१) रविशुक्रयोवरि प्रतीच्यां शूलम्, (२) बुधभौमयोरुदीच्यां शूलम्, (३) शनिचन्द्रयोः प्राच्यां शूलम्, (४) जीवेऽवाच्यां शूलम्, यत्र दिशिशूलमस्ति तत्र न गच्छेत्।

विदिक्छूलभेदाः—(१) बुधमन्दयोर्वरि ईशानकोणे शूलम्, (२) जीवेन्द्वोरग्निकोणे शूलम्, (३) भौमवारे वायव्यां शूलम्, (४) रवौ शुक्रे च रक्षोदिशि शूलम्, यस्यां दिशिशूलं तत्र यात्रां वर्जयेत्।

अस्य परिहारोप्युक्तो ग्रन्थान्तरे—

पीत्वा घृतं रवौ, गच्छेत्पयश्चन्द्रे, कुजे, गुडम्।
बुधे तिलान्, गुरोर्वरि दधि, शुक्रे यवांस्तथा।।
भुक्त्वा माषान्नमर्कौ तु शूलदोषापनुत्तये। इति। हो०च० २६/३६/६७।

।। इति बिहारप्रान्तसहरसामण्डलान्तर्गतदोरमाग्रामवास्तव्येन दैवज्ञचूड़ामणिश्रीसूर्यनारायणसूनुना डॉ० सुरकान्तझाख्येन ज्योतिर्विज्ञानशब्दकोषे दिग्सर्गः पञ्चदशः ।।१५।।

अथ दिक्पालसर्गः—१६

दिक्पालभेदाः—(१) इन्द्रः, (२) अग्निः, (३) यमः, (४) नैर्ऋतः, (५) वरुणः, (६) वायुः, (७) कुबेरः, (८) ईशः इत्येते पूर्वदिशः क्रमादष्टौ दिक्पालाः स्युः।

तदुक्तममरसिंहेन—

इन्द्रो वह्निःपितृपतिर्नैर्ऋतो वरुणो मरुत्।
कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमादिति।।

इन्द्रपर्यायाः—अण्डीरः, अदितिपुत्रः, अद्रिद्विट् (ष्), अद्रिभित् (द्), अप्सरसांपतिः, अमरेट् (श्), अर्की (इन्), अर्हः, आखण्डलः, आतङ्कः, इन्द्रः, उग्रधन्वा (अन्), ऊर्ध्वधन्वा (अन्), ऋभुक्षा (अन्), ऋषभध्वजः, ऐरावतः, कारुः, किणालातः, कौटीरः, कौशिकः, खदिरः गोत्रभित् (द्), गौरावस्कन्दी (इन्), घनाघनः, चन्दिरः, चित्ररथः, जम्भभेदी (इन्), जम्भरिपुः, जयः, जिष्णुः, तपः, तपस्तक्षः, तुराषाट् (ह्), तुलः, त्रिलोकीराजः, दल्मी (इन्), दाल्मिः, दिवस्पतिः, दुश्च्यवनः, देवताधिपः, देवदुन्दुभिः, देवराजः, देवश्रेष्ठः, धाराङ्कुरः, नमुचिनिषूदनः, नमुचिसूदनः, नाकनाथः, परमन्युः, पर्जन्यः, पर्थज्ञः, पर्वतारिः, पाकनिषूदनः, पाकशासनः, पुरन्दरः, पुरुदंशाः (अस्), पुरुहूतः, पुलोमनिषूदनः, पुलोमशत्रुः, पुलोमारिः, पूतक्रतुः, पूर्वदिक्पतिः, पूर्वदिक्पालः, पृतनाषाट् (ह्), प्रयागः, प्राचीनबर्हिः, प्राचीपतिः, बलनिषूदनः, बलरिपुः, बलहा (न्), बलारातिः, बाणः, बाहुजज्ञः, बाहुदन्तेयः, बिडौजाः

(अस्), भूरिश्रवा: (अस्); मघवा (न्), मघवान् (मतु०), मरुत्वान् (मतु०), महेन्द्रः, माहिरः, मेघवाहनः, मेषाण्डः, यामनेमिः, युधिष्ठिरः, रावणः, लेखर्षभः, लोकपतिः, वज्रदक्षिणः, वज्रपाणिः, वज्री (इन्), वन्दीकः, व (वि) युनः, वारणः, वार्वाहवाहः, वासवः, वास्तोष्पतिः, विडौजः, विभीषणः, विश्वम्भरः, वृत्रः, वृत्रनिषूदनः, वृत्रहा (न्), वृत्रारिः, वृद्धश्रवा: (अस्), वृषा (न्), वैकुण्ठः, शक्रः, शचीपतिः, शतधृतिः, शतमन्युः, शयीचिः, शुनासीरः, शैलारिः, संक्रदनः, सहस्रनयनः, सहस्राक्षः, सितकुञ्जरः, सुत्रामा (न्), सुनाशीरः, सुनासीरः, सुरपतिः, सुराधिपः, सुरेश्वरः, सूत्रामा (न्), स्वाराट् (ज्), हरिः, हरिमान् (मतु०), हरिवाहनः, हरिहयः, हर्य्यश्वः।

इन्द्रभेदाः—(१) यज्ञः, (२) रोचनः, (३) सत्यजित् (द्), (४) चित्रशिखः, (५) विभुः, (६) मंत्रद्रुमः, (७) पुरन्दरः, (८) बलिः, (९) श्रुतः, (१०) शम्भुः, (११) वैधृतः, (१२) ऋतधामा (अन्), (१३) दिवस्पतिः, (१४) शुचिश्चैते चतुर्दश इन्द्राः स्युः।

इन्द्राणीपर्यायाः—इन्द्राणी, गन्धोली, चारुधारा, चारुरावा, जयवाहिनी, परिपूर्णसहस्रचन्द्रवती, पुमोजा, पुलोमतनया, पूतक्रतायी, पौलोमी, महेन्द्राणी, शक्राणी, शचिः, चीं, शतावरी, सचिः—ची।

जयन्तप०—इन्द्रपुत्रः, जयः, जयदत्तः, जयन्तः, पाकशासनिः, यागसन्तानः।

जयन्तीप०—इन्द्रपुत्री, गुहप्रिया, जयन्ती, तविषी, ताविषो, देवसेना।

इन्द्रपुरीप०—अमरा, अमरावती, इन्द्रपुरी, विश्वौकसारा, वृषभासा, सुदर्शनम्, सुदर्शना, सुदर्शनी, सुरपुरी।

इन्द्रप्रसादप०—वैजयन्तः।

इन्द्रध्वजप०—वैजयन्तः।

इन्द्रसारथिप०—इन्द्रसारथिः, मातलिः, शक्रसारथिः, हयङ्कषः।

इन्द्रहयप०—उच्चैःश्रवा: (अस्), देवाश्वः, वृषणश्वः, वृषणाश्वः, श्वेतहयः।

इन्द्रगजप०—अभ्रतागः, अभ्रमातङ्गः, अभ्रमुप्राणेश्वरः, अभ्रमुप्रियः, अभ्रमुवल्लभः, अभ्ररूपः, अरिमर्दनः, अर्कसोदरः, ऐरावणः, ऐरावतः, चतुर्दंष्ट्रः, चतुर्दन्तः, भद्ररेणुः, मदाम्बरः, राथन्तरिः श्वेतगजः, श्वेतद्विपः, सदादानः, सदामदः, सुदामा (अन्) सूर्यभ्राता (तृ), सूर्यसोदरः।

इन्द्रद्वाः स्थप०—देवनन्दी (इन्)।

इन्द्रक्रीडाभूप०—नन्दिका।

इन्द्रक्रीडासरःप०—नन्दिसरः (अस्), नन्दीसरः (अस्)।

इन्द्रवनप०—ऐन्द्रम्, कन्दसारम्—कम्, नन्दनम्, पारुष्यम्, मिश्रकावनम्, वृषण्वसु।

इन्द्रशान्तिकर्मकृत्प०—पुराजः।

इन्द्रधनुःप०—इन्द्रधनुः, इन्द्रायुधम्, देवायुधम्, शक्रधनुः, (उष्), शक्रशरासनम्।

तदुत्पातादिना अवक्रं सत्तत्पर्यायाः—रोहितम्।

वज्रप०—अक्षजम्, अभ्रोत्थम्, अम्बुजम्।

अशनिः—नी, आपोत्रम्, इन्द्रप्रहरणम्। कुलिशः (पुं०न०), कुलीशम्, गिरिकण्टकः, गिरिज्वरः, गौः (गो)। जम्भारिः, जाम्बविः। त्रिदशायुधम्, दम्भः, दम्भोलिः, पविः, भिदिरम्, भिदुः, भिदुरम्, भिद्रः, मेघभूतिः। वज्रः (पु०न०), वज्राशनिः, व्याधामः। शतकोटिः, शतधारम्—कम्, शतारम्, शंवः, शम्बः, सम्बः, स्वरुः (पुं०) स्वरुः (स्), ह्रादिनी (स्त्री०)।

वज्रध्वनिपर्यायाः—वज्रजनितशब्दः वज्रनिर्घोषः, वज्रनिष्पेषः, स्फूर्जथुः।

वज्राग्निप०—इरम्मदः, मेघज्योतिः (इष्), वज्राग्निः।

वज्रज्वालाप०—अतिभीः (स्त्री०)।

मेघप०—अन्नम्, अब्दः, अब्भ्रम्, अभ्रम्, अम्बुदः, अम्बुभृत् (द्), अम्बुवाहः अम्भोधरः, अम्भोभृत् (द्)। कदः, कन्धः, कन्धरः, कोशः, क्षरः, खतमालः, गगनध्वजः, गडयित्नुः, गडेरः, गदयित्नुः, गदामरः, गदाम्बरः,गवेडुः, गाडवः, घनः, घनाघनः। जलकरङ्कः, जलदः, जलधरः, जलभृत् (द्), जलमसिः, जलमुक् (च्), जलवाहः, जीमूतः। तटित्पत्तिः, तडित्वान् (मतु०), तोयदः, दर्दुरः, देवः, धाराधरः, धूमयोनिः, नदतुः, नभोगजः, नभोध्वजः, नभोहस्ती (इन्), नभ्राट् (ज्), नागः। पयोगर्भः, पयोधरः, पयोमुक् (च्), पर्जन्यः, पर्य्यन्यः, पाथोदः, पेचकः, बलाहकः, भेकः, मदयीत्नुः, मदाम्बरः, मुदिरः, मेघः। वनदः, वनमुक् (च्), वराहकः, वलाहकः, वातरथः, वायुदारुः, वारिदः, वारिधरः, वारिमसिः, वारिमुक् (च्), वारिवाहः, वारिवाहनः, वार्मसिः, वार्मुक् (च्)। शम्बरः, श्वेतनीलः, स्तनयित्नुः।

मेघभेदाः—(१) आवर्त्तः, (२) संवर्तः, (३) पुष्करः, (४) द्रोणः, इत्येते मेघस्य चत्वारो भेदाः स्युः।

तदन्यभेदाः—(१)आवर्त्तः, (२) संवर्त्तः, (३) पुष्करः, (४) द्रोणः, (५) कालः, (६) नीलः, (७) वरुणः, (८) वायुः, (९) तमः, इत्येते मेघस्य नवभेदाः स्युः।

पुनस्तदन्यभेदाः—ग्रन्थान्तरे द्रष्टव्याः।

विद्युत्प०—अचिरद्युतिः, अचिरप्रभा, अचिररोचिः (इष्), अणुप्रभा, अणुभा, अशनिः—नी, अस्थिरा, ऐरावती।

क्षणप्रभा, क्षणांशुः, क्षणिका।

चञ्चला, चटुला, चपला, चम्पा, चला, चिलमीलिका, चिलिमिली, जलदा, जलपालिका, जलवालिका।

तटित् (द्), तडित् (द्) दीप्ता, नीलाञ्जना, मेघप्रभा।

राधा, विद्युत् (द्), वीया, शतह्रदा, शतावर्ता, शम्पा, सम्पा, सर्जूः, सौदामनी, सौदामिनी, सौदाम्नी, हरिस्वसा (सृ), ह्रादिनी।

मेघमालाप०—कादम्बिनी, काली कृष्णनवाम्बुदः, मेघमाला, मेषश्रेणी, (नवोमेघः)।

वृष्टिप०—वर्षः, वर्षम्, वर्षणम्, वृष्टिः, (स्त्री०)।

वृष्टिनिरोधप०—अवग्रहः, अवग्राहः वग्रहः, वग्राहः।

अग्निप०—अगिरः, अग्निः, अग्निकोणपतिः, अग्निशुष्मा (अन्), अग्निहोत्रः, अञ्चतिः,

अदेवताडः, अनन्तः, अनलः, अनिलसखः, अपपारिकः, अपांपित्तम्, अप्पित्तम्, अरिणिः, अर्चिष्मान् (मतु०), आज्यभुक् (ज्), आशयाशः, आशिरः, आशुशुक्षणिः, आश्रयाशः, ईर्षिरः, उदर्चिः (इष्), उषर्बुधः, उषर्बुद् (ध्), ऊर्ध्वगतिः, एधतुः।

कः, कपिलः, कर्कः, कुतपः, कुषाकुः, कृपीटयोनिः, कृशानुः, कृष्णवर्त्मा (अन्), कृष्णार्चिः (इष्), घसुरिः, घासिः, घृतार्चिः (इष्)।

चक्रवाडः, चित्रभानुः, चिरिः, छागरथः, छागवाहनः, छिदिरः, जागृविः, जातवेदाः (अस्), जुहुराणः, जुहूवारः, जुहूवालः, ज्योतिः (इष्), ज्वलनः, ज्वालाजिह्वाः।

तनूनपात् (द्), तमोध्नः, तमोनुत् (द्), तमोवैरो (अन्), तुत्थः, तेजाः (अस्), त्रिधामा (अन्), दमुनाः (अस्), दमूनः, (अस्), दस्मः, दहनः, दीप्रः, दुरासदः, दूतः, द्युः, धनञ्जयः, धमनः, धिष्ण्यः, धूमकेतुः, धूमध्वजः, नाचिकेतः।

पचिः, पर्परीकः, पवनवाहनः, प्रविः, पशुपतिः, पाचनः, पावकः, पावनः, पिङ्गलः, पीथः, पृथुः, पृदाकुः, पृष्ठः, बभ्रबर्हिः, वर्हिः (इष्), बर्हिशुष्मा, (अन्), बर्हिरुत्कः, बर्हिरुत्थः, बर्हिज्योतिः, (इष्), बलिदीप्तः, बहलः, बहुलः, बृहद्भानुः, भरथः, भास्करः, भुजिः, भुवन्युः, भूमिकेतनः, मंत्रः, मंत्रजिह्वः, महावीरः।

यज्ञः, रक्तवर्णः, रोहिताश्वः, रोहिदश्वः, लोहिताश्वः, वञ्चतिः, वमिः, वसुः वसुरेताः (अस्), वह्निः, वातसख, वातसारथिः, वायुवाहनः, वायुसखः—खा, विभावसुः, विरोचनः, विश्वप्साः (आकारान्तः), वीतिहोत्रः, वृषाकपिः, वैश्वानरः।

शमीगर्भः, शिखावान् (मतु०), शिखी (इन्), शिवः, शुक्रः, शुचिः, शुचिपतिः, शुष्मः, शुष्मा (अन्), शोचिष्केशः, शोणः, श्रेष्ठः, सद्धिः, सप्तजिह्वः। सप्तदीधितिः, सप्तार्चिः (इष्), समन्तभुक (ज्), समित्पीथः, सर्वदेवमुखः, सहुरिः, साचिः, सुशिखः, सुशिराः (अस्), सृदाकुः, स्रुग्जिह्वः, स्वनिः, स्वर्णदीधितिः, स्वाहापतिः, हरः, हवः, हवनः, हविरशनः, हव्यः, हव्यभुक् (ज्), हव्यवाहः, हव्यवाहनः, हव्याशः, हव्याशनः, हिमारातिः, हिरण्यरेताः, (अस्), हुतभुक् (ज्), हुतवहः, हुताशः, हुताशनः, हौमिः।

अग्निभेदाः—(१) दक्षिणाग्निः (२) गार्हपत्यः, (३) आहवनीयः, इत्येतेऽग्नेस्त्रयो भेदाः स्युः।

एकयोक्त्यात्र्यग्निपर्यायः—त्रेता (स्त्री०)।

अग्निशिखापर्यायाः—अर्चिः, अर्चिः (ष्), (स्त्री०न०), कीला (पुं०स्त्री०), जिह्वा (स्त्री०), ज्वाला (पु०ं स्त्री०), शिखा (स्त्री०) हेतिः (स्त्री०)।

महाज्वालाप०—उलक्का, उल्का, झलका, नीलकः, प्रवर्ग्यः, महाज्वाला।

अग्निजिह्वाभेदाः—(१) काली (कपाली), (२) मनोजवा, (३) सुलोहिता, (४) सुधूम्रवर्णा (५) स्फुलिङ्गिनी, (६) विश्वरुचिः, (७) देवीलेलायमाना, इत्येता अग्नेर्जिह्वायाः, सप्तभेदाः स्युः।

तद्भेदाः मतान्तरे—(१) कराली (काली), (२) धूमिनी (कराली), (३) श्वेता (विस्फुलिङ्गिनी), (४) लोहिता (धुम्रवर्णा), (५) नीललोहिता (विश्वरुचिः), (६) सुवर्णा (लोहिता), (७) पद्मरागा (मनोजवा), इत्येता मतान्तरेऽग्नेः सप्तजिह्वाः स्युः।

अग्निपितृपर्यायः—धर्मः।

अग्निमातृप०—वसुः।

अग्निपत्नीप०—अग्निप्रिया, अग्नायी, दहनप्रिया, स्वाहा, हुतभुक्प्रिया।

अग्निपुत्रभेदाः—(१) पावकः, (२) पवमानः, (३) शुचिः, इत्येतेऽग्नेस्त्रयः पुत्राः स्युः।

अग्निकणपर्यायाः—अग्निकणः, अपुञ्जः, खङ्गाङ्गः, स्फुलिङ्गः।

अग्निसन्तापप०—खञ्ज्वरः, सन्तापः।

अग्निउल्काप०—अलातम्, अलातज्वाला, उल्का, उल्मुकम्, क्रमुकम्, (दीप्ताग्रं काष्ठम्)।

अङ्गारप०—अङ्गारः, प्रशान्तार्चिः (ष्)।

अग्निविट्प०—अग्निविट् (श्), इङ्गालः, कारिका, कोयला इति भाषा।

भस्मप०—क्षारः, भसितम्, भस्म (अन्), भूतिः, रक्षा, 'राख' इति भाषा।

अग्न्युत्पातपर्यायाः—अग्न्युपातः, अनलोत्पातः, उपाहितः।

स्थूलकाष्ठाग्निप०—स्कन्धाग्निः, मोटी लकड़ी की आग इति भाषा।

तृणाग्निप०—क्षामः, तरत्समः, तार्णः, समः। तिनके की आग इति भाषा।

तुषानलप०—कुकूलः, कूकलः, तुषानलः, मुर्मुरः। भूसे की आग इति भाषा।

करीशाग्निप०—छगणः, छागणः, छागलः। उपले की आग इति भाषा।

समुद्राग्निप०—अग्धिकुक्ष्यग्निः, और्वः, काकध्वजः, कुक्ष्यग्निः, जलेन्धनः, वडवानलः, वडवामुखः, वाडवः, वाडवानलः, संवर्तकः, समुद्रवह्निः, सलिलेन्धनः।

वनाग्निप०–दवः, दावः, दावाग्निः, दावानलः, दुध्रः, वनवह्निः, वनानलः, सहरक्षाः (अस्)।

ज्वराग्निप०—आधिमन्यवः।

मेघाग्निप०—इरम्मदः।

प्रेतदाहाग्निप०—क्रव्यात् (द्), क्रव्यादः, चिताग्निः।

मृतकाग्निप०—सव्यः।

सूतकाग्निप०—अपसव्यः।

पित्रग्निप०—कव्यवाहनः।

देवाग्निप०—हव्यवाहनः।

दैत्याग्निप०—सहरक्षाः (अस्)।

यज्ञाग्निप०—अपोनपात् (द्)।

क्रत्वग्निप०—अपान्नपात् (द्)

वर्त्महोमाग्निप०—पथिकृत् (त्)।

पदहोमाग्निप०—अनीकवान् (मतु०)।

आधानाद्यग्निप०—अहस्तातः।

यूपकर्माग्निप०—सुरभिः।

ब्रह्मौदनाग्निप०—भरतः।

सवनाहुतिप०—यविष्ठः।

विवाहाग्निप०—महिमान् (मतु०)।

वैश्वदेवाग्निप०—अद्भुतः।

व्रतान्ताग्निप०—बहुरन्ननादः।

पाकयज्ञिकवह्निप०—सुलभः।

अध्वरे दक्षिणाग्निप०—अन्वाहार्यपचनः, शुक्रः।

पश्चिमेऽग्निप०—गार्हपत्यः, गृहपतिः, पवमानः।

पूर्वेऽग्निप०—आहवनीयः, शंस्यः, हव्यवाहनः।

लौकिकाग्निप०—आवसथ्यः, सभ्यः।

धूमपर्यायाः—अग्निवाहः, अम्भःसूः, करमालः, जीमूतवाही (इन्), दहनकेतनम्, धूमः, वायुवाहः, स्तरीः (स्त्री०)।

गन्धवासितधूमप०—धूपः।

काष्ठप०—काष्ठम्, दलिकम्, दारु।

समित्प०—इन्धनम्, इध्मम्, एधः, एधः (अस्), तर्पणम्, समित् (ध) (स्त्री०)। समिद्भेदा ग्रन्थान्तरेद्रष्टव्याः।

होमप०—आहुतिः, देवयज्ञः, वषट्कारः, हवनम्, होत्रम्, होमः।

होमकुण्डप०—हवित्री, होमकुण्डम्।

धान्यभेदाः—(१) यवाः, (२) गोधूमाः, (३) तिलाः, (४) कङ्गवः, (५) मुद्गकाः, (६) श्यामाकाः, (७) चणकाः, इत्येते धान्यानां सप्त भेदाः स्युः।

हव्यान्नप०—चरुः, हव्यपाकः, हव्यान्नम्।

धाय्याप०—धाय्या, सामेधेनी, अग्निसमिन्धने समित्प्रक्षेपणवह्निज्वलने या ऋक्प्रयुज्यते सा 'धाय्या' सामधेनी च।

अग्निवाहन (छाग) प०—अजः, छगः, छगलः, छागः, तुभः, पशुः, बस्तः, शुभः, स्तभः, स्तुभः।

अजाप०—अजा, गलस्तनी, छागिका, छागी, मञ्ञा, सर्वभक्षा।

यमप०—अन्तकः, अर्कपुत्रः, अर्कसूनुः, उर्मिलापतिः, औडम्बरः, औदुम्बरः, कङ्कः, कर्मकरः, कालः, कालकुन्थः, कालकूटः, कालिन्दीसोदरः, कीनाशः, कृतान्तः, चित्रगुप्तः, जीवितेशः, दक्षिणदिक्पालः, दक्षिणाधिपः, दक्षिणाशापतिः, दण्डः, दण्डधरः, दण्डधारः, दण्डयामः, दघ्नः धर्मः, धर्मराजः, धर्मराट्, धूमोर्णापतिः, प (पा) र्परः, पितृपतिः, पीयुः, पुराणान्तः, प्रेतपतिः, प्रेतराट् (ज्), भीमशासनः, मन्दः, महासत्य;, महिषध्वजः, महिषवाहनः, मृत्युः, यमः, यमनः यमराजः, यमराट्, यमुनाग्रजः, यमुनाभ्राता (तृ), लुलायवाहः, विशीर्णपात् (द्), विश्वप्साः (आकारान्तः), वैवस्वतः शमनः, शीर्णपादः, शीर्णाङ्घ्रिः, शीर्णाह्रिः, श्राद्धदेवः, समवर्ती (इन्), सावित्रेयः सूरसूः, हरिः, हर्षणः।

यमपत्नीप०—उर्मिला, धूमोर्णा, विजया।

यमपुरीप०—यमपुरी, संयमनी।

यमलेखकप०—चित्रगुप्तः।

यमप्रतीहारप०—वैध्यतः।

यमविचारभूप०—कालीची, कालीमी।

यमपञ्जिकाप०—अग्रसन्धानी, पञ्जिका।

यमदूतप०—कीलालपः, क्षपाटः, खसात्मजः नरविष्वणः, नृचक्षाः (अस्), पलाशः, पलाशी (इन्), रात्रिमटः, विखुरः, शङ्कुः, शमनीषदः, सन्ध्याबलः, हनूषः।

यमदासनामनी—(१) चण्डः, (२) महाचण्डः, इत्येतौ यमस्य द्वौ दासौ स्याताम्।

मृत्युपर्यायाः—अन्तः, कालः, नाशः निधनम्, मरणम्, मृतिः, मृत्युः, शेषस्तु कामदेवे।

यमवाहन (महिष) प०—कटाहः, कलुषः, कासरः, कृष्णशृङ्गः, गद्गदस्वरः, जरन्तः, दंशभीरुकः, धीरस्कन्धः, पिङ्गः, महः, महिषः, यमरथः, यमवाहनः, रक्ताक्षः, रजस्वलः, लालिकः, लुलापः, लुलायः, वाहद्विट् (ष्), वाहरिपुः, सैरिभः, स्कन्धशृङ्गः, हंसकालीतनयः, हेरम्बः।

महिषीप०—कलुषा, काली, पयस्विनी, मन्दगमना, महाक्षीरा, महिषी, सैरिभी, हंसकाली।

निर्ऋतकोणदिक्पालप०—निर्ऋतिः (पुं०), नैर्ऋतः (पुं०), नैऋती (स्त्री०), नैर्ऋतकोण-नैर्ऋत दिक्पालः कोणाधिपतिः, पश्चिमदक्षिणकोणपालः, अवाचीप्रतीचीमध्यदिगीशः।

अलक्ष्मीप०—अलक्ष्मीः, ज्येष्ठा, निर्ऋतिः (स्त्रियाम्)।

राक्षसप०—अनुषः, अललोहितः, असृक्पः, अश्रपः, अस्रपः, आशरः, आशारः, आशिरः, आसरः, उद्धरः उद्वरः, कखासुतः, कटप्रूः, कर्बरः कर्बुरः, कर्बूरः, कल्माषः कषापुत्रः, कीनाशः, कीलालपः, कीलालपाः, कुणपः, कैकंसेयः, कोणपः, कौणपः, क्रव्यात् (द्), क्रव्यादः, क्षपाटः, खसात्मजः, खसापुत्रः, जललोहितः, जातुधानः—कः, त्रिशिराः (अस्) नक्तञ्चरः, नरविष्कणः, नरविष्वणः, निकषात्मजः निकसात्मजः, नीलाम्बरः, नृचक्षाः (अस्), नैकषेयः, नैकसेयः, नैर्ऋतः, पलप्रियः, पलादः—नः, पलाशः—शी (इन्), पिशिताशनः, पुण्यजनः, पुरुषादः, पैशाचः प्रवाहिकः, भूतः, रक्तग्रहः, रक्तग्रीवः, रक्षः (अस्) (न०), रजनीचरः, रतविष्वणः, राक्षसः, रात्रिचरः, रात्रिञ्चरः, रात्रिमटः, विखुरः, विथुरः, विधुरः, शङ्कुः, शमनीषदः, सन्ध्याबलः, समितीपदः, स्तब्धसम्भारः, हनुषः हनूषः।

रक्षःपुरीपर्यायाः—निरक्षदेशः, पलभाशून्यस्थानम्, रक्षः पुरी, राक्षसीपुरी, रावणराजधानी, लङ्का (इयं कुमध्यगा), व्यक्षदेशः, अधुना 'सिलोन' इति नाम्ना प्रसिद्धो देशः।

रक्षःपितृप०—निर्ऋतिः (पुं०)।

रक्षोमातृप०—निकखा, निकषा, निकसा, निर्ऋती, नैकषेयी, नैकसेयी।

पिशाचप०—अनृजुः, कापिशेयः, कापीशेयः, दर्वः, पिङ्गकः, पिण्डकः, पिशाचः।

शरीरस्थधातुभेदाः—(१) रसः, (२) असृक् (ज्), (३) मांसम, (४) मेदः (स्), (५) अस्थि, (६) मज्जा, (७) शुक्रम् इत्येते शरीरस्थाः सप्तधातवः स्युः। (१) रोम (न्), (२) त्वक् (च्), (३) स्नायुश्चैभिः सहिता दश धातवः स्युः।

रसधातुप०—अग्निसम्भवः, असृक्करः, आत्रेयः, आहारतेजः (स्), घनधातुः, महाधातुः, मूल धातुः, रसः, षड्रसासवः।

रक्तप०—असृक् (ज्), अश्रम्, अस्रम्, आग्नेयम्, आसुरम्, कीलांलम्, क्षतजम्, प्राणदम्, मांसकारि (इन्), रक्तम्, रसतेजः, (स्), रसभवम्, रुधिरम्, लोहितम्, वाशिष्ठम्, विस्रम्, शोणितम्, शोध्यम्।

मांसप०—आमिषम्, आरटम्, उद्घः, उद्घसम्, काश्पम्, कीनम्, क्रव्यम्, जङ्गलम्,

तरसम्, पलम्, पललम्, पिशितम्, मांसम्, मेदस्कृत् (द्), (न०), रक्ततेजः (स्), रक्तभवम्, लेपनम्। समारटम्।

मांसलताप०—आमिषलता, पेशी, पेश्यः (स्त्री०ब०), मांसलता।

मुख्यमांस (हृदय) प०—अग्रमांसम्, बुक्कः (त्रि०), बुक्का (अन्), सुरसम्, हृत् (द्), हृदयम्।

शुष्कमांसप०—उत्तप्तम्, वल्लुरम्, वल्लूरम्।

पूयप०—दूष्यम्, पूयम्, 'पीप' इति भाषा।

वसाप०—अस्थिकृत् (द्) (न०), गौतमम्, मांसजम्, मांसतेजः (स्), मेदः (स्) (न०), वपा, वसा। 'चर्वी' इति भाषा।

मस्तकस्नेहप०—गोदम् (पुं०न०), गोर्दम्, मस्तकस्नेहः, मस्तिष्कः, मस्तुलुङ्गकः। 'मगज' इति भाषा।

हड्डप०—अस्थि (न०), कर्करः, कीकसम्, कुल्यम्, देहधारकम्, भारद्वाजम्, मज्जकृत् (द्) (न०), मांसपित्तम्, मेदस्तेजः (स्), मेदोजम्, श्वदयितम्, सारः, हड्डम्। 'हड्डी' इति भाषा।

मस्तकहड्डप०—किरोटिः-टी (स्त्री०)। मस्तकहड्डम्।

वरुणप०—अपान्नाथः, अपांपत्तिः, अप्पतिः, अब्धिसद्मा (अन्), अम्बुकान्तारः, अम्बुवासः, अर्णवमन्दिरः, उद्दामः, कुण्डली (इन्) क्रव्यादः, जम्बुकः, जम्बूकः, जलकान्तारः, जलपतिः, जलभूषणः, जलाधिदैवतः, जलेश्वरः, जीवनावासः, दुन्दुभिः, दैत्यदेवः, नन्दपालः, परञ्जनः, परञ्जयः, पश्चिमदिशापतिः, पाशपाणिः, पाशी (इन्), प्रचेताः (स्), प्रतीचीशः, प्रत्यगाशापतिः, मकरवाहनः, मेघनादः, यादःपतिः, यादसान्नाथः, यादसाम्पतिः, यादोनाथः, रामः, वः, वरणः, वरुणः, वामः, वारिलोमः, वारीश्वरः, वार्य्याश्रयः, विलोमः, शीतलः, संवृतः सलिलेश्वरः, सुखाशः।

वरुणवाहनप०—आलास्यः, कुम्भी (इन्), कुम्भीरः, गोमुखः, जलसूकरः, तालुजिह्वः, नक्रः, मकरः, महामुखः, शकुमुखः, शंखमुखः। 'नाकू' 'मगर' इति च भाषा।

वरुणपत्नीप०—काहली, गौरी, तल्लिः-ल्ली।

वारुणपुरीप०—गन्धवती, वरुणपुरी, सुखा।

जलजन्तुप०—यादांसि (न०ब०) जलजन्तवः (पुं०ब०)।

जलप०—आपः (स्त्री०ब०), अम्बु, जलम्, तोयम्, पानीयम्, शेषस्तु विष्णौ।

समुद्रप०—अब्धिः जलधिः, वरुणगृहः, वरुणावासः, समुद्रः, सागरः, सिन्धुः, शेषस्तु विष्णौ।

नदीप०—अपगा, अब्धा, अर्णा, आपगा, इरावती, ऋषिकुल्या, कर्षूः, कुल्या, कूलङ्कषा, कूलवती, कृष्णा, गिरिजा, चञ्चला, चम्पिला, जम्बालिनी, जलधिगा, तटिनी, तरङ्गिणी, तलोदा, द्वीपवती, धुनिः-नी, धेना, नदी, निम्नगा, निर्झरिणी, निर्झिरिणी, पयस्विनी, पर्वतजा, पार्वती, माता (तृ), रुजाता, रोधवक्रा, रोधश्चक्रा, रोधस्वती, रोधोवक्त्रा, रोधोवक्रा, रोधोवती,

वहा, वाहिनी, शिफा, शैवलिनी, शैवालिनी, समुद्रकान्ता, समुद्रगा, समुद्रदयिता, समुद्रस्त्री, सरस्वती, सरित् (द्), सस्रुत् (द्), सागरगा, सागरगामिनी, सिन्धुः सुनीरा, स्रवन्ती, स्रोताः (अस्), स्रोतस्वती, स्रोतस्विनी, स्रोतोवहा, स्रोत्या, हिरण्यवर्णा, ह्रादनी, ह्रादिनी।

मत्स्यप०—अण्डजः, अनिमिषः, आत्माशी (इन्), कण्टकी (इन्), कण्ठकालः, कण्ठी (इन्), जलचरः, जलपिप्पकः, जलपिप्पिकः, जलेशयः, झषः, तिमिः, पाठीनः, पृथुरोमा (अन्), मच्छः, मत्सः, मत्स्यः माङ्गल्यदर्शनः, मीनः, मूकः, रोहितः, वल्कवान् (मतु०), विसारः, वैसारिणः, शंवरः, शकलिः, शकली (इन्), शकुनी (इन्), शकुली (इन्) शम्बरः, शल्की (इन्), शेवः, संघाचारी (इन्), स्थिरजिह्वः, स्वकुलक्षयः।

तदन्येऽपि पर्यायाः—अनिमेषः, अभ्ररसौकाः (अस्), घनरसचरः, तुरस्कः, नीरनिकेतः, पाठीरः, पुष्करागारः, प्रोष्ठी (इन्), वलाहकरसागारः, शक्ली (इन्), शफरः, शफरी (इन्)।

मदिराप०—अब्धिजा, इरा, कल्यम्, कश्यम्, कादम्बरी, कापिशम्, कापिशायनम्, गन्धोत्तमा, देवसृष्टा, परिप्लुता परिस्रुत् (द्), परिस्रुता, प्रसन्ना, मदता, मदिरा, मदिष्ठा, मद्यम्, मधु, माध्वीकम्, मार्द्वीकम्, वारुणी, शुण्डा, सुरा, स्वादुरसा, हलिप्रिया, हारहूरम्, हाला।

वायुपर्यायाः—अक्षतिः, अग्निसखः, अङ्क्तिः, अजिरः, अञ्चतिः, अनवस्थानः, अनिलः, अबलीरः, अहिकान्तः, आत्मा (अन्), आवकः, आशुगः, उत्तरपश्चिमदिक्कोणाधिपतिः, कः, कम्पलक्ष्मा (अन्), कम्पाकः, कर्त्ता (तृ), क्षिपणुः, क्षिपतिः, खगः, खश्वासः, गन्धवहः, गन्धवाहः—ही (इन्), चञ्चलः, चपलः, चलः, जगत्, जगत्प्राणः, जगद्बलः, जलकान्तारः, जवनः, जलदूषणः? जीवनः, तरस्वी (इन्), दैत्यदेवः, धारः, धारावलिः, धूननः, धूलिध्वजः, ध्वजप्रहरणः, नभःप्राणः, नभःश्वासः, नभःस्वरः, नभस्वान् (मतु०), नभोजातः, निःपावः, नित्यगतिः, निश्बासकः, पः, पञ्चलक्ष्मा (अन्), पवनः, पवमानः, पश्चिमोत्तरदिक्कोणपतिः, पृश्न्याकुलः, पृषताम्पतिः, पृषताश्वः, पृषदश्वः, प्रकम्पनः, प्रधावनः, प्रभञ्जनः, प्रवहः, प्राणः, फणिप्रियः, बलदेवः, भोगिकान्तः, मरुतः, मरुत् (द्), मर्कः, मलिम्लुचः, महाबलः, मातरिश्वा (अन्), मारुतः, मृगवाहनः, मेघकारकः, मेघारिः, मोटनः, यः युजिनः, लघुगः, लोलघण्टः, लोहघनः, वः, वहः, यातः, वातगुल्मः, वातिः, वातूलः, वायुः, वासः, वाहः, विः, विश्वप्साः (आकारान्तः), विहगः, वेगी (इन्), शीघ्रः, शीतलः, शुचिः, शुषिलः, शुष्मिः, श्वसनः, श्वसिनः, श्वसीनिः, श्वेतोदरः, संहर्षः, सदागतिः, समिरः, समीरः, समीरणः, सम्भृतः, सरः, सरयुः, सारः, सुखाशः, सुरालयः, सृदाकुः, सृमरः, स्तनूनः, स्पर्शः, स्पर्शनः, स्वकम्पनः, हरिः।

वायुपुरीप०—गन्धवती, वातपूः, वायुपुरी।

वायुवाहन–(मृग)प०—अजिनयोनि, कुरङ्गः, मृगः, वनायुः, वानायुः, शारङ्गः, सारङ्गः, हरिणः।

वायुपुत्रभेदौः—(१) भीमसेनः, (२) हनुमान् (मतु०), इत्येतौ वायोर्द्वौ पुत्रौ स्तः।

भीममातृप०—कुन्ती, पाण्डुपत्नी, पृथा।

हनुमन्मातृप०—अञ्जना, अञ्जनावती।

वायुभेदाः—(१) रूरूः, (२) भूभूः, (३) चण्डः, (४) प्रचण्डश्चेत्येते वायोश्चत्वारो भेदाः स्युः।

तदन्यभेदाः—(१) आवहः, (२) प्रवहः, (३) संवहः, (४) विवहः, (५) उद्वहः, (६) अतिवहः, (७) प्राणवहः इत्येते वायोः सप्त भेदाः स्युः।

मतान्तरे तद्भेदाः—(१) भूवायुः, (२) आवहः, (३) प्रवहः, (४) उद्वहः, (५) संवहः, (६) सुवहः, (७) परावहश्चेति।

'सिद्धान्तशिरोमणौ' तु—(१) आवाहः, (२) प्रवहः, (३) उद्वहः, (४) संवहः, (५) सुवहः, (६) परिवहः, (७) परावहश्चेति सप्त भेदाः स्युः। अथ शरीरस्थाः प्राणादयः पञ्चवायवस्तत्क्रियाश्च यथा—(१) प्राणः (हृदि) (अन्नप्रवेशनम्)। (२) अपानः (गुदे) (मूत्राद्युत्सर्गः)। (३) समानः (नाभिमण्डले) (अन्नादिपचनम्)। (४) उदानः (कण्ठदेशे) (भाषणादिः)। (५) व्यानः (सर्वशरीरगः) (निमेषादिः), इत्येते शरीरस्थवायोः पञ्चभेदास्तत्क्रियाश्च।

अथ तस्य कृकरादयः पञ्चभेदास्तत्क्रियाश्च यथा—(१) कृकरः (क्षुत्करः), (२) देवदत्तः (जृंम्भणकरः), (३) नागः (उद्गारकरः), (४) कूर्मः (उन्मीलननिमीलनकरः), (५) धनञ्जयः, (पोषणकरः), इत्येते तस्य कृकरादयः सक्रियाः पञ्च भेदाः स्युः।

वातसहतिप०—आःसङ्गिनी, वातगुल्मः, वातमण्डली, वातसंहतिः, वाताली, वातुलः, वातूलः, वात्या। भाषायां तु 'ववण्डर, 'बबूला, इति च लौकैरुक्तम्।

मृदुवातप०—चिञ्चिलिकः, मृदुवातः, लिट् (ह ्), लेढा (ढ्), सौरतः।

शिशिरर्तुजवायुपर्यायौ—पुटानिलः, शैशिरः।

वसन्तर्त्तुजवायुप०—अमलपालिकः, दाक्षिणात्यः, मलयानिलः, वासन्तः।

ग्रीष्मर्तुजवायुप०—गरवायुः, ग्रैष्मः, चरवायुः, चारवायुः निदाघजः, निदाघसमयानिलः।

वर्षर्त्तुजवायुप०—कङ्कावातः, झञ्झानिलः, झञ्झावातः, प्रावृषिजः, संक्रावातः, सवृष्टिकप्रावृड्भवानिलः।

शरदृतुजवायुप०—शरः, शारदः, सारणः।

हेमन्तर्त्तुजवायुप०—जारवायुः, हेमन्तः।

कुबेरपर्यायाः—अर्हदुपासकः, अलकाधिपः, अष्टदन्तः, इच्छावसुः, इलविलापुत्रः, ईशवयस्यः, ईशसखः, ईहावसुः, उत्तराशापतिः, एककुण्डलः, एकपिङ्गः, एलविलः, ऐडविडः, ऐडविलः ऐलः, ऐलविलः, किन्नरेशः, किन्नरेश्वरः, किम्पुरुषेश्वरः, किशाली (इन्), कुडः, कुतनुः, कुबेरः, कुशरीरः, कुहः, केकराक्षः, कैलासनाथः, कैलासौकाः (अस्), गुह्यकः, गुह्यकेशः, गुह्यकेश्वरः, त्रिपात् (द्), त्रिशिराः (अस्), त्र्यम्बकसखः, द्रुमः धनकेलिः, धनदः, धनाधिपः, धनाध्यक्षः, धनी (इन्), धनेश्वरः, नन्दीवृक्षः, नरवाहनः, निधानाध्यक्षः, निधानेशः, निधिनाथः, निधिपालः, निधीश्वरः, नृधर्मा (अन्), पद्मलाञ्छनः, पराविद्धः, पिशाचकी (इन्),

पुण्यजनेश्वरः पौलस्त्यः, प्रमोदितः, बकः, मनुष्यधर्मा (अन्), मन्दः, महासत्त्वः, मायुराट् (ज्), यक्षः, यक्षराजः, यक्षराट् (ज्), यक्षेश्वरः, रत्नकरः, रत्नगर्भः, रत्नहस्तः, राजराजः, रुद्रमखः, वक्रनेत्रः, वटवासी (इन्), वटाश्रयः, वसुः, वित्तेशः, बिलः, वैश्रवणः, शम्भुमित्रम्, श्रीकण्ठसखः, श्रीदः, श्रेष्ठः, सत्यसङ्गरः, सितोदरः, सुप्रसन्नः, सोमः, स्वेश्वरः हर्य्यक्षः।

अर्हत्पर्यायाः—अर्हन् (त्), जिनः, शेषस्तु देवे।

उपासकप०—आराधनाकरः, आराधनाकर्त्ता, उपासकः।

कुबेरपुरीप०—अलका, कुबेरपुरी, प्रभा, वसुप्रभा, वसुसारा, वसुस्थली, वस्वोकसारा, वस्वोकसारिका, वस्वौकसारा।

अधिपप०—अधिपः, नाथः, स्वामी शेषस्तु रवौ

अष्टप०—अष्ट (अन्) (त्रि०ब०)।

दन्तप०—दन्तः, दशनः, द्विजः, रदः, शेषस्त्वन्यत्र।

इच्छाप०—अभिलाषः, आशंसा आशा, इच्छा, ईप्सा, ईहः, ईहा, कांक्षा, कामः, कामना, गर्द्धः, तृट् (ष्), तृष्णा, धनाया, मनोगवी, मनोरथः, मनोराज्यम्, रुचिः, लिप्सा, लोभः, वशः, वाञ्छा, स्पृहा।

वसु (धन)प०—अर्थः, ऋक्णम्, ऋक्थम्, द्युम्नम्, द्रविणम्, द्रव्यम्, धनम्, पृक्थम्, रिक्थम्, राः (रै), वसु, विटपः, वित्तम्, विभवः, सारम्, स्वम्, स्वापतेयम्, हिरण्यम्।

घटिताघटितहेमरूप्यप०—अकुप्यम्, कोशम्, कोशः, कोषः, हिरण्यम्।

ताम्रादिकप०—कुप्यम्।

आहत (मुद्रित) कुप्य कुप्यप०—रूप्यम्।

निधिपर्यायाः—कुनाभिः, गूढकोशः, निधानम्, निधिः, रत्नकोशः, वर्णकविः, शेवधिः, सेवधिः।

निधिभेदाः—(१) पद्मः, (२) महापद्मः, (३) शंखः, (४) मकरः, (५) कच्छपः, (६) मुकुन्दः, (७) कुनन्दः, (८) नीलः, (९) खर्वः (चर्वाः) (अस्), इत्येते निधेर्नवभेदाः स्युः।

निक्षेपपर्यायाः—उपनिधिः, निक्षेपः, न्यस्तकः, न्यासः, स्थाप्यः 'धरोहर' इति भाषा।

कुत्सितप०—कु (अ०), कुत्सितम्।

बेर (शरीर) प०—अङ्गम्, कलेवरम्, कायः, तनुः बेरम्, शरीरम्, शेषस्तु गरुडे।

कुबेरपत्नीप०—ऋद्धिः, कुबेरपत्नी, धनददारा।

कुबेरमातृप०—इडविला, इलविला, कुबेराम्बा।

कुबेरपितृप०—कुबेरजनकः, पौलस्त्यः, विश्रवाः।

कुबेरभ्रातृप०—दशकण्ठः, मेघनादजनकः, रावणः।

कुबेरस्थानप०—कैलासः, रजताचलः, हराद्रिः, शेषस्तु शिवे।

कुबेरविमानप०—पुष्पम्, पुष्पकम्।

कुबेरसारथिप०—मायुराजः।

कुबेरोद्यानप०—चैत्ररथम्।

कुबेरपुत्रभेदौ—(१) नलकूवरः, (२) मणिग्रावः (माणिग्रीतः), इत्येतौ कुबेरस्य द्वौ पुत्रौ स्तः।

किन्नरप०—अश्वमुखः, किन्नरः, किम्पुरुषः, तुरङ्गवदनः, मयुः।

यक्षप०—खाषेयः, गुह्यकः, पुण्यजनः, यक्षः, राजा (अन्), वटवासी (इन्)।

गुह्यकप०—कुबेरनिधिरक्षकः, गुह्यकः, देवजनः, माणिचरिः।

तन्नामानि—जीमूतवाहनः, मणिभद्र इत्यादयः।

गन्धर्वपर्यायाः—गन्धर्वः, गातुः, गान्धर्वः, गीतमोदी (इन्), दिव्यगायनः, देवगायनः, सुरगायनः, स्वर्गगायकः, हरिणनर्त्तकः।

गन्धर्वभेदा—(१) चित्ररथः, (२) तुम्बुरुः, (३) वसुरुचिः, (४) विश्वावसुः, (५) वृषणश्वः, (६) हहाः, हाहाः, हाहाः (स्), (७) हाहाहूहूः, (८) हुहुः (हूहूः), इत्यादयो गन्धर्वाणां भेदाः स्युः।

कुबेरवाहन (मनुष्य) प०—नरः, मनुजः, मानवः, शेषस्तु देवे।

ईशानपर्यायाः—ईशः, ईशानः, ईशानकोणाधिपतिः, रुद्रः, शङ्करः, शिवः, शेषस्तु शिवे। अयमेकादशरुद्रान्तर्गतो रुद्रविशेषः।

ईशानपुरीप०—ईशपुरी, ईशानपुरी, यशोवती।

॥ इति बिहारप्रान्तसहरसामण्डलान्तर्गतदोरमाग्रामवास्तव्येन दैवज्ञचूडामणिश्रीसूर्यनारायणसूनुना डॉ० सुरकान्तझाख्येन ज्योतिर्विज्ञानशब्दकोषे दिक्पालसर्गः षोडशः ॥१६॥

अथ पुरसर्गः–१७

पुरपर्यायाः—अधिष्ठानम्, द्रंगः, नगरम्, नगरी, निगमः, निवेशनम्, पटभेदनम्, पट्टनम्, पट्टनी, पत्तनम्, पुटः पुटभेदनम्, पूः (र्) (स्त्री०), पुरम्, पुरिः, पुरी, स्थानम् (शहर इति भाषा)।

पण्यप०—क्रयविक्रयद्रव्यम्, क्रयविक्रयवस्तु।

पण्यभूप०—आरोहः, क्रयविक्रयस्थानम्, क्रयारोहः, ग्राममुखम्, जन्यम्, पण्यभूः, हट्टः, हट्टक्रयः, (खरीदने बेचने का स्थान इति भाषा)।

पण्यशालाप०—अट्टः, आपणः, निषद्या, पण्यविक्रयशाला, पण्यवीथिका, पण्यवीथी, पण्यशालम-ला, विपणिः-णी, संवासः, हट्टः, 'बाजार' 'दुकान' इति च भाषा।)

पन्यार्घप०—क्रयविक्रयद्रव्यार्घः, क्रयविक्रयवस्त्वर्घः।

वैश्यप०—आर्यः, ऊरव्यः, ऊरुजः, भूमिस्पृक् (श्), विट्, वैश्यः, वनियां इतिभाषा।

तद्वृत्तिभेदाः—(१) वाणिज्यम् (व्यापार), (२) पाशुपाल्यम् (जानवर पालना), (३) कर्षणम् (खेती), चेति वैश्यानां तिस्रो वृत्तयः स्युः।

आजीविकाप०—आजीवः, आजीविका, जीवनम्, जीविका, वार्ता, वृत्तिः, वेतनम्। 'रोजगार' इति भाषा।

वणिक्प०—आपणिकः, क्रयविक्रयकः, क्रयविक्रयकर्ता (तृ), क्रयविक्रयी (इन्), चङ्गणः, नागरः, निगमः, निर्मुटः, नैगमः, पणिः, पणी (इन्), पण्याजीवः, प्रापणिकः, वणिक् (ज्) वैदेशिकः, वैदेहः, वैदेहकः, व्यापारी (इन्), सार्थवाहः, 'वनियां' वनजारा व्यापारी इति च भाषा।

वणिग्गृहप०—पणिकः, वणिग्गृहम्, वनिये का घर इति भाषा।

वाणिज्यप०—क्रयविक्रयः, वणिज्या, वाणिज्यम्, सत्यानृतम्, वणज इति भाषा।

क्रयप०—क्रयः, क्रपुकः, क्रेणी (इन्), प्रक्रयः, भेटकः। खरीदना इति भाषा।

विक्रयप०—पणः, विक्रयः, विपणः। बेचना इति भाष।

क्रायकप०—क्रयकर्त्ता (तृ०), क्रयिकः, क्रयी (इन्), क्रायकः, क्रेता (तृ), मोल लेने वाला' खरीदने वाला इति च भाषा।

विक्रायकप—विक्रयकर्ता (तृ०) विक्रयिकः, विक्रयी (इन्), विक्रायकः, विक्रेता (तृ)। बेचने वाला इति भाषा।

क्रयाणकप०—क्रयाणकम्। खरीदी हुई वस्तु इति भाषा।

विक्रयाणकप—विक्रयाणकम्। बेचने के लिए रखी हुई वस्तु इति भाषा।

विक्रेयपर्यायाः—पणितव्यम्, पण्यम्, विक्रेयम्। बिकने की वस्तु इति भाषा।

मूल्यप०—अर्घः, अवक्रयः, भाटकः, मूल्यम्, वक्रयः, वस्नः, (पुं०न०), बिकने की वस्तुओं का मोल इति भाषा।

क्रेयप०—क्रेयम् (त्रि०), क्रेतव्यमात्रकम्। खरीदने योग्य वस्तु इति भाषा।

क्रय्यप०—क्रय्यम् (त्रि०) बेचने के लिए (प्रसारित) बाजार में फैलाई हुई वस्तु इति भाषा।

विनिमयप०—निमयः, निमेयः, नैमेयः, परावर्तः, परिदत्तम्, परि (री) दानम्, परि (री) वर्तः, परिवर्त्तनम्, परिवृत्तिः, परीवर्त्तः-नम्, प्रतिदानम्, प्रतिहारः, विनिमयः, विमयः, विमेयः, वैमेयः, व्यतिहारः, हेरा फेरी अदला-बदली इति च भाषा।

सत्यापनप०—सत्यङ्कारः, सत्याकृतिः, सत्यापनम्, वयाना साई इति च भाषा।

मूलधनप०—नीविः, नीवी, पण्यद्रव्यम्, परिपणः, भाण्डम्, मूलद्रव्यम्, मूलधनम्, वणिङ्मूलधनम्, पूंजी नूलधन इति च भाषा।

लाभप०—अधिकम्, फलम्, लाभः, लाभ नफा मुनाफा इति च भाषा।

निक्षेपप०—उपनिधिः, निक्षेपः, न्यासः, धरोहरि थाती इति च भाषा।

न्यासार्पणप०—तदर्पणम्, न्यासार्पणम्, प्रति (ती) दानम्, परि (री) दानम्। धरोहरि लौटाना इति भाषा।

महर्घप०—महर्घः। महंगा इति भाषा।

महर्घताप०—महर्घता, महर्घत्वम्। महंगाई इति भाषा।

महर्घ्यताप०—महर्घ्यता, अधिकन्यूनत्वम्।

महार्घप०—महार्घः (त्रि०), महामूल्यम्।

महार्घ्यप०—महार्घ्यः (त्रि०), मूल्यवान्, वेश कीमती इति भाषा।

समताप०—तुल्यता, समता, समत्वम्, समानता, सादृश्यम्, साम्यम्।

समर्घप०—समर्घः (त्रि०), सस्ता मंदा इति च भाषा।

समर्घताप०—समर्घता (स्त्री०), समर्घत्वम् (न०), सस्ताई मंदगी इति च भाषा।

ऋणप०—अपमित्यकम्, उद्धारः, ऋणम्, पर्य्युदञ्चनम्, उधार कर्ज लेना इति च भाषा।

वृद्ध्याजीवप०—कुसीदिकः, द्वैगुणिकः, वर्धुषिः, वर्धुषिकः, वार्धुषी (इन्), व्याजखोर इति भाषा।

कुसीदप०—अर्थप्रयोगः, कुशीदम्, कुषीदम्, कुसीदम्, वृद्धिजीवनम्, वृद्धिजीविका। व्याज का धन्धा ब्याज का व्यापार इति च भाषा।

वृद्धिप०—वृद्धिः (स्त्री०), कलान्तरम् (न०), सूदं लाभ ब्याज इति भाषा।

चयप०—उपचयः, ऋद्धिः, एधा, चयः, चितिः, वृद्धिः।

क्षतिप०—अपचयः, अपहरः, अपायः, क्षतिः, क्षयः, नाशः, विरतिः, हानिः।

बन्धकप०—अधिः (स्त्री०), अधिकः, प्रणयः, बन्धः, बन्धकः। गिरवी बन्धक इति च भाषा।

॥ इति बिहारप्रान्तसहरसामण्डलान्तर्गतदोरमाग्रामवास्तव्येन दैवज्ञचूडामणिश्रीसूर्यनारायणसूनुना डॉ० सुरकान्तझाख्येन ज्योतिर्विज्ञानशब्दकोषे पुरसर्गः सप्तदशः ॥१७॥

अथ प्रकीर्णसर्गः–१८

उक्तप०[१]—अभिहितः, आख्यातः, ईरितः, उक्तः, उच्चरितः, उच्चारितः, उदाहृतः, उदितः, उदीरितः, उद्दिष्टः, उपदिष्टः, कथितः, कलितः, कीर्तितः, ख्यातः, गदितः, जल्पितः, निगदितः, निरुक्तः, निर्दिष्टः, परिकीर्तितः, परिगदितः, परिजल्पितः, प्रकीर्तितः, प्रजल्पितः, प्रणिगदितः, प्रदिष्टः, प्रोक्तः, भणितः, भाषितः, लपितः, विनिर्दिष्टः, विहितः, संकीर्तितः, समीरितः, समुदाहृतः, समुदिरः, समुदीरितः, समुद्गीर्णः, संप्रोक्तः। एते त्रिलिङ्गाः स्युः।

कथनप०[२]—अभिधानम्, उच्चारणम्, कथनम्, कथा (स्त्री०), गदनम्, जल्पनम्, भणनम्, भाषणम्, लपनम्, वचनम्, वदनम्, वाचनम्। एते क्लीबलिङ्गाः स्युः।

वाच्यप०[३]—अभिधेयः, उच्चारणीयः, उच्चारितव्यः, उच्चार्य्यः, कथनीयः, कथितव्यः, कथ्यः, गदनीयः, गदितव्यः, गद्यः, जल्पनीयः, जल्पितव्यः, जल्प्यः, निर्दर्शनीयः, निर्देश्यः, निर्देष्टव्यः, भणनीयः, भणितव्यः, भण्यः, भाषणीयः, भाषितव्यः, भाष्यः, लपनीयः, लपितव्यः लप्यः, वक्तव्यः, वचनीयः, वदनीयः, वदितव्यः, वद्यः, वाच्यः, विनिर्देश्यः। एते त्रिलिङ्गाः स्युः।

वाचकप०[४]—अभिधायकः, वक्ता (तृ), वाचकः। एते त्रिलिङ्गाः।

उक्त्वावाचकाव्ययप०[५]—उक्त्वा, उच्चार्य्य, उदित्वा, कथयित्वा, जल्पित्वा, प्रकथ्य, प्रजल्प्य, प्रलप्य, भणित्वा, भाषयित्वा, लपित्वा, संलप्य, समुच्चार्य्य, समुदीर्य्य, सम्भण्य, सम्भाष्य। एतेऽव्ययाः।

उच्चार्य्यमाणप०[६]—उच्चार्य्यमाणः, कथमानः, जल्प्यमानः, निर्दिश्यमानः, भण्यमानः, भाष्यमाणः, लप्यमानः, वक्ष्यमाणः, एते त्रिलिङ्गाः।

अवतगतवाचकशब्दाः[७]—अवगतः, अवसितः, आलक्षित, ज्ञातः, परिगतः, परिज्ञातः,

---

(१) कहा, कहा हुआ (२) कहना (३) कहने योग्य (४) बोलने वाला (५) कह कर (६) उच्चारण किया जाने वाला, कहा जाने वाला (७) जाना, जाना हुआ।

प्रतिपन्नः, प्रतीतः, प्रमितः, बुद्धः, बुधितः, मतः, मनितः, विज्ञातः, विदितः, सितः, ए त्रिलिङ्गाः।

ज्ञातव्यवाचकप०[१]—अवगन्तव्यः, ज्ञातव्यः, ज्ञातुमर्हः, ज्ञातुंयोग्यः, ज्ञानकर्म, ज्ञानविषयम्, ज्ञेयः, प्रतिपाद्यम्, प्रत्येतव्यः[२], बोधनीयः, बोधयोग्यः, बोधितव्यः, बोद्धव्यः, बोध्यः, विज्ञातव्यः, विज्ञेयः, वेदनीयः, वेदितव्यः, वेदितुंयोग्यः, वेद्यः, संवेद्यः। एते त्रिलिङ्गाः।

ज्ञात्वाव्ययवाचकशब्दाः[३]—अवगम्य, ज्ञात्वा, प्रबोध्य, बुद्ध्वा, विज्ञाय। एतेऽव्ययाः।

ज्ञापितप०[४]—ज्ञापितः, प्रबोधितः, बोधितः, वेदितः, सूचितः (त्रि०)।

ज्ञापितव्यप[५]—ज्ञापनीयः, ज्ञापितव्यः, ज्ञाप्यः एते त्रि०।

स्मृतपर्यायाः[६]—कृतस्मरणम्, संस्मृतः, स्मृतः, स्मृतिविषयः।

स्मरणीयप०[७]—संस्मरणीयः, संस्मर्तव्यः, संस्मार्यः, स्मरणीयः, स्मर्तव्यः स्मार्यः। एते (त्रि०)।

स्मृत्वाव्ययप०[८]—संस्मृत्य, स्मृत्वा। एतावव्ययौ।

स्मृतिप०[९]—आध्यानम् (न०), चर्चा (स्त्री०), चिन्तनम् (न०), चिन्ता (स्त्री०), चिन्तिया (स्त्री०), ध्यानम् (न०), स्मरणम् (न०), स्मृतिः (स्त्री०)।

विचारप०[१०]—चर्चा (स्त्री०), चिन्तनम् (न०), ज्ञानम् (न०), विचारः, (पुं०), विचारणम् (न०), विचारणा (स्त्री), विचिन्तनम् (न०), वित्तिः (स्त्री), संख्या (स्त्री०)।

चिन्तितप०[११]—चिन्तितः, विचारितः, वित्तम्, विन्नम् (त्रि०)।

चिन्तनीयप०[१२]—चिन्तनीयः, चिन्तितव्यः, चिन्त्यः, निरूपणीयः, निरूपितव्यः, निरूप्यः, परिचिन्तनीयः, परिचिन्तितव्यः, परिचिन्त्यः, विचारणीयः, विचारितव्यः, विचार्य्यः, विभावनीयः, विभावितव्यः, विभाव्यः, सञ्चिन्तनीयः सञ्चिन्तितव्यः, सञ्चिन्त्यः (त्रि०)।

चिन्त्यमानप०[१३]—चिन्त्यमानः, निरुप्यमाणः, विचारर्य्यमाणः, विचिन्त्यमानः, विभाव्यमानः (त्रि०)।

चिन्तयित्वाव्ययप०[१४]—चिन्तयित्वा, परिचिन्त्य, प्रविचार्य्य, विचार्य्य, विचिन्त्य, सञ्चिन्त्य (अ०)।

कल्पितप[१५]**०**—कल्पितः, परिकल्पतः, प्रकल्पितः (त्रि०)।

कल्पनीयप०[१६]—कल्पनीयः, कल्पितव्यः, कल्प्यः, परिकल्पनीयः परिकल्पितव्यः,

---

(१) जानने योग्य (२) द्रव्यागरे पामरव्योमवासे प्रत्येतव्या नुः क्षतिर्द्रविणस्या इति ग्रन्थकारः। (३) जान कर। (४) सूचित, जनाया हुआ, बतलाया हुआ। (५) जो बतलाने के योग्य हो, समझाने योग्य (६) याद किया हुआ (७) स्मरण (याद) करने योग्य (८) याद कर (९) स्मरणशक्ति, याददाश्त। (१०) सोचना, विचारना, खयाल। (११) सोचा हुआ, विचारा हुआ (१२) सोचने योग्य (१३) विचाने योग्य। (१४) विचार कर, (१५) कल्पना किया हुआ। (१६) कल्पना करने योग्य।

परिकल्प्यः, प्रकल्पनीयः, प्रकल्पितव्यः, प्रकल्प्यः (त्रि०)।

ऊहप०[1]—अध्याहारः (पुं०), उन्नयनम् (न०), ऊहः (पुं०), ऊहनम् (न०), ऊहा (स्त्री०), तर्कः, (पु०), परामर्शः, (पुं०), वितर्कः (पु०), वितर्कणम् (न०), विमशनम् (न०)।

ऊहितप०[2]—ऊहितः, तर्कितः (त्रि०)।

ऊहनीयप०[3]—ऊहनीयः, ऊहितव्यः, ऊह्यः, तर्कणीयः, तर्कितव्यः, तर्क्यः, (त्रि०)।

तर्कयित्वाप०[4]—तर्कयित्वा, प्रोह्य, सन्तर्क्य, समुह्य (अ०)।

अपोहप०[5]—अपोहः (पुं०), तर्कनिराकरणम् (न०), वितर्काभावः (पुं०)।

गतप०[6]—अतीतः, इतः, गतः, प्रगतः, प्रयातः, यातः, विगतः, वीतः, व्यतीतः (त्रि०)।

[7]**गन्तव्यप०**—गन्तव्यः, गन्तुमर्हः गन्तुंयोग्यः, गमनीयः, गम्यः, गम्यमानः (त्रि०)।

[8]**गत्वाप०**—इत्वा, गत्वा यात्वा (अ०)।

[9]**गमनप०**—गमनम् (न०), प्रयाणम् (न०), यात्रा (स्त्री०)। शेषस्त्वन्यत्र।

दानप०[10]—अंहतिः (स्त्री०), अपवर्जनम् (न०), उत्सर्जनम् (न०), त्यागः (पुं०), ददनम् (न०), दानम्, निर्वपणम्, निर्वापणम्, प्रदेशनम्, प्रादेशनम्, वितरणम्, विश्राणनम्, विसर्जनम्, विहायिनम्, स्पर्शनम्। इह ददनत उत्तरे सर्वे क्लीबलिङ्गाः।

[11]**दत्तप०**—दत्तः, दिष्टः, प्रदत्तः, वितरितः (त्रि०)।

हेयप०—हेयः, पात्यः, हातव्यः, त्याज्यः, (त्रि०), (छोड़ने योग्य)।

[12]**दातव्यप०**—दातव्यः, दानः, दानीयः देयः, प्रदेयः, वितरणीयः, वितर्तव्यः वितर्य्यः (त्रि०)।

[13]**दत्वाव्ययप०**—दत्वा, वितर्य्य, संदाय (अ०)।

[14]**समाप्तप०**—अवसितः, वसितः, समापन्नः, समाप्तः समाप्तिङ्गतः, सितः (त्रि०)।

[15]**समाप्तिप०**—अवसानम् (न०), समापन्नम् (न०), समाप्तिः (स्त्री०), समाप्तिका (स्त्री०)।

[16]**समापनीयप०**—समापनीयः, समापितव्यः, समाप्यः (त्रि०)।

[17]**समापय्याव्ययप०**—समापय्य (अ०), समाप्तिं, प्रापय्येत्यर्थे।

[18]**प्रदर्शितप०**—दिष्टः, प्रदर्शितः प्रदिष्टः (त्रि०)।

[19]**उपोद्घातप०**—उदाहारः, उपक्रमः, उपोद्घातः (पुं०)।

---

(१) अनुमान, अटकल (२) अटकल किया हुआ अनुमान किया हुआ। (३) अनुमान के योग्य, अटकल के योग्य (४) अटकल कर, अनुमान करके।(५) तर्क को दूर करना। (६) गया, गया हआ। (७) जाने योग्य (८) जाकर। (९) जाना। (१०) देना। (११) दिया, दिया हुआ, बांटा हुआ। (१२) देने योग्य। (७-क) नवकदान (देवे) विशोधनाभ्याम् इ०जा०भ०। (७-ख) वर्तमानार्धके देया, न०ज०। देयाः। स्वशीध्रफलवत्स्फुटय्योः, इति। देयं तच्चरमरुणे विलिप्तकासु, इति च ग्र०ला०। देयं = यथागतं कार्यमित्यर्थः। (१३) देकर। (१४) समाप्त हुआ, पूरा हुआ। (१५) पूर्ति, सम्पूर्ण। (१६) समाप्ति के योग्य। (१७) समाप्त कर। (१८) दिखलाया हुआ। (१९) ग्रन्थ का आरम्भ या कार्यारम्भ।

[१]उदाहरणप०—उदाहरणम् (न०), उदाहृतिः (स्त्री)।

[२]नित्यप०—अजस्रम्, अनवरतम्, अनारतम्, अनिशम्, अविरतम्, आश्रान्तम्, असक्तम्, नित्यम्, संसक्तम्, सततम्, सन्ततम्, क्रियाविशेषणत्वे एषां क्लीबत्वम्। द्रव्यविशेषणत्वे वाच्य (त्रि०) लिङ्गत्वम्, ज्ञेयमिति।

[३]अतिशयप०—अतिमर्यादम्, अतिमात्रम्, अतिवेलम्, अतिशयः (पुं०), अत्यर्थम्, उत्कर्षः (पुं०) उद्गाढम्, एकान्तम्, गाढम्, तीव्रम्, दृढम्, नितान्तम्, निर्भरः (पु०) वाढम्, भरः (पुं), भृशम्।

अत्रविशेषः—

अतिमर्यादमित्यारभ्य भृशशब्दपर्यन्तं नपुंसकलिङ्गे यदुक्तं तत्तु असत्त्वे द्रव्यवृत्तित्वाभावे एव ज्ञेयम्। यथा—शीघ्रं जुहोति। शीघ्रं कृतवा न्। भृशं मूर्खः। भृशं याति। सततं भुंक्ते, इति।

क्रियाविशेषणत्वे एषां शीघ्रादीनां मध्ये यत्सत्त्वगा मि द्रव्यवृत्ति तत् त्रिषु। तस्य द्रव्यस्य यल्लिङ्गं तदेवास्येत्यर्थः। यथा—शीघ्रा धेनु, शीघ्रा जरा। शीघ्रो मृत्युः। शीघ्रो वृषः। शीघ्रं वयः, शीघ्रं गमनम्।

अतिशयोत्कर्षनिर्भरभराणां सत्त्वगमित्वं नास्ति। नित्यं पुंस्त्वम्।

४क्रमपर्यायाः—अनुक्रमः (पुं०), अनुपूर्विका (स्त्री०), आनुपूर्वी (स्त्री०), आनुपूर्व्यम् (न०), आनुवृत् (त्) (स्त्री०), आनुवृत्तिः (स्त्री०), क्रमः (पुं०), परिपाटिः—टी (स्त्री०), पर्यायः (पुं०)।

५उत्क्रमप०—अक्रमः, उत्क्रमः, क्रमविपर्ययः, व्यतिक्रमः, व्युत्क्रमः, एते पुंल्लिङ्गाः।

६अतिक्रमप०—अतिक्रमः, अतिपातः, उपात्ययः, पर्ययः।

व्यतिक्रमप०[७]—विपर्ययः (पुं०), विपर्यायः, (पुं०), विपर्यासः (पुं०), वैपरीत्यम् (न०), व्यतिक्रमः (पु०), व्यत्ययः (पु०), व्यत्यस्तः (त्रि०), व्यत्यासः (पुं०)।

विपरीतप०[८]—अपष्ठु, अपष्ठुरम्, अपसव्यम्, प्रतिकूलम्, प्रतिलोमम्, प्रतीपम्, प्रसव्यम्, वामम्, विलोमम्, एते क्लीबलिङ्गाः। व्यस्तः (त्रि०)।

शरीरस्य वामभागप०[९]—वामम्, सव्यम्।

शरीरस्य दक्षिणभागप०[१०]—अपसव्यम्, दक्षिणाङ्गम्।

प्रथमप०[११]—अग्रम्, आदिः, आदिमम्, आद्यम्, पूर्वः, पौरस्त्यम्, प्रथमम्, एते त्रिलिङ्गाः। प्राक (अ०)।

मध्यमप[१२]—मध्यम, मध्यन्दिनम्, मध्यमम्, मध्यमीयस्, मध्यन्दिनम्, माध्यमम्।

---

(१) गणित की क्रिया वा दृष्टान्त (मिशाल)। (२) नित्य, निरन्तर, सतत, सर्वदा। (३) अधिकता (बहुतायता। (४) यथाक्रम (सिल सला), (५) विपरीतभाव, नियमविरुद्धता। (६) विरुद्धव्यवहार, नियम वा मर्यादा उल्लंघन (७) विपर्यय, क्रमानुसार न होन वाला। (८) विरुद्ध (उलटा)। (९) वायां अंग, (१०) दाहिना अंग। (११) पहला, (१२) बीच।

[१]**अन्त्यप०**—अन्तः, अन्तिमम्, अन्त्यम्, चरमम्, जघन्यम्, पश्चिमम्, पाश्चात्यम्।

अन्तरालप०—अन्तरालम्, विचालम्, शेषस्त्वन्यत्र॥

अन्तरप०—अन्तरम्, मध्यम्, शेषस्त्वन्यत्र।

[२]**निरन्तरप०**—घनम्, निविडम्, निरन्तरम्, सान्द्रम्।

पंक्तिप०—आलिःली, आवलिःली, ततिः, धोरणी, पंक्तिः, माला, राजिः, लेखा, वीथी, श्रेणिः-णी।

संलग्नप०—अनन्तरम्, अपटान्तरम्, अपदान्तरम्, अव्यवहितम्, संलग्नम्, संसक्तम्।

अधीनप०—अधीनः, आयत्तः, गृह्यकः, नाथवान् (मतु०), निघ्नः, परच्छन्दः, परतंत्रः, परवशः, परवान् (मतु०), पराधीनः, परायत्तः, वशः। एते त्रिलिङ्गाः स्युः।

समीपप०—अन्तिकम्, अभितः (स्) (अ०), अभ्यग्रम्, अभ्यर्णम्, अभ्याशम्; अभ्यासः, आसन्नम्, उपकण्ठम्, उपान्तम्, निकटम्, पार्श्वम्, सदेशम्, सनीडम्, सन्निकर्षः, सन्निकृष्टम्, सन्निधानम्, सन्तिधिः, समर्यादम्, समीपम्, सविधम्, सवेशः, ससीमम्।

विरलप०—तनु, पेलवम्, विरलम्।

ह्रस्वप०—कुब्जम्, खर्वम्, नीचः, नीची, (स्त्री०), न्यक् (ञ्च्) (न०) चान्तः, मन्थरम्, लघु, ह्रस्वः।

उन्नतप०—उच्चम्, उच्छ्रितम्, उदग्रम्, उद्धुरम्, उन्नतः, तुङ्गः, प्राशुः।

दीर्घप०—आयतम्, दीर्घम्।

विस्तीर्णप०—उरु, गुरु, ततम्, पृथु, पृथुलम्, बहु, बृहत् (त्) (न०), महत् (त्) (न०), वड्रम्, वरिष्ठम्, विकटम्, विपुलम्, विशङ्कटम्, विशालम्, विस्तीर्णम्, स्फारम्।

स्थूलप०—पीनः, पीवा (अन्), स्त्रीपुंसयोस्तु पीवा, पीवरः, स्थूलः।

अधिकप०—अतिरिक्तः, अधिकः, पुष्टः, प्रपुष्टः, समधिकश्चैते त्रिलिङ्गाः स्युः।

अल्पप०—अल्पः, क्षुल्लम्, क्षुल्लकम्, स्तोकः।

अत्यल्पप०—अणीयः (अस), अल्पिष्ठः, अल्पीयः (अस्), कनीयः (अस्)।

सूक्ष्मप०—अणुः, कणः, कृशम्, क्षुद्रम्, तनुः, तलिनम्, तुच्छम्, त्रुटिःटी, दभ्रम् पेलवम्, मात्रा, लवः, लेशः, श्लक्ष्णम्, सूक्ष्मम्।

बहुलप०—अदभ्रम्, पुरहम्, पुरु, पुरुहम्, पुरुहूः पुरुह्वौ। ल्कीबे तु पुरुहु। पुष्कलम्, प्रचुरम्, प्रभूतम्, प्राज्यम्, बहुः, बहुलम्, भूयः (अस्), भूयिष्ठम्, भूरि, स्फारम्, स्फिरम्।

अनेकप०—अनेकः, उच्चवचम्, नैकः, नानाप्रकारम्, बहुः, नैकविधम्, बहुविधम्।

नाना रूपप०—नानारूपः, नानाविधः, पृथग्रूपः, पृथग्विधः, बहुरूपः, बहुविधः, विविधः। एते त्रिलिङ्गाः।

समान (तुल्य) प०—तुल्यः, सदृक् श्), सदृशः, सदक्षः, सधर्मा (अन्), सन्निभः,

---

(१) आखिर। (२) घना, अन्तर-रहित।

समः, समानः, सरूपः, सवर्णः, साधारणः, अमी वाच्यलिङ्गाः सन्ति।

उत्तरपदस्थसदृशप०—उपमा, कल्पः, निभः, नीकाशः, प्रकारः, प्रकाशः, प्रख्यः, प्रतिकाशः, प्रतिमः प्रतीकाशः, भूतः, रूपम्, सङ्काशश्चैते उपमादय उत्तरपदस्था वाच्यलिङ्गाः स्युः।

यथा—पितृनिभः पुत्रः नित्यसमासोऽयं पित्रा सदृश इत्यर्थः। मातृनिभा कन्या मातुः सदृशीत्यर्थः। पितृभूतः, पितृरूपः, पितृकल्पो वा पुत्रः। चन्द्रप्रख्यम् मुखम्। काशसङ्काशकेशाः इति।

तुलितप०—उन्मितम्, तुलितम्, तुल्यम्, परिमितम्, प्रमः, प्रमाणम्, प्रमितम्, समानम्, सम्मितम्।

दोषप०—दूषणम् (न०), दोषः (पुं०)।

दूषितप०—अभिशस्तः, क्षारितः, प्राप्तदोषः, वाच्यम् (त्रि०)।

दूष्यप०—दूषणीयः, दूषितव्यः, दूष्यः (त्रि०)।

दुष्टप०—दुष्टम्, दोषभाक् (ज्), दोषयुक्तः, दोषवान् (मतु०), दोषी (इन्) (त्रि०)।

त्याज्यप०—त्याज्यम्, परिवर्जनीयम्, परिवर्जितव्यम्, परिवर्ज्यम्, वर्जनीयम्, वर्जितव्यम्, वर्ज्यम्, विवर्जनीयम्, विवर्जितव्यम्, विवर्ज्यम्, (त्रि०)।

वर्जनप०—निषिद्धिः, निषेधः, निवर्त्तनम्, प्रतिषेधः, वर्जनम्।

वर्जितप०—निषिद्धम्, नेष्टम्, वर्जितम्, विवर्जितम्।

निन्दाप०—अपवादः, अवर्णः, उपक्रोशः, कुत्सा, क्षेपः, गर्हः, गहणम्, गर्हा, जुगुप्सनम्, गुप्सा, धिक्क्रिया, निन्दा, निर्वादः, परि (री) वादः।

निन्दितप०—गर्हितम्, धिक्कृतम्, निन्दायुक्तम्, निन्दितम् (त्रि०)।

निन्द्यप०—निन्दनीयः, निन्दितव्यः, निद्यः (त्रि०)।

अधमप०—अणकम्, अधमम्, अपकृष्टम्, अपशदम्, अर्वत् (द्), अवधम्, अवयम्, आणकः, कपूयः, काण्डम्, कुत्सितम्,कुपुयम्, खेटम्, गर्ह्यम्, चेलम्, निकृष्टम्, पापम्, प्रतिकृष्टम्, ब्रुवम्, याप्यम्, याव्यम्, रेपः, रेपः (अस्), रेफः।

मध्यवर्तिप—मध्यः, मध्यमः, मध्यवर्ति (इन्), समः, समानः एते त्रिलिङ्गाः।

गौणप०—अप्रधानम्, अप्राग्यम्, अमुख्यम्, उपसर्जनम्, उपाग्रम्, गुणम्। एते त्रिलिङ्गाः।

प्रधानप०—अग्रम्, अग्रणीः, अग्रिमम्, अग्रिमः, अग्रेसरम्, अग्र्यम्, अनवरार्थ्यर्ध्यम्, अनुत्तमम्, अनुत्तरम्, उत्तमम्, ग्रामणीः, जात्यम्, परम्, परार्थ्यः-र्ध्यम्, पुरोगम्, प्रकृष्टम्, प्रधानम्, प्रमुखम्, प्रवरम्, प्रवर्हम्, प्रवर्हणम्, प्रवेकम्, प्रष्ठम्, प्राग्रम्,प्राग्रहरम्, प्राग्र्यम्, मुख्यम्, युक्तम्, वरम्, वरेण्यम्, वर्य्यम्, श्रेष्ठम्, स्पर्ध्यम्, एते त्रिलिङ्गाः स्युः।

श्रेष्ठवाचकः प०—व्याघ्रः, पुङ्गवः, ऋषभः, कुञ्जरः सिंहः, शार्दूलः, नागः, आद्यशब्दात् -सोमः, चन्द्रः मुखम्, इत्यादयः। एते उत्तरपदे पुंसि श्रेष्ठार्थगोचराः, (वाचकाः)।

उदाहरणं यथा—

पुरुषब्याघ्रः, मक्रपुङ्गाः, पुरुषर्षभः, मनुष्यकुञ्जरः, नृपसिंहः नृपशार्दुलः नृपनागः, गोनागः

गोवृन्दारकः, नृसोमः, नरचन्द्रः, चन्द्रमुखः। इति।

तदुक्तम्—

स्युरुत्तरपदे व्याघ्र-पुङ्गव-र्षभ-कुञ्जराः सिंह-शार्दूल-नागाद्याः पुंसि श्रेष्ठार्थगोचराः (वाचकाः)। इत्यमरः।

प्रशस्तवाचकप०—मतल्लिका (स्त्री०) मचर्चिका (स्त्री०), प्रकाण्डम् (पुं०न०), उद्घः (पुं०) तल्लजः (पुं०)। इत्येतेऽजहल्लिङ्गाः स्युः। एते पञ्चनियतलिङ्गाः, अव्युत्पन्नाश्चेति प्राञ्चः।

अथवा नित्यमेते पञ्च द्रव्यवाचिनः स्युः। गोमतल्लिका, गोनागः, गोवृन्दारकः, गोतल्लजः, गोमचर्चिका, गोप्रकण्डम्, गवोद्घः, इति।

अन्यत्र तु-ब्राह्मणमतल्लिका, ब्राह्मणमचर्चिका, गोप्रकाण्डः, मनुष्योद्घः, कुमारीतल्लजः।

समासस्तु—प्रशस्तो ब्राह्मणो ब्राह्मंणमतल्लिका, प्रशस्तो ब्राह्मणो ब्राह्मणमचर्चिका, प्रशस्ता गौर्गोप्रकाण्डः, प्रशस्तो मनुष्यो मनुष्योद्घः, प्रशस्ता कुमारी, कुमारीतल्लजः। इति।

सुन्दरप०—अभिरामम्, कमनीयम्, कम्रम्, कान्तम् काम्यम्, चारु, चौक्षम्, न्युंखम्, पेशलम्, प्रियम्, बन्धुरम्, मञ्जु, मञ्जुलम्, मधुरम्, मनोज्ञम्, मनोरमम्, मनोहरम्, मनोहारि, रमणीयम्, रम्यम्, रुचिरम्, रुच्यम्, लडहम्, वल्गुवामम्, शोभनम्, साधु, सुन्दरम्, सुषमम्, सौम्यम्, हारि, हृद्यम् (त्रि०)।

प्रवीणप०—अभिज्ञः, कुशलः, कृतकर्मा (अन्), कृतकृत्यः, कृतमुखः, कृतहस्तः, कृतार्थः, कृती (इन्), कृष्टिः, क्षेत्रज्ञः, चतुरः, दक्षः, नदीष्णः, निपुणः, निष्णः, निष्णातः, पटुः, प्रकृष्टसारः, प्रवीणः, विज्ञः, विज्ञानिकः, वैज्ञानिकः, शिक्षितः (त्रि०)।

दक्षप०—उष्णः, चतुरः, दक्षः, पटुः, पेशलः, सूत्थानः (त्रि०)।

अतिचतुरप०—छइल्लः, छेकः, छेकालः, छेकिलः, विदग्धः (त्रि०)।

प्रतिभाशालिप०—प्रगल्भः, प्रतिभान्वितः, प्रतिमुखः, प्रौढः (त्रि०)।

दूरदर्शिप०—दीर्घदर्शी (इन्), दूरदर्शी (इन्), (त्रि०)।

तीक्ष्णबुद्धिमतप०—कुशाग्रीयमतिः, सूक्ष्मदर्शी (इन्) (त्रि०)।

प्रत्युत्पन्नमतिप०—तत्कालधीः, प्रत्युत्पन्नमतिः (त्रि०)।

पण्डितप०—(१) ज्ञः, वित् (द्), सन् (त्), (२) कविः, कृती (इन्), कृष्टिः, धीमान् (मतु०), धीरः, प्रज्ञः, प्राज्ञः, बुधः, विद्वान् (क्वसु), व्यक्तः, सुधीः, सूरिः, (३) कविता (तृ), कृतीन्द्रः, कोविदः, दोषज्ञः, पण्डितः, प्रबुद्धः, मतिमान् (मतु०), मनीषी (इन्), मेधावी (इन्), विपश्चित् (द्), विबुधः, संख्यावान् (मतु०), (४) अभिरूपः, कोविदोच्चः, दीर्घदर्शी (इन्), दूरदर्शी (इन्), धीरवर्य्यः, पण्डिताग्र्यः, प्राप्तरूपः, लब्धवर्णः, विचक्षणः, विशारदः, सुमतिमान् (मतु०), (५) बुधाग्रगण्यः। क्वचित्तु—(२) आद्यः, ऋषिः, ज्ञानी, (इन्), पूर्वः, महान् (मतु०), मुनिः, श्रेष्ठः, (३) अजड़ः, दिव्यदृक् (श्), पुराणः, प्राक्तनः,

प्राचीनः, बहुज्ञः, महर्षिः, महात्मा (अन्), विधिज्ञः, शास्त्रवित् (द्), श्रुतिवित् (द्), सज्जनः, सुमतिः, सुविद्वान् (क्वसु), (४) चिरन्तनः, ज्ञानदोहः, पुरातनः, भव्याशयः, महान्मुनिः, शास्त्रवेदी (इन्), श्रेष्ठमुनिः, सत्यवादी (इन्), (५) आचार्यमुखः, उदारचित्तः, धिषणालयः, पुराणदृष्टः, पुराणविज्ञः, प्रमाणपटुः, बुधाग्रगण्यः, महानुभावः, मुनिपुङ्गवः, मुनिप्रवर्य्यः, शास्त्रप्रवरः, शास्त्रप्रवीणः, पुराणविग्रहः, श्रुतधनजनः, (५) पूर्वमुनिप्रवर्य्यः, श्रुतवारपारगः, (६) वाचाविचारचतुरः, शास्त्रान्तरपारगम्यः (१२) विकसितधिषणाप्रभाभासुरः।

ज्योतिर्वित्प०—(२) ज्ञानी (इन्), (३) आदेशी (इन्), कालवित् (द्), क्षणदः, गणकः, गतिज्ञः, ग्रहज्ञः, ज्योतिर्वित् (द्), दैवज्ञः, दैववित् (द्), नैमित्तः, भार्गवः? मौहूर्तः, होरावित् (द्), हौरिकः, (४) ईक्षणिकः, कार्तान्तिकः, कालप्रियः, गणतिकः, जातकज्ञः, ज्यौतिषिकः, दैववेदी (इन्), निमित्तवित् (द्), नैमित्तिकः, फलितज्ञः, मौहूर्तिकः, विप्रश्निकः, साँव्वत्सरः, सांहितिकः, हौरिकेन्द्रः, (५) कालवित्तम, ग्रहग्रन्थिवित् (द्), दैवचिन्तकः, दैवज्ञवर्य्यः, प्रश्नार्थवादी (इन्), लग्नलग्नधीः, सुजातकवित् (द्), होरागमज्ञः, होराविधिज्ञः, (६) जातककोविदः, ज्यौतिषपण्डितः, द्रकवेधसत्यः, निखिल गमज्ञः, हौरिकाग्रगण्यः, (७) गणकमुनिवरः, प्राक्तनजातकज्ञः, (८) जातकागमदर्शनः, (९) फलितागमबोधवृद्धः, (१०) जातकार्णवनियामुख्यः, प्रवरमतियुतहौरिकः, (११) होरागमाज्ञानविराजमानः, होरापारावारपारंप्रयातः, होराविधानार्णवपारयातः, (१४) होरागमार्णवतरङ्गविहारदक्षः।

तत्त्वार्थज्ञातृप०—() तांत्रिकः, (४) सिद्धान्तज्ञः, सैद्धान्तिकः, (५) ज्ञातसिद्धान्तः, शास्त्रतत्त्वज्ञः।

शकुनशास्त्रप०—निमित्तशास्त्रम्।

[1]शकुलप०—निमित्तम् (न०), शकुनम् (न०)।

शकुनज्ञप०—शकुनज्ञः (त्रि०) शकुनवित् (द्), शकुनवेदी (इन्), शाकुनः, शाकुनिकः।

[2]प्रश्नप०—अनुयोगः, अनुयोजनम्, कथङ्कथिकता, पृच्छा, प्रश्नः।

[3]पृच्छकप०—कथङ्कथिकः, पृच्छकः, प्रश्नकर्त्ता (त्), प्रष्टा (ष्ट्), प्राश्निकः। एते त्रिलिङ्गाः।

[4]प्रश्नलग्नप०—पृच्छितनुः (स्त्री०) प्रश्नलग्नम् (न०)।

पृष्टप०—पृष्टः (त्रि०)।

[5]पृष्टव्यप०—पृच्छ्यम् (त्रि०), प्रष्टव्यः (त्रि०)।

गोचरप०—गोचरः, गोचारः, ग्रहगोचरः, ग्रहगोचारः।

गोचरफलप०—गोचरफलम्, गोचारफलम्, ग्रहगोचरफलम्, ग्रहगोचारफलम्।

---

(१) शुभाशुभलक्षण, शगुन, (२) पूछना, (३) पूछनेवाला, (४) पूछने के समय का लग्न, (५) (६) पूछाजाने योग्य।

यथा—जन्मराशेः सकाशाद् ग्रहाणां सञ्चारवशेन शुभाशुभफलं यत्तद् ग्रहगोचरफलं ज्ञातव्यमिति। जन्मचन्द्रधिष्ठितराशितस्तत्काले (वर्तमानसमये) रव्यादयो ग्रहा यस्मिन् यस्मिन् तन्वादिभावे वर्त्तन्ते तज्जन्यगोचरफलानि ते नराणां प्रयच्छन्तीत्यर्थः।

सामुद्रप०—देहलक्षणम्, शरीरचिह्नम्, सामुद्रम्, समुद्रोक्तशास्त्रम्।

सामुद्रिकप०—सामुद्रकः (त्रि०), सामुद्रिकः (त्रि०), स्त्रीपुंसयोश्चिह्नवेत्ता (तृ) (त्रि०)।

तदुक्तम्—

वेत्ता स्त्रीपुंसयोश्चिह्नं सामुद्रिक उदाहृतः। इति हारावल्याम्, ३९९/६१

फलप०—फलम् (न०), व्युष्टिः (स्त्री०), परिणामः (पुं०), प्रयोजन इति भाषा।

फलितप०—फलितः (त्रि०), सफलसञ्जातफलम्, ज्यौतिषशास्त्र का फलित (होरा) भाग। इति भाषा।

स्फुरणप०—स्पन्दः, स्पन्दनम्, स्फरणम्, स्फारणम्, स्फुरः, स्फुरणम्, स्फुरणा, स्फुरितम्, स्फुलनम्, स्फोरणम्, शरीर का फड़कना इति भाषा।

अस्य फलम्—

अङ्गस्य स्फुरण भवेच्छुभतरं पार्श्वे सदा दक्षिणे।
भागे वाम इहाप्रशस्तमुदितं स्त्रीणां विलोमं मतम्। इति ज्योतिस्तत्त्वे ४३/१३५९/४४

छिक्कापं०—क्षवः (पुं०), क्षुत् (स्त्री०), क्षुतम् (न०), छिक्का (स्त्री), 'छींक' इति भाषा। अस्य फलम्—

छिक्का कलिश्चेत्पुरतोऽथ मध्ये छिक्काऽऽमनोऽतीवभयं सदूर्ध्वम्।
स्वप्ने क्षणे भोजनदानपीठे वामाङ्गपृष्ठे शुभदाः क्षुतः षट्॥
इति ज्योतिस्तत्वे ४३/१३५/०२

स्वप्नप०—प्रसुप्तविज्ञानम् (जाग्रद्वासनामयः), स्वप्नः।

अस्य भेदाः—(१) दृष्टः, (२) श्रुतः, (३) अनुभूतः, (४) प्रार्थितः, (५) कल्पितः, (६) भावितः, (७) दोषजश्चेत्येते स्वप्नस्य सप्तभेदाः स्युः।

अस्यान्ये प्रभेदाः—

(१) स्पष्टस्मृतिः, (२) अस्पष्टस्मृतिः (३) अस्मृतिश्चेत्येतेऽन्ये त्रयः प्रभेदाः स्युः।

उपश्रुतिप०—आकशवाणी (स्त्री०), उपश्रुतिः (स्त्री०), चित्तोक्तिः (स्त्री०), देवप्रश्नः (पुं०), पुष्पशकटी (स्त्री०), आकाशवाणी इति भाषा।

तदुक्तम्—

अथ स्यात्पुष्पशकटी दैवप्रश्न उपश्रुतिः। इति कल्पद्रौ ९६/६७।
'चित्तोक्तिः पुष्पशकटी दैवप्रश्न उपश्रुतिः॥ इति त्रिकाण्डशेषः।

तज्ज्ञानप्रकारमाह पुरुषोत्तमदेवः—

नक्तं निर्गत्य यत्किञ्चिच्छुभाशुभकरं वचः।
श्रूयते तद्विदुर्धीरा दैवप्रश्नमुपश्रुतिम्॥ इति हारावल्याम् ३९८/२२

सांहितिकप०—संहिताशास्त्रज्ञः, संहिताशास्त्रवेत्ता (तृ), सांहितिकः।

ईतिप०—ईतिः (स्त्री०), कृषेः षट् (सप्तवा) प्रकारोपद्रवविशेषः। अजन्यम्, उत्पातः

(विप्लवः), कलहभेदः (नृपतिरहितयुद्धम्),डिम्बः, प्रवासः, इति।

कृषेः षट् प्रकारोपद्रवभेदाः—अतिवृष्टिः, (२) अनावृष्टिः, खण्डवृष्टिः, (३) शलभाः, (४) मूष (षि) काः, (५) शुकाः (खगाः), (६) अ (प्र) त्यासन्नाश्च राजानः, इत्येताः षट्ईतयः स्युः। अथवा स्वचक्रम्, (७) परचक्रम्, इत्येताः सप्त ईतयः स्युः।

उक्तं च—अतिवृष्टिरनावृष्टिः शलभा मूष (षि) का शुकाः (खगाः)।
अ (प्र) त्यासन्नाश्च राजानः षडेता ईतयः स्मृताः॥
अथवा—स्वचक्रं परचक्रं वा सप्तैता ईतयः स्मृता। इति पाठान्तरम्।

अजन्यप०—अजन्यम् (न०), १ उत्पातः, उपद्रवः, उपप्लवः, उपसर्गः, शुभाशुभसूचकमहाभूतविकारः। २ रोगप्रभेदः।

तदुक्तम्—विदुरजन्यमुत्पातम् इति हारावल्याम्। ४०६/२१०

उत्पातभेदाः—(१) दिव्योत्पातः, (२) आन्तरीक्ष्योत्पातः, (३) भौमोत्पातः। इत्युत्पातस्य त्रयो भेदाः स्युः। तत्र दिव्यो यथा—अपर्वणि चन्द्रादित्यग्रासः। आन्तरीक्ष्यो यथा—उल्कापातनिर्घातादिः। भौमो यथा—भूकम्पादिः।

उल्कापातपर्यायौ—उल्कापातः, अग्निशिखावत्तेजः पातः।

निर्घातप०—निर्घातः (पुं०), व्योममुद्गरः, (पुं०)।

तदुक्तम्—'निर्घातो व्योममुद्गरः।' इति हारावल्याम्। ४०६/२१ वाय्वभिहतवायुप्रपतनजन्यशब्दविशेषः। यथाऽऽहवराहः-पवनः पवनाभिहतो गगनादवनौ यदा समापतति।
भवति तदा निर्घातः स च पापो दीप्तविहगरुतः॥ इति श. चिं० २/१४०

भूकम्पप०—(पुं०) भूकम्पनम् (न०),भूचलः, (पुं०), भूचलनम् (न०), उत्पातविशेषः। भूचाल इति भाषा।

तदुक्तं शब्दार्थचिन्तामणौ-२-२४८

क्षितिकम्पमाहुरेके बृहदन्तर्जलनिवाससत्त्वकृतम्।
भूभारखिन्नदिग्गजविश्रामसमुद्भवं चान्ये।
अनिलोऽनिलेन निहतः क्षितौ पतन् स स्वनं करोत्यन्ये।
केचित्त्वदृष्टकारितमिदमन्ये प्राहुराचार्य्याः॥ इति॥

तत्रैवास्य फलमाह-वशिष्ठः—यामक्रमाच्च भूकम्पो द्विजादीनामनिष्टदः। अनिष्टदः, क्षितीशानां सन्ध्ययोरुभयोरपि॥ इति श०चिं० १-४४८।

दिग्दाहः—(पुं०) उत्पातविशेषः। यथाऽऽहास्य लक्षणं दिशां राजभयाय पीतो देशस्य नाशाय हुताशवर्णः। यश्चारुणः स्यादपसव्यवायुः स सस्यनाशं च करोति दृष्टः॥ योऽतीवदीप्त्या कुरुते प्रकाशं छायामभिव्यञ्जयतेऽर्कवद्यः। राज्ञो महद्वेदयते भयं स शस्त्र-प्रकोपं क्षतजानुरूपः॥ इति श०चिं० १-११९६।

केतुप०—केतुः (पुं०), शिखी (इन्) (पुं०), स चोत्पातरूपः। अत्र केतुरित्येकवचनं जात्यभिप्रायेण। इति।

॥ इति बिहारप्रान्तसहरसामण्डलान्तर्गतदोरमाग्रामवास्तव्येन दैवज्ञचूड़ामणिश्रीसूर्यनारायणसूनुना डॉ० सुरकान्तझाख्येन ज्योतिर्विज्ञानशब्दकोषे प्रकीर्णसर्गः अष्टादशः ॥१८॥

शब्दव्युत्पत्तिसर्गः–१९

तत्रादौ शब्दपर्यायानाचष्टे—

शब्दो व्योमगुणः स्वनिर्नरि रसो घोषो न ना गर्जना।
ध्रूणा क्ष्वेडविरावरावरवणा गानाभिधाने स्वनः।
कानं कूजित-कूजने च मशनं गर्जा द्वयो-र्गुञ्जनं।
निर्घोषो निनदः स्वरः कुहरितं निह्रादको निस्वनः।।१।।
संरावाऽऽरववाचकाश्च रणको ध्वानो भिधा मुञ्जनं
ह्रादो गञ्जनरेभणे क्वणतकं क्वाणः क्वणो निक्वणः।
निक्वाणोऽपि च कोरणं नरि कणि-ह्रासाभिलापा वपि
स्वानाऽऽरावकवा ध्वनिर्नरि तथा नादो निनादो रवः।।२।।

व्याख्या—शब्द इति। संरावेति च। शब्दः, व्योमगुणः, स्वनिः, रसः, घोषः, गर्जना, ध्रूणा, क्ष्वेडः, विरावः, रावः, रवणः, गानम्, अभिधानम्, स्वनः, कानम्, कूजितम्, कूजनम्, मशनम्, गर्जा, गुञ्जनम्, निर्घोषः, निनदः, स्वरः, कुहरितम्, निह्रादकः, निस्वनः, संरावः, आरवः, वाचकः, रणकः, ध्वानः, अभिधा, मुञ्जनम्, ह्रादः, गञ्जनम्, रेभणम्, क्वणनकम्, क्वाणः, क्वणः, निक्वणः, निक्वाणः, कोरणम्, कणिः, ह्रासः, अभिलापः, स्वानः, आरवः, कवः, ध्वनिः, नादः, निनादः, रवः। इति शब्दमात्रस्य द्विपञ्चाशन्नामानि स्युः। तत्र गर्जना स्त्रीक्लीबयोः। गर्जा स्त्रीपुंसयोः। स्वनिः, कणिः, ध्वनिश्च पुंसि। क्वणनम्, निःस्वनः, निःस्वानः निस्वनः, रणः, इत्यन्ये शब्दा अपि शब्दपर्यायेषु दृश्यन्ते।

अथेदानीं शब्दभेदान्व्याचष्टे—

'रूढश्च योगिको योगरूढाख्यः पारिभाषिकः।
एवं चतुर्विधाः शब्दास्त्रिविधा इति केचन।।३।।
रूढयौगिकमिरास्ते मण्डपाखण्डलौ मणिः।
व्युत्पत्तिवर्जिता रूढा अथो योगोऽन्वयश्च सः।।४।।
गुणात् क्रियायाः सम्बन्धात्सञ्जातोऽत्र ततो गुणात्।
श्यामाङ्गः पीतवासाश्च क्रियायाः कर्तृतुल्यकाः।।५।।

व्याख्या—रूढ इति। रूढेति। गुणादिति च। (१) रूढः, (२) यौगिकः, (३) योगरूढः, (४) पारिभाषिकश्च। एवं शब्दः प्रकारार्थः। चतुर्विधाः शब्दाः, भवेयुरिति शेषः। केचन शब्दवेदिनस्तु रूढः, यौगिकः मिश्रश्च ते त्रिविधा इत्याहुः। 'तत्र रूढाञ्च्छब्दान्व्याचष्टे प्रकृति प्रत्ययविभागेनान्वर्थवर्जिता व्युत्पत्तिरहिताः शब्दा रूढाः स्युः। मण्डप—आखण्डल-मणि-नूपुरादय इत्युदाहरणम्। यौगिकशब्दान्व्याचष्टे—शब्दानामन्योन्यमर्थानुगमनमन्वयः सयोगः। स च पुनः योगो गुणात्, क्रियायाः सम्बन्धाच्च भवति। गुणः श्यामपीतादिः। क्रिया करोत्यादिका। सम्बन्धो वक्ष्यमाणः सञ्जातो यस्य स तथा। गुणक्रियासम्भवयोगेन यौगिकानामुदाहरणम्—गुणतो गुणनिबन्धनो येषां योगस्ते शब्दाः श्यामाङ्गः, पीतवासाः इत्याद्याः। श्यामः अङ्गमस्य इति गुणप्राधान्याद् श्यामाङ्गः बुधः। पीतः वासोऽस्य इति गुणप्राधान्यात् पीतवासाः, बृहस्पतिः। एवं कौसुम्भवासाः सूर्यः इत्यन्येऽप्यूहनीयाः। संख्याऽपि गुण एव इति। एकदन्तः गणेशः।

तेन—एकदेहः बुधः। द्विरदः हस्ती। द्विरेफः भ्रमरः। त्रिलोचनः शिवः। त्रिशिराः असुर विशेषः। चतुर्मुखः ब्रह्मा। चतुर्बाहुः विष्णुः। पञ्चबाणः कामः। पञ्चार्चिः बुधः षडंघ्रिः भ्रमरः। षण्मुखः स्कन्दः। सप्तपर्णः सांतवण इति ख्यातो वृक्षः। सप्तार्चिः शनिः। सप्ताश्वः सूर्यः। अष्टमूतिः शिवः। अष्टश्रवाः ब्रह्मा। नवशक्तिः शिवः। नवार्चिः भौमः। दशकण्ठः रावणः। दशाश्वः चन्द्रः। एकादशद्वारं शरीराख्य पुरम्। द्वादशभुजः स्कन्दः। द्वादशार्चिः बृहस्पतिः। षोडशांघ्रिः कर्कटः। षोडशा र्चिः शुक्रः। विंशतिभुजः रावणः। शतक्रतुः इन्द्रः। शताङ्गुलिः, रावणः। दशाशतकरः सूर्यः। सहसनयन इन्द्रः। सहस्त्रबाहुः कार्तवीर्यः। सहस्त्रवदनः शेषः। सहस्तांशुः, सूर्य इत्यादि संगृहीतम्। क्रियायाः क्रियानिबन्धनो योगो येषां ते कर्तृप्रभृतयः। करोति इति करणप्राधान्यात्कर्त्ता ब्रह्मा एव धाता विधाता इत्यादयः।

अथ साम्प्रतं सम्बंन्धं व्याचष्टे—

निजेशत्वादिसम्बन्धो नामाहुस्तत्रतद्वताम्।
स्वान्नाथा-धीश-नेतार इन्द्रश्च नायकः प्रभुः॥६॥
स्वामी-शानो-ऽधिभू-पाल-पति-भर्तार ईशिता।
क्वचिदत्र धरो माली पाणिर्मत्वर्थपूर्वकाः॥७॥

व्याख्या—निजेति। स्वामीति च। निजम् आत्मीयम्, ईशः स्वामी यस्तत्र प्रभविष्णुः उत्पत्तिकाले सर्वस्य प्रभवनशील इत्यर्थः। तयोर्भावो निजेशत्वम्। तदादिसम्बन्धः। आदिशब्दात्कार्यकारणभावादि परिग्रहः। इति। तत्र निजेशभावसम्बन्धे नाथादयः शब्दाः निजात् (मूलशब्दात्) परे नियोजिताः तद्वतां ईशानां स्वामिनां नाम आहुः ब्रुवन्ति। मत्वर्थपूर्वका इति। मतुस्तद्धितः। तस्यार्थोऽस्त्यर्थविशिष्टप्रकृत्यर्थेन सह देवदत्तादेः सम्बन्धः। तदाधारो वा तदस्यास्त्यस्मिन्निति मतुः इति मतुप्रत्ययविधानात् मतोरर्थो यस्य स मत्वर्थकस्तद्धितो मतुना समानार्थ इत्यर्थः। स च इन्नणिकादिः। मत्वर्थाव्यभिचारान्मतुरपि। आदिशब्द दधिपादयोऽपि। नामाहुस्तत्र तद्वताम् इति उत्तरेष्वप्यनुवर्तनीयम्।

अत्र क्रमेणोदाहरणानि व्याचष्टे—

ग्रहनाथो ग्रहाधीशो ग्रहेन्द्रो ग्रहनायकः।
ग्रहप्रभुर्ग्रहस्वामी ग्रहेशानो ग्रहाधिभूः॥८॥
ग्रहपालो ग्रहपतिर्ग्रहभर्ता ग्रहेशिता।
अंशुमाली चांशुधरोह्यंशुपाणिस्तथांशुमान्॥९॥
इति रूढ्या कवीन्द्राणां स्मृतोदाहरणावली। इति।

व्याख्याः—ग्रहनाथ इति। ग्रहपाल इति। इतीति च। ग्रहनाथः, ग्रहाधीशः, ग्रहेन्द्रः ग्रहनायकः, ग्रहप्रभुः, ग्रहस्वामी (इन्), ग्रहेशानः, ग्रहाधिभूः, ग्रहपालः, ग्रहपतिः, ग्रहभर्ता (तृ), ग्रहेशिता (तृ), क्वचित्तु-अंशुमाली (इन्), अंशुधरः, अंशुपाणिः, अंशुमान् (मत्वन्तः), सूर्यः। इतिशब्दः प्रकारार्थः। तेन ग्रहाधिपादयोऽपि। कवीन्द्राणां कविश्रेष्ठानां रूढिः परम्परा तया न तु कविरूढ्यति क्रमेण। एष उदाहरणावली उदाहृतिः श्रेणी स्मृता ज्ञेया। इति।

अथातः परं रव्यादीनां यौगिकशब्दानाह—

क्रमेण यौगिकाञ्छब्दानिनादीनां प्रवच्म्यहम्।

व्याख्या—क्रमेणेति। क्रमेण क्रमतः इनादीनां सूर्यादीनां यौगिकान् शब्दान् योगजशब्दान् अहम् प्रवच्मि ब्रवीमि।

तत्राऽऽदौ रवेर्यौगिकशब्दानाह—

पति-र्जलजिनी-छाया-सञ्ज्ञा-वडवा-राज्ञीभ्यश्च ।
स्वामीगो-द्यु-ग्रहतो गोविन्दपदत-स्तिलक-
मणी कर्म-जगद्भ्यां साक्षी, चक्रवाका-ऽम्बुज-लोकेभ्यः।
बन्धुः प्रभायाः करो दिनात्स्वामी-कर-कृन्मणयश्च।
अम्बरतो ध्वज-मार्गगा वंश्व-ब्जाभ्यां हस्तो ध्वान्ताद् द्विट्।
तेजो-महोभ्यांराशि-निधी, सहस्र-तिग्मो-ष्णतो रश्मिः।
मतुबन्ताश्च विवस्वद्भानु-ज्योति-रर्चिषो, विज्ञेयाः।
जगतश्च नेत्रदीपौ, शनि-कर्ण-यम-सुग्रीवेभ्यश्च सूः॥१४॥
नामान्येतानि रवे-रिति।

व्याख्या— पतिरिति। अम्बरत इति। मतुबन्ता इति। नामानीति च। जलजिनी, छाया, सञ्ज्ञा, वडवा, राज्ञी, चैभ्यः शब्देभ्यः परतः पतिशब्दो नियोज्यस्तदा रविनामानि स्युः। यथा-जलजिनीपतिः, छायापतिः, सञ्ज्ञापतिः, वडवापतिः, राज्ञीपतिः। इति। गौः, द्युः, ग्रहश्चेभ्यः शब्देभ्यः परतः स्वामिशब्दो नियोज्यस्तदा रवेर्नामानि स्युः। यथा-गोस्वामी, द्युस्वामी, ग्रहस्वामी तदा तद्वत्। गोविन्दपदत आकाशशब्दादुत्तरे तिलक-मणीचेत्तदा तद्वत्। यथा-गोविन्दपदतिलकः, गोविन्दपदमणिः। इति। कर्मजगच्चाभ्यामुत्तरे साक्षिशब्दश्चेत्तदा तद्वत्। यथा-कर्मसाक्षी, जगत्साक्षी। इति। चक्रवाकः, अम्बुजम्, लोकश्चैभ्यः परतश्चेद्बन्धुशब्दस्तदा तद्वत् यथा-चक्रवाकबन्धुः, अम्बुजबन्धुः, लोकबन्धुः, इति। प्रभाया उत्तरे यदि करशब्दस्तदा तद्वत्। यथा-प्रभाकरः, इति। दिनात्परतः स्वामी, करः, कृत्, मणि-श्चैते शब्दाः स्युस्तदा तद्वत्। यथा-दिनस्वामी, दिनकरः, दिनकृत्, दिनमणिः, इति। अम्बरत उत्तरे यदा ध्वज-मार्गगशब्दौ स्यातां तदा तद्वत्। यथा अम्बरध्वजः, अम्बरमार्गगः। इति। अंशुः, अब्जं, चाभ्यामुत्तरे यदा हस्तस्तदा तद्वत्। यथा-अंशुहस्तः, अब्जहस्तः। इति। ध्वान्तादुत्तरे यदा द्विट् तदा तद्वत्। ध्वान्तद्विट्। इति। तेजः, महश्चाभ्यामुत्तरे यदा राशिनिधिशब्दौ स्यातां तदा तद्वत्। यथा-तेजोराशिः, तेजोनिधिः, महोराशिः, महोनिधिः, इति। सहस्रम्, तिग्मम्, उष्णं चैभ्यः परतो यदा रश्मिशब्दस्तदा तद्वत्। यथा-सहस्ररश्मिः, तिग्मरश्मिः, उष्णरश्मिः। इति। विवस्वद्, भानुः, ज्योतिः, अर्चिश्चैते शब्दा यदा मतुप्प्रत्ययान्तास्तदा तद्वत्। यथा-विवस्वान्, भानुमान्, ज्योतिष्मान्, अर्चिष्मान्। इति। जगत उत्तरे यदि नेत्रदीपौ शब्दौ स्यातां तदा तद्वत्। यथा जगन्नेत्रः, जगद्दीपः, इति। शनिः, कर्णः, यमः, सुग्रीवः, श्चैभ्य उत्तरे यदि सूशब्दस्तदा तद्वत्। यथा-शनिसूः, कर्णसूः, यमसूः, सुग्रीवसूः। इत्येतानि खेर्नामानि स्युः।

अथ सम्प्रति चन्द्रस्य यौगिकशब्दानाह—

............अथ विधोर्हिम-सित-सुधाभ्यो दीप्तिः।
पीयूषत्सूःश्चाङ्गं हरिण-शश-च्छायाभ्योऽङ्कधरभृतः॥१५॥

राका-रात्रि-कौमुदी-तारा-कुमुदिनी-रोहिणी-भेभ्य:।
द्विजौषधीभ्यां पतिस्तथा दाक्षायणी-दक्षजाभ्यां च।
शर्व्वर्य्या रत्नकरौ मतुब्धरान्ता कलाऽनुजो लक्ष्म्या:।
अत्रिनयनतो जननं कुमुदाद्वन्धुरब्धेस्तनय:। इति।

व्याख्या—अथेति—राकेति। शर्वर्य्या इति च। अथ शब्द आनन्तर्य्यार्थे। हिमम्, सितम्, सुधा, चैभ्य: शब्देभ्य: परतो दीप्तिशब्दश्चेत्तदा चन्द्रमसो नामानि स्यु:। यथा-हिम-दीप्ति:, सितदीप्ति:, सुधादीप्ति:। इति। पीयूषात् परत: सू:, अङ्गं, चैतौ शब्दौ स्यातां तदा तद्वत्। यथा-पीयूषसू:, पीयूषाङ्ग:। इति। हरिण:, शश:, छाया चैभ्य: परत: अङ्कं, धर:, भृच्चैते शब्दास्स्युस्तदा तद्वत्। यथा-हरिणाङ्क:, हरिणधर:, हरिणभृत्। शशाङ्क:, शशधर:, शशभृत्। छायाङ्क:, छायाधर:, छायाभृत्। इति। राका, रात्रि:, कौमुदी, तारा, कुमुदिनी, रोहिणी, भम्, द्विज:, ओषधी, दाक्षायणी, दक्षजा, चैभ्य: परतो यदि पतिशब्दस्तदा तद्वत्। यथा-राकापति:, रात्रिपति:, कौमुदीपति:, तारापति:, कुमुदिनीपति:, रोहिणी भपति:, द्विजपति:, ओषधीपति:, दाक्षायणीपति:, दक्षजापति:। इति। शर्वर्य्या उत्तरे यदि रत्नं करश्च यदि तदा तद्वत्। यथा-शर्वरीरत्नम्, शर्वरीकर:। इति यदि कलाशब्दो मतुब्धरान्तस्तदा तद्वत्। यथा-कलावान्, कलाधर:। इति लक्ष्म्या उत्तरे यद्यनुजस्तदा तद्वत्। यथा-लक्ष्म्यनुज:। इति। अत्रि: सप्तर्षिविशेष:, तस्य नयनतो नेत्राद् उत्तरे यदि जननं तदा तद्वत्। यथा-अत्रिनेत्रेजनन:। इति। कुमुदादुत्तरे यदा बन्धुस्तदा तद्वत्। यथा-कुमुदबन्धु:। इति अब्धेरुत्तरे यदि तनयस्तदा तद्वत्। यथा-अब्धितनय:। इति।

अथाधुना भौमस्य यौगिकशब्दानाह—

'अथ नामानि भौमस्य लोहित-रुधिरत: कराङ्गे परत:।
तथा क्रूरादिलोचन-माषाढाया भू: क्षितेस्तनयश्च॥१८॥ भूनाम्नोडणादयो, इति।

व्याख्या—अथेति। भूनाम्न इति च। लोहितम्, रुधिरं चाभ्यां परतश्चेत्कर:, अङ्ग:, च स्यातां तदा भौमस्य नामानि स्यु:। यथा-लोहितकर:, लोहिताङ्ग:। रुधिकर:, रुधिराङ्ग:। इति। क्रूरादुत्तरे यदि विलोचनं तदा तद्वत्। यथा-क्रूरविलोचन:। इति। आषाढाया उत्तरे यदा भूस्तदा तद्वत्। यथा-आषाढाभू:। इति। क्षितेरुत्तरे यदा तनयस्तदा तद्वत्। यथा-क्षितितनय:। इति। भू:पृथ्वी तस्या नाम आख्या तस्या: परतो यदि अणादय: प्रत्यया: स्युस्तदातेऽपि भौमनामानि स्यु:। यथा-भौम:, आवनेय:,माहेय:, ऐलेय:, आचलेय:, क्षैत: इति।

अथ साम्प्रतं बुधस्य यौगिकशब्दानाह—

..........ऽथ नामानि विद: श्यामलादङ्गं च।
अणाद्याश्चन्द्रनाम्नस्तथा रोहिणी-ताराभ्यां च॥१९॥
श्रविष्ठाया भवोऽब्जात्तनयो, इति।

व्याख्या—अथेति। श्रविष्ठाया इति च। श्यामलादुत्तरेऽङ्गं चेत्तदाविदो नाम स्यात्। यथा —श्यामलाङ्ग:। चन्द्रनाम्नचन्द्राख्याया: तथा रोहिण्या: ताराश्याश्च परतो यद्यणाद्या:

प्रत्ययाः स्युस्तदा विदो बुधस्य नामानि भवन्ति। यथा-चान्द्रिः, शाशाङ्किः, ऐन्दवः, वैधवः, चान्द्रमसायनः, चान्द्रमसायनिः, रौहिणेयः, तारकेयः, तारेयः। इति। श्रविष्ठाया उत्तरे यदि भवस्तदा तद्वत्। यथा-श्रविष्ठाभवः। इति। एवं अब्जादुत्तरे तनयस्तदा बुधस्य नाम। यथा—अब्जतनयः। इति।

अथ सम्प्रति बृहस्पतेर्यौगिकनामान्याह—

…………………ऽथ वागीश्वरस्य नामानि।
उतथ्यादनुजो, भवः, फाल्गुन्या, अङ्गिरसस्तथाण्॥२०॥

व्याख्या—अथेति उतथ्यो बृहस्पतेर्ज्येष्ठभ्राता तस्मादुत्तरे यद्यनुजशब्दस्तदा वागीश्वरस्य बृहस्पतेर्नाम स्यात्, यथा-उतथ्यानुजः। इति। फाल्गुन्याः परतो यदा भवशब्दस्तदा तद्वत्। यथा-फाल्गुनीभवः। इति। अङ्गिराः सप्तर्षिविशेषस्तन्नामत उत्तरे यद्यण् प्रत्ययः स्यात्तदा तद्वत्। यथा—आङ्गिरसः। इति।

अथेदानीं वक्ष्यमाणोत्तरपदेषु बृहस्पतिशुक्रयोर्यौगिकनामान्याह—

अदिति-दितिजाभ्यां परे, याजको-पाध्याय-पूजित-पूज्याः।
ऋत्विगा-चार्य्यो-पनी-दयित-प्रिय-सुहृ-दीड्य-नुतानि ॥
पुरोहित-सौवस्तिकौ महिता-र्चित-गुरु-व्रन्द्य-नमस्ये-ज्याः।
राजवन्दितपदोऽर्चितपद-मंत्रिणौ, झ-भयोः क्रमान्नाम॥

